**येभ्यः श्रीजैनधर्मस्य, महोदयमयी प्रभा । पूज्या नन्दन्तु ते श्रीम–दुदयप्रभसूरयः ॥ ८ ॥**

**'ते पूज्या श्रीमदुदयप्रभसूरयः नन्दन्तु'** जयन्तु । **'येभ्यः श्रीजैनधर्मस्य' 'महोदयमयी'** परमानन्दपूर्णा मोक्षमार्गप्रकाशिनी **'प्रभा'** कान्तिः प्रसूता ॥ ८ ॥

**दक्षिणावर्त्तशंखश्रीर्दानधर्मः सुशब्दभूः । हेतुरक्षीणलक्ष्मीणां, भवाम्भोधौ सुदुर्लभः ॥ ९ ॥**

**हेलया कलयामास, करं यस्याच्युतश्रियः । श्रीशालिभद्रं श्रीशालि-भद्रं तं कथया प्रथे ॥ १० ॥**

**'भवाम्भोधौ'** संसारसागरे । शंखपक्षे–भववत् महादेववत् रुद्रे भीमे सागरे । **'सुदुर्लभः'** अतिदुष्प्रापः, दक्षिणावर्त्तशंखवत् दानधर्मोऽपि सुदुर्लभः । **'अक्षीणलक्ष्मीणाम्'** अक्षयश्रीणाम् । पक्षे–अनश्वरलक्ष्मीणां **'हेतुः'** कारणम् । दक्षिणावर्तशङ्खे निधिस्थिते वर्धते हि लक्ष्मीः ।

**'सुशब्दभूः'** शोभनः शब्दः-कीर्तिः तस्य भूः-उत्पत्तिस्थानम् । दानेन हि कीर्तिः जायते । यदुक्तम्-'यत्नानुसारिणी विद्या, लक्ष्मीः पुण्यानुसारिणी । दानानुसारिणी कीर्तिः बुद्धिः कर्मानुसारिणी ॥ पक्षे-सुशब्दः शङ्खनादः तस्य भूः उत्पत्तिस्थानम्। **'दक्षिणावर्त्तशंखश्रीः'** दक्षिणावर्त्तशंखस्य श्रीः इव श्रीः यस्य सः **'दानधर्मः'** ॥ ९ ॥

**'यस्य अच्युतश्रियः'** अच्युता अभ्रष्टा श्रीः दानजन्या लक्ष्मीः यस्य स अच्युतश्रीः तस्य शालिभद्रपूर्वभवजीव-सङ्गमस्य। शङ्खपक्षे-अच्युता अभ्रष्टा श्रीः लक्ष्मीः यस्य तस्य विष्णोः ।

**'श्रीशालिभद्रं'** श्रीशालिभिः कलमौदनैः-शालिनिर्मित-पायसेनेति भावः भद्रं-मंगलं भद्रकरमित्यर्थः यस्य तम् । विष्णुपक्षे-श्रिया लक्ष्म्या शोभया वा शालते शोभते इत्येवंशीलं भद्रकरं च । **'करं'** हस्तम् । **'हेलया'** लीलया । **'कलयामास'** भूषितवान् । भवति हि विष्णुहस्ते दक्षिणावर्तः पाञ्चजन्यनामा शङ्खः । **'तं'** श्रीशालिभद्रम् । **'कथया'** चरित्रेण । **'प्रथे'** प्रसिद्धं करोमि ॥ १० ॥

**तावदाबालगोपाल-महेलं प्रथिता कथा । श्रीरामस्येव सौभाग्यं, श्रीशालेः किञ्चिदुच्यते ॥ ११ ॥**

**'तावद्' 'आबालगोपालमहेलं'** आशिशुगोपाङ्गनम् । **'श्रीरामस्य' 'इव'** यस्य **'कथा' 'प्रथिता'** प्रसिद्धा । तस्य **'श्रीशालेः'** शालिभद्रस्य **'सौभाग्यं' 'किञ्चिद्' 'उच्यते'** कथ्यते । श्रीशालेः पूर्णसौभाग्यकथने मादृशां क्व शक्तिः ? ॥ ११ ॥

**धनधान्यैरगाधश्रीः, सम्बाधः साधुगोधनैः । देशोऽस्ति मगधो नाम, नगधोरणिबन्धुरः ॥ १२ ॥**

**'धनधान्यैः'** द्रव्यान्नैः । **'अगाधश्रीः'** अगाधा-अस्थागा श्रीः-लक्ष्मीः यस्य सः । **'साधुगोधनैः'** साधुभिः-सज्जनैः

गोधनैः-वाग्धनैश्च पंडितैरित्यर्थः । शोभनगोवृन्दैश्च । **'सम्बाधः'** सङ्कुलः । **'नगधोरणिबन्धुरः'** न गच्छतीति नगः पर्वतः वृक्षश्च तेषां धोरण्या-श्रेण्या बन्धुरः-मनोहरः **'मगधो नाम देशोऽस्ति'** ॥ १२ ॥

**आसीदिह महाशालि-पालिशालितसीमभूः । 'शालिग्राम' इति ग्राम-ग्रामणी रामणीयकात् ॥ १३ ॥**

**'इह'** मगधदेशे **'रामणीयकात्'** रमणीयत्वप्रधानत्वात् । **'ग्रामग्रामणीः'** ग्राममुख्यः । **'शालिग्राम' 'इति'** नाम्ना **'आसीत्'** कथम्भूतः ? **'महाशालिपालिशालितसीमभूः'** महान्तः-मनोहरा इत्यर्थः शालयः उत्तमतन्दुलाः येषु तानि उपलक्षणतः क्षेत्राणि तेषां पालिभिः (भाषायां 'पाल') शालिता-शोभिता सीमभूः-प्रान्तक्षितिः यस्य सः ॥ १३ ॥

**'दुग्धध्वनि-धनालोक-पयस्यामोद-भोजनैः । बालोर्णाकम्बल-स्पर्शै-र्यत्र वैषयिकं सुखम् ॥ १४ ॥**

**'दुग्धध्वनि धनालोक पयस्यामोद भोजनैः'** दुग्धध्वनिः-गोदोहनकाले जायते हि ध्वनिः, धनालोकः गोवृन्ददर्शनं 'गोकुलं गोधनं धनम्' इति हैमनाममालायाम् । पयस्यामोदः-परमान्नसुगन्धः भोजनैः भोज्यैः । **'बालोर्णाकम्बलस्पर्शैः'** 'बालमेण्ढकोर्णानिर्मितकम्बलस्पर्शनैः श्रोत्र-नेत्र-घ्राण-रसन-स्पर्शन-क्रमेण पञ्चप्रकारम् । 'वैषयिकं' इन्द्रियविषय-जन्यं देशजं च । 'विषयस्तूपवर्तनम् । देशो जनपदो नीवृत्' इति हैम्याम् । **'सुखं'** शर्म । **'यत्र'** शालिग्रामे अभवत् ॥ १४ ॥

**पानीयच्छायालङ्कारी, बहुधान्योपकारकः । ऋजुनिष्पङ्कमार्गश्रीः, स ग्रामः सज्जनायते ॥ १५ ॥**

**'सः'** शालिग्रामः **'सज्जनायते'** सज्जन इव आचरति । कथम् ? **'पानीयच्छायाऽलङ्कारी'** सरस्यादीनां पानीये-जले नगरस्य या छाया-प्रतिबिम्बं सैव अलङ्काराः भूषणानि तद्वान् । सज्जनपक्षे-पानीयवत् स्वच्छा छाया-कान्तिः येषां ते तद्वान् । सज्जनो हि महत्त्वशोभार्थमलङ्कारान् धारयति । **'बहुधान्योपकारकः'** बहुधान्यादिभिः उपकारकः । पक्षे-'बहुधा'

बहुप्रकारेण अन्यस्य उपकारकः । परोपकारपरा हि सज्जनाः । यदुक्तम्-''पिबन्ति नद्यः स्वयमेव नाम्भः, स्वयं न खादन्ति फलानि वृक्षाः । नादन्ति सस्यं खलु वारिवाहाः, परोपकाराय सतां विभूतयः ॥ १ ॥ '**ऋजुनिष्पङ्कमार्गश्रीः**' 'सरल-पङ्कहीनमार्गश्रीः' सरला-अवक्रा पङ्कहीना-कर्दमरहिता मार्गश्रीः-मार्गशोभा यस्मिन् सः । पक्षे-सरला-अकुटिला पङ्कहीना-पापरहिता मार्गश्रीः-जीवनपथशोभा यस्य सः ॥ १५ ॥

**धन्या-वर्णनम्–**

**धनुर्वल्लिरिवोच्छिन्न-वंशाऽपि गुणसंगता । प्रतिपच्चन्द्रलेखेव, निष्कलङ्का कृशाऽपि या ॥ १६ ॥**

**कदलीवदसाराऽपि, प्राञ्जला शीतला मृदुः । निराधाराऽपि हि सदा-चारा तारावलीव या ॥ १७ ॥**

**सर्वत्राहितसौजन्या, तत्र मान्या निजैर्गुणैः । अभूदभिधया धन्या, नारी नारीणवैभवा ॥ १८ ॥**

'**तत्र**' शालिग्रामे '**अभिधया**' नाम्ना '**धन्या**' '**नारी**' स्त्री **अभूत्** । कथम्भूता सा ? या **उच्छिन्नवंशा**-उच्छिन्नः वंशः कुलपरंपरा यस्याः सा । धनुःपक्षे-उच्छिन्नः वंशः-वेणुः यस्याः सा । '**अपि**' तथापि । '**धर्नुवल्लिरिव**' धनुर्यष्टिरिव '**गुणसंगता**' गुणैः संगता । पक्षे-प्रत्यञ्चा-युता । '**प्रतिपच्चन्द्रलेखा इव**' शुक्लपक्षप्रथमतिथिशशिरेखा इव '**कृशाऽपि**' दुर्बलाऽपि '**या**' धन्या '**कलङ्करहिता**' चौर्यादिकलंकहीना । चन्द्रपक्षे-मृगरूपश्यामकलंकेन रहिता । नहि भवति प्रतिपच्चन्द्रे कलंकः ॥ १६ ॥ '**कदलीवत्**' मोचातरुवत्, '**असाराऽपि**' धनरूपसाररहिताऽपि, पक्षे-बलरहिता, भवति हि कदलीस्तम्भः असारः । '**प्राञ्जला**' अकुटिला सरला, कदलीवृक्षोऽपि सरल एव भवति । '**शीतला**' अकोपना, कदल्यपि शीतैव । '**मृदुः**' कोमला कदल्यपि मृदुरेव । '**या**' 'तारावलीव' **तारकश्रेणिरिव** '**निराधाराऽपि**' पत्याद्याधाररहिताऽपि । तारापक्षे-गगनसञ्चारित्वात् निराधारा। '**हि**' निश्चयदर्शकमव्ययम् । '**सदाचारा**' शुभचरित्रा पक्षे-सततभ्रमणशीला ॥ १७ ॥

**'सर्वत्र'** सकल प्रसंगे **'आहितसौजन्या'** स्थापितसज्जनता **'निजैः'** स्वैः **'गुणै;'** क्षमाद्यैः **'मान्या'** सर्वप्रातिवेश्मिकाद्यैः मान्या **'नारीणवैभवा'** न अरीणः अक्षीणः अपि तु क्षीण एव वैभवो यस्याः सा, निःस्वा इत्यर्थः ॥ १८ ॥

**जङ्गमः सेवधिस्तस्या, मनोरथतुरङ्गमः । आस्ते सूनुरनूनाङ्गः, 'सङ्गमः' सौख्यसङ्गमः ॥ १९ ॥**

**'तस्या'** धन्यायाः **'सङ्गमो'** नाम **'सूनुः'** पुत्रः **'आस्ते'** अस्तीत्यर्थः । कथम्भूतः सः ? तस्याः **'जङ्गमः'** चलन् **'सेवधिः'** निधिः । **'मनोरथतुरङ्गमः'** तस्याः मनोरथे–इच्छापूरणे तुरङ्गमः अश्वः । अथवा मनः एव रथः तत्र तुरङ्गमः। अश्वो हि शीघ्रगामी । अपूर्णेच्छौ हि पितरौ सन्तानेभ्यः स्वेच्छापूर्तिमिच्छतः । **'अनूनाङ्गः'** अविकलाङ्गः, **'सौख्यसङ्गमः'** सौख्यस्य–सुखस्य संगमः–संयोगो यस्मात् सः, सुखसंयुत इत्यर्थः ॥ १९ ॥

**संगम-वर्णनम्–**

**स सोम इव सौम्यश्री-श्चतुरश्च चकोरवत् । अहिंसकः शुको यद्वत्-कलगीः कलकण्ठवत् ॥ २० ॥**

**विनये वेतसः साक्षाद्, विवेकी कलहंसवत् । स्वभावादेव निर्मायः, सारङ्ग इव सङ्गमः ॥ २१ ॥**

कीदृशः स सङ्गमः ?

**'सोमः इव'** चन्द्र इव, **'सौम्यश्रीः'** सौम्या शान्तिसहिता श्रीः शोभा यस्य सः । **'चकोरवत्'** ज्योत्स्नाप्रियपक्षिवत् **'चतुरः'** कुशलः । **'यद्वत्'** यथा **'शुकः'** कीरः **'अहिंसकः'** हिंसारहितः तद्वत् सोऽपि अहिंसकः । शुकः खलु फलानि अत्ति तन्नामाऽपि फलादनः, यदुक्तं हैम्याम्–'रक्ततुण्डः फलादनः' । **'कलकण्ठवत्'** कोकिलवत् **'कलगीः'** मधुरवचनः ॥ २० ॥ **'विनये'** विनयकरणे **'साक्षात्'** प्रत्यक्षं **'वेतसः'** वेत्रयष्टिः, तद्वत् नमनशीलः । **'कलहंसवत्'**

राजहंसवत् विवेकी। यथा हंसः क्षीरनीरे वेवेक्ति तथाऽयमपि सत्यासत्ये वेवेक्ति । **'स्वभावात्-एव'** प्रकृत्या एव **'निर्मायः'** मायारहितः, क इव ? **'सारङ्ग इव'** हरिण इव ॥ २१ ॥

**लघुनाऽपि कुलीनेना-विपरीतेन तेन सा । मुदिताऽभूद् विपत्त्रेणा-प्याशा विश्राम शाखिना ॥ २२ ॥**

**'विश्रामशाखिना'** विश्रामे धन्यामनोरथविश्रान्तौ शाखिना-वृक्षतुल्येन। **'तेन'** पुत्रेण। **'सा'** धन्या। **'आशा'** आशाभूता मनोरथमयीत्यर्थः । पक्षे-दिग् । 'काष्ठाऽऽशा दिग् हरित् ककुप्' इति हैम्याम् । **'मुदिता'** आनन्दिता **'अभूत्'** जाता । कीदृशेन तेन ? **'लघुनाऽपि'** बालकेनाऽपि वृक्षपक्षे-ह्रस्वेणाऽपि **'कुलीनेन'** कुलोत्पन्नेन, पक्षे-पृथ्वीलीनेन (कु-पृथ्वी) **'अविपरीतेन'** वैपरीत्यरहितेन विनीतेनेत्यर्थः । पक्षे-न विभिः-पक्षिभिः परीतेन-युक्तेन । 'वि-वयः-शकुन्ताः' इति हैम्याम्। **'विपत्त्रेण'** विपद्भ्यः त्रायते विपत्त्रस्तेन विपद्रक्षकेण । पक्षे-विगतपत्रेण अपि आशा-दिग् मुदिता अभूदित्यर्थः ॥ २२॥

**अनिन्दुरपि दीपाली-रजनी दीप्रदीपिका । विधवाऽपि तथा नारी, राजते पुत्रदीपिका ॥ २३ ॥**

**'अनिन्दुरपि'** इन्दुना-चन्द्रेण रहिता अपि **'दीपाली-रजनी'** दीपालिकारात्रिः । **'दीप्रदीपिका'** दीप्राः दीपिकाः यस्यां सा । **राजते** तथा इयमपि । **'अनिन्दुः'** न मृताऽपत्यप्रसविनी, 'नश्यत्प्रसूतिका निन्दुः' इति हैम्याम् । **'नारी'** धन्या **'विधवाऽपि'** विगतधवा-पतिरहिताऽपि । **'पुत्रदीपिका'** पुत्र एव दीपकः यस्याः सा । अस्यायत्तत्क्षिपकादीनाम् २।४।१११॥ इति हैमसूत्रेण दीपिका । **'राजते'** शोभते ॥ २३ ॥

**यथा दीपालिकाकल्पा कीर्त्यते किल कार्तिकी । तथैवाऽविधवादेश्या, स्त्री पुत्राद् विधवाऽप्यहो ॥ २४ ॥**

**यथा** किल **'कार्त्तिकी'** पूर्णिमा **दीपालिकाकल्पा** किञ्चिदूना दीपालिका **कीर्त्यते** कथ्यते । कार्तिकी-पूर्णिमा

देवदीपाली कथ्यते । तथैव इयमपि 'स्त्री' धन्या **'विधवाऽपि'** पतिहीनाऽपि **'अविधवादेश्या'** सधवासमा । **'अहो** इत्याश्चर्ये' ॥ २४ ॥

**उत्तमाः स्वगुणैः ख्याता, मध्यमास्तु पितुर्गुणैः । इतीव सङ्गमस्येह, नाम न ज्ञायते पितुः ॥ २५ ॥**

**'उत्तमाः'** उत्कृष्टाः जनाः । **'स्वगुणैः'** निज-क्षमादिकैः गुणैः । **'ख्याताः'** विश्रुताः । **मध्यमास्तु** मध्यमगुणधारकास्तु **'पितुः'** जनकस्य **'गुणैः'** दानादिकैः ख्याताः । **इतीव 'इह'** जगति **'संगमस्य' 'पितुः'** जनकस्य **'नाम'** अभिधानं **'न ज्ञायते'** न श्रूयते । अयं भावः-संगमः किल भुवि स्वनाम्ना विख्यातः, न तु पितृनाम्ना, अतः स उत्तमः पुरुषः । यदुक्तम्-'उत्तमा आत्मनः ख्याताः, पितुः ख्याताश्च मध्यमाः । अधमा मातुलात् ख्याताः, श्वशुराच्चाधमाधमाः' ॥ २५ ॥

**धन्या-दारिद्र्यम्–**

**निजाङ्गजस्य पोषाय, शोषाय प्राच्यकर्मणः । साऽन्यसद्मसु निश्छद्मा, चक्रे कर्माणि निर्मला ॥ २६ ॥**

**'निश्छद्मा'** निष्कपटा निर्मला । **'सा'** धन्या । **'निजाङ्गजस्य'** स्वपुत्रस्य । **'पोषाय'** पोषणाय । **'प्राच्यकर्मणः'** पूर्वजन्मकृतपापकर्मणः । **'शोषाय'** नाशाय । **'अन्यसद्मसु'** परगेहेषु । **'कर्माणि'** गृहकार्याणि । **'चक्रे'** करोति स्म ॥ २६ ॥

**सूतचूतस्य सेकाय, दारिद्र्यानलशान्तये । चिन्तासन्तापनाशाय, दुःखपङ्कापनीतये ॥ २७ ॥**

**उग्रान्तरङ्गरोगार्त्ता, जलयोगचिकीरिव । दक्षा चिक्षेप साक्षेप-मुदकुम्भानदाम्भिका ॥ २८ ॥ (युग्मम्)**

**'साक्षेपं'** साक्रोशम् । **'दक्षा'** चतुरा । **'अदाम्भिका'** कपटरहिता । **सा** धन्या **'उदकुम्भान्'** जलघटान् । **'चिक्षेप'**

क्षिपति स्म । किमर्थं ? **'सुतचूतस्य'** पुत्रसहकारतरोः । **'सेकाय'** सिञ्चनाय । **'दारिद्र्यानलशान्तये'** निर्धनताग्निशमनाय । **'चिन्तासन्तापनाशाय'** चिन्ताजन्यः यः सन्तापः तस्य नाशाय ध्वंसाय । **'दुःखपङ्कापनीतये'** दुःखकर्दमं दूरीकर्तुं । कीदृशी सा ? **'उग्रान्तरङ्गरोगार्त्ता'** उग्रैः प्रचण्डैः दारिद्र्याद्यैरन्तरङ्गैः रोगैः आर्त्ता पीडिता । **'जलयोगचिकीः इव'** जलयोगं चिकीर्षतीत्येवंशीला । यथा किल उग्ररोग-पीडितः जलयोगं करोति तथा इयमपि ॥ २७ ॥ २८ ॥

**सम्मार्जनं चकाराऽर्या, हर्म्याणां कर्मणामिव । घरट्टै र्दलयामास, मरट्टै र्विपदामिव ॥ २९ ॥**

**'आर्या'** आर्यकुलोद्भवा सा धन्या । **'कर्मणामिव'** प्राक्तनकर्मणामिव । **'हर्म्याणां'** धनिकगृहाणां । **'संमार्जनं'** शुद्धिं । **'चकार'** करोति स्म । **'विपदां'** दुःखानाम् । **'मरट्टैरिव'** मर्दकैरिव । **'घरट्टैः'** ('घंटी' इति भाषायाम्) **'दलयामास'** दलयति स्म ॥ २९ ॥

**अखण्डं खण्डयन्ती सा, मुसलैः कुशला कणान् । दुरन्तदुरितानीव, रेजे रञ्जितसज्जना ॥ ३० ॥**

**'कुशला'** चतुरा । **'रञ्जितसज्जना'** प्रीणितसुजना । **'सा'** धन्या । **मुसलैः** **'कणान्'** धान्यादिखाद्यावयवान् । **'दुरन्तदुरितानीव'** गहनपापानीव । **'अखण्डं'** सततं । **'खण्डयन्ती'** खण्डनं कुर्वती । **'रेजे'** राजते स्म ॥ ३० ॥

**भोज्याच्छादनसन्देहे, देहे चिन्ताग्निना तथा । धनिगेहेषु सा देहे, सेहे दुःखं यथा भृशम् ॥ ३१ ॥**

यथा **'सा'** धन्या । **'धनिगेहेषु'** श्रीमद्गृहेषु । **'देहे'** शरीरे । **'भृशं'** अत्यन्तं । **'दुःखं'** विपदं । **'सेहे'** सहते स्म । तथा **'भोज्याच्छादनसन्देहे'** भोजनवस्त्रसंशये । **'चिन्ताग्निना'** चिन्तावह्निना । **'देहे'** दह्यते स्म । मनसि अपि इति शेषः ॥ ३१ ॥

**गोवत्सान् चारयन् सङ्गमः–**

**अथाष्टवर्षः सोत्कर्षः, सङ्गमः स्फुरदुद्यमः । गोचरे चारयामास, वत्सरूपाणि वत्सलः ॥ ३२ ॥**

**अथ 'अष्टवर्षः'** अष्टवत्सरवयाः । **'सोत्कर्षः'** सोत्साहः । **'स्फुरदुद्यमः'** उल्लसदूर्जाः । **'वत्सलः'** गोवत्सेषु वात्सल्यभृत् । **'सङ्गमः'** धन्यापुत्रः । **'गोचरे'** गावो यत्र चरन्ति तस्मिन् । **'वत्सरूपाणि'** गोवत्सानि । **'चारयामास'** चारयति स्म ॥ ३२ ॥

**जगन्मित्रावलोकेन, स बुद्धः शुद्धबुद्धिमान् । त्यक्तस्वविषयग्रामो, दण्डचीवरखण्डभृत् ॥ ३३ ॥**

**पवित्रगोप्रसूतानि, वत्सरूपाण्यमत्सरः । पुरस्कृत्य कृती पुण्य-कर्माणीव वनान्यगात् ॥ ३४ ॥**

**'जगन्मित्रावलोकेन'** सूर्यावलोकेन । मुनिपक्षे अर्हदवलोकेन । **'बुद्धः'** जागृतः, पक्षे–ज्ञाततत्त्वः । **'शुद्धबुद्धिमान्'**। विमलमतिः, पक्षे–जैनतत्त्वज्ञानात् शुद्धबुद्धिः । **स** सङ्गमः । **'पुण्यकर्माणीव'** सुकृतकर्माणीव । **'वनानि'** गहनानि । **'अगात्'** गच्छति स्म । कीदृशः सः ? **'त्यक्तस्वविषयग्रामः'** परिहतनिजदेशग्रामः । पक्षे परिहृतेन्द्रियविषयग्रामः । **'दण्डचीवरखण्डभृत्'** दण्डं च वस्त्रखण्डं च बिभर्तीत्येवंशीलः । पक्षे–तथाभूतः साधुः । धारयत्येव जैनमुनिः दण्ड-वस्त्रखण्डादीनि । **'अमत्सरः'** मात्सर्यरहितः । जैनमुनिरपि अमत्सरः एव भवति । **'कृती'** सुकृती पुण्यवान् । पक्षे–विद्वान् मुनिः । 'ज्ञः प्राप्त-रूप-कृति-कृष्ट्यभिरूपधीराः' इति हैम्याम् । किं कृत्वा ? **'वत्सरूपाणि** गोवत्सानि । पक्षे–लक्षणार्थतः वचनानि । **'पुरस्कृत्य'** अग्रेकृत्वा । कथम्भूतानि ? **'पवित्र गोप्रसूतानि'** पवित्रायाः गोः प्रसूतानि जातानि । पक्षे पवित्रवाणी–प्रसूतानि ॥ अथवा यथा कृती पुण्यकर्माणि पुरस्कृत्य याति तथा सः वत्सरूपाणि पुरस्कृत्य वनानि अगात् इत्येवमपि अर्थः स्यात् ॥ ३३ ॥ ३४ ॥

**नारीणां वाग् यथा तथ्या, कुमारीणां विशेषतः । गवां रेणुस्तथा पथ्या, वत्सानां तस्य साधिकम् ॥ ३५ ॥**

यथा '**नारीणां**' स्त्रीणां । '**वाक्**' वाणी । '**तथ्या**' सत्या । '**विशेषतश्च**' विशेषरूपेण च । '**कुमारीणां**' कन्यानां। वाणी सत्या भवति । तथा '**गवां**' धेनूनां । '**रेणुः**' रजः । '**पथ्या**' हिता । पुनः 'तस्य' सङ्गमस्य **वत्सानां** '**सा**' रेणुः। '**अधिकं**' विशेषतः पथ्या अभूत् ॥ ३५ ॥

**सुहितानीन्द्रियाणीव, वत्सरूपाण्यतुच्छधीः । विचार्य संवरं नीत्वा, कम्बली कुक्षिशम्बली ॥ ३६ ॥**

**मूलोत्तरगुणग्राम-सङ्गतिर्मातृभक्तिभाग् । निशासु सुखशय्यायां, स साधुरिव लीयते ॥ ३७ ॥**

'**अतुच्छधीः**' उदात्तमतिः । '**सः**' सङ्गमः । '**सुहितानि**' अतिशयहितकराणि तृप्तानि वा । '**इन्द्रियाणीव**' करणानीव। '**वत्सरूपाणि**' वत्सानि । '**विचार्य**' विशेषेण चारयित्वा । साधुपक्षे-चिन्तयित्वा '**संवरं**' जलम् । '**नीत्वा**' पाययित्वा । पक्षे-उपशमं नीत्वा संयम्य वा । '**कम्बली**' कम्बलोऽस्ति यस्य सः गोपः साधुश्च । '**कुक्षिशम्बली**' कुक्षिमात्रं उदरमात्रं '**शम्बलं**' पाथेयं तद्वान् ॥ ३६ ॥

'**मूलोत्तरगुणग्रामसङ्गतिः**' मूलात्-शैशवात् आरभ्य उत्तरा-उत्कृष्टा गुणग्रामसङ्गतिः गुणसन्दोहसहितता यस्य सः । पक्षे-'**मूलगुणाः**' महाव्रतानि । '**उत्तरगुणाः**' पिण्डविशुद्ध्यादयस्तेषां सन्दोहसङ्गतिः यस्य सः । '**मातृभक्तिभाग्**' जनन्याः भक्तः। पक्षे अष्टप्रवचनमातृभक्तिभाग् । '**निशासु**' रात्रिषु । '**साधुरिव**' मुनिरिव' '**सुखशय्यायां**' सुखकारिशयनीये । पक्षे-सुखकरवसतौ। '**लीनाति**' स्वपितीत्यर्थः ॥ ३७ ॥

**सङ्गमस्य क्षीरभोजनेच्छा–**

**अन्यदाऽपश्यदुत्पश्यः, पर्वणि क्वापि बालकः । कदन्नभोजनस्तत्र, परमान्नं गृहे गृहे ॥ ३८ ॥**

'**अन्यदा**' एकस्मिन् समये । '**क्वापि**' कस्मिंश्चित् । '**पर्वणि**' पर्वोत्सवसमये । '**कदन्नभोजनः**' कुत्सित-भोजनभुक् । '**उत्पश्यः**' उर्ध्वं पश्यतीत्येवंशीलः उन्मुखः इत्यर्थः । '**बालकः**' सङ्गमः । '**तत्र**' शालिग्रामे । '**गृहे गृहे**' प्रतिगृहं । '**परमान्नं**' पायसं । '**अपश्यत्**' पश्यति स्म ॥ ३८ ॥

**अतुच्छमुत्सवं मत्वा, तत्त्वातत्त्वाविचारकः । स निजां जननीं सभ्य-मभ्यधादिभ्यपुत्रवत् ॥ ३९ ॥**

'**तत्त्वातत्त्वाविचारकः**' तत्त्वातत्त्वयोः सदसतोः अविचारकः अचिन्तकः बाल्यत्वात् । '**सः**' सङ्गमः । '**अतुच्छं महान्तं**' '**उत्सवं**' महम् । '**मत्वा**' ज्ञात्वा । '**निजां**' स्वां । '**जननीं**' मातरं । '**सभ्यं**' प्रधानं यथा स्यात्तथा । '**इभ्यपुत्रवत्**' श्रेष्ठिपुत्रवत् । '**अभ्यधात्**' भाषितवान् ॥ ३९ ॥

**अम्बाऽविलम्बं सद्योऽद्य, मह्यं सह्याय सज्जय । पायं काय-संप्रीत्यै, सितायुक्तं घृतप्लुतम् ॥ ४० ॥**

'**अम्ब**' हे मातः ! । **अद्य** '**सह्याय**' नीरोगाय । '**मह्यं**' मत्कृते '**सद्यः**' सपदि । '**अविलम्बं**' विलम्बं विहाय । '**पायसं**' परमान्नं । '**सज्जय**' कुरु । तच्च कीदृशम् ? '**सितायुक्तं**' शर्करासहितं । '**घृतप्लुतं**' सर्पिर्मिश्रितं । कथम् ? '**कायसम्प्रीत्यै**', कायस्य शरीरस्य सम्प्रीत्यै देहपुष्ट्यै ॥ ४० ॥

**माता प्रोवाच हे वत्स ! रूपनारायणस्य ते । निजलीलाविलासस्य, बालकस्य बलिः क्रिये ॥ ४१ ॥**

'**माता**' जननी । '**प्रोवाच**' भाषितवती । '**हे वत्स !**' हे पुत्र ! । '**रूपनारायणस्य**' रूपेण विष्णुतुल्यस्य । '**निजलीलाविलासस्य**' स्वक्रीडाविभ्रमस्य । '**बालकस्य**' शिशोः । '**ते**' तव । अहं '**बलिः**' उपहारः '**क्रिये**' । विष्णुतुल्यस्य तव कृते अहं बलिरूपा भवामीत्यर्थः ॥ ४१ ॥

**न्युञ्छनं तव नेत्राणां, भाषितस्यावतारणम् । भ्राम्येऽहं भुजयो र्जात-मुखकस्य म्रिये म्रिये ॥ ४२ ॥**

'**तव**' '**नेत्राणां**' नयनानां । '**न्युञ्छनं**' 'लुछणुं' इति भाषायाम् । '**भाषितस्य**' वचनस्य च '**अवतारणं**' 'ओवारणुं' इति भाषायाम् । करोमीति शेषः । '**जातमुखकस्य**' जातं मुखकं मुखं, कः स्वार्थिकः, लक्षणार्थतः वचनं यस्य तस्य पुत्रस्य । '**भुजयोः**' दोष्णोः अहं '**भ्राम्ये**' अहं भ्रमणं करोमि । '**म्रिये म्रिये**' तव कृते प्राणानपि जहामि । 'मरी फीटुं' इति भाषायाम् ॥ ४२ ॥

**प्रमोदमेदुरस्वान्त, सदा सन्तुष्ट जात ते । बालकस्याप्यबालस्य, न कदापि कदाग्रहः ॥ ४३ ॥**

'**प्रमोदमेदुर-स्वान्त**' हे हर्षमुदित-मनः ! । '**सदा सन्तुष्ट**' नित्यं सन्तोषवन् । '**जात**' पुत्र ! । तव '**बालकस्यापि**' शिशोरपि । '**अबालस्य**' विदुषः । '**कदापि**' कस्मिन्नपि समये । '**कदाग्रहः**' हठाग्रहः । '**न**' न जातः ॥ ४३ ॥

**श्रद्धां ते पुरयिष्यामि, दूरयिष्याम्यमङ्गलम् । वदन्ति प्रति पुत्रं हि, प्रत्यनीकं न मातरः ॥ ४४ ॥**

'**ते**' तव । '**श्रद्धां**' आशाम् । '**पूरयिष्यामि**' पूर्णां करिष्यामि । '**अमङ्गलं**' अभद्रम् । '**दूरयिष्यामि**' नाशयिष्यामि ।" इति तं प्रति माता प्रोवाच । यतः '**मातरः**' जनन्यः । **पुत्रं** सुतम् **प्रति** । '**प्रत्यनीकं**' प्रतिकूलम् । '**न वदन्ति**' न भाषन्ते । उक्तं च-'सुधामधुविधुज्योत्स्ना-मुद्वीकाशर्करादिभिः । वेधसा सारमुद्धृत्य, विहितं जननीमनः ॥ ४४ ॥

**साक्षादिव सुधासारै-र्व्याहारैरतिरञ्जितः । मात्रा मात्राधिकं बाल-स्तत्कालमगमद् गृहात् ॥ ४५ ॥**

**'साक्षादिव'** प्रत्यक्षमिव । **'सुधासारैः'** अमृतसारैः । **व्याहारैः'** वचनैः । 'व्याहारो भाषितं वचः' इति हैम्याम् । **'मात्रा'** जनन्या । **'मात्राधिकं'** अतिमात्रम् । **'अतिरञ्जितः'** अतिप्रीणितः । **'बालः'** सङ्गमः । **'तत्कालं'** तत्क्षणम् । **'गृहात्'** गेहात् । **'अगमत्'** जगाम ॥ ४५ ॥

**वन्या वल्लीव धन्याऽथ, स्वाङ्गजस्य गजस्य सा । दन्तैरुदन्तैर्वाञ्छाया, धुता विच्छायतामिता ॥ ४६ ॥**

अथ **'धन्या'** सङ्गममाता । **'स्वाङ्गजस्य'** निजपुत्रस्य । **'गजस्य'** गजतुल्यस्य । **'वाञ्छायाः'** इच्छायाः । **'दन्तैः'** दन्ततुल्यैः । **'उदन्तैः'** वृत्तान्तैः । **'धुता'** कम्पिता । **'वन्या'** वने भवा वन्या । **'वल्लीव'** लतेव । **'विच्छायतां'** म्लानिम्। **'इता'** प्राप्ता । अयं भावः-यथा किल गजदन्तधुतवल्ली विच्छायतां गच्छति तथा धन्याऽपि पुत्रवाञ्छावृत्तान्तैः म्लानिं गता। तस्यास्तत्पूरणेऽसामर्थ्यात् ॥ ४६ ॥

**धन्यायाः विलापः ।**

**साऽचिन्तयदथ व्यर्थ-प्रत्याशाविधुराशया । मत्तोऽधिकां व्यधाद्वेधा, वशां कां दुर्दशावशाम् ॥ ४७ ॥**

**अथ 'व्यर्थप्रत्याशाविधुराशया'** पुत्रं प्रति वृथाश्वासनव्याकुलहृदया । **'अचिन्तयत्'** चिन्तयति स्म । किमित्याह- **'वेधाः'** ब्रह्मा **'मत्तोऽधिकां'** मदधिकाम् । **'दुर्दशावशां'** दुर्दैवपराधीनां कां **'वशां'** नारीम् । **'व्यधात्'** अकरोत् ? न कामपीत्यर्थः ॥ ४७ ॥

**निम्नं स्त्रीजन्म तत्रापि, वैधव्यं नव्यदुःखकृत् । दौःस्थ्यं स्थानमनस्थाया, दास्यं हास्यकरं जने ॥ ४८ ॥**

'**जने**' लोके प्रथमं तावत् । '**स्त्रीजन्म**' महिलारूपेण जन्म । '**निम्नं**' तुच्छम् । अनन्त-पापराश्युदयात् स्त्रीजन्म लभ्यते इति आगमेऽपि कथितमेव । '**तत्रापि**' स्त्रीजन्मन्यपि । '**वैधव्यं**' पतिराहित्यम् । '**नव्यदुःखकृत्**' अधिककष्टकारि । तत्रापि '**दौःस्थ्यं**' दौर्गत्यं दारिद्र्यम् । '**अनास्थायाः**' अश्रद्धायाः । '**स्थानं**' धाम । तत्रापि '**दास्यं**' दासत्वम् । '**हास्यकरं**' हास्यास्पदमिति ॥ ४८ ॥

**स्मारं स्मारं पूर्वसौख्यं, तारं तारं रुरोद सा । रीणानामिह नारीणा-मुदितं रुदितं बलम् ॥ ४९ ॥**

'**सा**' धन्या । '**पूर्वसौख्यं**' सधवाऽवस्थायाः सुखम् । '**स्मारं स्मारं**' स्मृत्वा स्मृत्वा '**तारं तारं**' अत्यन्तमुच्चैः । '**रुरोद**' रोदिति स्म । '**इह**' लोके । '**रीणानां**' खिन्नानाम् । '**नारीणां**' स्त्रीणाम् । '**रुदितं**' क्रन्दितम् । '**बलं**' शक्तिः । '**उदितं**' कथितम् ॥ ४९ ॥

**हा मातः ! किमहं जाता ? हा पितः पालिताऽस्मि किम् ? । विपदां वर्णकग्रामः, प्रकाममसुखास्पदम् ॥ ५० ॥**

'**हा**' इति खेददर्शकमव्ययम् । '**मातः**' रे जननि ! **अहं किं** कस्मै प्रयोजनाय '**जाता**' पुत्रीत्वेन उत्पन्ना ? '**हा पितः**' रे जनक ! **किं** कथम् । '**पालिता**' आहारादिना पोषिता ? यतोऽहं '**विपदां**' दुःखानाम् । '**वर्णकग्रामः**' दृष्टान्तसमूहः । 'वानगी' इति भाषायाम् । यावन्त्यो जगति विपदः सन्ति तासां दृष्टान्ताः मयि विद्यन्ते इत्यर्थः । '**प्रकामं**' अत्यन्तम् । '**असुखास्पदं**' दुःखस्थानमस्मीत्यर्थः ॥ ५० ॥

**अभद्राऽपि यथा भद्रा, धन्याऽहं नामतस्तथा । एकदाऽप्येकपुत्रस्य, नालम्भूष्णुः सुभोजने ॥ ५१ ॥**

**यथा अभद्राऽपि** अकल्याण्यपि तिथिः '**भद्रा**' इति **नामतः**' इति नाम्ना **प्रसिद्धा** । यदुक्तं-भौमे 'मंगल' नाम

विष्टिविषये, 'भद्रा' कणानां क्षये । **'वृद्धिः'** शीतलिकेति तीव्रपिटके, 'राजा' रजःपर्वणि ॥ 'मिष्टत्वं' लवणे विषे च 'मधुरं', 'जामिः' सपत्न्यां पुनः । 'पात्रत्वं' च पणाङ्गनासु रुचिरं, नाम्ना तथा नार्थतः ॥ (शार्दूल.) **'तथा'** तेन प्रकारेण। **'अहं'** अहमपि । **'नामतः'** अभिधानत एव **'धन्या'** । वस्तुतस्तु अधन्या एव । यतः **'एक-पुत्रस्य'** सङ्गमस्यैकस्य । **'सुभोजने'** परमान्नरूप - स-रसाऽऽहारेच्छापूरणे । **'एकदाऽपि'** सकृदपि । **'नालम्भूष्णुः'** न समर्थाऽस्मीत्यर्थः ॥ ५१ ॥

**श्रुत्वेति प्रतिवेशिन्य, आवेशिन्यस्तया शुचा । तर्जनेन प्रदेशिन्यः, सुखादेशिन्य ऐयरुः ॥ ५२ ॥**

**'श्रुत्वेति'** इति धन्याप्रलापं आकर्ण्य । **'प्रतिवेशिन्यः'** प्रातिवेश्मिक्यः । 'पाडोशी' इति भाषायाम् । **'ऐयरुः'** आगच्छन्। कीदृश्यः ? **'तया शुचा'** तेन शोकेन । **'आवेशिन्यः'** आवेशवत्यः व्याकुलाः । **'तर्जनेन'** धन्यादुःख-निवारणाऽसमर्थमात्मानं प्रति तर्जनेन-तिरस्कारेण । **'प्रदेशिन्यः'** तर्जन्यः तर्जन्यङ्गुलीसदृश्यः । 'तर्जनी तु प्रदेशिनी' इति हैम्याम् । **'सुखादेशिन्यः'** सुखदायिन्यः ॥ ५२ ॥

**राजन्यस्येव राजन्यः, प्रायोऽरिः प्रातिवेश्मिकः । क्षेत्रावनेरिवास्यास्तु, स्रवन्त्यस्ता रसश्रिये ॥ ५३ ॥**

**यथा 'राजन्यस्य'** क्षत्रियस्य। **'अन्यो राजन्यः'** परः क्षत्रियः। **'प्रायः'** प्रायेण। **'अरिः'** शत्रुः। तथैव प्रातिवेश्मिकस्य अन्यः प्रातिवेश्मिकः प्रायः अरिः। किन्तु धन्याविषये नैवम्। **'क्षेत्रावनेः इव'** केदारपृथिव्याः इव। **'ताः'** प्रातिवेश्मिक्यः' **'स्रवन्त्यः'** अश्रुधारया स्रवन्त्यः। क्षेत्र-पक्षे-नद्यः। **'रसश्रिये'** परमान्नरूपरसवतीश्रिये। पक्षे-जलश्रिये। अभवन्निति शेषः ॥ ५३ ॥

**स्वसः संवृणु निःश्वासान्, मातर्मातः परं रुदः । कल्याणवल्लेः कल्याणि, वारणं कारणं वद ॥ ५४ ॥**

**'स्वसः'** हे भगिनि ! । **'निःश्वासान्'** दुःखरूपान् निःश्वासान् । **'संवृणु'** अपनय । **'मातः'** हे अम्ब ! । **'अतः**

**परं**' अतः पश्चात् । '**मा रुदः**' मा रुदिहि । '**कल्याणि**' हे कल्याणमयि ! । '**कल्याणवल्लेः**' तव भद्रलतायाः । '**वारणं**' निवारकं । '**कारणं**' हेतुम् । '**वद**' ब्रूहि ॥ ५४ ॥

**कुशलं कुशलं सूनोः, शान्तं शान्तममङ्गलम् । इत्यूचुः सूचित-स्नेह-सर्वस्वास्तां तदा हि ताः ॥ ५५ ॥**

'**सूनोः**' पुत्रस्य । **कुशलं कुशलं** भद्रं भद्रम् । '**अमङ्गलं**' अकल्याणं । '**शान्तं शान्तं**' अति शान्तं भवतु । इति '**सूचितस्नेहसर्वस्वाः**' देयत्वेन सूचितं स्नेहेन सर्वस्वं याभिः **ताः** प्रातिवेश्मिक्यः । '**तदा**' तस्मिन् काले । '**तां**' धन्याम्। '**ऊचुः**' बभाषिरे ॥ ५५ ॥

**अथो विधूय नेत्राम्बु, प्राञ्जला कम्बलाञ्चलैः । शुचिः सोवाच शोचामि, मन्दभाग्या किमात्मनः ? ॥ ५६ ॥**

**अथो** '**कम्बलाञ्चलैः**' कम्बलस्य अञ्चलैः प्रान्त-भागैः । '**नेत्राम्बु**' नयनाश्रु । '**विधूय**' अपनीय । '**शुचिः**' पवित्रा। '**प्राञ्जला**' सरला । '**सा**' धन्या । '**उवाच**' वदति स्म । यत् '**मन्दभाग्या**' अल्पपुण्या । '**आत्मनः**' स्वस्य । '**किं**' वस्तु । '**शोचामि**' शोकं कुर्वे ? ॥ ५६ ॥

**प्रलापकारणं कथयन्ती धन्या–**

**आजन्म दुःखदग्धां मां, विदग्धा अपि मुग्धवत् । तापं किं पृच्छत स्वच्छा, इष्टिकापाकमूषिकाम् ॥ ५७ ॥**

'**स्वच्छा**' निर्मलहृदयाः । '**विदग्धाः**' चतुराः अपि यूयम् । '**मुग्धवत्**' अज्ञवत् । '**आजन्मदुःखदग्धां**' आजीवनकष्टग्रस्ताम् । '**इष्टिकापाकमूषिकां**' इष्टिकापाक ('निभाडुं' इति भाषायाम्) समीपबिलस्थितां मूषिकासदृशीं मां । '**तापं**' शरीरचित्तादिसन्तापम् । **किं पृच्छत** ? किं पृच्छां कुरुत ? ॥ ५७ ॥

**विशेषस्तु विशेषज्ञा, मनोरथरथेऽद्य माम् । अवेदनः सुतः सूतः, संयुयोज जरद्गवीम् ॥ ५८ ॥**

'**विशेषज्ञाः**' विशिष्टविज्ञाः हे प्रातिवेश्मिक्यः ! '**विशेषस्तु**' विशिष्टोऽयं वृत्तान्तः । अद्य '**अवेदनः**' विशिष्टज्ञानविहीनः । '**सूतः**' सारथिः सूततुल्यः । '**सुतः**' पुत्रः । '**मनोरथ-रथे**' मनोरथः एव रथः तस्मिन् । '**जरद्गवीं**' जरती गौः तत्समाम् माम् । '**संयुयोज**' सम्यक् युनक्ति स्म ॥ ५८ ॥

**तन्निर्वाहाक्षमा क्षामा, विषीदामि निषीदत । हेतुर्नान्यः सौख्यकेतु-र्भवत्सन्निधिसन्निधेः ॥ ५९ ॥**

'**तन्निर्वाहाक्षमा**' तन्निर्वाहे तन्मनोरथपूरणे अक्षमा-असमर्था । '**क्षामा**' कृशा । '**विषीदामि**' विषादं करोमि । '**यूयं निषीदत**' उपविशत । '**भवत्सन्निधिसन्निधेः**' भवतीनां सन्निधिः-सान्निध्यं सामीप्यं एव सन्निधिः-शोभनो निधिः तस्मात् । '**सौख्य-केतुः**' मम सौख्यस्य केतुः केतनम् सुखसूचकमित्यर्थः । '**अन्यो हेतुः**' अपरं कारणम् । '**न**' न विद्यते ॥ भवत्सान्निध्यमेव मम सुखकारणमिति भावः ॥ ५९ ॥

**प्रातिवेश्मिकीनां मधुरप्रत्युत्तरम्–**

**ततस्ता विस्मिता स्माहुरैन्द्रो गज इवाङ्गजः । कल्पद्रुमफलश्रेणीं, निस्सहे ! किं समीहते ? ॥ ६० ॥**

'**ततः**' तत्पश्चात् । '**ताः**' प्रातिवेश्मिक्यः । '**आहुः**' कथयन्ति । '**निःसहे**' हे असमर्थे ! । '**ऐन्द्रो गजः इव**' ऐरावणहस्तीव । '**अङ्गजः**' तव पुत्रः । **किं** '**कल्पद्रुमफलश्रेणीं**' कल्पतरुफलावलीं । '**समीहते**' इच्छति ? ॥ ६० ॥

**गद्गदं सा जगादाथ, सुस्निग्धं वसुधासुधा । प्रतीतं परमप्रीत्यै, निसर्गात् स्वर्गिणामपि ॥ ६१ ॥**

**पायसं सद्वच इव, निर्द्धनैः क्वापि नाप्यते । तत्तेनायाचि यद् दृष्ट-श्रद्धालुर्बालको जनः ॥ ६२ ॥**

**अथ 'सा'** धन्या । **'गद्गदम्'** गद्गद्तापूर्वकम् । **'जगाद'** जल्पति स्म । **'सुस्निग्धं'** घृतादिना सम्यक् स्निग्धम् । **'वसुधासुधा'** वसुधायां पृथिव्यां सुधा अमृतरूपम् । **'स्वर्गिणामपि'** देवानामपि । **'निसर्गात्'** स्वभावात् । **'परम-प्रीत्यै'** अत्यन्ततोषाय । **'प्रतीतं'** प्रख्यातम् ॥ ६१ ॥ **'पायसं'** परमान्नम् । **'सद्वच इव'** मधुरवचनमिव । **'निर्द्धनैः'** दरिद्रैः । **'क्वापि'** कुत्रापि । **'नाप्यते'** न लभ्यते । तद्वत् तत् पायसम् । **'तेन'** बालेन । **'अयाचि'** याच्यते स्म । **'यद्'** यतः । **'बालको जनः'** शिशुलोकः । **'दृष्टश्रद्धालुः'** दृष्टं वस्तु श्रद्धाति समीहते इत्येवंशीलः भवति ॥ ६२ ॥

**ऊचुस्ताः सज्जनंमन्याः, समदुःखसुखा वयम् । अनया चर्चया वर्ये !, स्नेहशून्या विभाविताः ॥ ६३ ॥**

**'सज्जनंमन्याः'** आत्मानं सज्जनं मन्यन्ते इत्येवंशीलाः । **'ताः'** प्रातिवेश्मिक्यः । **'ऊचुः'** अवोचन् । **वयं 'सम-दुःखसुखाः'** समानानि दुःखसुखानि यासां ताः, दुःखे दुःखिन्यः सुखे सुखिन्यः स्मः इत्यर्थः । किन्तु **वर्ये** ! हे श्रेष्ठे! **अनया 'चर्चया'** आलापेन । त्वया वयं **'स्नेहशून्याः'** प्रेमरहिताः । **'विभाविताः'** विज्ञापिताः ॥ ६३ ॥

**धन्ये धन्यासि मानार्थे, जीवं मुञ्चन्ति मानिनः । जीविताधिक-पुत्रार्थे, त्वं तु मानं न मुञ्चसि ॥ ६४ ॥**

**'मानार्थे'** स्वगौरवार्थम् । **'मानिनः'** स्वमानिनः पुरुषाः । **'जीवं'** प्राणान् । **'मुञ्चन्ति'** त्यजन्ति । **त्वं तु 'जीविताधिकपुत्रार्थे'** प्राणेभ्योऽपि प्रियस्य पुत्रस्य अर्थे-कृते । **'मानम्'** स्वगौरवमपि । **न मुञ्चसि** न जहासि । **'धन्ये'** हे धन्ये ! । त्वं सत्यं **'धन्या'** न केवलं नाम्ना, किन्तु कार्येणाऽपि धन्या । **'असि'** वर्तसे । हे धन्ये स्वमानिनः स्वगौरवरक्षणार्थं जीवनमपि त्यजन्ति । त्वं तु प्राणप्रियपुत्रार्थं स्वगौरवमपि न त्यजसि । सत्यं त्वं 'धन्या' असि, स्वगौरवस्य रक्षणात् - इति भावः ॥ ६४ ॥

**धूमरीभिरिवास्माभिः, शाम्येद् दुःखानलो न चेत् । रवेरिवास्य बालस्य, किं नान्तर्द्धीयते रुचिः ॥ ६५ ॥**

'**धूमरीभिरिव**' अवश्यायतुल्याभिः (धूमरी-'झाकल' इति भाषायाम्) '**अस्माभिः**' प्रातिवेश्मिकीभिः । '**चेत्**' यदि। '**दुःखानलः**' तव विपत्तिदवाग्निः । '**न शाम्येत्**' न शान्तः स्यात् । किन्तु '**रवेरिव**' सूर्यस्येव । '**अस्य बालस्य**' शिशोः सङ्गमस्य । '**रुचिः**' अभिलाषः । रविपक्षे-किरणः । '**किं**' कथम् । '**नान्तर्द्धीयते**' न आच्छाद्यते ? अयं भावः-धूमरीलहरीभिः दावानलः न शाम्यति, किन्तु सूर्यकिरणास्तु छाद्यन्ते एव, तद्वत् वयं प्रातिवेश्मिक्यः तव सर्वदुःखाऽपनयने असमर्थाः किन्तु तव पुत्रेच्छापूरणे तु समर्थाः एव ॥ ६५ ॥

**काऽप्यवादीदिमं पुत्रं, भोजयिष्ये स्व-वेश्मनि । पराऽवोचद्युक्तमेवं, प्रत्येकं क्रमशः पुनः ॥ ६६ ॥**

'**काऽपि**' स्त्री । '**अवादीत्**' अवोचत् । '**इमं पुत्रं**' सङ्गमं बालम् । '**स्व-वेश्मनि**' निजगृहे । '**भोजयिष्ये**' भोजनं कारयिष्यामि । '**परा**' अन्या काचित् स्त्री । '**अवोचत्**' अकथयत् । '**एवं**' इत्थम् । '**प्रत्येकं**' प्रत्येकस्त्रीणां गृहे । '**क्रमशः**' क्रमेण । पुनः '**युक्तं**' भोजयितुं समुचितम् ॥ ६६ ॥

**माता प्रमोदते नैवमन्याऽऽचष्ट विशिष्टधीः । परा बभाषे सम्भूय, सर्वाः कुर्मो वयं त्वदः ॥ ६७ ॥**

'**अन्या**' परा । '**विशिष्टधीः**' असाधारणमतिः स्त्री । '**आचष्ट**' अवक् । '**माता**' जननी । '**एवं**' अन्यगृहे भोजनेन। '**न प्रमोदते**' न प्रसन्ना भवति । '**परा**' अन्या कापि । '**बभाषे**' उवाच । '**वयं सर्वाः**' सकलाः प्रातिवेश्मिक्यः । '**सम्भूय**' सम्मील्य । '**अदः**' परमान्नम् । '**कुर्मः**' विदध्मः' ॥ ६७ ॥

**क्षीरवस्तूनि आनयन्त्यः प्रातिवेश्मिक्यः—**

**इत्युक्त्वैका गुणप्रायान्, प्रैषीत् कलमतन्दुलान् । पयोभिः पूरितां पारीं, स्व-यशोभिरिवेतरा ॥ ६८ ॥**

**आज्यं प्राज्यं रसश्रीणां, साम्राज्यमिव चापरा । कलां सितोपलां चान्या, प्रीतिस्फीतिमिवोज्ज्वलाम् ॥ ६९ ॥**

'**इति**' एवं प्रकारेण । '**उक्त्वा**' कथयित्वा । '**एका**' काचित् नारी । '**गुणप्रायान्**' गुणतुल्यान् उज्ज्वलानित्यर्थः । '**कलमतन्दुलान्**' कलमजातीयशालीन् । '**प्रैषीत्**' प्राहिणोत् अयच्छदित्यर्थः । '**इतरा**' अन्या नारी । '**स्वयशोभिरिव**' निजकीर्तिभिः इव । '**पयोभिः**' दुग्धैः । '**पूरितां**' पूर्णाम् । '**पारीं**' पात्रम् । 'पारीओ-घडो' इति भाषायाम् । **प्रैषीत्** ॥ ६८ ॥ '**अपरा**' अन्या नारी । **चः** समुच्चये । **रसश्रीणां साम्राज्यमिव** । '**प्राज्यं**' पुष्कलम् । '**आज्यं**' घृतम् । **प्रैषीत्** । घृते हि रसाधिपत्यं सर्वविदितमेव । कथितं चायुर्वेदे-घृतमायुरिति । '**अन्या**' नारी । '**प्रेमस्फीतिमिव**' स्नेहविस्तारामिव । '**उज्ज्वलां**' श्वेताम् । '**कलां**' मधुराम् । '**सितोपलां**' शर्कराम् । 'शर्करा तु सितोपला' इति हैम्याम् । **प्रैषीत्** ॥ ६९ ॥

**दत्ते स्नेहं वरारक्ष-स्त्यक्तनीरानुमानतः । सा सखीभ्यस्तु तं प्राप-दुज्झिताश्रु-जलाधिकम् ॥ ७० ॥**

'**वरारक्षः**' वरः श्रेष्ठः आरक्षः रक्षकः । लक्षणार्थतः अरघट्टवाहकः । '**त्यक्तनीराऽनुमानतः**' आकृष्य मुक्तजलपरिमाणाऽनुमानतः । '**स्नेहं**' तैलम् । '**दत्ते**' सिञ्चति । 'ऊँजवुं' इति भाषायाम् । दत्ते हि तैलं यन्त्रे यान्त्रिकाः । यति जलं अरघट्ट आकर्षति तदनुसारेणैव चक्रे स्नेहं पूर्यते । '**सा**' धन्या । '**तु**' परन्तु । '**उज्झिताश्रुजलाधिकम्**' नेत्रमुक्तबाष्प-नीरादपि अधिकम् । '**तं**' स्नेहम् । '**सखीभ्यः**' प्रातिवेश्मिकीपार्श्वात् । '**प्रापत्**' प्राप्तवती ॥ ७० ॥

**शतैः सुपाटकः प्राप्यः, सहस्रैः प्रातिवेश्मिकः । तस्यास्तु प्रतिवेशिन्यः, प्राप्ताः कोटिं परां पुनः ॥ ७१ ॥**

**शतैः** रूप्यकैः **सुपाटकः**-शोभनो ग्रामैकविभागः 'पाडो' इति भाषायाम् । **प्राप्यः** लभ्यः । **'सहस्रैः'** (शोभनः) **प्रातिवेश्मिकः प्राप्यः । 'तस्याः'** धन्यायाः । **'तु'** परन्तु पुनः । **'प्रतिवेशिन्यः'** प्रातिवेश्मिक्यः । **'परां'** परमाम् । **कोटिं** कोटिसंख्यां उत्तमकक्षां च । **प्राप्ता** । रूप्यकशतव्ययेन एकः सुपाटको लभ्यते, सहस्र-व्ययेन च एकः सुप्रातिवेश्मिको लभ्यते किन्तु तस्याः एकरूप्यकस्यापि व्ययं विना सुप्रतिवेशिन्यः परां कोटिं-उत्तमां कक्षां प्राप्ताः । कोटिरूप्यकलभ्यास्ता जाता इत्यर्थः ॥ ७१ ॥

**दुष्प्रापा प्रतिवेशिन्यो दुःखादर्शनिभा अपि । तास्तस्या दुःख-शल्यायस्कान्तरत्नोपमाः पुनः ॥ ७२ ॥**

**'दुःखे'** आपत्तौ । **'आदर्शनिभा अपि'** दर्पणसदृश्यः अपि । **प्रतिवेशिन्यः । 'दुष्प्रापाः'**-दुर्लभाः । **'ताः'** प्रतिवेशिन्यः। **'तस्याः'** धन्यायाः । **पुनः 'दुःखशल्यायस्कान्तरत्नोपमाः'** दुःखशल्योध्दरणे अयस्कान्तरत्नोपमा लोहचुम्बकतुल्या अभूवन् ॥ ७२ ॥

**धन्यमंन्या ततो धन्या, परमान्नस्य सङ्गमम् । विधाय सङ्गमस्याऽर्थेऽजनि प्रमदमेदुरा ॥ ७३ ॥**

**ततः 'धन्यंमन्या'** आत्मानं धन्यं मन्यते इत्येवंशीला धन्या । **'सङ्गमस्य अर्थे'**-कृते **'परमान्नस्य'** पायसस्य । **'सङ्गमं'** लाभं **'विधाय'** कृत्वा । **'प्रमदमेदुरा'**-प्रमोद-पुष्टा । **अजनि**-जाता ॥ ७३ ॥

**विसृज्य वत्सरूपाणि, स्नातः शान्तपरिश्रमः । आजगाम निजं धाम, सङ्गमः शुभसङ्गमः ॥ ७४ ॥**

**'वत्सरूपाणि'** गोवत्सानि। **विसृज्य** त्यक्त्वा। **स्नातः**। **'शान्तपरिश्रमः'** शान्तः परिश्रमः यस्य सः। **'शुभसङ्गमः'** शुभस्य पुण्यस्य भावी सङ्गमो यस्य सः। **सङ्गमः**। **'निजं'** स्वम्। **धाम**-गृहम्। **आजगाम**-आगच्छति स्म ॥ ७४ ॥

**आस्तासने स निःशल्ये, निश्चले मातृकल्पिते । समाश्रित्योत्तरां काष्ठां, जैनधर्म इवामले ॥ ७५ ॥**

**उत्तरां** काष्ठां-उत्तरदिशम्। धर्म-पक्षे-उत्तमां निष्ठाम्। **'समाश्रित्य'** पुरस्कृत्य। **'अमले'** उज्ज्वले। **जैनधर्मे इव निःशल्ये**-कंटकादि-शल्यरहिते। पक्षे-मायादिशल्यरहिते **'निश्चले'** अचले-पक्षे दुर्वादिभिः निष्कम्पे। **'मातृकल्पिते'**-जननीनिर्मिते। पक्षे-प्रवचनमातृजाते। **आसने। स** सङ्गमः **आस्त**-उपाविशत् ॥ ७५ ॥

**माता ज्ञानवतीवास्य शिशोरग्रे चतुष्किकाम् । गृहिधर्मतरोर्दानफलादानकृते न्यधात् ॥ ७६ ॥**

**'ज्ञानवती इव'** भाविफलवेदित्री इव। **'माता'** जननी। **अस्य शिशोः** बालस्य। **'अग्रे'** पुरः। 'गृहिधर्मतरोः' गृहिधर्मः एव तरुः तस्मात्। **'फलादानकृते'**-फल-ग्रहणार्थम् **'चतुष्किकां'** काष्ठपीठिकाम्। 'बाजोठ' इति भाषायाम्। **'न्यधात्'** अस्थापयत् ॥ ७६ ॥

**तत्र कुण्डलिकां साऽथ भव्येव भवितव्यता । स्थापयन्त्य दुष्कर्म, किल कुण्डलितं व्यधात् ॥ ७७ ॥**

**अथ 'भव्या'** रम्या। **'भवितव्यता इव'** भाग्यमिव। **सा। 'तत्र'** चतुष्किकायाम्। **'कुण्डलिकां'** वृत्ताकाररूपां रेखां अपमङ्गलाऽपनयनार्थम्। **स्थापयन्ती** कुर्वती। **'अस्य'** शिशोः। **'किलः'** निश्चये। **'दुष्कर्म'**-दुरितम्। **'कुण्डलितं'**-सीमितम्। **'व्यधात्'**-अकरोत् ॥ ७७ ॥

**सतां चित्तमिवोदारं, सुविमृष्टं च वाक्यवत् । गात्रवच्च रुचेः पात्रं, स्थालं न्यास्थच्च तत्र सा ॥ ७८ ॥**

**सतां** सज्जनानाम् **चित्तमिव** मन इव । **उदारं**-विशालं सज्जनपक्षे-स्वपरभेदाभावात् उदारम् । **'सतां वाक्य-वच्च'** वचनवच्च । **'सुविमृष्टं'**-शोधितम् । पक्षे-वितर्कितम् । **'गात्रवत्'**-शरीरवच्च । **'रुचेः'** बुभुक्षायाः पक्षे-कान्तेः पात्रं-स्थानम् । **स्थालं** भोजनभाजनम् । **सा तत्र**-कुण्डलिकायाम् **न्यास्थत्**-अस्थापयत् ॥ ७८ ॥

**एष्यन्त्याः सहसा धर्मवाहिन्या दानसम्पदः । नासीरमिव तन्नीरं, करशुद्धिकरं बभौ ॥ ७९ ॥**

**'सहसा'**-सपदि । **'एष्यन्त्याः'**-आयास्यत्याः । **'दानसम्पदः'** दानसम्पत्तेः । **'धर्मवाहिन्याः'**-धर्म-नद्याः । पक्षे-धर्म-सेनायाः । **'नासीरमिव'** अग्रयानमिव । पक्षे-सेनायाः अग्रेसरसैन्यमिव । **'करशुद्धिकरं'** हस्तशुद्धिकरम् । सेना पक्षे-शुल्कशुद्धिकरं, सेनाक्रान्ताः सामन्ताः भयेन करं ददत्येव । **'तद् नीरं'**-जलम् । **'बभौ'**-भाति स्म । भोजनात् पूर्वं क्रियते किल कर-शोधनम् ॥ ७९ ॥

**सुभटस्वान्तवत् सोष्म, सुखदं न्याय्यवित्तवत् । मातृचित्तमिव स्निग्धं, सरसं सच्चरित्रवत् ॥ ८० ॥**

**सर्वथैव मनोहारि, गुरुशिक्षावचो यथा । माता प्रमुदिता तस्मै पायसं पर्यवेषयत् ॥ ८१ ॥ (युग्मम्)**

**'प्रमुदिता'**-प्रहृष्टा । **'माता'** धन्या । **'तस्मै'**-सङ्गमाय । **'पायसं'** परमान्नम् । **'पर्यवेषयत्'** भोक्तुं ढौकितम् । तच्च कीदृशम् ? **'सुभटस्वान्तवत्'**-सैनिकमनोवत् । **'सोष्म'**-उष्मणा सहितं उष्णमित्यर्थः । **'न्याय्यवित्तवत्'**-न्यायोपार्जितद्रविणवत्। **'सुखदं'** शर्मप्रदम् । **'मातृचितमिव'**-जननीमन इव । **'स्निग्धं'** प्रेमयुक्तम् । पायसपक्षे-घृतार्द्रम्। **'सच्चरित्रवत्'** सतां चरित्रवत् । **'सरसं'** रससहितम् । **'यथा गुरुशिक्षावचः'** गुरूणां शिक्षावचः हितशिक्षावचनम् तथा **'सर्वथैव'** सर्वप्रकारेणैव । **मनोहारि** चित्ताह्लादकारि ॥ ८० ॥ ८१ ॥

**सिताघृताभ्यां तन्नीत्युत्साहाभ्यामिव वैभवम् । सफारीकृत्यान्यतः साऽगात् किल सन्तोषदृग्भयात् ॥ ८२ ॥**

'**नीत्युत्साहाभ्यां**' न्यायोल्लासाभ्याम् । '**वैभवमिव**' द्रव्यमिव । '**तत्**' पायसं सिताघृताभ्यां-शर्करासर्पिर्भ्याम् । **स्फारीकृत्य**-शीतीकरणार्थं स्थाले विपुलीकृत्य । वैभवपक्षेऽपि नीत्युत्साहाभ्यां भवत्येव स्फारं वैभवम् । '**सन्तोषदृग्भयात्**'-सन्तुष्टदृष्टिदोषभयात् दृष्टिलगनभयात् । '**सा**' धन्या । 'किलः' निश्चले । '**अन्यतः**'-अन्यत्र । **अगात्**-अगच्छत् ॥ ८२ ॥

**तपस्विमुनेः आगमनम्–**

**इतश्च कश्चिदागच्छच्चिन्तामणिरचिन्तितः । अकल्पितश्च कल्पद्रुः कामधेनुरकामिता ॥ ८३ ॥**

**योगाभ्यासरतिः सर्वविरति-प्रोल्लसन्मतिः । मासोपवासनिरतिर्मुक्तिमार्गगतिर्यतिः ॥ ८४ ॥ (युग्मम्)**

**इतश्च कश्चिद् यतिः**-साधुः । '**आगच्छत्**' आयातः । कीदृशः स साधुः ? '**अचिन्तितः**' अविचारितः । '**चिन्तामणिः**'-चिन्तारत्नम् । **अकल्पितः** अतर्कितः । '**चः**' समुच्चये । **कल्पद्रुः**-कल्पवृक्षः । '**अकामिता**'-असंभाविता । '**कामधेनुः**'-कामगवी ॥ ८३ ॥

'**योगाभ्यासरतिः**'-योगाभ्यासे रतिः यस्य सः । '**सर्वविरति-प्रोल्लसन्मतिः**' सर्वविरतौ प्रौल्लसन्ती विकसती मतिः बुद्धिः यस्य सः । '**मासोपवासनिरतिः**'-मासोपवासे निरतिः नितरां रतिः यस्य सः । '**मुक्तिमार्गगतिः**' मोक्षाध्वनि गतिः गमनं यस्य सः ॥ ८४ ॥

**यथा हि दक्षिणावर्त्तशङ्खः कृष्णश्च चित्रकः । पुण्यैरगण्यैः प्रत्यक्षस्तथा तस्याभवन्मुनिः ॥ ८५ ॥**

**'यथा हि दक्षिणावर्त्तशङ्खः'** दक्षिणाः अपसव्यगामिनः आवर्त्ता यस्य सः शङ्खः कम्बुः । **'कृष्णश्च चित्रकः'** कृष्णा चित्रवल्ली । **'अगण्यैः'** अपरिमितैः । **'पुण्यैः'** सुकृतैः । **प्रत्यक्षः** साक्षात् स्यात् **तथा तस्य** सङ्गमस्य **मुनिः प्रत्यक्षः** अभवत् ॥ ८५ ॥

**तस्माज्जगत्त्रयीमित्रादसावादर्शनिर्मलः । तेजो बोधमयं प्रापदन्तरङ्गतमोपहम् ॥ ८६ ॥**

**'तस्मात्'** मुनेः । **'जगत्त्रयीमित्रात्'**-विश्वत्रयसुहृदः । पक्षे-सूर्यात् । **'आदर्शनिर्मलः'** दर्पणोज्ज्वलः । **'असौ'** सङ्गमकः । **'अन्तरङ्गतमोपहं'**-अभ्यन्तरान्धकारहारि । बोधमयं ज्ञानमयम् । पक्षे-जागृतिमयम् । **'तेजः'** प्रकाशम् । **'प्रापत्'**-प्राप्नोति स्म । प्रतिबिम्ब्यते हि आदर्शे सूर्यप्रकाशः ॥ ८६ ॥

**जातजातिस्मृतिरिव प्राप्तजन्माथ निर्जरः । किमेतदिति सम्भ्रान्तस्ततश्चेतस्यचिन्तयत् ॥ ८७ ॥**

**'अथ जातजातिस्मृतिः इव'** उत्पन्नजातिस्मरणः इव । **'प्राप्तजन्मा'**-लब्धजनुः । **निर्जरः**-देवः इव । **'एतत् किम् ?'** **इति सम्भ्रान्तः**-सम्भ्रमं प्राप्तः सङ्गमः । **चेतसि**-मनसि । **अचिन्तयत्**-चिन्तयति स्म ॥ ८७ ॥

**सङ्गमस्य आनन्दः ।**

**अहो भाग्यमहो भाग्यमहो मेऽद्य महोत्सवः । अरिरे धर्मसामग्री कटरे कर्म्मलाघवम् ॥ ८८ ॥**

**अहो मम भाग्यम् । अहो मम भाग्यम् । अहो मे अद्य महोत्सवः ।** **'अरिरे कटरे'** इति आश्चर्यद्योतके अव्यये । **धर्म सामग्री** मम प्राप्ता । **कर्मलाघवं** जातम् ॥ ८८ ॥

**अनभ्रविभ्रमा वृष्टिरचन्द्रा किल चन्द्रिका । अप्रदीपः प्रकाशश्च ममाकस्माद् विजृम्भते ॥ ८९ ॥**

'**अनभ्रविभ्रमा**'-अजलदविलसिता। '**वृष्टिः**'-वर्षणम्। '**अचन्द्रा**'-चन्द्ररहिता। '**किलः**' निश्चये। '**चन्द्रिका**' ज्योत्स्ना। '**अप्रदीपः**' प्रदीपरहितश्च प्रकाशः तेजः । '**मम अकस्मात्**' न कस्मात् अकस्मात् । **विजृम्भते**-प्रकटीभवति ॥ ८९ ॥

**ऐरावणोऽयं भूपीठे, गङ्गापूरश्च जाङ्गले । मरौ जातः पारिजातः, साधुर्ग्रामे यदीदृशे ॥ ९० ॥**

'**अयं**' साधुः । **भूपीठे**-पृथ्वीतले । '**ऐरावणो**' तन्नामा इन्द्र-हस्ती । **जाङ्गले**-निर्जलदेशे । **चः** समुच्चये । **गङ्गापूरः** जाह्नवीप्रवाहः। **मरौ** देशे च **पारिजातः** कल्पवृक्षः **जातः**। **यद् ईदृशे ग्रामे** लघुग्रामे। **साधुः**-मुनिः। आगतः इति शेषः॥ ९० ॥

**राजा रोरगृहं प्रापदमावस्यामयं शशी । हेलिः पातालमूलं वा, यत्तत्रापि ममालयम् ॥ ९१ ॥**

'**राजा**'-नृपः । '**रोरगृहं**'-द्रमकगेहम् । '**प्रापद्**'-प्राप्तः । '**अमावस्यां**'-अमावस्यायाम् । '**अयं**' साधुः । '**शशी**'-चन्द्रः प्राप्तः । '**हेलिः**'-सूर्यः । '**वा**'-विकल्पे । '**पातालमूलं**'-अधोलोकं प्रापद् । '**यत्**'-यस्मात् । **तत्रापि**-ग्रामे । '**ममालयं**'-मम गृहम् । साधुः आगतः ॥ ९१ ॥

**सामान्यान्नस्य सन्देहे, परमान्नं क्व मे गृहे । ऊषरे स्यान्न तृण्यापि, क्व महाशालिपालयः ॥ ९२ ॥**

'**सामान्यान्नस्य अपि**' साधारणभोजनस्यापि । '**सन्देहे**' संशये । '**मे**'-मम । '**गृहे**' गेहे । '**परमान्नं**' पायसं क्व ?। '**ऊषरे प्रदेशे**'-ऊषरभूमौ । '**तृण्या**'-तृणसमूहोऽपि । न स्यात् न प्ररोहेत् तर्हि **क्व** '**महाशालिपालयः**'-महाशालिस्तम्बानां पालिः पङ्क्तिः ? ॥ ९२ ॥

**त्रिवेणी-सङ्गमः सोऽयं, जज्ञे गगनमण्डले । शिलापुत्रस्य सन्तुष्टा गौरीब्राह्मीमहाश्रियः ॥ ९३ ॥**

'**सोऽयं**' मम भावस्य परमान्नस्य मुनेरागमनस्य च सङ्गमः । '**गगनमण्डले**' नभस्तले । '**त्रिवेणीसङ्गमः**' त्रिनदीप्रवाहमेलनम् । पृथ्व्यां तु गंगा-यमुना-सरस्वतीनां त्रिवेणीसंगमः प्रसिद्धः अयं तु गगने त्रिवेणीसंगमः संजातः। '**शिलापुत्रस्य**'-पेषणदृषदः तद्वत् तुच्छप्राणिनः । **गौरीब्राह्मीमहाश्रियः** पार्वती-सरस्वती-श्रियः **संतुष्टाः** अभवन् । कः शिलापुत्रः ? "निर्भाग्यो दुर्भगः पङ्गुः कुणिः कुण्ठमतिस्तथा । नीचः पापरतो यस्तु '**शिलापुत्रः**' स उच्यते ॥" केचिदेवमाहुः-कस्याश्चित् स्त्रियाः लोढको जातस्तयाऽसावरण्ये त्यक्तः, पुनर्गौरी-सहितेन शङ्करेण दृष्टस्ततो गौर्य्या सहानीतस्ततो तस्य (लोढकस्य) दानेन विद्यालक्ष्म्यावपि तुष्टे एवं तिस्रोऽपि (गौरीब्राह्मीमहाश्रियः) तस्योपरि तुष्टाः ॥ ९३ ॥

**कुम्भेऽनवद्यत्रैविद्यवादस्तदयमीक्षितः । यच्चित्तवित्तपात्राणां, सङ्गमः सङ्गमे मयि ॥ ९४ ॥**

'**तद्**' तस्मात् । अयं '**कुम्भे**'-चैतन्यशून्ये जडरूपे घटे '**अनवद्यत्रैविद्यवादः**'-पवित्रं तर्कलक्षण-साहित्यरूपं '**त्रैविद्यं**'-त्रिविद्याया इदं त्रैविद्यं तस्य वादः चर्चा । **ईक्षितः**-दृष्टः । '**यद्**'-यस्मात् । '**मयि**' सङ्गमे । **चित्तवित्तपात्राणां**-मनोद्रव्य-सत्पात्राणाम् । **सङ्गमः**-समागमः । अभवदिति शेषः ॥ ९४ ॥

**सद्यः समागतं वित्तं, सद्यः पात्रं च सङ्गतम् । सद्यः प्रमुदितं चित्तं, पुण्यं सद्योऽर्जयामि तत् ॥ ९५ ॥**

**सद्यः**-सपदि । **वित्तं** पायसरूपं **समागतम्** । **सद्यः पात्रं** मुनिरूपं सत्पात्रं **सङ्गतं** मिलितम् । **सद्यः चित्तं** मनः । **प्रमुदितं**-प्रहृष्टम् । '**तत्**' तस्मात् । '**सद्यः**' सपदि । '**पुण्यं**' सुकृतम् '**अर्जयामि**' लभे । इति सङ्गमस्य एवम्भूत-सामग्र्याः दुर्लभत्वे विचारणा । यदुक्तम्-केसिंचि होइ वित्तं, चित्तं अन्नेसिमुभयमन्नेसिं । चित्तं वित्तं पत्तं तिण्णि वि केसिंचि धन्नाणं ॥ ९५ ॥

**सर्वरत्नप्रधानं श्रीरामेणान्नममन्यत । परमान्नं तु पात्रत्राकृतं चिन्तामणीयताम् ॥ ९६ ॥**

'**श्री रामेण**'-लङ्कातः प्रत्यागतेन । '**अन्नं**'-भोजनम् । '**सर्वरत्नप्रधानं**'-सकलमणिमुख्यम् । **अमन्यत**-मतम् । ''उत्पत्ति-दुर्लभा यस्य, व्ययो यस्य दिने दिने । सर्वरत्नप्रधानस्य, धान्यस्य कुशलं गृहे ॥ ॥ इति श्री रामश्लोकोऽयम् । लङ्काविजयं कृत्वा अयोध्यां प्रत्यागतस्य रामस्य भरतं प्रति वचनम् । '**पात्रत्राकृतं**'-पात्रेधीनं क्रियते दीयते इति पात्रत्रा; ''देये त्रा च ७/२/१३३।'' इति त्राप्रत्ययः । '**परमान्नं**' इदं पात्रदेयं पायसम् । '**चिन्तामणीयतां**' चिन्तारत्नमिव भवतु ॥ ९६ ॥

**एष एवामृताहारो यः सत्पात्रे नियोज्यते । रसो न हीयते यस्य कल्पकोटिशतैरपि ॥ ९७ ॥**

'**यः**' आहारः । '**सत्पात्रे**' मुनिपुङ्वरूपे सुपात्रे । यदुक्तम्-मिथ्यादृष्टिसहस्रेषु, वरमेको ह्यणुव्रती । अणुव्रति-सहस्रेषु, वरमेको महाव्रती ॥ १ ॥

महाव्रति-सहस्रेषु, वरमेको हि तात्त्विकः । तात्त्विकस्य समं पात्रं न भूतं न भविष्यति ॥ २ ॥

'**नियोज्यते**'-दीयते । '**एष एव अमृताहारो**'-अमृततुल्यः आहारः । '**यस्य कल्पकोटिशतैरपि**'-कोटिशतयुगान्तैरपि । **रसो न हीयते**-पुण्यानुबन्धरूपः रसः न क्षीयते ॥ ९७ ॥

**अभ्युत्तस्थौ विमृश्येति स्थालमादाय सुस्थिरः । उदञ्चदुच्चरोमाञ्चकञ्चुकः स व्यराजत ॥ ९८ ॥**

**उद्भूतसुकृताङ्कूरः कृतधर्मद्रुमावृतिः । दारिद्र्यद्वेषियुद्धाय सन्नद्ध इव शुद्धधीः ॥ ९९ ॥ (युग्मम्)**

'**इति विमृश्य**'-विचिन्त्य । '**सुस्थिरः**' निश्चलः । '**स्थालं**'-भोजनपात्रम् । '**आदाय**'-गृहीत्वा । '**अभ्युत्तस्थौ**'-

अभ्युत्तिष्ठति स्म । **'उदञ्चदुच्चरोमाञ्चकञ्चुकः'** उदगच्छदुच्च-रोमाञ्चितदेहः । **'सः'** सङ्गमः । **'व्यराजत'**-राजते स्म ॥ ९८ ॥ पुनः कीदृशः स सङ्गमः ? **'उद्भूतसुकृताङ्कूरः'**-उत्पन्नपुण्याङ्कूरः । **'कृतधर्मद्रुमावृतिः'**-कृता धर्मद्रुमे आ सामस्त्येन वृतिर्येन सः । **'दारिद्र्यद्वेषियुद्धाय'**-दौर्गत्यशत्रु-सङ्ग्रामाय । **'सन्नद्धः इव'**-कवचित इव । **'शुद्धधीः'**-विमलमतिः । सन्नद्धः सैनिकोऽपि रोमाञ्चितदेहः-उत्साहाङ्कूरितः सुस्थिरश्च भवति ॥ ९९ ॥

**स तं विज्ञपयामास कलावानसि हे मुने ! । यत्तुल्या राज्ञि रङ्केऽपि रुचिः स्फुरति ते शुचिः ॥ १०० ॥**

**'स'** सङ्गमः । **'तं'** मुनिम् । **'विज्ञपयामास'**-विज्ञपयति स्म-हे मुने त्वं कलावान् अध्यात्मकलायुक्तः । चन्द्रपक्षे-चन्द्रमाः । 'कलाशशैणच्छायाभृद्' इति हैम्याम् । **असि** वर्तसे । यतः **ते** तव । **'शुचिः'**-पवित्रः । **रुचिः**-अभिलाषः । पक्षे-किरणः 'रोचिरस्त्ररुचिशोचिरंशुगः' इति हैम्याम् । **'राज्ञि'**-नृपे । **'रङ्के'**-दरिद्रे । **'तुल्या'**-समाना (अस्ति) यदुक्तम्-''निर्गुणेष्वपि सत्त्वेषु, दयां कुर्वन्ति साधवः । नहि संहरते ज्योत्सनां, चन्द्रश्चाण्डालवेश्मनि ॥ १०० ॥

**अचिन्तितोपलम्भेन स्पर्शेन पदयोस्तव । त्वद्गुणै रक्तधातोर्मे कल्या कल्याणताऽजनि ॥ १०१ ॥**

हे मुने । **तव पदयोः 'अचिन्तितोपलम्भेन'**-असङ्कल्पित-प्राप्तेन स्पर्शेन । सुवर्ण पक्षे स्पर्शमणिना । **'पारसमणि'** इति भाषायाम् । **त्वद्गुणैः रक्तधातोः**-रक्ताः तन्मया रसादिसप्तधातवः यस्य तस्य **मे** । पक्षे-ताम्रधातोः । 'ताम्रं म्लेच्छमुखं शुल्वं रक्तं द्व्यष्टमुदुम्बरमिति' हैम्याम् । **'कल्या'**-पट्वी । **'कल्याणता'**-भद्रता । पक्षे-सुवर्णता । 'कल्याणं कनकमिति' हैम्याम् । **'अजनि'**-जाता । यथा स्पर्शमणिना रक्तधातोः सुवर्णता भवति तद्वत् रक्तधातोर्मे कल्याणता जातेत्यर्थः ॥ १०१ ॥

**मैत्रीविलास-प्रासाद ! प्रसादं तत्प्रभो कुरु । करुणातरुणीपुण्यतरतारुण्य तारय ॥ १०२ ॥**

**'तत्'**-तस्मात् । **'मैत्रीविलासप्रासाद'**-मैत्रीक्रीडामन्दिर । **'प्रभो'**-मुने । **'प्रसादं कुरु'**-अनुग्रहं कुरु । **'करुणातरुणीपुण्यतरतारुण्य'**-कृपाकामिनीपवित्रतरयौवन । मां **तारय** ॥ १०२ ॥

**इमं दोषाकरं बालं दुर्बलं विगलद्वसुम् । निजसम्भावनेनात्र, पवित्रय महाव्रतिन् ॥ १०३ ॥**

**'महाव्रतिन्'**-हे महामुने । शङ्कर-पक्षे-महादेव । 'महाव्रती वह्निहिरण्यरेताः' इति हैम्यां शिवनामसु । अत्र गृहे **'निजसम्भावनेन'**-स्वागमनेन । पक्षे स्वोपरिधारणेन । **'इमं-बालं'** शिशुम् । पक्षे बालचन्द्रम् । **'पवित्रय'**-पुनीहि । कथम्भूतं बालम् ? **'दोषाकरं'**-दोषसमूह-युक्तम् । पक्षे-निशाकरं (दोषाकरं) चन्द्रम् । **'दुर्बलं'**-निःशक्तं पक्षे-अल्पप्रकाशत्वात् बलविहीनम् । **'विगलद्वसुं'**-अविद्यमानद्रविणं पक्षे-अल्पकिरणम् । यथा महादेवः स्वजटायां बालचन्द्रं धारयति तथा हे मुने । मां मद्गृहागमनेन पुनीहि इत्यर्थः ॥ १०३ ॥

**पूर्वरङ्गं विधायेति सुधाऽऽसारकिरा गिरा । आनन्दाश्रुजलोद्गारैश्छटाच्छोटं किरन्निव ॥ १०४ ॥**

**निषिञ्चन्निव भावद्रुं पङ्कं प्रक्षालयन्निव । जलपूर्वतया पूर्णं दानं दातुमिवोद्यतः ॥ १०५ ॥**

**सप्रसादं सप्रमोदं, सादरं भावभास्वरम् । भक्तिदक्षं गताकाङ्क्षमस्तकक्षमशिक्षितम् ॥ १०६ ॥**

**तस्मै परमपात्रायापरमोऽपि स्वकर्मतः । युतः परमया भक्त्या, परमान्नमदात्तदा ॥ १०७ ॥**

**'इति सुधाऽऽसारकिरा'**-अमृतवृष्टिकारिण्या । **'गिरा'**-वाण्या । **'पूर्वरङ्गं'**-उपक्रमं भूमिकां । **'विधाय'**-कृत्वा । **'तस्मै परमपात्राय'**-मुनये तदा । **'परमान्नं'**-पायसम् । **'अदात्'**-अयच्छत् । कीदृशः स सङ्गमः ? **आनन्दाश्रुजलोद्गारैः-**

प्रमोदबाष्पनीरनिर्गमैः । **'छटाच्छोटं'**-भास्वरबिन्दून् 'छांटणा' इति भाषायाम् । **'किरन्निव'**-स्रवन्निव । **'भावद्रुं'**-भाववृक्षं अश्रुजलैः निषिञ्चन्निव । **'पङ्कं'**-कर्दमं अश्रुजलैः प्रक्षालयन्निव । **'जलपूर्वतया'**-पूर्णं दानं दातुं उद्यत इव । जलदानपूर्वकमेव दानं दीयते इति प्राचीनरूढिः । अत्र जलदानस्थाने हर्षाश्रुजलमेव ज्ञेयम् । **'सप्रसादं'**-प्रसन्नतायुतं । **'सप्रमोदं'**-सहर्षम्। **'सादरं'** आदरसहितम् । **'भावभास्वरं'**-भावोज्ज्वलम् । **'भक्तिदक्षं'**-भक्तिकुशलम् । **'गताकाङ्क्षं'**-निष्कामम् । **'अस्तकक्षं'**-कोटिरहितं, अनुपममित्यर्थः । **'अशिक्षितं'**-शिक्षारहितं, न केनाऽपि शिक्षितं यथा स्यात् तथा । एतानि क्रियाविशेषणानि। पुनः कथम्भूतः स सङ्गमः ? **'स्वकर्मतः'**-निजभाग्यात् । **'अपरमोऽपि'**-अपगता रमा-लक्ष्मीः यस्मात् स अपरमोऽपि अनुपमोऽपि वा । **परमया भक्त्या युतः** ॥ १०४ ॥ १०५ ॥ १०६ ॥ १०७ ॥

**रसः शान्तो मुनेर्ध्यानात्करुणश्चात्मनिन्दया । दानप्रवृत्तितो वीरश्चासम्भावनयाऽद्भुतः ॥ १०८ ॥**

**वचस्विनां वचोऽतीतमगम्यं योगिनामपि । अमेयं मतिमानानां चतुःसङ्करमाप सः ॥ १०९ ॥ ( युग्मम् )**

**मुनेः ध्यानात् शान्तः रसः । आत्मनिन्दया च करुणः रसः । दानप्रवृत्तितः वीरः रसः । 'असम्भावनया'** अकल्पनया **अद्भुतः रसः** । **'स सङ्गमः चतुःसङ्करं'** चतुः संयोगं चतुर्णां रसानां मिश्रणम् । **'आप'** प्रापत् । कथम्भूतं चतुः-सङ्करम् ? **'वचस्विनां'**-वाग्मिनाम् । **'वचोऽतीतं'**-वचनातीतम् । **'योगिनामपि'** योगधारिणामपि । **'अगम्यम्'** अपार्यम् । **'मतिमानानां'** मतिरेव मानं प्रमाणं येषां ते मतिमानास्तेषाम् । **'अमेयं'**-अप्रमेयम् ॥ १०८ ॥ १०९ ॥

**मुनये क्षीरदानम्—**

**प्रगृहीताभिधां भिक्षां दक्षः षष्ठीं विचार्य सः । प्रगृहीतां मुनिश्चक्रे तदनुग्रहसाग्रहः ॥ ११० ॥**

भिक्षा सप्तविधा भवति । तद्यथा–''संसट्ठ–मसंसट्ठा उद्धड तह अप्पलेविया चेव । उग्गहिआ पग्गहिआ उज्झियधम्मा य सत्तमिआ ॥''

(१) संसृष्टाभ्यां तत्खरण्टिताभ्यां हस्तपात्राभ्यां भिक्षा संसृष्टा ।

(२) असंसृष्टाभ्यां तु ताभ्यामसंसृष्टा ।

(३) स्थाल्यादिभ्यः स्वार्थं भोजनाय उत्क्षिप्ता 'उद्धृता' ।

(४) निर्लेपं पृथुकादि, तत्स्वरूपा अल्पलेपा ।

(५) भोजनकाले शरावाद्याहितभोज्यवस्तुमध्यादुत्पाटिता उद्गृहीता ।

(६) भोजनार्थं करोपात्तभोज्यमध्याद् दातुमीष्टा प्रगृहीता ।

(७) अन्यानभिलष्यमाणा परित्यज्यमानभक्ताद्यन्नरूपा उज्झितधर्मा ।

**'दक्षः'** निर्दोषाऽन्नग्रहणे कुशलः । स मुनिः **प्रगृहीताभिधां षष्ठीं भिक्षां विचार्य तदनुग्रहसाग्रहः**–सङ्गमानुग्रहपरायणः मुनिः तां भिक्षां **'प्रगृहीतां'** उपात्ताम् । **चक्रे** कृतवान् । अगृह्णादित्यर्थः ॥ ११० ॥

**तत्पुण्यराशिपल्यस्य धर्मलाभाशिषा शिखाम् । मुनिर्निर्माय निर्माय-चित्तः स्वाश्रयमाश्रयत् ॥ १११ ॥**

**'तत्पुण्यराशिपल्यस्य'** सङ्गमपुण्य पुञ्जपल्यस्य । पल्यो धान्यमानविशेषः । **'धर्मलाभाशिषा'** धर्मलाभप्रदानेन । **'शिखां'** धर्मलाभदानरूपाम् । **'निर्माय'** कृत्वा । **'निर्माय-चित्तः'** मायारहितमानसः । **'मुनिः'** तपोधनः । **'स्वाश्रयं'** निजधामम्। **'आश्रयत्'** गतः ॥ १११ ॥

**माता गृहान्तरायाता, तस्मै सुस्मेरमानसा । निषण्णायाविषण्णात्मा, पायसं पुनरप्यदात् ॥ ११२ ॥**

'**सुस्मेरमानसा**'-प्रफुल्लचित्ता । '**गृहान्तरायाता**'-अन्यगृहादागता । '**अविषण्णात्मा**'-प्रसन्नात्मा । '**माता**' धन्या । '**तस्मै निषण्णाय**'-उपविष्टाय सङ्गमाय । '**पायसं**'-परमान्नम् । '**पुनरपि**'-भूयोऽपि । '**अदात्**'-यच्छति स्म ॥ ११२ ॥

**भोजयेन्मधुरं स्निग्धमम्बा बालं बलादपि । भुक्तोऽयं स्वयमेवेति, हृष्टा नाचष्ट किञ्चन ॥ ११३ ॥**

'**अम्बा**'-माता । '**बलादपि**'-आग्रहपूर्वकमपि । '**बालं**'-शिशुम् । '**स्निग्धं**'-मधुरं मृष्टमन्नम् । '**भोजयेत्**'-भोजनं कारयेत् । अयं सङ्गमस्तु स्वयमेव भुक्तः इति विचिन्त्य । '**हृष्टा**' प्रमुदिता । **किञ्चन** । '**नाचष्ट**' न कथितवती ॥ ११३ ॥

**अहो काऽप्यस्य बालस्य लोभसंक्षोभसङ्गतिः । मुनिदानफले येन, पश्य माताऽपि वञ्चिता ॥ ११४ ॥**

'**अहो**' इत्यामन्त्रणे । '**पश्य**'-विलोकय । **अस्य बालस्य** । '**लोभसंक्षोभसङ्गतिः**'-लोभसंक्षोभसङ्गमः । **काऽपि** अद्भुता । **येन मुनिदानफले माताऽपि वञ्चिता** । दानाऽवसरे मातुरनुपस्थितेः कवेरियं कल्पना ॥ ११४ ॥

**आ तूर्णं पुण्यपूर्णस्य, प्रमोदभरशालिनः । अमृताहारतस्तस्मात्, तस्यासीदाशितंभवः ॥ ११५ ॥**

**आ** वाक्यारम्भे पादपूर्तावव्ययम् । '**प्रमोदभरशालिनः**'-आनन्दातिशयशालिनः । '**पुण्यपूर्णस्य**'-सुकृतपूरितस्य । '**तस्य**' सङ्गमस्य । '**तस्मात् अमृताहारतः**' मुनिदानात् सुधाभूतात् भोजनात् । '**तूर्णं**' क्षिप्रम् । अतूर्णमित्यपि पाठः '**अतूर्णं**' शनैः शनैः । '**आशितंभवः**'-तृप्तिः । '**आसीत्**'-अभवत् ॥ ११५ ॥

**अथाचान्तः स विश्रान्तः, प्रशान्ताभ्रान्तमानसः । अर्जितोर्जितराज्यश्री-रिवानन्दमविन्दत ॥ ११६ ॥**

**अथ** । **'आचान्तः'** गृहीतचुलुकः । **'प्रशान्ताभ्रान्तमानसः'**-प्रशान्तं अभ्रान्तं-भ्रान्तिरहितं च मानसं यस्य सः । **'विश्रान्तः'**। **'सः'** सङ्गमः । **'अर्जितोर्जितराज्यश्रीः इव'**-प्राप्त-महाराज्यलक्ष्मीः इव । **'आनन्दं'**-मुदम् । **अविन्दत**-प्रापत् ॥ ११६ ॥

**प्रसाधितस्य तत्पुण्यपाकस्य प्रगुणैर्गुणैः । अप्रमेयमपि प्राज्ञाः सम्भावयत सौरभम् ॥ ११७ ॥**

**'प्रगुणैः'**-सज्जैः । **'गुणैः'**-आत्मगुणैः । पाकपक्षे-सूदैः । 'सूदस्त्वौदनिको गुणः' इति हैम्याम् । **'प्रसाधितस्य'**-निर्मितस्य । **'तत्पुण्यपाकस्य'** सङ्गमपुण्यविपाकस्य । पक्षे-पवित्रभोजनस्य । **'अप्रमेयमपि'**-अनन्तमपि । **'सौरभं'**-सुरभि । **'प्राज्ञाः'** हे बुद्धिमन्तः ! । **'सम्भावयत'**-चिन्तयत ॥ ११७ ॥

**तथाहि-मङ्गल्यं दक्षिणावर्त्तं तीक्ष्णघाति रसायनम् । गुर्वदाह्यं पवित्रं च नम्रं दानं सुवर्णति ॥ ११८ ॥**

**दानं सुवर्णति** सुवर्णमिव जायते । कथम् ? **'मङ्गल्यं'** उपद्रवोपशमनात् । सुवर्णपक्षे दारिद्र्यामङ्गलाऽपनयनात् मङ्गलकारि। **'दक्षिणावर्तं'** जीवानुकूल्यात् । पक्षे तप्तं सुवर्णं दक्षिणावर्तं करोति । **'तीक्ष्णघाति'** तीक्ष्णं विषं मोहविषं तद्घातित्वात् तीक्ष्णघाति । 'तीक्ष्णं गरलः' इति हैम्याम् । पक्षे तीक्ष्णं लोहं तद्घाति । लोहं स्वर्णेन म्रियते इति धातुवादिनः। तीक्ष्ण-कृष्णामिषे अयः इति हैम्याम् । **'रसायनं'** रसस्य शान्तरसस्य अयनात् प्राप्तेः रसायनम् । पक्षे रसेन पारदेन अयनं यस्य । **'गुरु'** त्रिकोटिशुद्धत्वात् । पक्षे-गुरुत्वात् गुरु । **'अदाह्यं'** कुविकल्पादिना अग्निना अदाह्यम् । पक्षे अग्निना अदाह्यम्। **'पवित्रं'** निजफलदानात् । पक्षे-कुथिताऽभावात् । **'नम्रं'** विनययुक्तम् । पक्षे-नमनशीलम् । एवमष्टगुणोपेतं दानं सुवर्णायते। सुवर्णमपि अष्टगुणोपेतं भवति यदुक्तं संवेगरंगशालायां भाव-साधु-वर्णने-विसघाइ रसायण मंगलत्थविणीए

पयाहिणावत्ते। गुरुए अडज्झऽकुच्छे, अट्ठ सुवन्ने गुणा हुंति ॥ ८८४८ ॥ इय मोहविसं घायइ, सिवोवएसा रसायणं होइ। गुणओ य मंगलत्थं, कुणइ विणीओ य जोगोत्ति ॥ ८८४९ ॥ मग्गणुसारि पयाहिण-गंभीरो गरुयओ तहा होइ । कोहग्गिणा अडज्झो, अकुच्छ सइ सीलभावेणं ॥ ८८५० ॥ ॥ ११८ ॥

**दाक्षिण्याद्धातुवादोत्थमुपदेशात्तु धातुजम् । दानं स्वारिकं हेम कुमारं गीयतेऽधिकम् ॥ ११९ ॥**

**'दाक्षिण्यात्'**-नैपुण्यात् । **'धातुवादोत्थं'**-धातुवादजनितं । **उपदेशात्तु** धातुजं हेम । यदुक्तम्-''रससिद्धिः कला विद्या, धर्मस्तत्त्वं धनार्जना । विना गुरूपदेशेन, प्राज्ञस्यापि न सिध्यति ॥'' 'इदं दानं हेम-सुवर्णं तु । **'स्वारसिकं'**-स्वरसेन निर्वृत्तं स्वारसिकम् । **कुमारं** शुद्धसुवर्णं **अधिकं गीयते** - कीर्त्यते । अयं भावः-धातुजं हेम दाक्षिण्य-धातुवादोपदेशादिबहुवस्तूनि अपेक्षते । इदं दानहेम स्वारसिकं निरपेक्षमस्ति । अत एव तत् कुमारं शुद्धसुवर्णं गीयते ॥ ११९ ॥

**महामहार्घ्यं दुर्लभ्भं, स्वयंभूर्भूतदोषहृत । शालिग्रामभवं दानमेतत् स्वर्णं कुमारकम् ॥ १२० ॥**

**'महामहार्घ्यं'**-अतीव अमूल्यम् । **'दुर्लभ्यं'**-दुष्प्रापम् । **'स्वयम्भूः'** गुर्वाद्युपदेशरहितं स्वयं भवतीत्येवंशीलम् । स्वर्णपक्षे-न धातुजम् । **'भूतदोषहृत्'**-अतीतकालार्जितपापहारि । पक्षे-प्रेतदोषापहारि । **'शालिग्रामभवं'**-शालिग्रामे भवं-जातम् । **एतत् दानं कुमारकं** अतिशुद्धं **स्वर्णं** कथ्यते ॥ १२० ॥

**कुमारकनकाकारं दानमत्राजनिष्ट यत् । इतीव संनिवेशोऽयं शालिग्राम इतीरितः ॥ १२१ ॥**

**'अत्र यत् कुमारकनकाकारं'**-शुद्धस्वर्णसमानम् । पक्षे-कार्तिकेयसमानम् । कार्तिकेयः किल शङ्करपुत्रः । **'दानम्**।

**अजनिष्ट'** जातम् । **'इतीव अयं संनिवेशः'** ग्रामः । **'शालिग्राम'** 'इति **ईरितः'**-कथितः । यतः शिवलिङ्गे हि **'शालिग्राम'** इति संज्ञा प्रचलिताऽस्ति ॥ १२१ ॥

**वत्सकान्यनुगच्छन्ति, येन गावः समुत्सुकाः । शिश्रिये वत्सपालं तद्दूरात् तं धर्मकामधुक् ॥ १२२ ॥**

**'येन समुत्सुकाः'**-अतीवोत्कण्ठिता **गावः** । **'वत्सकानि'** निजापत्यानि । **'अनुगच्छन्ति'**-अनुयान्ति **'तत्'** तथा **'दूरात्'**। **'धर्मकामधुक्'**-धर्मकामधेनुः । **'तं वत्सपालं'** सङ्गमम् । **'शिश्रिये'**-आश्रितवती । यथा धेनुः वत्सानि अनुगच्छति तथा धर्मकामधेनुः सङ्गमं श्रितवती इत्यर्थः ॥ १२२ ॥

**मिथ्यात्वपुद्‌गलानेव मन्ये मदनकोद्रवान् । रुरोद विमलीकर्तुमिव धन्याऽऽत्मजन्मनः ॥ १२३ ॥**

**'धन्या'**-सङ्गमजननी । **'आत्मजन्मनः'**-पुत्रस्य । **'मदनकोद्रवान्'**-तुच्छधान्यविशेषा मदनकोद्रवाः तत्समान् मिथ्यात्वपुद्‌गलान् । **'एवः'** अवधारणे । **'विमलीकर्तुमिव'** । **'रुरोद'**-रोदिति स्म इत्यहं **मन्ये** ॥ १२३ ॥

**शतैः सुपाटकः प्राप्यः सहस्त्रैः प्रातिवेश्मिकः । तस्यास्तु प्रतिवेशिन्यः प्राप्ताः कोटिं परां पुनः ॥ १२४ ॥**

द्रष्टव्या-७१ श्लोकटीका ॥ १२४ ॥

**अषडक्षीणमंत्रोऽयं पूर्वं स्वस्मै प्रकाश्य यः । पायसोपक्रमं चक्रे परलोकफलप्रदम् ॥ १२५ ॥**

**'यः अयं अषडक्षीणमंत्रः'**-न विद्यन्ते षडक्षिणी यत्र तथाविधा गुप्तमंत्रणा विद्यते यस्य स सङ्गमः, दानपूर्वं दानानन्तरं वा सङ्‌गमेन न स्वमात्रे कथितं तस्मात् अषडक्षीणमंत्रः स सङ्गमः । **'पूर्वं'**-प्राक् । **'स्वस्मै'** आत्मने । **'प्रकाश्य'** निवेद्य । **'परलोकफलप्रदं'** कृत्यम् । **'पायसोपक्रमं'** 'पायसेन' परमान्नेन उपक्रमम्-आरम्भम् । **'चक्रे'**-करोति स्म ॥ १२५ ॥

**कन्या सूत्रं गजपटी, स्वयंभूर्देवता तथा । बालेन्दुरुपमानानि स्युस्तद्दानस्य शैशवे ॥ १२६ ॥**

'**तद्दानस्य**'-संगमदानस्य । '**शैशवे**'-बालत्वे प्रारंभो इत्यर्थः । '**कन्या**' कुमारी स्त्री । '**सूत्रं**' कर्तितं सूत्रम् । '**गजपटी**'-देशान्तरीयं वस्त्रम् । '**तथा स्वयंभूः देवता**' ब्रह्मा । **बालेन्दुः**-बालचन्द्रः-एतानि '**उपमानानि स्युः**' । यथा एतानि वस्तूनि क्रमेण वर्धमानानि पूर्णतां प्राप्नुवन्ति, तथा तद्दानमपि पूर्णतां गमिष्यति । अयं भावः-कुमारी, पत्नी-माता मातामही इत्यादि स्वरूपं प्राप्य विशाल-परिवारस्य कारणं भवति । सूत्रं अन्ततोगत्वा वस्त्रं भवति । स्वयंभूः ब्रह्मा एकोऽहं बहु स्यामिति भावनया पौराणिकमतेन समग्रसृष्टेर्मूलकारणं भवति । बालचन्द्रः प्रतिपच्चन्द्रः पूर्णः चन्द्रो भवति । तथेदं दानमपि विस्तारं गमिष्यति ॥ १२६ ॥

**श्रीनाभेयप्रपौत्रः श्री-श्रेयांसो जातिसंस्मरः । कलाकल्पलतामूलं मूलदेवश्च भूपभूः ॥ १२७ ॥**

**नागरी गुणगौराङ्गी, चन्दना नृपनन्दना । ग्राम्योऽयं बालगोपालः प्रदातेत्यद्भुतं पुनः ॥ १२८ ॥**

'**श्रीश्रेयांसः**' '**श्रीनाभेयप्रपौत्रः**'-श्रीआदिनाथ-प्रपौत्रः-श्रेयांसः । '**जातिसंस्मरः**'-जातिस्मरणज्ञानवान् आसीत् । '**मूलदेवः**' । चः समुच्चये । '**कलाकल्पलतामूलं**'-कलाकल्पवल्लिकन्दम् । '**भूपभूः**'-राजपुत्रः अभवत् ॥ १२७ ॥ '**गुणगौराङ्गी**'-गुणोज्ज्वलाङ्गी । **चन्दना** । '**नागरी**' नगरे भवा पौरी इत्यर्थः । '**नृपनन्दना**'-राजपुत्री आसीत् । '**अयं पुनः ग्राम्यः**' ग्रामे भवः ग्राम्यः । '**बालगोपालः**'-बालश्चासौ गोपालश्चेति । '**प्रदाता इति अद्भुतम्**' । अन्ये दातारः अनेकगुणवैभवसमलङ्कृताः आसन् । अयं तु अज्ञो ग्रामीणो गोपशिशुः प्रदाता इति अत्र आश्चर्यम् ॥ १२८ ॥

**चन्दनायाः किमाश्चर्यं, स्वशिष्यायाः स्वयं प्रभुः । सामग्र्याः कारको जज्ञे, चतुर्धाभिग्रहाग्रही ॥ १२९ ॥**

'**चन्दनायाः किमाश्चर्यं**' किंचित्रम् ? यतः '**चतुर्धाभिग्रहाग्रही**' द्रव्यक्षेत्रकालभावाभिग्रहाग्रही । '**स्वयं प्रभुः**'-

श्री महावीरदेवः । **'स्वशिष्यायाः सामग्र्याः'** दानसामग्र्याः । **'कारको'**-विधायकः । **'जज्ञे'**-अभवत् । अत्र तु नास्ति साक्षात्तीर्थकरः नापि च राजपुत्री तथापि महाफलं दानमभूदिति चित्रम् ॥ १२९ ॥

**मूलदेवेन तत्कालं स्वेच्छा स्वच्छतयोदिता । बालेनापि महेच्छेना-नेन मौनं कृतं हितम् ॥ १३० ॥**

**'मूलदेवेन स्वेच्छा'**-निजकामना । **'तत्कालं'**-दानक्षणे एव । **'स्वच्छतया'**-निर्मलतया । **'उदिता'**-कथिता प्रकटीकृतेत्यर्थः । **'अनेन महेच्छेन'**-उदारेण । सङ्गमेन **बालेनापि हितं मौनं कृतमिति** । निष्कामं दानं दत्तम् । मूलदेववत् मनसि न कापि कामना कृतेत्यर्थः ॥ १३० ॥

**अनुदानं पुरो मातुर्मौनं यत्सङ्गमो व्यधात् । मन्ये सत्यं तदैवाभून्मौनं सर्वार्थसाधकम् ॥ १३१ ॥**

**'अनुदानं'**-दानानन्तरम् । **'मातुः'**-जनन्याः । **'पुरः'**-अग्रे । **'सङ्गमः यत् मौनं व्यधात्'**-अकरोत् । **'तदैव'** तत्काले एव । **'मौनं सर्वार्थसाधकं'** इति लोकरूढं सूत्रम् । **'सत्यम् अभूत्'** इति **'मन्ये'** ॥ १३१ ॥

**तदार्जवं वासना सा, दुष्प्रापाऽस्तु कलौ नृणाम् । दाने दत्ते तु यत्तस्य, मौनं तदपि दुष्करम् ॥ १३२ ॥**

**'कलौ'**-कलिकाले । **'नृणां'**-मानवानाम् । **'तदार्जवम्'**-तत् सङ्गमस्य ऋजुत्वम् । **'सा वासना'**-सङ्गमस्य सा भावना। **'दुष्प्रापा'**-दुर्लभा अस्तु-भवतु । किन्तु **'दाने दत्ते तु यत् तस्य'** केवलं मौनं तदपि दुष्करम् ॥ १३२ ॥

**महादानेऽपि यत्तस्य, न सुरा ववृषुर्वसु । दातुं किल व्यलम्बन्त, तत्प्रभूतं भवान्तरे ॥ १३३ ॥**

**'तस्य'** सङ्गमस्य । **'महादानेऽपि यत् सुराः'**-देवाः । **'वसु'** द्रव्यं । **'न ववृषुः'**-अवर्षन् । तत्र कविः उत्प्रेक्षतेः **'तत् भवान्तरे'**-आगामिभवे । **'प्रभूतं'**-पुष्कलं द्रव्यं **दातुं** देवाः किल **व्यलम्बन्त**-विलम्बितवन्तः ॥ १३३ ॥

**न स्थानं धर्मसंस्थानं, न चास्य विमलं कुलम् । नोपदेशः पुण्यदेशः, सन्निधिर्न धियां निधिः ॥ १३४ ॥**

**इतीवानवधानेन, संमोहेनावधीरितः । स कर्मविवरं प्राप्य, मन्ये स्वार्थमसाधयत् ॥ १३५ ॥ (युग्मम्)**

'**अस्य सङ्गमस्य न धर्मसंस्थानं**'-धर्मस्य संस्थानं-स्थितिः यत्र तादृशं धर्मसंस्थानं-**स्थानम्** । '**न च विमलं**'-उज्ज्वलं कुलम् । '**न पुण्यदेशः**' पुण्यस्य देशः-विभागो यत्र स न पुण्यदेशः । '**उपदेशः**' मुनीनामुपदेशः '**न धियां**'-न बुद्धीनाम् । '**सन्निधिः**' समीपम् । अत्रापि नकारो द्रष्टव्यः । **निधिः** अर्थसञ्चयः नास्ति ॥ १३४ ॥

'**इतीव अनवधानेन**'-असावधानेन । '**संमोहेन**'-मोहराजेन । '**अवधीरितः**'-अवगणितः । '**स**'-सङ्गमः । '**कर्मविवरं**'-कर्म-च्छिद्रम् । '**प्राप्य**'-लब्ध्वा । '**स्वार्थं**'-निजप्रयोजनम् । '**असाधयत्**'-साधितवानिति । '**मन्ये**' आशङ्के इति कविवचनम् ॥ १३५ ॥

**दाताऽऽहारस्य तं भुक्तं, तृणायासौ न मन्यते । तेनापरिणतस्तस्य, विचक्रेऽतिक्रुधेव सः ॥ १३६ ॥**

'**आहारस्य**'-पायसस्य । '**दाता**' असौ सङ्गमः । '**तं भुक्तं**'-आहारम् । '**तृणाय**'-अपिरत्राध्याहार्यः, '**न मन्यते**'-तृणतुल्यमपि न गणयतीत्यर्थः । '**तेन अतिक्रुधा इव**'-अतिरोषेण इव । '**सः आहारः**'-अपरिणतः जठरे अपक्व आहारः । '**तस्य विचक्रे**'-विकारं गतः ॥ १३६ ॥

**कुञ्चिका पुण्यकोशस्य तस्य गूढा विशूचिका । सूचिका गुणयोगेऽभून्न तु दोषस्य सूचिका ॥ १३७ ॥**

'**तस्य**'-सङ्गमस्य । '**गूढा**'-गुप्ता । '**विशूचिका**'-सद्योघाती उदरातङ्कः '**अभूत्**' । कथम्भूता विशूचिका ? '**पुण्यकोशस्य**'-सुकृतनिधेः । '**कुञ्चिका**'-पुण्यकोशोद्घाटने कुञ्चिका इत्यर्थः । '**गुणयोगे**' - सद्गुणसंयोगे । पक्षे

सूत्रयोगे। '**सूचिका**'-सूचितकारिणी । पक्षे सूची । इत्थं सा विशूचिका गुणकारिणी अभवत् '**न तु दोषस्य सूचिका**' कथयित्री ॥ १३७ ॥

**प्रायः स्मरत्यभावेऽपि हा मातरिति दुःखितः । सा प्रत्युत मुनिध्यानात् तस्यासन्नापि विस्मृता ॥ १३८ ॥**

'**प्रायः**' मातुः '**अभावेऽपि**' '**हा मातः**' '**इति**' जल्पन् दुःखितो '**बालः स्मरति**' । असतीमपि मातरं स्मरतीत्यर्थः । '**तस्य**' सङ्गमस्य । '**प्रत्युत सा**' धन्या माता '**आसन्नापि**'-समीपगाऽपि । '**मुनिध्यानात्**' मुनिध्यानप्रभावात् । '**विस्मृता**'-विस्मृतिं गता ॥ १३८ ॥

**प्रायः कण्टकभङ्गोऽपि स्याद्धर्मे रङ्गभङ्गदः । सङ्गमस्य पुनः प्राण-संशयोऽपि न भावभित् ॥ १३९ ॥**

'**प्रायः**' '**कण्टकभङ्गोऽपि**'-कण्टकवेधोऽपि मनाग् दुःखमपि इत्यर्थः । '**धर्मे**' सुकृते । '**रङ्गभङ्गदः**'-उल्लासमर्दी । '**स्यात्**'-भवेत् '**सङ्गमस्य-पुनः प्राण-संशयोऽपि भावभित्**'-भावभञ्जको । '**न अभूत्**'-न जातः ॥ १३९ ॥

**स दध्यौ धीरधौरेयः, पात्रादानबलोज्ज्वलः । मृतेरवश्यंभाविन्या, भावज्ञानां कुतो भयम् ॥ १४० ॥**

'**पात्रादानबलोज्ज्वलः**'-सुपात्रदानबलनिर्मलः । '**धीरधौरेयः**' धीराग्रणीः । '**स**'-सङ्गमः । '**दध्यौ**' चिन्तयति स्म। किमित्याह-'**अवश्यम्भाविन्याः**' अवश्य भवतीत्येवंशीलायाः।'**मृतेः**' मरणात्।'**भावज्ञानां**'-तत्त्वज्ञानाम्।**कुतः भयम्**? ॥ १४० ॥

**पान्थः पथि स दुःखी यो याति शम्बलदुर्बलः । पात्रदानेन संपन्नं, शम्बलं सबलं तु मे ॥ १४१ ॥**

'**यः पान्थः**'-प्रवासी । '**पथि**'-मार्गे । '**शम्बल-दुर्बलः**'-पाथेयेन रहितः । '**स दुःखी**' भवति । '**पात्रदानेन तु मे**'-परलोकप्रयाणे । '**सबलं**' सशक्तं । '**शम्बलं**' प्राथेयम् । **सम्पन्नं** प्राप्तम् । अतो नास्ति मे कोपि चिन्तालवः ॥ १४१ ॥

**कम्बलावरणस्यापि, सत्यं मे भाग्यतोऽभवत् । पात्रदानमहापुण्यं, कर्पूरेणाऽऽस्यपूरणम् ॥ १४२ ॥**

'**कम्बलावरणस्यापि**' कम्बलमेव आवरणं वस्त्रं यस्य तस्यापि । '**मे**' मम । **भाग्यतः**–सत्यं निश्चितम् । '**पात्रदान-महापुण्यं**' पात्रे दानात् जातं महापुण्यम् '**कर्पूरेण**'–घनसारेण । '**आस्यपूरणम्**' मुखस्थगनम् । '**अभवत्**' जातम् ॥ १४२ ॥

**पशुदेश्यः पशुप्रेष्यः, क्वाहं सर्वबहिष्कृतः । क्व वा मुनि-महेन्द्रोऽयं, सुमनोराजिशेखरः ॥ १४३ ॥**

क्व अहम् । '**पशुदेश्यः**'–पशुसमः । '**पशुप्रेष्यः**'–पशुदासः । '**सर्वबहिष्कृतः**' सर्वलोकात् निराकृतः ? । '**क्व वा अयं**' । '**सुमनोराजिशेखरः**'–विद्वदावलीमुख्यः । इन्द्रपक्षे–सुमनसां देवानां राजिषु आवलीषु शेखरः मुख्यः । '**मुनिमहेन्द्रः**'–मुनिमुख्यः । पक्षे–इन्द्रः ॥ १४३ ॥

**समग्रा सा क्व सामग्री, क्व मे सर्वविहीनता । विशाला चन्द्रशालाऽसौ, पर्णशालामधिश्रिता ॥ १४४ ॥**

'**क्व सा समग्रा**'–संपूर्णा सामग्री–परमान्न–भोजन–साधुसमागमनादिरूपा ? '**क्व**' च '**मे**' मम । '**सर्व-विहीनता**'–बाह्यान्तरसर्ववैभवरहितता ? । तन्नूनं '**असौ विशाला**'–महती । '**चन्द्रशाला**'–शिरोगृहम् । '**पर्णशालाम्**'–उटजम् । '**अधिश्रिता**'–आश्रिता इति मन्ये । इयं पूर्वोक्ता सामग्री कुटीरकोपरि चन्द्रशाला–समाना जातेत्यर्थः ॥ १४४ ॥

**परान्नं मां तु संस्थाप्य, परमान्नं दधेऽम्बया । मया तु परमार्थान्नं, कृत्वाऽर्थान्निजकानहो ॥ १४५ ॥**

'**अम्बया**'–मात्रा । '**मां तु परान्नं**'–परपिण्डादं परपिंडभोजिनम् । '**संस्थाप्य**'–न्यस्य । '**परमान्नं**'–क्षीरम् । '**दधे**' अधारि । **मया** । '**तु**' किन्तु । **निजकान्** स्वकीयान् । '**अर्थान्**' प्रयोजनान् । '**कृत्वा**'–विधाय । '**अहो**' इत्याश्चर्ये । '**परमार्थान्नं**' मुनिदानजनितं वास्तवभोजनं परलोक–प्रयाण–पाथेयं । '**दधे**'–विदधे कृतम् ॥ १४५ ॥

**साम्प्रतं साम्प्रतं मेऽसौ, प्रशमामृततल्लिका । शरणं शरणं शान्तेर्भूयान्मुनिमतल्लिका ॥ १४६ ॥**

'**साम्प्रतं**'-इदानीम् । '**असौ प्रशमामृततल्लिका**' प्रशान्तिपीयूषतटाकिका-तुल्यः । '**शान्तेः**'-शमस्य । '**शरणं**'-धाम । '**मुनिमतल्लिका**'-श्रमणश्रेष्ठः । '**शरणं**'-आश्रयः । '**भूयात्**'-भवतु इति '**साम्प्रतं**'-उचितम् ॥ १४६ ॥

**सतां निदर्शनीयेऽस्मिन्, रत्नादर्शसुदर्शने । पुरस्कृतो महात्मेव, लघुके प्रतिबिम्बितः ॥ १४७ ॥**

'**सतां**'-सज्जनानाम् । '**निदर्शनीये**'-उदाहरणीये । '**रत्नादर्शसुदर्शने**'-रत्नदर्पण इव शोभनं दर्शनं यस्य तस्मिन् । '**लघुके**'-बालसङ्गमे । '**पुरस्कृतः**' ध्यानतः हृदयस्य अग्रस्थितः । '**महात्मा**'-महामुनिः । '**इव**'-जाने । '**प्रतिबिम्बितः**'-संक्रान्तः ॥ १४७ ॥

**नामुञ्चद्धर्मरङ्गस्तं, तदात्वमपि सङ्गतः । प्राणान्तसङ्कटेऽप्याप्ते, राजपुत्र इवोत्तमः ॥ १४८ ॥**

'**प्राणान्तसङ्कटेऽपि**' मरणापत्तावपि । '**आप्ते**' आगते । '**उत्तमः**' श्रेष्ठः । '**राजपुत्रः इव**'-नृपनन्दन इव । '**तदात्वम्**' तत्कालम् । '**सङ्गतः**' अपि संलग्नः अपि । **धर्मरङ्गः**-सुकृत रागः । '**तं**' सङ्गमम् । '**न अमुञ्चत्**' न अत्यजत् । अर्थात् मृत्युसमयेऽपि तेन धर्मो न त्यक्तः ॥ १४८ ॥

**आचारः कुलमाख्याति, यदि सत्यमिदं वचः । निर्णीतं दान-धैर्याभ्यां, तत्स क्षत्रियगोत्रभूः ॥ १४९ ॥**

'**आचारः**' वर्तनम् । '**कुलम्**' अन्वयम् । '**आख्याति**' कथयति । '**यदि इदं वचः**' वचनं । '**सत्यं**'-समीचीनम् । '**तत्**' तस्मात् । '**दानधैर्याभ्यां**' तस्य विश्राणनधृतिभ्याम् । '**निर्णीतं**' निश्चितम् । **यत्** । '**सः**' सङ्गमः । '**क्षत्रियगोत्रम्**' क्षत्रियकुलप्रभवः ॥ १४९ ॥

**सौभाग्यं सङ्गमस्याहो, नवोढाऽपि सुवासना । प्रिया सतीव सोल्लासा तस्याभूत् सहयायिनी ॥ १५० ॥**

'**अहो**'-आश्चर्ये । '**सङ्गमस्य सौभाग्यं**'-सुभगता । '**नवोढाऽपि**'-तत्कालपरिणीता अपि तत्कालजनिताऽपि इत्यर्थः । '**सुवासना**' शुभा भावना । '**सोल्लासा**' सोत्साहा । '**सती**' पतिव्रता । '**प्रिया**' '**इव**' पत्नी इव । '**तस्य**' सङ्गमस्य । '**सह-यायिनी**' सहगामिनी । '**अभूत्**' अजायत । परलोक-गमनेऽपि सुभावना सार्धमचलदित्यर्थः ॥ १५० ॥

**रूपस्थध्यानतो ध्यात्वा, पञ्चमं परमेष्ठिनम् । समाधान-सुधाकुण्डे कण्ठदघ्ने स मग्नधीः ॥ १५१ ॥**

**निराकृत्य गतिं दिव्यां दानशीलविनाकृताम् । दानध्यानानुसन्धानाद् दानशीलां गतिं ययौ ॥ १५२ ॥**

'**पञ्चमं परमेष्ठिनं**' पञ्चमपदे स्थितं मुनिम् । '**रूपस्थध्यानतो**'-रूपस्थनाम्ना तृतीयध्यानेन । '**ध्यात्वा**'-प्रणिधाय '**समाधान सुधाकुण्डे**' समाधिपीयूष जलाशये । '**कण्ठदघ्ने**' कण्ठप्रमाणे, प्रमाणेऽर्थे "वोर्ध्वं" (३-१-१४२) इति सूत्रेण दघ्नट्-द्वयसट् । '**मग्नधीः**'-निविष्टमतिः । '**सः**'-सङ्गमः ॥ १५१ ॥

'**दिव्यां**'-देवलोक-सम्बन्धिनीम् । '**दानशीलविनाकृतां**' दानब्रह्मचर्यादि धर्मरहिताम् । '**गतिं**' देवगतिम् । '**निराकृत्य**' अनादृत्य । '**दानध्यानानुसन्धानात्**' वितरण-विचारणानुबन्धात् । '**दानशीलां**' दान-प्रधानाम् । '**गतिं**' मनुष्यगतिमित्यर्थः । '**ययौ**' गतः ॥ १५२ ॥

**मर्त्यत्वे देवभोगानां, लब्धिश्चित्रविधायिनी । इतीव सुमनुष्यत्व-सङ्गमं सङ्गमो व्यधात् ॥ १५३ ॥**

'**मर्त्यत्वे**'-मनुष्यत्वे । '**देवभोगानां**'-दिव्यसुखानाम् । '**लब्धिः**'-प्राप्तिः । '**चित्रविधायिनी**'-आश्चर्यकारिणी । '**इतीव**'-सञ्चिन्त्य । '**सङ्गमः** सुमनुष्यत्वसङ्गमं-सुनरत्वसंयोगम् । '**व्यधात्**' अकरोत् ॥ १५३ ॥

**दत्त्वा भुक्त्वा च तत्तादृक् कथं भोक्ष्ये कदन्नकम् । इति ध्यात्वेव तत्याज, निर्व्याजः स स्वजीवितम् ॥ १५४ ॥**

**'तत् तादृक्'**-श्रेष्ठं परमान्नम् । **'दत्वा'**-अर्पयित्वा । **'भुक्त्वा'**-अभ्यवहार्य । **'कदन्नकम्'**-दरिद्रजनोचितं कुत्सितम् अन्नम् । **'कथं भोक्ष्ये'**-खादिष्यामि ? **'इति ध्यात्वा इव'** विचार्य इव । **'निर्व्याजः'** निष्कपटः । **'सः'** सङ्गमः । **'स्वजीवितं'** निजजीवनम् । **'तत्याज'** अजहात् । मृतः इत्यर्थः ॥ १५४ ॥

**अर्थे ग्रन्थिस्थिते को नु, कुवासे निवसेद् बुधः । पात्रदानधनः सैष ग्रामाङ्गे ते ततोऽत्यजत् ॥ १५५ ॥**

**'अर्थे'** धने, **'ग्रन्थिस्थिते'** स्वसमीप स्थिते सति, को नु, **'कुवासे'** कुत्सिते-स्थाने । **'निवसेद्'** स्थितिं कुर्यात् ? **'सैषः'** स एष सङ्गमः । **'पात्रदानधनः'** सुपात्र-दानमेव धनं यस्य सः । **'ततः ते ग्रामाङ्गे'** ग्रामश्च अङ्गं-शरीरं च इति कुत्सिते ग्राम-शरीरे । **'अत्यजत्'** अजहात् ॥ १५५ ॥

**दानमुद्रां करे कृत्वा, दधद्धर्माधिकारिताम् । सतां सेव्यः कथं त्वेष, स्यात्तिरश्चामनुप्लवः ॥ १५६ ॥**

**'दानमुद्रां'** वितरणमुद्रम् । 'महोर' इति भाषायाम् । **'करे'** हस्ते । **'कृत्वा'** विधाय । **'धर्माधिकारितां'** धर्माध्यक्षताम् । **'दधत्'** धारयन् । **'सतां'** सज्जनानाम् । **'सेव्यः'** आराध्यः । **'एषः'** सङ्गमः । **'तिरश्चां'** पशूनाम् । **'अनुप्लवः'** अनुचरः सेवकः । **'कथं स्यात् ?'** न कथमपीत्यर्थः । दानकरणात् स गोपत्वेन कथं तिष्ठेदित्यर्थः ॥ १५६ ॥

**पात्रदानाभिमानाद्यो, नृपस्यापि सहिष्यते । न स्वामित्वं कथं नाम, स्वामीयतु पशूनयम् ॥ १५७ ॥**

**'पात्रदानाभिमानात्'** पात्रविश्राणनगौरवात् । यः शालिभद्रः । **'नृपस्यापि'** श्रेणिकराज्ञोऽपि । **'स्वामित्वं'** आधिपत्यम् ।

'**न सहिष्यते**' न तितिक्षिष्यते । सः '**अयं**' सङ्गमः । '**कथं नाम पशून् स्वामीयतु**' स्वामिरूपान् तिरश्चः इच्छेत् ?- गोपालको भवतु ? न कथञ्चिदित्यर्थः ॥ १५७ ॥

**प्रासाद इव चन्द्रस्य, द्रौपदीचूतपादपः । चक्रशालिचर्मरत्नं, मूलदोषहरः पटः ॥ १५८ ॥**

**सुकृतं सङ्गमस्याहो प्राज्यभावप्रभावतः । तत्रैव दिवसे जज्ञे सर्वसिद्धिसमृद्धिदम् ॥ १५९ ॥ (युग्मम्)**

'**चन्द्रस्य प्रासाद इव**' चन्द्रस्य प्रासाद एकेनैव दिनेन कृतः शुभाय भवति, न बहुदिनैः । तेन चन्द्रप्रासादः क्वापि न दृश्यते । '**द्रौपदीचूतपादप इव**'-द्रौपद्या किल तद्दिनजाताम्रफलैर्नारदः प्रीणितः । '**चक्रशालिचर्मरत्नमिव**' चक्रवर्तिचर्मरत्नवत् । चतुर्दशसु रत्नेषु चर्मरत्नं चक्रवर्तिराज्ञः सद्यः सकलस्कंधावारविस्तारकृद् भवति । '**मूलदोषहरः पट इव**' पटः तद्दिनकृत एव मूलनक्षत्रदोषं हरति नान्यथा ॥ १५८ ॥ तद्वत् '**अहो**' इत्याश्चर्ये । **सङ्गमस्य** । '**सुकृतं**'-पुण्यम् । '**प्राज्यभावप्रभावतः**' प्रचुरसद्भावनानुभावात्। '**तत्रैव दिवसे**' तस्मिन्नेव दिने । '**सर्वसिद्धिसमृद्धिदं**' सकललब्धिसम्पत्तिप्रापकम् । '**जज्ञे**' जातम् ॥ १५९ ॥

**रागद्वेष-विवर्जितार्जवगुण-प्राप्यं सदाप्यक्षयं, विश्वस्याप्युपरि स्थितं न पुनरा-वृत्त्याऽन्वितं निश्चितम् । एकस्यैव हि चेतनस्य रुचितं, नान्यस्य भोगोचितं, दानं सङ्गमवत्सपालकलितं, सिद्धेः सुखं च स्तुमः ॥ १६० ॥**

प्रथमं प्रक्रममुपसंहरन् दानधर्मं प्रशंसन् कविराह-'**सङ्गमवत्सपालकलितं**'-सङ्गमगोपविहितम् । **दानं** परमान्नदानम् । '**सिद्धेः**' मुक्तेः । '**सुखं**' शर्म । **चः** समुच्चये । '**स्तुमः**' कीर्तयामः । '**कथम्भूतं**' दानं सिद्धिसुखं च ? इत्याह । '**रागद्वेषविवर्जितार्जवगुणप्राप्यं**' स्नेहरोष-विरहितसरलतागुणलभ्यम् । '**सदापि**' नित्यमपि । '**अक्षयं**' अविनश्वरम् । '**विश्वस्यापि**' लोकस्यापि । '**उपरि स्थितम्**' **न पुनरावृत्याऽन्वितं** पुनरागमनेन न अन्वितं-न युक्तं, अपुनरावर्तनशीलम् ।

दानपक्षे ईदृशं उत्तमदानं न पुनः लभ्यते । अर्थात् सकृदेव प्राप्तं सत् सिद्धसुखं यच्छति । **निश्चितं**-ध्रुवम् । **'एकस्य एव हि चेतनस्य'**-आत्मनः । दानपक्षे-शालिभद्रस्य । **'रुचितं'**-इष्टम् । **'न अन्यस्य'** अपरस्य दानधर्मरहितस्य । **'भोगोचितं'** भोगयोग्यम् । आत्मा एव निजानंतज्ञान-दर्शन-चारित्रादिगुणगरिष्ठं सुखं उपभुनक्ति, न जडः । दानपक्षेऽपि शालिभद्रं विहाय एतद्दान-जनितभोगोचितो नान्यो जनः । शार्दूलविक्रीडितं वृत्तमिदम् । तल्लक्षणं चेदम्-सूर्याश्वैर्मसजास्तताः सगुरवः शार्दूलविक्रीडितम् ॥ १६० ॥

**श्रीशालिचरिते धर्म-कुमारसुधिया कृते । श्री प्रद्युम्नधिया शुद्धे, प्रथमः प्रक्रमोऽभवत् ॥ १६१ ॥**

**'धर्मकुमारसुधिया'** धर्मकुमारपंडितेन । **'कृते'** रचिते । **'श्रीप्रद्युम्नधिया'** संशोधक प्रद्युम्नमुनिमत्या **'शुद्धे'** दोषहीने । **'श्रीशालिचरिते'** श्रीशालिभद्रचरित्रे । **'प्रथमः प्रक्रमः'** अयं सम्पूर्णः अभवत् ॥ १६१ ॥

**इति-कच्छवागडदेशोद्धारक-तपागच्छाचार्य-विजय-कनकसूरि प्रशिष्याचार्य-**
**विजय कलापूर्णसूरि-शिष्य मुनिश्रीकलाप्रभविजय (विजय कलाप्रभसूरि)-शिष्य मुनिश्री (पंन्यास)**
**मुक्तिचन्द्रविजय-शिष्यमुनिश्री (पंन्यास) मुनिचन्द्रविजय-विरचितायां**
**श्रीशालिभद्र-महाकाव्यस्य सानुवाद-टीकायां**
**प्रथमः प्रक्रमोऽभवत् ।**

## ॥ अथ द्वितीयः प्रक्रमः ॥

**तेन दानावदानेन, प्रीणितो धर्मभूपतिः । यं प्रसादमदत्ताऽस्मै, तस्य लीलायितं स्तुमः ॥ १ ॥**

'**तेन**' सङ्गमकृतेन । '**दानावदानेन**' दानपराक्रमेण अद्भुतदानकर्मणा । '**प्रीणितः**' प्रसन्नः । '**धर्मभूपतिः**' धर्ममहाराजः । '**यं प्रसादं**' कृपाम् । '**अस्मै**' सङ्गमाय । '**अदत्त**' अयच्छत् । '**तस्य**' प्रसादस्य । '**लीलायितं**' क्रीडितं विलासम् । '**स्तुमः**' कीर्तयामः ॥ १ ॥

**जम्बूद्वीप-भरतक्षेत्र वर्णनम्—**

**अस्ति स्वस्तिपदं शश्वन्महापुरुष-सन्निभः । 'जम्बूद्वीप' इति द्वीप-श्चन्द्रनिस्तन्द्रवृत्तभूः ॥ २ ॥**

'**स्वस्तिपदं**' शुभस्थानम् । '**शश्वत्**' सनातनः । '**महापुरुषसन्निभः**' महापुरुषेण सन्निभः सदृशः । '**चन्द्रनिस्तन्द्रवृत्तभूः**' चन्द्रवत् निस्तन्द्रा तन्द्राहीना जागृता वृत्ता वर्तुला भूः क्षितिः यस्य सः । महापुरुषपक्षे-चन्द्रवत् निस्तन्द्रं-अप्रमत्तं वृत्तं-आचरणं तस्य भूः स्थानं यस्य सः । यदुक्तम्

उदारस्तत्त्ववित् सत्त्व-सम्पन्नः सुकृताशयः । सर्वसत्त्वहितः सत्य-शाली विशदसद्गुणः ॥ १ ॥

विश्वोपकारी सम्पूर्ण-चन्द्रनिस्तन्द्रवृतभूः । विनीतात्मा विवेकी यः, स महापुरुषः स्मृतः ॥ २ ॥

'**जम्बूद्वीप**' **इति** नाम्ना प्रसिद्धः **द्वीपः** । '**अस्ति**' वर्तते ॥ २ ॥

**यस्यासौ लक्ष्यते लक्ष-योजनायाममानिनः । सौवर्णो नित्यसज्योति-रचलो लक्षदीपकः ॥ ३ ॥**

'**यस्य लक्षयोजनायाममानिनः**' शतसहस्रयोजनदैर्घ्यप्रमाणवतः जम्बूद्वीपस्य । '**नित्यसज्योतिः**' सदा सकान्तिः । **असौ** । '**सौवर्णः**' कनकमयः । '**अचलः**' गिरिः, मेरुपर्वतः इत्यर्थः । '**लक्षदीपकः**' लक्षयोजनानि यावत् दीपकः प्रकाशकः शतसहस्रप्रदीपतुल्यो वा । '**लक्ष्यते**' विलोक्यते ॥ ३ ॥

**सप्तसप्तिरथे सप्तीन्, सुरसप्तौ मुखानि च । ग्रहान् लग्ने स्वरान् गीतेऽ-ङ्गानि राज्ये गजे तथा ॥ ४ ॥**

**धातूनङ्गे तथा सप्तक्षेत्राण्यत्र जगुर्जिनाः । स षड्वर्षधरश्चित्रं, सप्तवर्षः प्रकीर्त्यते ॥ ५ ॥**

'**सप्तसप्तिरथे**' सप्तसप्तेः रवेः रथे स्यन्दने । '**सप्तीन्**' (सप्त) अश्वान् । रविरथे किल सप्ताश्वाः इति लौकिकाः । सुरसप्तौ सुरस्य देवस्य सप्तौ अश्वे, 'उच्चैःश्रवाः' इत्याख्ये इन्द्राश्वे । '**मुखानि**' सप्तवदनानि । चः समुच्चये । '**लग्ने**' लग्नकुण्डलिकायाम् । '**ग्रहान्**' मङ्गल-बुध-गुरु-शुक्र-शनि-राहु-केत्वभिधान् सप्त ग्रहान् । जैनमते सूर्यचन्द्रौ ग्रहेषु न गण्येते । जैनज्योतिषि सूर्य-चन्द्र-ग्रह-नक्षत्र-तारकाख्येषु पञ्चभेदेषु तयोः पृथगभिधानात् । '**गीते**' सङ्गीतशास्त्रे । '**स्वरान्**' षड्ज-ऋषभ-गान्धार-मध्यम-पञ्चम-धैवत-निषधाभिधान् सप्त स्वरान् । **राज्ये** । '**अङ्गानि**' स्वाम्य-मात्य-सुहृत्-कोश-राष्ट्र-दुर्ग-बलाभिख्यानि सप्त अङ्गानि । '**तथा**' समुच्चये । '**गजे**' हस्तिनि । '**अङ्गानि**' चत्वारः पादाः करो मेढ्रं पुच्छं चेति सप्ताङ्गानि । '**अङ्गे**' शरीरे । '**धातून्**' रसासृग्मांसमेदोऽस्थि-मज्जा-शुक्राभिधान् सप्त धातून् । '**तथा**' तत्प्रकारेण । '**अत्र**' जम्बूद्वीपे । '**जिनाः**' अर्हन्तः । '**सप्तक्षेत्राणि**' भरत-हैमवत-हरिवर्ष-विदेह-रम्यक्-हैरण्यवत-ऐरवतनामानि सप्तक्षेत्राणि । '**जगुः**' कथितन्तः । '**सः**' जम्बूद्वीपः । '**षड्वर्षधरः**' षड् वर्षधराः यस्मिन् सः । पर्वताः वर्षधरा उच्यन्ते । ते चैते-

हिमवन्त-महाहिमवन्त-निषध-नीलवन्त-रुक्मि-शिखरिणः षड् वर्षधराः । **'चित्रं'** आश्चर्यम् । स जम्बूद्वीपः षड्वर्षधरोऽपि **'सप्तवर्षः'** सप्तानि वर्षाणि क्षेत्राणि यस्मिन् सः । **'प्रकीर्त्यते'** प्रोच्यते । अत्र वर्षशब्दः क्षेत्रवाची ॥ ४ ॥ ५ ॥

**क्षेत्रदेशास्तु चत्वार-स्तस्य तिष्ठन्त्यकर्मठाः । पुत्रा इव त्रयः किन्तु, सर्वर्द्धिव्यवसायिनः ॥ ६ ॥**

**'तस्य'** जम्बूद्वीपस्य । **'चत्वारः क्षेत्रदेशाः'** भरतादिषु सप्तसु हैमवत-हरिवर्ष-रम्यक्-हैरण्यवताभिधाः चत्वारः क्षेत्रदेशाः। **'तु'** परन्तु । **'अकर्मठाः'** कर्मणि तत्पराः कर्मठाः, न तथाविधाः अकर्मठाः । **'किन्तु'** परन्तु । **'त्रयः'** भरत-विदेह-ऐरवताख्याः त्रयः । **'पुत्राः इव'** सुताः इव । **'सर्वर्द्धिव्यवसायिनः'** सकलसम्पत्तिव्यापारिणः । सन्तीति शेषः । अयं भावः-हैमवतादिचतुर्षु क्षेत्रेषु युगालिकिमनुष्याः एव वसन्ति । न तत्र काचित् धर्माधर्मप्रवृत्तिः । किन्तु भरत-विदेह-ऐरवतेषु अस्ति धर्माधर्मप्रवृत्तिः । अतस्ते सर्वर्द्धिव्यवसायिभिः पुत्रैरुपमिताः ॥ ६ ॥

**पारेऽब्धि परमं क्षेत्रं, तत्तेषु भरताभिधम् । ऋतवो वत्सरे यद्वद्, रागा गीते मुखा गुहे ॥ ७ ॥**

**रसा भोज्ये गुणा राज्ये, तर्का वादविदाम्वरे । षडेव यत्र खण्डानि, तथा रेजुरखण्डिते ॥ ८ ॥**

**'पारेऽब्धि'** अब्धेः पारम् । 'पारे-मध्येऽग्रेन्तः० ।३।१।३०।। इति सूत्रेण पारेब्धि । **'तेषु'** क्षेत्रेषु । **'तत् भरताभिधं'** भरत इति अभिधा नाम यस्य तत् । **'परमं'** प्रधानं क्षेत्रं वर्तते । **'यद्वत्'** यथा । **'वत्सरे'** वर्षे । **'ऋतवः'** वसन्त-ग्रीष्म-वर्षा-शरत्-शिशिर-हेमन्ताख्याः षड् ऋतवः । **'गीते'** गाने । **'रागाः'** श्रीरागाद्याः षड् रागाः । ते चेमे-' ''श्रीरागोऽथ वसन्तश्च, भैरवः पञ्चमस्तथा । मेघराजश्च विज्ञेयः, षष्ठो भट्टनरायणः ॥'' **'गुहे'** कार्तिकेये । **'मुखाः'** वदनानि षड्। मुखशब्दः पुंलिङ्गेऽपि । **'भोज्ये'** भोजने । **'रसाः'** मधुराम्ल-लवण-कटु-कषाय-तिक्ताः षड् रसाः । **'राज्ये'** राज्य-

सञ्चालने । **'गुणाः'** सन्धि-विग्रह-यान-आसन-दैधाश्रय-रूपाः षड् गुणाः । **'वादविदां'** वादिनाम् । **'वरे'** श्रेष्ठे । प्रकृष्टवादिनी इत्यर्थः । **'तर्काः'** शिक्षा-कल्प-व्याकरण-छंदो-ज्योति-निरुक्ताख्यानि षट् शास्त्राणि । **'तथा'** तत्प्रकारेण । **'अखण्डिते'** सम्पूर्णे । **'यत्र'** भरतक्षेत्रे । **षड् एव** । **'खण्डानि'** विभागाः । **'रेजुः'** अशोभन्त ॥ ७ ॥ ८ ॥

**वैताढ्येनोच्चगोत्रेण, नीचधात्रीभवानि वा । त्रीणि त्रीणि पृथक् पङ्क्तौ, विन्यवेश्यन्त तान्यहो ॥ ९ ॥**

**'उच्चगोत्रेण'** उत्तुङ्गपर्वतेन । **'वैत्ताढ्येन'** तन्नाम्ना गिरिणा । उच्चगोत्रीयपक्षे-वित्ताढ्येन धनाढ्येन उत्तमकुलीनेन । **'नीचधात्रीभवानि'** निम्नपृथ्वीस्थितानि । पक्षे-नीचमातृजनितानि । **'वा'** इव, अत्र **'वा'** इवार्थे । **'अहो'** इति सम्बोधने । तानि त्रीणि त्रीणि खण्डानि **'पृथक्पङ्क्तौ'** भिन्नश्रेण्याम् । **'विन्यवेश्यन्त'** अस्थाप्यन्त । यथा उच्चगोत्रीयः श्रेष्ठी हीनान् नरान् पृथक्पङ्क्तौ स्थापयति, तथा वैत्ताढ्यपर्वतेन षट्खण्डमध्ये त्रीणि त्रीणि खण्डानि पृथक् स्थापितानीत्यर्थः ॥ ९ ॥

**नृलोक इव लोकेषु, वयस्सु त्रिषु यौवनम् । वर्तमानश्च कालेषु, यथा सर्वार्थसाधकः ॥ १० ॥**

**तथाऽर्वाक्तनखण्डेषु, मध्यमं खण्डमुत्तमम् । सर्वाङ्गीणसुखप्राप्ता-वलङ्कर्मीणविक्रमम् ॥ ११ ॥**

**'लोकेषु'** स्वर्ग-मर्त्य-पातालाख्येषु त्रिषु लोकेषु । **'नृलोक इव'** मर्त्यलोक इव । **'त्रिषु वयस्सु'** बाल्य-यौवन-वार्धक्याख्येषु वयस्सु । **'यौवनं'** तारुण्यम् । **'कालेषु'** भूत-वर्तमानाऽनागतेषु । चः समुच्चये । **वर्तमानः** कालः । **'यथा'** यत्प्रकारेण । **'सर्वार्थसाधकः'** सकल-प्रयोजन-सम्पादकः ॥ १० ॥ **'तथा'** तत्प्रकारेण । **'अर्वाक्तनखण्डेषु'** दक्षिणविभागेषु । **'मध्यमं'** मध्यस्थितं खण्डम् । **'उत्तमं'** प्रधानम् । कीदृशं तदित्याह-**'सर्वाङ्गीणसुख-प्राप्तौ'** सर्वदेशीय-

शर्म-प्रापणे । '**अलङ्कर्मीणविक्रमं**' समर्थपराक्रमम् । जिन-चक्र्याद्यानां उत्तमानां पुरुषाणां तत्रैव जायमानत्वात् '**अलङ्कर्मीण-विक्रमम्**' इति मध्यखण्डस्य विशेषणं सार्थकम् ॥ ११ ॥

**मगध-राजगृह-वर्णनम्–**

**मुक्तोज्ज्वलकणश्रेणी-मण्डलैः क्षोणिकुण्डलैः । आस्ते तत्राऽतिसम्बाधो, मगधाभिधमण्डलः ॥ १२ ॥**

'**तत्र**' मध्यखण्डे । '**मुक्तोज्ज्वलकणश्रेणीमण्डलैः**' मुक्ताफलवद् विमलधान्यावलिप्रदेशैः । '**क्षोणिकुण्डलैः**' पृथ्वीवलयैः । '**अतिसम्बाधः**' अतिसङ्कुलः । '**मगधाभिधमण्डलः**' मगधाभिधदेशः । '**आस्ते**' वर्तते ॥ १२ ॥

**गावो यत्र वशास्थूलाः, सुव्रताः सुवशा इव । न वशाः सूर-चौराणां, न वशा-दोष-दूषिताः ॥ १३ ॥**

'**यत्र**' मगधदेशे । '**गावः**' धेनवः । '**वशास्थूलाः**' वशया-मेदसा स्थूलाः-पीनाः पुष्टाः । '**सुवशाः इव**' सुनार्यः इव । '**सुव्रताः**' सुखदोह्याः । नारी-पक्षे-पतिव्रताः । '**न सूर-चौराणां**' न शूरवीर-स्तेनानाम् । पक्षे-सूर्यखलानाम् । '**वशाः**' वश्याः । '**न वशा-दोष-दूषिताः**' न वन्ध्यात्वदोष-दुष्टाः । नारीपक्षेऽपि एवमेव ॥ १३ ॥

**दुर्भिक्ष-दुर्ग-भङ्गाय, गोलका इव मूढकाः । हलयश्च बभुर्यत्र, यन्त्र-वाहन-यष्टयः ॥ १४ ॥**

'**यत्र**' मगधदेशे । '**दुर्भिक्ष-दुर्ग-भङ्गाय**' दुर्भिक्षः एव दुर्गः वप्रः तस्य भङ्गाय नाशाय । '**मूढकाः**' कृषि-साधन-विशेषाः । '**गोलका इव**' तोपगोलकाः इव । '**बभुः**' भ्राजिरे । '**हलयश्च**' महान्ति हलानि; यतः महद् हलं हलिरित्युच्यते । '**यन्त्रवाहनयष्टय इव**' यन्त्रचालनदण्डा इव । '**बभुः**' भ्राजिरे ॥ १४ ॥

**सरांसि यत्र भूयांसि, सवयांसीव नीरधेः । यत्पयांसि पयांसीव, महांसीवावनिश्रियाम् ॥ १५ ॥**

'**यत्र**' मगधदेशे । '**भूयांसि**' बहूनि । '**सरांसि**' जलाशयाः । '**नीरधेः**' समुद्रस्य । '**सवयांसीव**' मित्राणि इव । '**यत्पयांसि**' यत्सरोजलानि । '**पयांसि इव**' दुग्धानि इव । '**अवनिश्रियां**' धरणीलक्ष्मीणाम् । '**महांसि इव**' तेजांसि इव। बभुरिति शेषः ॥ १५ ॥

**भुवो विशालशालेयाः, शाक-शाकट-सङ्कटाः । सनाथा रथकट्याभिः, पवित्रा यत्र गोत्रया ॥ १६ ॥**

'**यत्र**' मगधदेशे । '**भुवः**' पृथिव्यः । कीदृश्यः ? इत्याह-'**विशालशालेयाः**' विशालानि महान्ति शालिक्षेत्राणि सन्ति यत्र । 'वीह्रि-शालेरेयण्' ७-१-८० ॥ इति सूत्रेण एयण् । '**शाक-शाकट-सङ्कटाः**' शाकस्य क्षेत्रं शाकशाकटम् । शाकट-शाकिनौ क्षेत्रे ।७।१।७८॥ इति सूत्रेण क्षेत्रे शाक-शाकट-शाक-शाकिनौ इति साधुः । शाकक्षेत्रव्याप्ताः इत्यर्थः । पुनः कीदृश्यः ? '**रथकट्याभिः**' रथानां समूहाः रथकट्याः ताभिः । गोरथ० ।६।२।२४॥ इति कट्यल्प्रत्यय ।'**सनाथाः**' युक्ताः । पुनः कीदृश्यः ? '**गोत्रया**' गवां समूहो गोत्रा तया । गोरथ० ।६।२।२४ ॥ इत्यल् । '**पवित्राः**' शुचीभूताः ॥ १६ ॥

**बद्धमूला लसच्छाखाः, सच्छायाः सुमनः प्रियाः । महाफलोदया यत्र, सज्जना इव पादपाः ॥ १७ ॥**

'**यत्र**' मगधभूमौ । '**पादपाः**' वृक्षाः । **सज्जनाः इव** शोभन्ते । कथं तदित्याह-'**बद्धमूलाः**' बद्धानि मूलानि येषां ते । सज्जन-पक्षे बद्धं मूलं चिरनिवासः उपलक्षणात् आदिमूलं यैस्ते । '**लसच्छाखाः**' लसन्ति शाखा येषां ते। पक्षे-लसन्ति-शोभन्ते पुत्रपौत्रादिरूपाः शाखाः येषां ते । '**सच्छायाः**' छायायुक्ताः । पक्षे-छाया-कान्तिः तया सहिताः । '**सुमनःप्रियाः**' सुमनसः-पुष्पाणि तैः प्रियाः-हृदयङ्गमाः । पक्षे-सुमनसः-विद्वांसः प्रिया येषां ते विद्वत्सु वा प्रियाः ये

ते। **'महाफलोदयाः'** महतां-अतुच्छानां फलानां उदयः-प्रादुर्भवनं येषां ते । पक्षे-महाफलानि विवाह-यात्रा-जिन-मन्दिरोद्धरणादीनि तेषामुदयो येषां ते ॥ १७ ॥

**कण्टकौघश्चतुर्दन्ती, नायिकायाः प्रधानता । खलानां सत्कृतिर्यत्र, बहिरेव जने नहि ॥ १८ ॥**

**यत्र दानमकालेऽपि, न मृत्युः सत्यशालिनाम् । कालेऽपि वृष्टिरेव स्यान्न कोपस्तु विवेकिनाम् ॥ १९ ॥**

**'यत्र'** मगधदेशे । **'कण्टकौघः'** कण्टकानां खुण्टानां ओघः समूहः, शूलानां समूहश्च । **'चतुर्दन्ती'** दन्ताली खलसाधन-विशेषः कलहश्च । **'नायिकायाः'** धान्यवपनसाधनस्य । **'प्रधानता'** प्रकृष्टेन धारणा, स्त्रियाः प्रधानता च । **'खलानां'** धान्यशोधन-स्थानानाम् । **'सत्कृतिः'** सम्यक्करणम् । दुर्जनसत्कारश्च । इत्यादीनि बहिरेव । **'न जने'** न पुरे ॥ १८ ॥ यत्र । **'अकालेऽपि'** अनवसरेऽपि । **'दानं'** वितरणम् भवति, किन्तु **'सत्यशालिनां'** सत्याधिष्ठितानाम् अकाले न मृत्युः भवति । अनेन राज्ञः न्यायप्रियत्वमुक्तम् । **'कालेऽपि'** प्रावृट्कालेऽपि । **'वृष्टिरेव'** मेघवर्षणमेव । किन्तु । **'विवेकिनां'** सत्यासत्यज्ञानानाम् । **'कालेऽपि'** तथाविधाऽवसरेऽपि **'न कोपः'** न क्रोधः । प्रादुर्भवतीति शेषः ॥ १९ ॥

**तत्र काञ्चन-सोपान-भद्रपीठ-प्रतिष्ठितम् । सौवर्ण-कलस-ज्योति-र्माला-मुकुट-मण्डितम् ॥ २० ॥**

**उद्धूत-केतकी-रेणु-धूप-धूम्याभ्रम-च्छलात् । उत्तुङ्ग-गङ्गा-यमुना-च्छत्राभ्यामिव राजितम् ॥ २१ ॥**

**ध्वजाञ्चल चलच्चारु-चामरालीमनोहरम् । पुरेषु राजराजश्रि, रेजे राजगृहं पुरम् ॥ २२ ॥**

**'तत्र'** मगधदेशे । **'पुरेषु'** नगरेषु । **'राजराजश्रि'** राजराजः-राजाधिराजः तद्वत् श्रीः यस्य तत् । **राजगृहम्** । **'पुरं'** नगरम् । **'रेजे'** शोभते स्म । तच्च कीदृशम् ? **'काञ्चन-सोपान-भद्रपीठ-प्रतिष्ठितम्'** काञ्चनानि सौवर्णानि सोपानानि

तान्येव भद्रपीठानि-भद्रासनानि तेषु प्रतिष्ठितं-स्थितम् । **'सौवर्ण-कलस-ज्योति-र्माला-मुकुट-मण्डितं'** सौवर्णानां कलसानां प्रासादोपरिस्थितानां कलसानां ज्योति-र्माला तेजःश्रेणिः सैव मुकुटं तेन मण्डितं विभूषितम् ॥ २० ॥

**'उद्धूत-केतकी-रेणु-धूप-धूम्या-भ्रम-च्छलात्'** उद्धूते उच्छलिते केतकीरेणुः धूपधूम्या धूपधूम्रश्रेणिश्च उद्धूतकेतकीरेणुधूपधूम्ये तयोः भ्रमः भ्रान्तिः तस्य छलात्-व्याजात् । **'उत्तुङ्ग-गङ्गायमुनाच्छत्राभ्यामिव'** उत्तुङ्गे उच्चैः स्थिते गङ्गायमुने (केतकीरेणुः श्वेता धूपधूम्या च कृष्णा ततः ते गङ्गायमुना-समाने) ते एव छत्रे ताभ्यामिव राजितं शोभितम् ॥ २१ ॥

**'ध्वजाञ्चल-चलच्चारु-चामराली-मनोहरम्'** ध्वजाञ्चलः पताकावस्त्राञ्चलः स एव चलन्ती चारुचामरश्रेणिः तया मनोहरम् । अन्योऽपि राजा एतै राजचिह्नैः युक्तः भवत्येव ॥ २२ ॥

**महाराजः श्रीश्रेणिकः महाराज्ञी श्रीचेल्लणा–**

**यत्र नेत्रशुभारामा, बहिरन्तश्च रेजिरे । प्रियालापाः सनारङ्गाः, पत्रवल्ली-विराजिताः ॥ २३ ॥**

**पथ्या-रम्भाभिरामाश्च, संवृताः पाटलाधराः । पुण्यपण्यैः परीभोग्याः सुकुल्या हंसविभ्रमाः ॥ २४ ॥**

**यत्र हर्म्याणि धर्म्याणि, विशालान्युज्ज्वलानि च । कोटिप्राप्तपताकानि, चरित्राणि सतामिव ॥ २५ ॥**

**कीर्त्यारोहणनिःश्रेणि-गुणश्रेणिरपालयत् । रञ्जिताष्टादशश्रेणिः, श्रेणिकस्तत्पुरं नृपः ॥ २६ ॥ ( कलापकम् )**

**'यत्र'** राजगृहे । **'नेत्रशुभारामाः'** नेत्राख्यवृक्षैः प्रधानवृक्षैर्वा शुभाः प्रधाना आरामा उद्यानानि । स्त्रीपक्षे-नेत्रशुभाः लोचनशुभाः, रामाः स्त्रियः । **'बहिरन्तश्च'** पुराद् बहिः उद्यानानि, पुरान्तश्च स्त्रियः । **'रेजिरे'** राजन्ते स्म । **'प्रियालापाः'**

प्रियालानि राजादनानि आप्यन्ते लभ्यन्ते यत्र ते आरामाः । स्त्री-पक्षे-प्रियः आलापः यासाम् ताः । **'सनारङ्गाः'** नारङ्गैः सह वर्तन्ते ये ते । पक्षे-सना सदा रङ्गो विलासो यासां ताः । **'पत्रवल्लीविराजिताः'** पत्राणि पर्णानि वल्ल्यः लताः ताभिः विराजिताः । पक्षे पत्रवल्ल्यः स्त्रीणां कपोलस्तनादिभागे पत्ररचनाः ताभिः विराजिताः ॥ २३ ॥

**'पथ्यारम्भाभिरामाः'** पथ्याः हरीतक्यः रम्भाः कदल्यः ताभिः अभिरामाः मनोहराः । पक्षे-पथ्याः सुखकराः रम्भा इव अप्सरा इवाभिरामाः स्त्रियः । **चः** समुच्चये । **'संवृताः'** वृतिसंयुताः (वृति-'वाड' इति भाषायाम्) पक्षे-सावगुण्ठनाः । 'घुंघटवाळी' इति भाषायाम् । **'पाटलाधराः'** पाटलां वृक्षं धरन्तीत्येवंशीलाः । पक्षे-पाटलः रक्तः अधरः यासां ताः । **'पुण्यपण्यैः** परीभोग्याः' पुण्यानि पवित्राणि वस्तूनि तैः भोगार्हाः । पक्षे-पुण्यं सुकृतं तदेव मूल्यं तैः भोक्तुं योग्याः । **'सुकुल्याः'** शोभनाः कुल्याः कृत्रिमाः सरितः यत्र ते आरामाः । पक्षे-समीचीनकुलोत्पन्नाः । सुकुल्या तु कुलस्त्रियामिति अनेकार्थे । **'हंसविभ्रमाः'** हंसानां विभ्रमो विलासो यत्र । पक्षे-हंसवद् गमनं विभ्रमो यासामथवा हंसकः पादकटकः तस्य विभ्रमो विलासो यासाम् ॥ २४ ॥

**'यत्र'** राजगृहे । **'हर्म्याणि'** श्रेष्ठिगृहाणि । **'सतां चरित्राणि इव'** सज्जन-जीवनानि इव । **'धर्म्याणि'** धर्मसमेतानि । अत्र धर्मपदेन वास्तुधर्माः उच्यन्ते । सतां चरित्र-पक्षे धर्मसहितानि । **'विशालानि'** विस्तीर्णानि । पक्षे-उदाराणि । **'उज्ज्वलानि'** निर्मलानि । पक्षे-गुणैः शुभ्राणि । **'कोटिप्राप्तपताकानि'** कोटिद्रिव्य-सूचनाय न्यस्ताः पताकाः यत्र तानि । पक्षे-कोटिं परमां कक्षां प्राप्ताः कीर्तिपताकाः यत्र तानि ॥ २५ ॥

**'तत्पुरं'** राजगृहम् । **'श्रेणिकः'** तन्नामा प्रसेनजित्पुत्रः । **'नृपः'** भूपतिः । **'अपालयत्'** अन्वशात् । कथम्भूतः

स नृपः ? **'कीर्त्यारोहणनिःश्रेणि-गुणश्रेणिः'** कीर्तेः आरोहणे निःश्रेणीभूता ('नीसरणी' इति भाषायाम्) गुणश्रेणिः यस्य सः । **'रञ्जिताष्टादशश्रेणिः'** रञ्जिता अष्टादशश्रेणिः येन सः । राज्ञामास्थानश्रेणयः अष्टादश । तच्चेमानि मल्ल-आप्त-हित-स्निग्ध-मन्त्रि-अमात्य-महत्तम-बुद्धिसख-उभयसख-आम्नायिक-साङ्ग्रामिक-देशीयपुरुष-मानपुरुष-धन्यपुरुष-कामपुरुष-विज्ञानपुरुष-राजपुरुष-विनोद-पात्राणि इति ॥ २६ ॥

**भुजे धराधरे तस्य, पुष्करावर्त उन्नतः । धाराधरः कृपाणोऽभूत्, राजहंसप्रवासकः ॥ २७ ॥**

**'तस्य'** श्रेणिकस्य । **'धराधरे'** पृथ्वीपालके । मेघपक्षे-पर्वते । **'भुजे'** बाहौ । **'उन्नतः'** उच्चस्थितः । **'पुष्करावर्तः'** पुष्करः असिकोशसत्कः आवर्तः यस्मिन् । पक्षे-पुष्करावर्तनामा श्रेष्ठमेघः । **'धाराधरः'** तीक्ष्णधाराभृत् । पक्षे-जलधाराभृत् । **'राजहंसप्रवासकः'** शत्रुराजहंसान् वनं प्रवासयन् । पक्षे-राजहंसान् प्रवासयन् । प्रावृषि किल राजहंसाः अन्यत्र प्रतिष्ठन्ते इति कविसमयः । **'कृपाणः'** असिः । **'अभूत्'** लम्बमाना आसीत् ॥ २७ ॥

**स्वबलान्मोहराजस्य, सप्ताङ्गीमिव सप्तकम् । निहत्य सत्यतो वीर-क्रमाराधनमाप यः ॥ २८ ॥**

**'स्व-बलात्'** निजसामर्थ्यात् । राज्य-पक्षे-निजसैन्यात् । **मोहराजस्य** । **'सप्तकं'** सम्यक्त्वमिश्रमिथ्यात्वानि अनन्तानुबन्धिनश्चत्वारः कषायाश्चेति सप्तकम् । **'सप्ताङ्गीमिव'** राज्यसत्कां सप्ताङ्गीमिव । सप्त किल राज्याङ्गानि । यदुक्तमभिधान चिन्तामणौ-'स्वाम्यमात्यसुहृत्कोशो राष्ट्रदुर्गबलानि च' । **'निहत्य'** निकृन्त्य । **सत्यतः** । **'यः'** श्रेणिकः । **'वीरक्रमाराधनं'** श्रीमहावीरदेवचरणोपासनाम् । पक्षे-वीरैः शूरैः चरणोपासनाम् । **'आप'** लेभे ॥ २८ ॥

**यस्तथा तन्मयो दध्रे, भ्रामर-ध्यान-धारणम् । श्रीवीरविषयं येन, तादृगेव भविष्यति ॥ २९ ॥**

**'यः'** श्रेणिकः । **'तन्मयः'** महावीरमयः । **'तथा'** तेन प्रकारेण । **'श्रीवीरविषयं'** श्रीमहावीरसम्बन्धि । **'भ्रामरध्यानधारणं'** भ्रमसत्कध्यानधारणाम् । इलिका किल भ्रमरीध्यानात् भ्रमरी जायते इति श्रुतिः । यदुक्तं योगसारे "वीतरागं यतो ध्यायन्, वीतरागो भवेद् भवी । इलिका भ्रमरी-भीता, ध्यायन्ती भ्रमरीं यथा ॥" **'दध्रे'** ध्यातवान् । **'येन'** यथा । **'सः'** श्रेणिकः । **'तादृगेव'** श्रीमहावीरस्वामिसमः एव आगामिन्यामुत्सर्पिण्यां प्रथमः श्रीपद्मनाभस्तीर्थकृत् भविष्यति ॥ २९ ॥

**यस्य सिध्दरसप्रायसम्यग्दर्शनभावितम् । आर राज्यं शिलासारमपि काञ्चनवर्णिकाम् ॥ ३० ॥**

**'यस्य'** श्रेणिकस्य । **'सिद्धरसप्रायसम्यग्दर्शनभावितम्'** सिद्धरससमेन सिद्धरसतुल्येन सम्यग्दर्शनेन सम्यक्त्वेन भावितम्। **'शिलासारमपि'** लोहतुल्यमपि । 'गिरिसारं शिलासारं तीक्ष्ण-कृष्णामिषे अयः" इति हैम्याम् । **'राज्यं'** मगधसाम्राज्यम् । **'काञ्चनवर्णिकां'** सुवर्णसाम्यम् । **'आर'** प्राप्तम् ॥ ३० ॥

**प्रिया सुलक्षणा तस्य, पौलोम्या इव लक्षणा । यन्नेत्रतो मृगी चिल्ला, चेल्लणा नामतोऽस्ति सा ॥ ३१ ॥**

**'तस्य'** श्रेणिकस्य । **'पौलोम्याः इव लक्षणा'** पौलोम्याः इन्द्राण्याः इव लक्षणा लक्षणवती । अत्र अभ्रादिभ्यः ।७।२।४६ ॥ इत्यनेन मत्वर्थीयः अः प्रत्ययः । **'सुलक्षणा'** शोभनानि सामुद्रिकलक्षणानि यस्याः सा । **'प्रिया'** पत्नी अभवत् । **'येन्नेत्रतः'** यस्याः नेत्रतः लोचनतः । **'मृगी'** हरिणी । **'चिल्ला'** हीनलोचना । 'क्लिन्ननेत्रे चिल्लचुल्लौ' इति हैम्याम् । **सा चेल्लणानामतः अस्ति** ॥ ३१ ॥

**शीलचन्द्रमणेर्भूप-शङ्कापङ्कस्थितेरपि । जिनेन्दुवाग्रुचेर्यस्याः, परं ज्योतिर्व्यजृम्भत ॥ ३२ ॥**

**'यस्याः'** चेल्लणायाः । **'भूपशङ्कापङ्कस्थितेरपि'** भूपस्य श्रेणिकस्य शङ्कैव पङ्कः तस्मिन् स्थितिः अवस्थानं यस्याः तस्याः अपि । **'शीलचन्द्रमणेः'** सच्चारित्रचन्द्रकान्तमणिरूपायाः चेल्लणायाः । **'जिनेन्दुवाग्रुचेः'** श्रीवीरजिनचन्द्रवाणीकिरणात् । **'परं ज्योतिः'** प्रकृष्टं तेजः । **'व्यजृम्भत'** प्रादुर्बभूव । वर्धते हि चन्द्रकान्तमणितेजः चन्द्रकिरणसंसर्गात् । श्रीवीरवचसा निरस्तशङ्कः श्रेणिकः जातः । यदुक्तम्–हहा तपस्वी भविता कथं स, श्रुत्वेति देव्या वचनं सशङ्कः । प्रातर्जिनेन्दोर्वचनाद् विशङ्कः, श्रीश्रेणिको हृष्टमना बभूव ॥ ३२ ॥

**चतुर्बुद्धि चतुःशालं, चतुरा पुण्यकुम्भिनः । कीर्तिकन्याचतुरिका, चतुष्कावसरः श्रियाम् ॥ ३३ ॥**

**तस्याऽभयकुमाराख्यः, पुत्रो मन्त्रितया बभौ । चिन्तामणिः शिरोरत्नतया सुकृतिनः किल ॥ ३४ ॥**

**'तस्य'** श्रेणिकनृपस्य । 'चतुर्बुद्धिचतुःशालं' चतुर्बुद्धीनां औत्पातिकी–वैनयिकी–कार्मिकी–पारिणामिक्यभिधानाम् । यदुक्तम् उप्पत्तिआ वेणइआ कम्मिआ परिणामिआ । बुद्धी चउव्विहा उत्ता पंचमा नोवलब्भइ । **चतुःशालं** गृहम् । **'पुण्यकुम्भिनः'** सुकृतहस्तिनः । **'चतुरा'** हस्तिशाला । 'हस्तिशाला तु चतुरेति' हैम्याम् । **'कीर्तिकन्याचतुरिका'** कीर्तिकन्याविवाहे चतुरिका, 'चोरी' इति भाषायाम् । **'श्रियां'** लक्ष्मीणाम् । **'चतुष्कावसरः'** चतुष्पथसदृशः । 'चौटो' इति भाषायाम् । **'सुकृतिनः'** पुण्यशालिनः सुकृतिजनस्य । **'शिरोरत्नतया'** मुख्यमणितया । **'चिन्तामणिः'** सुरमणिसमः । **'अभयकुमाराख्यः'** अभयकुमारः इति आख्या नाम यस्य सः । **'पुत्रः'** नन्दनः । **'मन्त्रितया'** मन्त्रिस्थाने । **'बभौ'** भाति स्म ॥ ३३ ॥ ३४ ॥

**उपायाँश्चतुरो धर्मान्, गुणानावश्यकानि षट् । अङ्गानि सप्त क्षेत्राणि, भूपालान् द्वादश व्रतान् ॥ ३५ ॥**

**पञ्चाङ्गमन्त्रतत्त्वज्ञः, सभ्यः सम्भावयन्नयम् । राज्ये धर्मे च धौरेयः, शुशुभे निर्भयाऽभयः ॥ ३६ ॥**

‘**चतुरः उपायान्**’ साम-दान-भेद-दण्डरूपान् चतुर्विधान् उपायान् ‘**धर्मान्**’ दान-शील-तपो-भावरूपान् । ‘**षड्गुणान्**’ विग्रह-यानाऽऽसन-द्वेधीभावाऽऽश्रयरूपान् । ‘**षड् आवश्यकानि**’ सामायिकादीनि । ‘**सप्त अङ्गानि**’ स्वाम्यमात्य - सुहृत्-कोश-राष्ट्र-दुर्ग-बलरूपाणि । ‘**सप्त क्षेत्राणि**’ जिनचैत्यादीनि । ‘**द्वादश भूपालान्**’ विजिगीषुः अरिः मित्रं अरिमित्रं मित्रमित्रं अरिशत्रुः पार्ष्णिग्राहः आक्रन्दः तयोरासारौ कटके मध्यमः उदासीनः इति द्वादश राज्ञः । ‘**द्वादश व्रतान्**’ प्राणातिपातादीन् । ‘**सम्भावयन्**’ विचारयन् जानन् । ‘**पञ्चाङ्गमन्त्रतत्त्वज्ञः**’ पञ्चपरमेष्ठि-मन्त्रतत्त्ववेदी । राज्यपक्षे-(१) कर्मणामारम्भोपायः (२) पुरुषद्रव्यसम्पत् (३) देशकालविभागः (४) विनिपातप्रतीकारः (५) कार्यसिद्धिश्चेति पञ्चाङ्गो मन्त्रः विचारः तत्तत्त्ववेदी । ‘**राज्ये**’ पृथ्वीराज्ये । ‘**धर्मे**’ आत्मराज्ये । चः समुच्चये । ‘**धौरेयः**’ अग्रणीः । ‘**सभ्यः**’ सभायां योग्यः । ‘**निर्भयः**’ निर्भीकः । **अयम् अभयः** मन्त्री । ‘**शुशुभे**’ शोभते स्म ॥ ३५ ॥ ३६ ॥

**गोभद्रः भद्रा च–**

**तत्र धर्मधुरा-भद्रः, सुदानाद् भद्रदन्तिवत् । भूत-भावि-भवद्भद्रः, श्रेष्ठी गोभद्र इत्यभूत् ॥ ३७ ॥**

**कीर्त्या कैलास-सङ्काशः, स रत्नैः रोहणाचलः । आश्रितावस्तुकाष्ठानां, वस्तुत्वे मलयाचलः ॥ ३८ ॥**

‘**तत्र**’ राजगृहे । ‘**धर्मधुरा-भद्रः**’ धर्मधुरावहने भद्रवृषभ-तुल्यः । ‘**सुदानात्**’ शोभनदानात् । हस्तिपक्षे-शोभन-मदक्षरणात् । ‘**भद्रदन्तिवत्**’ भद्रजातिहस्तिवत् । ‘**भूत-भावि-भवद्भद्रः**’ भूतभाविभवत्सु अतीताऽनागत-वर्तमानकालेषु भद्रः मङ्गलरूपः । **गोभद्रः** इति नाम्ना **श्रेष्ठी** । **अभूत्** ॥ ३७ ॥ ‘**कीर्त्या**’ श्वेतकीर्त्या । ‘**कैलाससङ्काशः**’

स्फटिकाचलसमुज्ज्वलः। **'रत्नैः'** वैडूर्याद्यैः । **रोहणाचलः** । **'आश्रितावस्तुकाष्ठानां'** आश्रितानां अवस्तुकाष्ठानां करीरद्रुमादीनाम् । **'वस्तुत्वे'** गन्धत्वे। श्रेष्ठिपक्षे-आश्रितानाम्, वस्तूनि पदार्थाः काष्ठाः उपलक्षणात् गृहाणि न सन्ति येषां अवस्तुकाष्ठानाम् अर्थात् दीनादीनां ऋद्धिकरणे । **'मलयाचलः'** मलयगिरिसमः । **'सः'** गोभद्रश्रेष्ठी अभूत् ॥ ३८ ॥

**भ्रान्तिं सुमेरुभ्रान्त-स्तेने मित्रकलावताम् । छेकश्चिच्छेद तामेष, पुनः कनकदानतः ॥ ३९ ॥**

**'अभ्रान्तः'** अभ्रे गगने अन्तः यस्य सः अभ्रंकषः । **'सुमेरुः'** मेरुपर्वतः । **'मित्र-कलावतां'** सूर्य-चन्द्रादीनाम्। **'भ्रान्तिं'** भ्रमणम् । **'तेने'** करोति स्म । **'पुनः'** परन्तु । **'छेकः'** निपुणः । **'अभ्रान्तः'** भ्रान्तिरहितः । **'एषः'** गोभद्रश्रेष्ठी। **'मित्र-कलावतां'** मित्र-सुवर्णकाराणाम् । **'तां'** भ्रान्तिम् । **'कनकदानतः'** सुवर्णार्पणात् । **'चिच्छेद'** अच्छिनत् ॥ ३९ ॥

**सत्त्वेऽपि रत्नकोटीनां, तस्य रत्नत्रयी परम् । आसीददूषणं साधु-कोटीरस्य विभूषणम् ॥ ४० ॥**

**'रत्नकोटीनां'** रत्नानां कोट्यः तासाम् । **'सत्त्वेऽपि'** विद्यमानत्वेऽपि । **'साधुकोटीरस्य'** सज्जन-नायकस्य । **'तस्य'** गोभद्रश्रेष्ठिनः । **'रत्नत्रयी'** ज्ञान-दर्शन-चारित्रात्मिका । **'परं'** उत्तमम् । **'अदूषणं'** निष्कलङ्कम् । **'विभूषणं'** अलङ्कारः । **आसीत्** ॥ ४० ॥

**मनोवाक्कायचेष्टासु, धर्मस्तस्यावतिष्ठते । अर्थो वचसि कायेऽपि, कामः काये कदाचन ॥ ४१ ॥**

**'तस्य'** श्रेष्ठिनः । **'मनोवाक्कायचेष्टासु'** विचारोच्चाराचारेषु । **'धर्मः'** आर्हतः धर्मः । **'अवतिष्ठते'** अवस्थानं करोति। **'अर्थः'** धनम् । पुनश्चकारार्थः । **'वचसि'** वचने । **'कायेऽपि'** कदाचित् शरीरेऽपि । **'कामः'** मदनः । **'काये'** शरीरे कदाचनैव ॥ ४१ ॥

**निष्पङ्काकाकाशगङ्गेव, मर्त्यगङ्गेव दोषहृत् । निःसन्तापा च पाताल-गङ्गेव विशदाशया ॥ ४२ ॥**

**चन्द्रक्रीडाचकोरीव, सदाऽऽनन्दविलोचना । सदा सर्वर्तुकाराम-पिकीव प्रियभाषिणी ॥ ४३ ॥**

**धर्मस्येव मनः शुद्धि-रर्थस्येव नयस्थितिः । मदनस्येव मर्यादा, भद्रा तस्याऽभवत् प्रिया ॥ ४४ ॥ ( विशेषकम् )**

**'आकाश-गङ्गा इव'** सुरसरिदिव । **'निष्पङ्का'** कर्दमरहिता निर्मला । **'मर्त्यगङ्गा इव'** भूगङ्गा इव । **'दोषहृत्'** पापहारिणी। यदुक्तं लौकिकैः 'दृष्टा जन्मकृतं पापं, स्पृष्टा जन्मशतत्रयम् । स्नाता जन्मसहस्रस्य, हरेद् गङ्गा कलौ युगे ॥ **'पातालगङ्गा इव'** अधोलोकगङ्गा इव । **'निःसन्तापा'** सन्तापरहिता । **'विशदाशया'** निर्मलान्तःकरणा ॥ ४२ ॥ **'चन्द्रक्रीडाचकोरी इव'** चन्द्रः एव क्रीडा यस्याः सा चासौ चकोरी च, तद्वत् । **'सदाऽऽनन्दविलोचना'** नित्यानंदनेत्रा । **'सर्वर्तुकारामपिकी इव'** सर्वे ऋतवः यस्मिन् स चासौ आरामश्च तत्रस्था पिकी-कोकिला इव । **'सदा'** न केवलं वसन्तकाले किन्तु सर्वदा। **'प्रियभाषिणी'** मधुरवादिनी ॥ ४३ ॥ **धर्मस्य** । **'मनःशुद्धिः'** चित्तविशुद्धिः इव मुख्या, मनःशुद्धिं विना कृतः धर्मः प्रायेण विफलः । यदुक्तम्-''मनःशुद्धिमबिभ्राणा, ये तपस्यन्ति मुक्तये । त्यक्त्वा नावं भुजाभ्यां ते, तितीर्षन्ति महार्णवम्'' ॥ **'अर्थस्य'** धनस्य । **'नयस्थितिः इव'** न्यायमार्गः इव । अर्थे किल न्यायसम्पन्नता मुख्या । अन्यायार्जितं धनं न वृद्धिं गच्छति न च लोकप्रियतां विश्राणयति । यदुक्तम्-''अन्यायोपार्जितं वित्तं, दशवर्षाणि तिष्ठति । प्राप्ते त्वेकादशे वर्षे समूलं तद् विनश्यति ॥'' **'कामस्य'** भोगस्य । **'मर्यादा इव'** अवधिः इव । मर्यादाहीनः कामः भोक्तुरेव विनाशाय भवति। यदुक्तम्-'भोगे रोगभयम्' तद्वत् । **'तस्य'** श्रेष्ठिनः । **'भद्रा'** तन्नामिका । **'प्रिया'** पत्नी । **अभवत्** ॥ ४४ ॥

**कार्यहानिमनार्याणां, यच्छतीव मृतिं रुषाम् । नैःस्व्यं मदानां विश्वेषां, बुद्धिनाशं च दुर्धियाम् ॥ ४५ ॥**

**कलिं निःशेषदोषाणां, जयं पत्युर्वितन्वती । भद्रा भद्राय सा किन्तु, चतुःषष्टिकलान्विता ॥ ४६ ॥ ( युग्मम् )**

'**अनार्याणाम्**' पापानाम् । '**कार्यहानिं**' कर्मविनाशम् । '**यच्छती इव**' कुर्वती इव । '**रुषां**' क्रोधानाम् । '**मृतिं**' मृत्युम् । '**मदानां**' मानानाम् । '**नैःस्व्यं**' दारिद्र्यम् । '**विश्वेषां**' सर्वेषाम् । '**दुर्धियां**' दुष्टमतीनाम् । '**बुद्धिनाशं**' मतिहानिम् । चः समुच्चये ॥ ४५ ॥ '**निःशेषदोषाणां**' समस्तदुर्गुणानाम् । '**कलिं**' कलहं विनाशम् । '**पत्युश्च**' प्रियस्य च । '**जयं**' विजयम् । '**वितन्वती**' कुर्वती । **चतुःषष्टिकलान्विता** । '**भद्रा**' गोभद्रपत्नी । '**भद्राय**' मङ्गलाय । **किन्तु सा भद्रा** ज्योतिःशास्त्रप्रसिद्धा विष्टिः । '**अभद्राय**' अमङ्गलाय । का सा विष्टिः ? उच्यते-बाण-द्वि-दिग्-जलधि-षट्-त्रिषु नाडिकासु, वक्त्रं गलो हृदय-नाभि-कटाश्च पुच्छम् । विष्टे र्विदध्युरिह कार्य-वपुः स्व-बुद्धि-प्रेम-द्विषां क्षयमिमेऽवयवाः क्रमेण ॥ (वसन्त.) एवं भद्रा (विष्टिः) ३० कलान्विता । गोभद्रपत्नी भद्रा ६४ कलान्विता । भद्रा (विष्टिः) अभद्राय । भद्रा (गोभद्रपत्नी) भद्राय ॥ ४६ ॥

**अनयोर्नर्मदोत्सङ्ग-केलि-कल्लोल-लोलयोः । कियानपि ययौ कालः, करेण्वोरिव भद्रयोः ॥ ४७ ॥**

'**नर्मदोत्सङ्ग-केलि-कल्लोल-लोलयोः**' रेवानद्यङ्कक्रीडालहरी-चपलयोः । '**भद्रयोः करेण्वोरिव**' भद्रजातीयहस्तिदम्पत्योरिव । '**अनयोः**' गोभद्रभद्रयोः । **कियानपि कालः ययौ** ॥ ४७ ॥

**सङ्गमजीवस्य अवतरणम्–**

**चङ्गः सङ्गमकस्याथ, जीवः पीवरपुण्यभूः । अतन्द्रभद्रदन्तीव, भद्राकुक्षाववातरत् ॥ ४८ ॥**

**अथ** । **'चङ्गः'** मनोज्ञः । **'पीवरपुण्यभूः'** प्रकृष्ठसुकृतधाम । **सङ्गमकस्य जीवः** । **'अतन्द्रभद्रदन्तीव'** निस्तन्द्रभद्रहस्ती इव । **भद्राकुक्षौ** । **'अवातरत्'** अवतीर्णवान् ॥ ४८ ॥

**तुङ्गस्तम्बकरिस्फाति-नम्रशूक-शिखामुखम् । गोपी-गीतोद्धतं राज-शुक-राजि-विराजितम् ॥ ४९ ॥**

**शालिग्रामादिवायातं, तत्प्रीत्या सा निशात्यये । शालिक्षेत्रं परीपाक-पिशङ्गं स्वप्नमैक्षत ॥ ५० ॥**

**'तुङ्ग-स्तम्बकरिस्फाति-नम्रशूकशिखामुखं'** तुङ्गाः उच्चाः ये स्तम्बकरयो व्रीहयः तेषां स्फात्या वृद्धया नम्राणि शूक-शिखा-मुखानि तीक्ष्णाग्राणि शिखामुखानि यस्य तत् । **'गोपीगीतोद्धतं'** गोप्यः क्षेत्ररक्षिकाः स्त्रियः तासां गीतेः उद्धतं उत्कटं युक्तम् । **'राजशुकराजिविराजितं'** शुकेषु राजानः इव राजशुकाः तेषां राजिः श्रेणिः तया विराजितं शोभितम् ॥ ४९ ॥ **'तत्प्रीत्या इव'** सङ्गमभवस्नेहादिव । **शालिग्रामात् आयातम्** । **'परीपाकपिशङ्गं'** परिपाकेन पिशङ्गं पीतम् । **शालिक्षेत्रम्** । **'निशात्यये'** निशायाः अत्यये अन्ते प्रभाते । **'सा'** भद्रा । **स्वप्नम्** । **'ऐक्षत'** दृष्टवती ॥ ५० ॥

**तुच्छेऽवकरकूटाभे, कुले लब्धोदयः पुरा । रोपितः सुकुले वप्रे, शालिस्तम्बसमो हि सः ॥ ५१ ॥**

**'पुरा'** पूर्वम् । **'अवकरकूटाभे'** धूल्यादिकचवरपुञ्जसमे । **'तुच्छे'** हीने । **'कुले'** गोपकुले । **'लब्धोदयः'** मुनिदानात् प्राप्तप्रकर्षः । **'शालिस्तम्बसमः'** शालिरोपतुल्यः । **हिः** निश्चये । **'सः'** सङ्गमजीवः । **'सुकुले'** गोभद्रस्य श्रेष्ठकुले । **'वप्रे'** केदारे । **रोपितः** । पुण्यकर्मणा इति अध्याहार्यम् । अन्यस्थाने उप्ताः शालयः किल अन्यकेदारे रोप्यन्ते ॥ ५१ ॥

**सकर्णा वर्णिनी तूर्णमेत्य पत्युर्वितत्य सा । तेने तमर्थमत्यर्थं, कर्णजाहावगाहिनम् ॥ ५२ ॥**

**'सकर्णा'** कुशला । **'सा'** भद्रा । **'वर्णिनी'** महिला । **'पत्युः'** स्वामिनः पार्श्वे । **'तूर्णं'** क्षिप्रम् । **'एत्य'** आगत्य। **'कर्णजाहावगाहिनं'** कर्णमूलावगाहिनम् । कर्णस्य मूलं कर्णजाहम् । 'कर्णादिर्मूले. ७-१-८८ इति जाहप्रत्ययः । **'तमर्थं'** स्वप्नार्थम् । **'अत्यर्थं'** अत्यन्तम् । **'वितत्य'** विस्तीर्य । **'तेने'** कथितवती ॥ ५२ ॥

**अनूपविपुलाशालिक्षेत्रवत् सौरभाद्भुतम् । गोपीगीतगुणग्रामं, सुवयस्यशुकप्रियम् ॥ ५३ ॥**

**परिपाके च माधुर्यधुर्यतावर्यताऽऽस्पदम् । सुतं प्राप्ताऽसि तामेवमभ्यनीनन्ददाशु सः ॥ ५४ ॥**

**'अनूप-विपुला-शालिक्षेत्रवत्'** सजलभूमिस्थशालिक्षेत्रवत् 'अनुपोऽम्बुमान् (देशः)' इति हैम्याम् । (विपुला-पृथ्वी) **'सौरभाद्भुतं'** सौरभेण सुगन्धेन पुत्रपक्षे-यशः-सौरभेण अद्भुतं आश्चर्यप्रदम् । **'गोपीगीतगुणग्रामं'** गोप्यः क्षेत्ररक्षिकाः राज्यश्च, शालिक्षेत्रपक्षे क्षेत्ररक्षिकाः पुत्रपक्षेः राज्यः, ताभिः गीतः गुणग्रामः यस्य सः तम् । **'सुवयस्यशुकप्रियं'** समानं शोभनं वा वयः येषां ते सुवयस्याः तरुणाः ते एव शुकाः तेषां प्रियं इष्टम् ॥ ५३ ॥ **'परिपाके'** परिणामे । चः समुच्चयार्थः। **'माधुर्य-धुर्यता-वर्यतास्पदं'** माधुर्यं मधुरता, धुर्यता मुख्यत्वं, वर्यता श्रेष्ठत्वं, तेषां आस्पदं-स्थानम् । शालिषु सुते च इमे गुणाः घटन्ते एव । **'सुतं'** पुत्रम् । **'प्राप्ताऽसि'** प्राप्स्यसि । **एवम्** । **'सः'** श्रेष्ठी । **'आशु'** क्षिप्रम् । **'तां'** प्रियाम्। **'अभ्यनीनन्दत्'** अभिनन्दितवान् ॥ ५४ ॥

**तैलकन्दमहारत्नं, पातालमधुसेवधिम् । सर्वसंहेव तं गर्भं, महनीयमुवाह सा ॥ ५५ ॥**

**'सर्वसंहेव'** पृथ्वी इव । **'तैलकन्दमहारत्नं'** तैलकन्दनामा रत्नविशेषः तम् । **'पातालमधुसेवधिं'** पातालमधु अमृतं तस्य सेवधिं निधिं वहति तद्वत् । **'सा'** भद्रा । **'महनीयं'** पूजनीयम् । **गर्भम्** । **'उवाह'** अवहत् ॥ ५५ ॥

भद्रायाः दानदौर्हृदम्–

**तैलकन्दाद्यथाऽन्तः स्थादिला स्नेहाविला बहिः । तथाऽस्माद्दानधीकन्दादम्बाऽभूद्दानदोहदा ॥ ५६ ॥**

यथा । '**अन्तःस्थात्**' मध्यस्थितात् । '**तैलकन्दात्**' तन्नामकात् रत्नात् । '**इला**' पृथ्वी । '**बहिः**' उपरिभागे । '**स्नेहाविला**' स्नेहसहिता । **तथा** । '**दान-धी-कन्दात्**' दानबुद्धिमूलात् । '**अस्मात्**' गर्भस्थशालिभद्रात् । '**अम्बा**' भद्रा । '**दान-दोहदा**' दानं दातुमनाः । **अभूत्** ॥ ५६ ॥

**सुखेऽपि विबुधाः सद्यः, पूर्वस्नेहं त्यजन्त्यहो । सस्मरे दानमित्रस्य, गर्भदुःखेऽपि तेन तु ॥ ५७ ॥**

'**अहो**' आश्चर्ये । '**सुखेऽपि**' सुखसमयेऽपि । '**विबुधाः**' देवाः । '**पूर्वस्नेहं**' भवान्तरप्रेम । '**सद्यः**' सपदि । '**त्यजन्ति**' परिहरन्ति । '**तु**' परन्तु । '**तेन**' शालिभद्रेण । **गर्भदुःखेऽपि** । '**दानमित्रस्य**' दानमेव मित्रं तस्य । अत्र स्मृत्यर्थदयेशः ।२।२।११॥ इत्यनेन द्वितीयार्थे षष्ठी । दानमित्रमित्यर्थः । '**सस्मरे**' स्मृतम् ॥ ५७ ॥

**तस्य दानादरः पश्य, पारदः कटरे स्थितः । चिन्मूषायां गर्भदुःखाग्निना यन्नोदडीयत ॥ ५८ ॥**

'**कटरे**' अहो । '**पश्य**' विलोकय । यत् । '**तस्य**' शालिभद्रस्य । '**दानादरः पारदः**' दानादररूपः पारदः । '**चिन्मूषायां**' चैतन्यमूषायां, मूषा सुवर्णद्रवणपात्रविशेषः तत्र । '**स्थितः**' अवस्थितः । **गर्भदुःखाग्निना** गर्भावासदुःखं तदेव अग्निः तेन । '**न उदडीयत**' न उड्डीनवान् । उड्डीयते हि पारदः अग्निसम्पर्कात् । अत्र तु गर्भदुःखानलेन दानादरः पारदः न उड्डीनः इति चित्रम् ॥ ५८ ॥

**वासस्य धातवः सीमा, पूर्वाः क्षीणास्तु तस्य ते । असम्पूर्णेषु नव्येषु, दानवासस्तदद्भुतम् ॥ ५९ ॥**

**'वासस्य'** वासनायाः । **'सीमा'** अवधिः । **'धातवः'** शरीरस्थरुधिरादिसप्तधातवः । वासो हि सप्तधातून् यावद् भवति । **'तु'** किन्तु । **'तस्य'** शालिभद्रस्य । **'ते पूर्वाः'** सङ्गमभवप्रतिबद्धाः धातवः क्षीणाः । **'नव्येषु'** नवीनेषु च धातुषु । **'असम्पूर्णेषु'** अनुत्पन्नेषु, अपूर्णे गर्भकाले अपूर्णता भवत्येव शरीरस्य । **'दानवासः'** दानवासना दानेच्छा जाता। **तद् अद्भुतम्** ॥ ५९ ॥

**दोहदं सौहृदश्रेष्ठः, श्रेष्ठी विज्ञाय सोऽन्यदा । त्वरया पूरयामास, श्रीमतां हि स्पृहा महः ॥ ६० ॥**

**'सौहृदश्रेष्ठः'** सौहृदे स्नेहे श्रेष्ठः प्रकृष्टः । **'सः श्रेष्ठी'** गोभद्रः । **'अन्यदा'** अन्यस्मिन् दिवसे । **'दोहदं'** दानेच्छाम् । **'विज्ञाय'** अवगम्य । **'त्वरया'** तूर्णम् । **'पूरयामास'** पूर्तिं कृतवान् । **'हि'** यस्मात् । **'श्रीमतां'** लक्ष्मीवताम् । **'स्पृहा'** वाञ्छा । **'महः'** उत्सवः । महानेष उत्सवः यत् महतां श्रीमतां वाञ्छा जायते ॥ ६० ॥

**सर्वाङ्गीणैर्दयादानैः, पात्रदानैर्गुणोत्तरैः । प्रववर्षाशु वर्षावद्, भद्रा गोभद्रहर्षदा ॥ ६१ ॥**

**'सर्वाङ्गीगीणैः'** सर्वं अङ्गं व्याप्नुवन्ति इति सर्वाङ्गीणानि तैः । 'सर्वादेः' ७।१।९४॥ इति ईनप्रत्ययः । **दयादानैः**। **'गुणोत्तरैः'** गुणैः उत्तरैः उत्तमैः । **पात्रदानैः**। **'भद्रा'** शालिमाता । **'आशु'** क्षिप्रम् । **'वर्षावत्'** प्रावृड्वत् । **'प्रववर्ष'** प्रकर्षेण वृष्टवती । कीदृशी भद्रा ? **'गोभद्र-हर्षदा'** निजपतिगोभद्रमनः प्रमोददात्री । वर्षापक्षे-गौः पृथ्वी धेनुवृषभाश्च तेभ्यो जलवर्षणेन भद्रहर्षौ कल्याणानन्दौ ददातीत्येवंशीला ॥ ६१ ॥

**शालिभद्रस्य जन्म–**

**अतिक्रान्तेषु मासेषु, नवस्वथ दिनेष्वपि । किञ्चिन्न्यूनेषु नवसु, ग्रहेषूच्चस्थितेषु च ॥ ६२ ॥**

**भद्रा नवसुवर्णाभं, पूर्वेव दिवसेश्वरम् । कल्याणकमलोल्लास-मसूत सुतमर्चितम् ॥ ६३ ॥ (युग्मम्)**

**अथ नवसु मासेषु अतिक्रान्तेषु** पूर्णेषु । **दिनेषु अपि किञ्चिन्न्यूनेषु नवसु । उच्चस्थितेषु ग्रहेषु** बुधादिषु ॥ ६२ ॥ ‘**पूर्वेव**’ प्राची दिग् इव । **भद्रा** । ‘**दिवसेश्वरं**’ सूर्यम् । ‘**नवसुवर्णाभं**’ तप्ततपनीयकान्तिम् । सूर्योऽपि उदयकाले तप्तस्वर्णकान्तिः भवति । ‘**कल्याणकमलोल्लासं**’ कल्याणकमलानां मङ्गलपङ्कजानां उल्लासः विकासः यस्मात् तम् । सूर्योऽपि कमलानि विकासयति । ‘**अर्चितं**’ पूजितम् । सूर्योऽपि प्रातः नमस्कारेण पूज्यते एव । ‘**सुतं**’ पुत्रम् । ‘**असूत**’ अजीजनत् ॥ ६३ ॥

**दीपोत्सवः पुत्रजन्मोत्सवस्यांशो न षोडशः । सदा मङ्गल्यरूपस्य, सन्ततोद्योतदायिनः ॥ ६४ ॥**

**विचिन्त्येत्यविचिन्त्यश्रीः, सभगम्भावुकस्थितिः । निर्विगीतैः सुसङ्गीतैर्गुप्तिमोक्षसलक्षणैः ॥ ६५ ॥**

**सर्वपात्रीणसन्मान-दानैरुद्यद्ध्वजव्रजैः । श्रीश्रेणिकनृपादेशा-दलङ्कर्मीणविक्रमैः ॥ ६६ ॥**

**पुत्रजन्मोत्सवारम्भैः श्रेष्ठी गोष्ठीकृतालकम् । चक्रे राजगृहं साक्षात्, सर्वं राजगृहं पुरम् ॥ ६७ ॥**

‘**दीपोत्सवः**’ दीपावलीमहः । ‘**पुत्रजन्मोत्सवस्य**’ पुत्रस्य जन्मना यः उत्सवः क्रियते तस्य । षोडशोऽपि अंशः-भागः न अस्ति । कथम्भूतस्य पुत्रजन्मोत्सवस्य ? ‘**सदा मङ्गल्यरूपस्य**’ नित्यं कल्याणरूपस्य । ‘**सन्ततोद्योतदायिनः**’ अविच्छिन्नप्रकाशप्रदस्य । दीपावलीमहः क्षणिकप्रकाशप्रदः किन्तु पुत्रः सदोद्योतप्रदः मङ्गल्यरूपश्च । तस्मात् कथं दीपावलीमहः पुत्रोत्सवसमः भवेत् ? ॥ ६४ ॥ इति विचिन्त्य विचार्य । ‘**अविचिन्त्यश्रीः**’ अकल्प्यलक्ष्मीकः । ‘**सुभगम्भावुकस्थितिः**’ असुभगः सुभगः भवति इति सुभगम्भावुकः तस्य स्थितिः यस्य । नग्न-पलित. ।५।१।१२८।। इति सूत्रेण च्व्यर्थे खुकञ् । ‘**निर्विगीतैः**’ विगीतेन विगानेन निन्दया रहितैः निर्दोषैः ‘**सुसङ्गीतैः**’ शोभनानि सङ्गीतानि येषु तैः । ‘**गुप्तिमोक्षसलक्षणैः**’ गुप्तिः कारागृहं तस्मात् मोक्षः बन्दिजनानां मुक्तिः तत्सलक्षणैः तत्सदृशैः । ‘**सर्व-**

**पात्रीणसन्मानदानैः'** सर्वपात्राणि व्याप्नुवन्ति सर्वपात्रीणानि । 'सर्वादे. ७।१।९४॥ इति ईनः । तेभ्यः **सन्मानदानैः** । **'उद्यद्ध्वजव्रजैः'** उदगच्छत्पताका-निकरैः । **श्रीश्रेणिकनृपादेशात्** । **'अलङ्कर्मीणविक्रमैः'** अप्रतिहतसामर्थ्यैः ॥ ६६ ॥ **'पुत्रजन्मोत्सवारम्भैः'** ईदृशैः पुत्रजन्मनः उत्सवस्य आरम्भैः समारोहैः । **'श्रेष्ठी'** गोभद्रः । **'गोष्ठीकृतालकं'** गोष्ठं गोकुलम्, यत्र गावस्तिष्ठिन्ति, अगोष्ठा गोष्ठीकृता अलका (धनदनगरी) येन तद् गोष्ठी कृतालकम् । **सर्वं राजगृहं पुरं साक्षात्** । **'राजगृहं'** राजमन्दिरम् । **'चक्रे'** कृतवान् ॥ ६७ ॥

**सोऽथ चन्द्रार्कमालोक्य, षष्ठीजागरपूर्वकम् । वितेने नामकरणं, सुभगङ्करणं श्रियाम् ॥ ६८ ॥**

**मातृस्वप्नानुसारेण, सर्व-स्वजन-साक्षिकम् ।'शालिभद्र' इति ख्यातं, स्वसूनोरभिधां व्यधात् ॥ ६९ ॥ ( युग्मम् )**

अथ । **'सः'** गोभद्रश्रेष्ठी । **'चन्द्रार्कं'** चन्द्रः शशी अर्कः सूर्यः तयोः समाहारः चन्द्रार्कम् । **'आलोक्य'** दर्शयित्वा। चन्द्रार्कदर्शनं लोकप्रसिद्धः आचारविशेषः । षष्ठीजागरपूर्वकं जन्मतः षष्ठे दने जागरणं क्रियते, तद्दिने विधाता भाग्यलेखं लिखितुमागच्छतीति लौकिकाः । **'श्रियां'** लक्ष्मीणाम् । **'सुभगङ्करणं'** असुभगः सुभगः क्रियते अनेन । कृगः खनट् ।५।१।१२९॥ इति सूत्रेण सुभगङ्करणम् । **'नामकरणं'** नामस्थापनम् । **'वितेने'** अकरोत् ॥ ६८ ॥ **'सर्व-स्वजन-साक्षिकं'** सर्वेषां स्वजनानां साक्षितया । **'मातृस्वप्नानुसारेण'** शालिक्षेत्रस्वप्नानुसारेण । **'स्वसूनोः'** निजपुत्रस्य । **'अभिधां'** नाम । **'शालिभद्र'** इति ख्यातं प्रसिद्धम् । **'व्यधात्'** अकरोत् ॥ ६९ ॥

**स्नेहः सतां विनीतानां, गुणौघोऽभ्यस्यतां श्रुतम् । श्रीपूर इव धन्यानां, प्राप वृद्धिं क्रमेण सः ॥ ७० ॥**

**'सतां'** सज्जनानाम् । **स्नेहः** प्रेम । वृद्धिं गच्छति इति अग्रेऽपि द्रष्टव्यम् । **'विनीतानां'** नम्राणाम् । **'गुणौघः'**

गुणसमुदायः । '**अभ्यस्यतां**' अध्ययनं कुर्वताम् । '**श्रुतं**' शास्त्रम् । '**धन्यानां**' सौभाग्यशालिनाम् । '**श्रीपूरः**' लक्ष्मीप्रवाहः इव । '**सः**' शालिभद्रः । **क्रमेण वृद्धिं प्राप** ॥ ७० ॥

**व्रतं समितयः पञ्च, नाटकं सन्धिशुद्धयः । तत्त्वप्रवृत्तयः प्राणं, स्मरमिन्द्रियवृत्तयः ॥ ७१ ॥**

**करणस्थितयो राज्यमिव सर्वार्थसाधकम् । धात्र्यः सर्वोपधाशुद्धाः सकलास्तमलालयन् ॥ ७२ ॥ ( युग्मम् )**

'**पञ्च समितयः**' ईर्याद्याः' । '**व्रतं**' संयमम् । यथा पालयति इति सर्वत्र द्रष्टव्यम् । '**सन्धिशुद्धयः**' मुख-प्रतिमुख-गर्भ-विमर्श-निर्वहणाख्याः पञ्च नाटकविज्ञानानि । **नाटकम्** । '**तत्त्वप्रवृत्तयः**' तत्त्वानां शरीरस्थितानां पृथ्व्यादिपञ्चमहाभूत-तत्त्वानां प्रवृत्तयः । '**प्राणं**' जीवितम् । '**इन्द्रियवृत्तयः**' स्पर्शनादिपञ्चेन्द्रियाणां वृत्तयः । '**स्मरं**' कामम् ॥ ७१ ॥ '**करणस्थितयः**' पुराधिकरणानि पञ्च । **राज्यमिव** । '**सर्वार्थसाधकं**' सकलकार्यविधायकम् विदधति । तद्वत् । '**सर्वोपधाशुद्धाः**' सर्वाभिः उपधाभिः परीक्षाभिः शुद्धाः । का उपधा ? तत्स्वरूपं चेदं हैमनाममालायाम्-'भिया धर्मार्थकामैश्च, परीक्षाया तु सोपधा' भय-धर्मार्थकामोपन्यासेन अमात्यानाम् आशयान्वेषणम् । उपधीयते समीपे ढौक्यते परीक्षार्थमुपधा । यत्कौटिल्यः-उपधाभिः शौचाशौचपरिज्ञानममात्यानाम् । '**सकलाः**' कलाभिः सहिताः समस्ताः वा । '**धात्र्यः**' पञ्च । '**तं**' शालिभद्रम् । '**अलालयन्**' लालितवत्यः ॥ ७२ ॥

**रिङ्खणं क्रमणं किञ्च, जेमनं पिण्डवर्धनम् । जल्पश्चेलोपनयनं, वत्सरग्रन्थिबन्धनम् ॥ ७३ ॥**

**अन्यान्यपीत्थं कृत्यानि, महेन महता पिता । कारयामास सोल्लासः, श्रीरेवं हि फलेग्रहिः ॥ ७४ ॥** ॥ ७३ ॥

**'रिङ्खणं'** स्खलनं, स्खल्यते हि लघुशिशुश्चलने । **'क्रमणं'** गमनम् । **किञ्च** । **'जेमनं'** भोजनम् । **'पिण्डवर्धनं'** पिण्डेन कवलेन वर्धनम् । **'जल्पः'** संलापः । **'चेलोपनयनं'** वस्त्रपरिधानम् । **'वत्सरग्रन्थिबन्धनं'** 'वर्षगांठ उजववी' इति भाषायाम् । इत्थं अन्यानि अपि लोकप्रसिद्धानि । **'कृत्यानि'** कार्याणि । **'पिता'** गोभद्रः । **कारयामास** । **'हिः'** यस्मात् । **'श्रीः'** लक्ष्मीः । **एवं फलेग्रहिः** फलं गृह्णातीत्येवंशीला । रजःफलेमलाद् ग्रहः ।५।१।९८।। इति इः । सफला भवतीत्यर्थः ॥ ७३ ॥ ७४ ॥

**स भूरिसम्भृतावापः, शोणहस्तपदच्छदः । रसालः शालिभद्रोऽयं, शालते प्रोल्लसद्द्विजः ॥ ७५ ॥**

**सः अयं रसालः** आम्रः, **रसपूर्णः शालिभद्रः शालते**-शोभते । कथम्भूतः सः ? **'भूरिसम्भृतावापः'** भूरिणः सुवर्णस्य सम्भृतः धृतः आवापः कङ्कणं येन सः । 'जाम्बूनदं शातकौम्भं रजतं भूरि भूत्तमम्' इति हैम्याम् । आम्रपक्षे-भूरि अत्यन्तं सम्भृतः धृतः आवापः आलवालः यस्य सः । **'शोणहस्तपदच्छदः'** शोणाः रक्ताः हस्तौ पदौ पादौ छदौ ओष्ठौ यस्य सः । पक्षे-शोणानि हस्त-पद-च्छदानि शाखास्कंध-पर्णानि यस्य सः । **'प्रोल्लसद्द्विजः'** प्रोल्लसन्तः द्विजाः दन्ताः यस्य सः । पक्षे-प्रोल्लसन्तः द्विजाः विहगाः यस्मिन् सः ॥ ७५ ॥

**दन्ताबलमलं बालं, पुन्नागा गोत्रजा वशाः । सनीडाः क्रीडयन्ति स्म, प्रसरत्करपुष्कराः ॥ ७६ ॥**

**'दन्ताबलं'** उद्गतदन्तम् कृष्यादिभ्यो ।७।२।२७।। इति बलच्प्रत्ययः । बलच्यपित्रादेः ।३।२।८२।। इति दीर्घः । हस्तिपक्षे-कलभकम् । **'अलं'** समर्थम् । **'बालं'** शिशुं शालिभद्रम् । **'गोत्रजाः पुन्नागाः'** गोत्रिणः पुरुषश्रेष्ठाः । हस्तिपक्षे-पर्वतजाः श्रेष्ठहस्तिनः । **'वशाः'** नार्यः । पक्षे-हस्तिन्यः । **'सनीडाः'** समीपस्थाः । **'प्रसरत्करपुष्कराः'** प्रसरन्तौ करपुष्करौ हस्तकमलौ

येषां ते । पक्षे-प्रसरच्छुण्डाग्राः । **'क्रीडयन्ति स्म'** खेलयन्ति स्म । यथा कलभकं हस्तिनः हस्तिन्यश्च खेलयन्ति तथा बालं शालिभद्रं सर्वे खेलयन्ति इत्यर्थः ॥ ७६ ॥

**काञ्चनाम्भोजयोस्तस्य, पदोः कनकघुर्घुराः । तदीयरेणुपिङ्गाङ्गा, रेणुर्भृङ्गा इवानिशम् ॥ ७७ ॥**

**'तस्य'** शालिभद्रस्य । **'कनकाम्भोजयोः'** सुवर्णकमलसमयोः । **'पदोः'** पादयोः । **'कनकघुर्घुराः'** सुवर्णघुर्घुराः । 'घुघरा' इति भाषायाम् । **'तदीयरेणुपिङ्गाङ्गाः'** तदीयरेणुभिः चरणकमलरेणुभिः पिङ्गाङ्गाः पीतावयवाः । **'भृङ्गाः इव'** भ्रमराः इव । **'अनिशं'** अजस्रम् । **'रेणुः'** रणत्कारं चक्रुः । शालिभद्रस्य शिशोः चरणकमलयोः सुवर्णघुर्घुराः भ्रमराः इव रणत्कारं कुर्वन्ति स्म इत्यर्थः ॥ ७७ ॥

**प्रालम्बिका प्रलम्बाऽस्य, बभौ कण्ठावलम्बिता । वयसः प्रथमस्येव, केलिदोला चलाचला ॥ ७८ ॥**

**'अस्य'** बालशालिभद्रस्य । **'कण्ठावलम्बिता'** कण्ठस्थिता । **'प्रलम्बा'** प्रकृष्टेन लम्बमाना । **'प्रालम्बिका'** हारविशेषः । **'प्रशमस्य वयसः'** शिशुत्वस्य । **'चलाचला'** चला चपला । 'चराचर-चलाचल ।४।१।१३॥ इति सूत्रेण निपातः । **'केलिदोला इव'** केल्याः क्रीडायाः दोला हिण्डोलकः इव । **'बभौ'** भाति स्म । शिशुशालिभद्रकण्ठस्थितः प्रालम्बिकाहारः चलत्वं गच्छन् क्रीडाहिण्डोलको भवतीत्यर्थः ॥ ७८ ॥

**सरङ्गचञ्चुचरणः, सद्गतिर्मधुरस्वरः । बलक्षपक्षपक्षीव, काकपक्षधरोऽप्यभूत् ॥ ७९ ॥**

**'काकपक्षधरोऽपि'** स बालः **'बलक्षपक्षपक्षीव'** वलक्षौ श्वेतौ पक्षौ यस्य सः वलक्षपक्षः हंसः राजहंसपक्षीव । **अभूत्**। अत्र विरोधपरिहाराय 'काकपक्षधरः' इति पदस्य बाल-शिखाधारकः इत्यर्थः कार्यः । 'सा (शिखा) बालानां

काकपक्षः शिखण्डक-शिखाण्डकौ' इति हैम्याम् । कथम्भूतः सः ? '**सरङ्गचञ्चुचरणः**' लाक्षादिरागैः सरङ्गः रक्तः चञ्चुः-रक्तैरण्डः तद्वत् रक्तौ चरणौ यस्य सः । हंसपक्षे-सरङ्गा रक्ताः चञ्चुचरणाः यस्य सः । '**सद्गतिः**' शोभना गतिः यस्य सः । '**मधुरस्वरः**' प्रियवचनः ॥ ७९ ॥

**पुरीषशूकराः केचित्, चापल्यकपयः परे । मायागोमायवः केऽपि, बाला व्याला इवेतरे ॥ ८० ॥**

**पावित्र्यप्रीतिजात्याश्वः, संलीनाङ्गत्वकच्छपः । स तु सिंह इवौजस्वी, शमवान् शमवानिव ॥ ८१ ॥**

'**परे**' शालिभद्राद् अन्ये । '**केचिद्**' बालाः । '**पुरीषशूकराः**' पुरीषे विष्ठायां शूकराः । '**केचित् चापल्यकपयः**' चापल्ये चञ्चलतायां कपयः वानराः । '**केऽपि मायागोमायवः**' मायायां कपटकरणे गोमायुतुल्याः श्रृगालसमाः । **केऽपि इतरे** परे **व्यालाः** दुष्टश्वापदतुल्याः भवन्ति ॥ ८० ॥ '**तु**' परन्तु । '**सः**' शालिभद्रः । '**पावित्र्यप्रीतिजात्याश्वः**' पावित्र्यं शुचित्वं प्रीतिः प्रेम इत्यादिसम्पादने जात्याश्वः जातिमदश्वतुल्यः । '**संलीनाङ्गत्व-कच्छपः**' अङ्गसंलीनतायां कच्छपः । **सिंहः इव ओजस्वी** । '**शमवानिव**' मुनिरिव । '**शमवान्**' उपशान्तः । अयं बालशालिः नेतरप्राकृतडिम्भसमानः इत्यर्थः ॥ ८१ ॥

**पित्रोः पुण्यविवर्तोऽसौ, सौभाग्योपरि मञ्जरी । मज्जेव सुखबीजस्य, जीवितस्यापि जीवितम् ॥ ८२ ॥**

**उपाध्यायाय शुद्धाय, सार्थेशोऽर्थमिव प्रियम् । तं कलान्तरलाभाय, सर्वसाक्षिकमर्पयत् ॥ ८३ ॥**

'**पित्रोः**' जननीजनकयोः । '**असौ**' बालः । '**पुण्यविवर्तः**' पुण्यपरिपाकः । '**सौभाग्योपरि मञ्जरी**' सौभाग्यसहकारोपरि मञ्जरीसमः । **सुखबीजस्य मज्जा इव** । बीजे हि मज्जा सारभूता । **जीवितस्य अपि जीवितम् । अभूत्** ॥ ८२ ॥ '**सार्थेशः**' गोभद्रः । '**अर्थमिव प्रियं**' धनमिव प्रियम् । '**तं**' बालम् । '**शुद्धाय**' पवित्राय । धनपक्षे-सज्जनाय । '**उपाध्यायाय**' पाठकाय ।

उपेत्य अधीयते यस्मात् सः तस्मै । पक्षे-अधमर्णा, उपाधिना आयो लाभो यस्मात्, उप-समीपे आधिरेवंविधः आयो वा यस्मात् तस्मै उपाध्यायाय । **'कलान्तरलाभाय'** अन्यायकलाप्रासये । पक्षे-वृद्धि (व्याज) लाभाय । **'सर्व-साक्षिकं'** सर्वस्वजनादिसाक्षिकम् । पक्षे-मुख्य-महाजनसाक्षिकम् । अन्यसाक्षिकं हि धनं दीयते । **'अर्पयत्'** अर्पितवान् ॥ ८३ ॥

**स नम्रीभूय निभृतः, कलाचार्यात् कलाऽमृतम् । पपौ स्थिरोपकाराय, क्षीराम्भोधेरिवाम्बुदः ॥ ८४ ॥**

**'क्षीरोम्भोधेरिव'** क्षीरसागरादिव । **कलाचार्यात्** कलाध्यापकात् । **'अम्बुदः इव'** मेघः इव । **'सः'** बालशालिभद्रः । **'नभ्रीभूय'** विनीतो भूत्वा, मेघोऽपि सागरे नम्रीभूय जलं गृह्णाति इति लौकिकाः । **'निभृतः'** मौनपूर्वकम् उपाध्यायसमीपे विवादाऽकरणात् । मेघोऽपि मौनपूर्वकमेव जलं गृह्णाति, शब्दपूर्वकं च प्रायः जलं मुञ्चति । **'स्थिरोपकाराय'** अचलोपकाराय। पक्षे-स्थिरा-पृथ्वी तस्याः उपकाराय । **'कलाऽमृतं'** कलासुधाम् । पक्षे-कलं मधुरं अमृतं जलम् । 'यादोनिवासोऽमृतम्' इति हैम्यां जलनामसु । **'पपौ'** पीतवान् ॥ ८४ ॥

**साधुविभक्तिसम्बन्ध-कारकैः शब्दसिद्धिदैः । गुणवृद्धिकृत्कृत्यैः सः, नित्यं जज्ञे सलक्षणः ॥ ८५ ॥**

**'सः'** बालशालिभद्रः । **'नित्यं'** सदा । **'सलक्षणः'** सव्याकरणः वैयाकरणः । पक्षे-जैनलक्षणैः सहितः । **'जज्ञे'** जातः । कथम् ? **'शब्दसिद्धिदैः'** शब्दसिद्धिदातृभिः । जैनाचार्यपक्षे-शब्दात्मकोपदेशतः सिद्धिदैः मुक्तिप्रदैः । **'साधु-विभक्ति-सम्बन्ध-कारकैः'** सुष्ठु विभक्ति सम्बन्धयुक्तैः कर्त्रादिषट्कारकैः पक्षे-साधूनां मुनीनां विभक्तिः विशेषेण भक्तिः सम्बन्धः-समागमः तयोः कारकैः विधायकैः जैनाचार्यैः । **'गुणवृद्धिकृत्कृत्यैः'** गुणवृद्धिकारिभिः कृत्यप्रत्ययैः । पक्षे-गुणानां वृद्धिकरैः कृत्यैः कार्यैः ॥ ८५ ॥

**सविवेकैरलङ्कारैः, सभ्याविर्भाविते रसैः । सुरीतिवृत्तिभिश्चाय-मभूत्साहित्यशोभितः ॥ ८६ ॥**

शालिभद्रकुमारः **'साहित्यशोभितः'** साहित्यशास्त्रविभूषितः पक्षे-साहित्यं सहितता सङ्गतिः सुज्ञसङ्गतिः तया शोभितः अभूत् । कथम् ? **'सविवेकैः'** विवेकपूर्वकैः । **'अलङ्कारैः'** काव्यशास्त्रोक्तश्लेषाद्यैरलङ्कारैः । सत्सङ्गतिपक्षे-विवेकपूर्वकैः आभूषणैः । **'सभ्याविर्भावितैः'** सभ्यैः विद्वद्भिः आविर्भावितैः प्रकटीकृतैः । **'रसैः'** श्रृंगाराद्यैः । पक्षे-सभ्यपुरुषैः प्रकटीकृतैः रसैः रागैः स्नेहैः । **'सुरीतिवृत्तिभिः'** 'वैदर्भी-गौडी-पाञ्चाली-मागधी' एताः चतस्रः अलङ्कारशास्त्रप्रसिद्धाः रचनाः **'रीतिः'** प्रोच्यते, सुरीतियुक्ताभिः वृत्तिभिः विवरणैः । पक्षे-सुरीतिभिः सुस्वभावाभिः वृत्तिभिः वर्तनैः ॥ ८६ ॥

**भेजुस्तं सपदि प्रीताः, कलाद्वासप्ततिः कलाः । चक्रवर्ती कलाचक्रे, धर्मस्तत्रोषितोऽस्ति यत् ॥ ८७ ॥**

**'तं'** शालिभद्रम् । **'सपदि'** झटिति । **'प्रीताः'** तुष्टाः । **'कलाः'** मनोहराः । **'कलाद्वासप्ततिः'** कलानां द्वासप्ततिः । **'भेजुः'** आश्रितवत्यः । **'यत्'** यतः । तत्र **'कलाचक्रे'** कलासमुदाये । **धर्मः** । **'उषितः'** स्थित अस्ति । यतः उक्तम्-
सव्वा कला धम्मकला जिणाइ ॥ ८७ ॥

**यूनः शालिभद्रस्य वर्णनम्ः-**

**अथ शालेर्मनोज्ञानां, भूपरूपं निषेवितुम् । अवाततार तारश्री-पावनं यौवनं वयः ॥ ८८ ॥**

**अथ** । **'मनोज्ञानां'** मनोहराणां नृणां नृषु वा । **'शालेः'** शालते शोभते इति शालिः तस्य शालिभद्रस्येत्यर्थः । **'भूपरूपं'** भूपतुल्यं रूपं, रूपाधिराजमित्यर्थः । **'निषेवितुं'** नितरां सेवितुम् । **'तारश्री-पावनं'** तारश्रीः श्रेष्ठशोभा तया पावनं पवित्रम् । **'यौवनं वयः'** तारुण्यं वयः । **'अवाततार'** अवतीर्णवत् ॥ ८८ ॥

**हीनवर्णेन तद्वर्णात्, सुवर्णेन स्विकाऽऽहुतिः । तद्वर्णार्थमिवात्यर्थमग्नितीर्थे समर्थ्यते ॥ ८९ ॥**

'**तद्वर्णात्**' शालिशरीरवर्णात् । '**हीनवर्णेन**' तुच्छरूपेण । '**सुवर्णेन**' कनकेन । '**तद्वर्णार्थमिव**' शालिभद्ररूपप्राप्तये इव । '**अत्यर्थं**' अत्यन्तम् । '**अग्नितीर्थे**' अग्निरेव तीर्थं तस्मिन् । '**स्विकाऽऽहुतिः**' स्विका स्वकीया आहुतिः । '**समर्प्यते**' दीयते ॥ ८९ ॥

**तच्छायाऽऽतङ्कतः शङ्के, साशङ्कं राजचम्पकम् । आस्ते सङ्कुचितं किञ्चिद्, राजनिश्रां न मुञ्चति ॥ ९० ॥**

'**तच्छायाऽऽतङ्कतः**' शालिभद्रशरीरकान्तेः आतङ्कात् अतिभयात् । '**साशङ्कं**' आशङ्कासहितम् । राजचम्पकं किञ्चित् सङ्कुचितं-निमीलितं आस्ते-वर्तते । **राजनिश्रां न मुञ्चति** । स्वनिष्ठं राजशब्दं न मुञ्चति । अत एव '**राजचम्पकम्**' तत् कथ्यते । इत्यहं **शङ्के** मन्ये ॥ ९० ॥

**कल्याणकदली यस्य, कायकान्त्येव दण्डिता । स्वल्पान्तररसा जज्ञे, सकृत्तेन फलेग्रहिः ॥ ९१ ॥**

'**यस्य**' शालेः । '**कायकान्त्या**' शरीरप्रभया । '**दण्डिता इव**' शिक्षिता इव । '**कल्याणकदली**' सुवर्णकदली । '**स्वल्पान्तररसा**' अत्यल्पाभ्यन्तररसवती। '**जज्ञे**' अजायत । '**तेन**' तस्मात् । '**सकृत्**' एकवारमेव । '**फलग्रेहिः**' फलवती भवति ॥ ९१ ॥

**प्रभया प्रभया यस्य, तनोः कनककेतकी । गोपायितुमिवात्मानं, विधत्ते कण्टकैर्वृतिम् ॥ ९२ ॥**

'**यस्य**' शालेः । '**तनोः**' शरीरस्य । '**प्रभया**' कान्त्या । '**प्रभया**' प्रकृष्टं भयं यस्याः सा । '**कनककेतकी**'

सुवर्णकेतकी। **'आत्मानं'** स्वम्। **'गोपायितुमिव'** रक्षितुमिव। **कण्टकैः**। **'वृतिं'** 'वाड' इति भाषायाम्। **'विधत्ते'** करोति ॥ ९२॥

**तदंह्रिवादतः पद्मं, शङ्के पङ्केऽक्षिपद्विधिः । लक्ष्मीपुष्पैरिव नखैर्जित्वरौ तावपूपुजत् ॥ ९३ ॥**

**'विधिः'** ब्रह्मा। **'तदंह्रिवादतः'** शालिचरणस्पर्धया। **'पद्मं'** कमलम्। **'पङ्के'** कर्दमे। **'अक्षिपत्'** क्षिप्तवान्। **अतः**। **'जित्वरौ'** जेतारौ। **'तौ'** पदौ। **'विधिः'** ब्रह्मा। **'लक्ष्मीपुष्पैरिव'** पद्मरागमणिभिरिव। **नखैः**। **'अपूपुजत्'** पूजयति स्म। **इति शङ्के** मन्ये। अयं भावः-शालिचरणस्पर्धया पराजितं पद्मं ब्रह्मा पङ्के क्षिप्तवान्, विजयिनौ शालिचरणौ च नखमिषात् पद्मरागमणिभिः पूजितवान् ॥ ९३ ॥

**प्रव्यक्तनखरत्नौघं, निर्भयं तत्पदद्वयम् । सभयं जलदुर्गेऽस्थात्, पद्मं गुप्तवराटकम् ॥ ९४ ॥**

**'प्रव्यक्तनखरत्नौघं'** प्रव्यक्तः प्रकट एव नखरत्नानां ओघः समूहः यस्मिन् तत्। **'तत्पदद्वयं'** शालिपादयुगलम्। **'निर्भयं'** प्रकटत्वात् भयरहितं वर्तते। **'सभयं'** भययुक्तम्। **'गुप्तवराटकं'** गुप्तबीजकोशम्। **'पद्मं'** कमलम्। **'जलदुर्गे'** जलमेव दुर्गः वप्रः तस्मिन्। **अस्थात्**। सभयो हि आश्रयमपेक्षते, न निर्भयः ॥ ९४ ॥

**शङ्के शशाङ्करङ्कोः किं, जङ्घे आदत्त सोऽनघः । दीन आसीन एवास्ते, तच्चमूरुरनूरुवत् ॥ ९५ ॥**

किं सः शालिः। **'शशाङ्करङ्कोः'** चन्द्रमृगस्य। **'अनघे'** अनवद्ये। **'जङ्घे'** ऊरू। **'आदत्त'** गृहीतवान्? येन। **'तच्चमूरुः'** चन्द्रमृगः। **'अनूरुवत्'** पङ्गुवत्। **'दीनः'** दैन्ययुक्। **'आसीनः एव'** उपविष्टः एव। **आस्ते**। इति **शङ्के** मन्ये॥ ९५॥

**तस्य कान्तिह्रदे देहे, हारहंसावलिश्रिते । गम्भीरा दक्षिणावर्ता, नाभिर्भाति स्म कुम्भिनी ॥ ९६ ॥**

'**तस्य**' शालेः । '**हारहंसावलिश्रिते**' हाराः एव हंसाः तेषां आवलिभिः श्रिते । '**कान्तिहृदे**' प्रभासरोवरे । '**देहे**' शरीरे। '**दक्षिणावर्ता**' दक्षिणाः आवर्ताः यस्याः सा । **गम्भीरा । नाभिः** । '**कुम्भिनी**' हस्तिनीतुल्या । '**भाति स्म**' राजते स्म ॥ ९६ ॥

**विशालतां हृदस्तस्य, सकलाः कलयन्ति के । यत्प्राप श्रीसरस्वत्योः, प्रियमेलकतीर्थताम् ॥ ९७ ॥**

'**तस्य**' शालेः । '**हृदः**' हृदयस्य । **के सकलाः** कलाभिः सहिताः समस्ताः वा जनाः । **विशालताम्** । '**कलयन्ति**' जानन्ति ? '**यत्**' हृदयम् । '**श्री-सरस्वत्योः**' लक्ष्मी-भारत्योः । **प्रियमेलकतीर्थताम्** । '**प्राप**' प्राप्तवत् ॥ ९७ ॥

**चिरं विरेजतुस्तस्य, भुजावाजानुयायिनौ । हृद्वासिदानदन्तीन्द्र-दन्ताविव सकङ्कणौ ॥ ९८ ॥**

'**तस्य**' शालेः । '**आजानुयायिनौ**' जानुप्रमाणौ । '**सकङ्कणौ**' कङ्कणान्वितौ । '**हृद्वासिदानदन्तीन्द्रदन्ताविव**' हृदि वासी हृद्वासी दानदन्तीन्द्रः मदजलयुक्तगजराजः तस्य दन्तौ इव । '**भुजौ**' बाहू । **चिरम्** । '**विरेजतुः**' शोभेते स्म ॥ ९८ ॥

**नाम्भोधेः किन्तु कल्पद्रोः प्रवालानि निदानताम् । ईयुस्तत्करयोस्तेन, पाटलौ दायकौ च तौ ॥ ९९ ॥**

'**अम्भोधेः**' समुद्रस्य । '**प्रवालानि**' विद्रुमाः । **न । किन्तु** । '**कल्पद्रोः**' कल्पवृक्षस्य । **प्रवालानि** किसलयानि। '**तत्करयोः**' शालिभद्रहस्तयोः । '**निदानतां**' कारणताम् । '**ईयुः**' गतवन्तः । '**तेन**' तस्मात् । '**तौ**' शालिहस्तौ । '**पाटलौ**' रक्तौ । '**दायकौ**' दातारौ । चः समुच्चये । स्तः । समुद्रः खलु कृपणः, कल्पवृक्षश्च दाता, तेन कारणेन कल्पवृक्षप्रवाल निर्मितौ तस्य करौ ॥ ९९ ॥

**रेखात्रयाङ्किकतस्तस्य, कण्ठः कण्ठीरवाकृतेः । तत्रानवद्यत्रैविद्य-न्यासं प्रादुष्करोत्यहो ॥ १०० ॥**

**'कण्ठीरवाकृतेः'** कण्ठीरवः सिंहः तस्येव आकृतिः यस्य तस्य । **'तस्य'** शालिभद्रस्य । **'रेखात्रयाङ्कितः'** रेखाणां त्रयं तेन अङ्कितः । कण्ठः । **'तत्र'** कण्ठे । **'अहो'** आदरे । **'अनवद्यत्रैविद्यन्यासं'** अनवद्यं निष्पापं त्रैविद्यं तर्कलक्षण-साहित्यरूपायाः त्रिविद्यायाः इदं त्रैविद्यं तस्य न्यासः स्थापना तम् । **'प्रादुष्करोति'** प्रकटीकरोति ॥ १०० ॥

**यत्नात् षोडश रत्नानि, द्विधा वेधा विभिद्य किम् । द्वात्रिंशद्दशनीं तस्य, निर्ममे निर्मलां समाम् ॥ १०१ ॥**

**'वेधाः'** ब्रह्मा । **षोडश रत्नानि** । **'यत्नात्'** यत्नपूर्वकम् । **'द्विधा'** द्विभागेन । **'विभिद्य'** भेदं कृत्वा । **तस्य** शालेः **किं समां** समानाम् । **निर्मलां** उज्ज्वलाम् । **द्वात्रिंशद्दशनीं** द्वात्रिंशद्दन्ताः **'निर्ममे'** विहितवान् ? ॥ १०१ ॥

**यौवनानङ्गयोर्योग्यौ, स्वर्णपीठस्फुराविव । कपोलौ कल्पयामास, वृत्तौ मध्योन्नतौ विधिः ॥ १०२ ॥**

**'यौवनाऽनङ्गयोः'** यौवनं तारुण्यं अनङ्गः कामः तयोः । **'योग्यौ'** उचितौ । **'स्वर्णपीठस्फुराविव'** कनकासनफलकाविव । **'वृत्तौ'** वर्तुलाकारौ । **'मध्योन्नतौ'** मध्यभागे उन्नतौ उच्चौ । **कपोलौ** । **'विधिः'** ब्रह्मा । **'कल्पयामास'** रचयामास ॥ १०२ ॥

**उपमाद्रव्यकोटीषु, कोटिं प्राप्ते तदानने । नासावंशध्वजो रेजे, भ्रमद्भ्रूवैजयन्तिकः ॥ १०३ ॥**

**'उपमाद्रव्यकोटीषु'** उपमायोग्यद्रव्याणां कोटीषु । **'कोटिं प्राप्ते'** प्रकर्षं प्राप्ते । **'तदानने'** शालिभद्रमुखे । **'भ्रमद्भ्रूवैजयन्तिकः'** चलद्भ्रूपताकः । **'नासावंशध्वजः'** नासिकादण्डध्वजः । **'रेजे'** अशोभत ॥ १०३ ॥

**स्वश्रीकाभ्यां तदक्षिभ्यां, वनवासि तपस्वि च । स्पर्धतामुत्पलं राज-वशोन्मेषनिमेषि किम् ? ॥ १०४ ॥**

**'स्वश्रीकाभ्यां'** स्वेनैव आत्मनैव श्रीः ययोः तौ ताभ्याम् । **'तदक्षिभ्यां'** शालिभद्रनयनाभ्याम् । **'वनवासि'** वने

वसति इत्येवंशीलम् । **'तपस्वि'** कुमुदं दिने न भोजि, यतः दिने सङ्कुचति, अत एव तपस्वि वराकं वा । **'राजवशोन्मेषनिमेषि'** राजा-चन्द्रः, 'राजा निशारत्नकरौ च चन्द्रः' इति हैम्याम् । तस्य वशौ अधीनौ उन्मेषौ निमेषौ सङ्कोच-विकासौ । स्वामित्वार्थे इन् । **'उत्पलं'** कुमुदम् । **'किं'** कथम् । **स्पर्धताम्** ? ॥ १०४ ॥

**भालं भाऽलङ्कृतं तस्याऽष्टमीचन्द्रोदयः स्फुटम् । यत्कान्तिः क्षमदाङ्गार्धं, मुखं प्लावयतेतराम् ॥ १०५ ॥**

**'तस्य'** शालेः । **'भाऽलङ्कृतं'** भाभिः प्रभाभिः अलङ्कृतम् । **'भालं'** ललाटम् । **'स्फुटं'** स्पष्टम् । **अष्टमीचन्द्रोदयः** अस्ति । **'यत्कान्तिः'** ललाटप्रभा । **'क्षणदाङ्गार्धं'** क्षणं उत्सवं ददाति इत्येवंशीलं क्षणदं यद् अङ्गं शरीरं तस्य अर्धम् । **'मुखम्'** वदनम् । मुखं शरीरार्धमिति श्रुतेः । **'प्लावयतेतरां'** द्योतयतितराम् । अष्टमीचन्द्रपक्षे-क्षणदायाः रात्रेः अङ्गार्धं प्रहरद्वयं यावत् । अष्टमीचन्द्रः किल अर्धरात्रिं यावदेव प्रकाशते ॥ १०५ ॥

**कबरी कज्जलश्यामा, भाति तस्य सचम्पका । स्वर्णाक्षरा स्मरजय-प्रशस्तेरिव पट्टिका ॥ १०६ ॥**

**'तस्य'** शालेः । **'कबरी'** धम्मिल्लः । **'भाति'** शोभते । कथम्भूता सा ? **'स्मर जय प्रशस्तेः'** कामविजययशोगाथायाः । **स्वर्णाक्षरा पट्टिका इव** । **'सचम्पका'** चम्पकपुष्पयुक्ता । **'कज्जल-श्यामा'** कज्जलवत् अञ्जनवत् श्यामा कृष्णा ॥ १०६ ॥

**रूपमन्यमनुष्याणां, वर्ण्यमानमधः पतेत् । उच्चैरेव पुनस्तस्य, स्वर्गिवर्गोत्तमाकृतेः ॥ १०७ ॥**

**'अन्यमनुष्याणां'** शालिभद्राद् अन्यमानवानाम् । **वर्ण्यमानं रूपम्** । **'अधःपतेत्'** देववर्गात् अधस्तनोपमायोग्यं भवेत् । किन्तु **'स्वर्गिवर्गोत्तमाकृतेः'** स्वर्गिवर्गादपि देववृन्दादपि उत्तमाकृतेः श्रेष्ठाकारस्य । **'तस्य'** शालिभद्रस्य । **'उच्चैरेव गच्छेत्'** देववर्गादपि उच्चैस्तरोपमायोग्यं भवेत् ॥ १०७ ॥

**तेन श्रुतेन दृष्टेन, चित्तचित्रकृतेन वा । जनोऽभिहितमात्रेण, धर्मेणेव कृतार्थितः ॥ १०८ ॥**

'**जनः**' लोकः । '**तेन श्रुतेन**' श्रवणविषयीकृतेन शालिभद्रेण । '**दृष्टेन**' नेत्रविषयीकृतेन । '**चित्तचित्रकृतेन**' चित्ते चित्रवत् स्थापितेन । '**अभिहितमात्रेण वा**' उक्तमात्रेण वा शालिभद्रेण । **धर्मेण इव** । '**कृतार्थितः**' कृतकृत्यो भवति। यथा धर्मः दृष्टः श्रुतः चिन्तितः कथितः वा कृतार्थतां करोति तथा शालिभद्रोऽपि इत्यर्थः ॥ १०८ ॥

**दृशः पातालबालानां, तद्रूपालोकवञ्चिताः । चक्षुः कर्णतयाऽऽकर्ण्य, तत्कीर्तीर्जहृषुः सुखात् ॥ १०९ ॥**

'**चक्षुःकर्णतया**' चक्षूंषि एव कर्णा यासां ताः चक्षुःकर्णाः तासां भावः तया । सर्पाः किल दृक्कर्णाः । '**तत्कीर्तीः**' शालिभद्रगुण-कीर्तनानि । '**आकर्ण्य**' श्रुत्वा । '**पातालबालानां**' नागाङ्गनानाम् । '**तद्रूपालोकवञ्चिताः**' शालिरूपदर्शनरहिताः। '**दृशः**' नयनानि । **सुखात्** । '**जहृषुः**' हर्षं प्राप्तवत्यः ॥ १०९ ॥

**तद्रूपमिव तद्रूपं, तद्वचस्तद्वचः किल । तद्भाग्यमिव तद्भाग्यं, तद्गुणास्तद्गुणा इव ॥ ११० ॥**

'**तद्रूपं**' शालिभद्ररूपम् । '**तद्रूपमिव**' शालिभद्ररूपमिव अस्ति । **तद्वचः तद्वचः किल** । अत्र '**किल**' इवार्थे । **तद्भाग्यमिव तद् भाग्यम्** । **तद्गुणाः तद्गुणा इव** । अयं भावः-न किञ्चित् जगति वस्तुजातं, येन शालिभद्र-रूपवचोभाग्यगुणादयः उपमीयन्ते। यदुक्तम्-"गगनं गगनाकारं, सागरः सागरोपमः । रामरावणयोर्युद्धं, राम-रावणयोरिव ॥ १ ॥ ११० ॥

**फलं लक्षणवृक्षाणां, चक्रिभोगाः किलोत्तमम् । वर्ण्यतां तानि किं तस्य, द्युभोगा यस्य भाविनः ॥ १११ ॥**

'**लक्षणवृक्षाणां**' सामुद्रिकलक्षणतरूणाम् । '**चक्रिभोगाः**' चक्रिणां भोगाः । किल उत्तमं फलं भवति । '**तस्य**'

शालिभद्रस्य । **'तानि'** ऊर्ध्वरेखावयव-हस्तपादौष्ठ-रक्तादीनां लक्षणवृक्षाणां फलानि किं वर्ण्यतां विद्वद्भिः ? यस्य भाविनः द्युभोगाः दिव्यभोगाः भविष्यन्ति । भाविकाले किल स गोभद्रदेवप्रेषितदिव्यभोगान् प्राप्स्यति इत्यर्थः ॥ १११ ॥

**धर्मस्त्रिवर्गेषु धर्मेषु, दानं दानेष्वपि त्रिषु । अन्नदानमथान्नेषु, सुकुमारं हि पायसम् ॥ ११२ ॥**

**यद्देहस्तदुपादान-निदानां ह्याददे ततः । कुमारः सुकुमारेषु, सुषमारेखयाऽरुचत् ॥ ११३ ॥ (युग्मम्)**

**'त्रिवर्गे'** धर्मार्थकामात्मके त्रिवर्गे । **'धर्मः'** प्रधानः । **'धर्मेषु'** दानशीलतपोभावेषु । **'दानं'** प्रधानम् । **'त्रिषु दानेषु अपि'** ज्ञानाभयान्नदानेषु अपि । **'अन्नदानं'** प्रधानम् । **अथ अन्नेषु सुकुमारं सुकोमलं हि पायसं** परमान्नं अस्ति ॥ ११२ ॥ **'यद्देहः'** शालिभद्रशरीरम् । **'उपादाननिदानं'** उपादानकारणम् । **'आददे'** गृह्णाति स्म । त्रीणि किल कारणानि (१) उपादानकारणम् (२) निमित्तकारणम् (३) सहकारिकारणम् । एतेषु शालिभद्रशरीरेण परमान्नरूपं उपादानकारणं गृहीतम् । ततः कुमारः शालिभद्रकुमारः । **'सुकुमारेषु'** पदार्थेषु । **'सुषमारेखया'** सुषमा अतिशायिनी शोभा तद्रेखया । ''लक्ष्मीश्छाया च शोभायां सुषमा सातिशायिनी'' इति हैम्याम् । **'अरुचत्'** शोभते स्म ॥ ११३ ॥

**शालिभद्रस्य पाणिग्रहणम्–**

**वनं चैत्ररथं यद्वत्, चैत्रमैत्रीपवित्रितम् । पुत्ररूपं तथाऽऽलोक्य, तारुण्यसफलीकृतम् ॥ ११४ ॥**

**गोभद्रः सर्वतो भद्र-श्लोकान्वेषी व्यचिन्तयत् । अन्योऽन्यसदृशीर्बालाः, कविर्वर्णावलीरिव ॥ ११५ ॥**

**'यद्वत्'** यथा । **चैत्रमैत्रीपवित्रितं** चैत्रमैत्र्या चैत्र-मासस्य मैत्र्या पवित्रितं शुचीभूतम् । **'चैत्ररथं'** तन्नामकं कुबेरस्य वनं वर्तते । तथा **'तारुण्यसफलीकृतं'** तारुण्येन यौवनेन सफलीकृतम् । **'पुत्ररूपं'** शालिरूपम् । **'आलोक्य'** दृष्ट्वा

॥ ११४ ॥ **'भद्रश्लोकान्वेषी'** निर्मलयशःकामी । कविपक्षे-मङ्गलश्लोकेच्छुः । **'कविः'** काव्यकृत् । **'वर्णावलीः इव'** द्वात्रिंशद् वर्णश्रेणीः इव । अनुष्टुभि किल द्वांत्रिशद् वर्णाः । शालिपक्षेऽपि द्वांत्रिशत् पत्न्यः भवित्र्यः । **'गोभद्रः'** शालिपिता । **'सर्वतः'** सर्वमहेभ्यगेहेषु । **'अन्योन्यसदृशीः'** मिथः समरूपाः मिथःसमस्वभावाः । कविपक्षे-अन्योन्यसमप्रासाः । **'बालाः'** कन्याः । **'व्यचिन्तयत्'** चिन्तितवान् ॥ ११५ ॥

**पद्मास्याः पद्मनिः श्वासाः, पद्मोपमकरक्रमाः । पद्मनाभीः पद्मनेत्राः, पद्मिनीस्तत्र चान्तरे ॥ ११६ ॥**

**कन्या द्वात्रिंशतं धन्याः, कुलशीलगुणैः समाः । महेभ्यास्तत्र वास्तव्याः, कुमारार्थमुपानयन् ॥ ११७ ॥**

**'तत्र च अन्तरे'** तस्मिन् च अवसरे । **'पद्मास्याः'** पद्मवदनाः । **'पद्मनिःश्वासाः'** पद्मसुरभिश्वासाः । **'पद्मोपमकरक्रमाः'** पद्मतुल्यहस्तपादाः । **'पद्मनाभीः'** पद्मवत् गम्भीरनाभीः ॥ ११६ ॥ **धन्याः कुलशीलगुणैः समाः द्वात्रिंशतं पद्मिनीः** । पद्मिन्यादिचतुःप्रकाराः स्त्रियः, तासु पद्मिनी श्रेष्ठा । तत्स्वरूपं चेदं रतिमञ्जर्याम्-भवति कमलनेत्रा, नासिकाक्षुद्ररन्ध्रा, अविरलकुचयुग्मा दीर्घकेशी कृशाङ्गी । मृदुवचनसुशीला, नृत्यगीतानुरक्ता, सकलतनुसुवेशा, पद्मिनी पद्मगन्धा ॥ **'तत्र वास्तव्याः'** राजगृहनिवासिनः । **'महेभ्याः'** श्रेष्ठिनः । **'कुमारार्थं'** शालिकुमारकृते । **'उपानयन्'** आनीतवन्तः ॥ ११७ ॥

**विद्याऽधिदेवताः मूलोत्तरवैक्रियमूर्तयः । स्वःस्त्रीकोट्यष्टकात् किंवा, चतुष्काष्टकमुद्धृतम् ॥ ११८ ॥**

**व्यन्तरेन्द्रश्रियः सर्वाः, द्विधेन्दोर्वा कलाः कृताः । सप्रभाः प्रतिभासन्ते, या रूपातिशयश्रिया ॥ ११९ ॥ ( युग्मम् )**

**'विद्याऽधिदेवताः'** प्रज्ञप्त्यादयः षोडश विद्यादेव्यः । **'मूलोत्तरवैक्रियमूर्तयः'** मूलरूपधारिण्यः वैक्रियरूपधारिण्यश्च

इति द्वात्रिंशत्। **किंवा स्वःस्त्रीकोट्यष्टकात् स्वःस्त्रीणां** देवाङ्गनानां कोट्यष्टकात् **चतुष्काष्टकं** (८ x ४ = ३२) **उध्दृतम्** ? **'सर्वाः व्यन्तरेन्द्रश्रियः'** अष्ट व्यन्तरभेदाः अष्ट च वानव्यन्तरभेदाः तेषां उत्तरदक्षिणश्रेणिमीलने द्वात्रिंशद् व्यन्तरेन्द्राः तेषां श्रियः। **'इन्दोः'** चन्द्रस्य वा द्विधा कलाः कृता ? (१६ + १६ = ३२) **याः रूपातिशयश्रिया** रूपातिशयस्य श्रिया शोभया। **प्रतिभासन्ते** ॥ ११८ ॥ ११९ ॥

**श्रीसन्नाहः सार्थवाहः, सोत्साहस्वजनस्ततः। व्योममण्डलविस्तारं, विधाय वरमण्डपम् ॥ १२० ॥**

**पुष्पप्रकरनिक्षेपैर्वसन्तसमयायितम्। काश्मीरस्तबकालोकैः स्मेरकश्मीरविस्मयम् ॥ १२१ ॥**

**दिव्यैर्दूष्यैरलङ्कारैः सुपर्वनगरायितम्। नागवल्लीदलैः पूग-पूगैः कौङ्कणकोणितम् ॥ १२२ ॥**

**नृत्तप्रवृत्तसङ्गीतैर्गांधर्वनगरोपमम्। मङ्गलोलूलुकल्लोलैः, स्मेरस्मरजयारवम् ॥ १२३ ॥**

**प्राज्यभोज्याज्यसाम्राज्यैः, पक्वान्नैर्व्यञ्जनैरपि। फलावलीपयः पूरैः, विश्वावारितसत्रवत् ॥ १२४ ॥**

**सन्मान्यमानस्वजनं, प्रीतयाचकचातकम्। अवार्यतूर्यनिर्घोषं, जिनार्चाभिरधिष्ठितम् ॥ १२५ ॥**

**प्रगल्भाभिः पुरन्ध्रीभिः, सत्यापितविधिक्रमम्। लक्ष्मीपूरपरीवाहं, वीवाहं सुमहामहम् ॥ १२६ ॥**

**कारयामास भद्रायाः, पौलोम्याः पुलकावहम्। गोभद्रः शालिभद्रस्य, जयन्तस्येव वासवः ॥ १२७ ॥**

**(अष्टभिः कुलकम्)**

ततः। **'श्रीसन्नाहः'** श्रीकवचितः श्रीयुतः इत्यर्थः। **'सोत्साहस्वजनः'** सोल्लासनिजपरिवारः। **'सार्थवाहः'** गोभद्रः।

**'व्योममण्डलविस्तारं'** व्योममण्डलवत् आकाशमण्डलवद् विस्तारः यस्य तद् । **'वरमण्डपं'** श्रेष्ठमण्डपम् । **'विधाय'** कृत्वा ॥ १२० ॥ **'पुष्पप्रकरनिक्षेपैः'** कुसुमसमूहनिक्षेपैः । **'वसन्तसमयायितं'** वसन्तसमयसमानम् । **'काश्मीरस्तबकालोकैः'** घुसृणगुच्छदर्शनैः । **'स्मेरकश्मीरविस्मयं'** विकसितकश्मीरदेश-तुल्यं तं (वीवाहम्) दृष्ट्वा नृणां विस्मयो जातो यस्मिन् तम् । **'दिव्यैः दूष्यैः'** दिव्यवस्त्रैः । **'अलङ्कारैः'** भूषणैः । **'सुपर्वनगरायितं'** देवनगरसमानम् । **'नागवल्लीदलैः'** नागवल्लीपर्णैः । **'पूगपूगैः'** क्रमुकसमूहैः । **'कौङ्कणकोणितं'** कोंकणदेशस्य विभागतुल्यम् ॥ १२२ ॥ **'नृत्तप्रवृत्तसङ्गीतैः'** नृत्तेन नर्तनेन सह प्रवृत्तानि सङ्गीतानि तैः । **'गान्धर्वनगरोपमं'** गान्धर्वनगरतुल्यम् । **'मङ्गलोलूलुकल्लोलैः'** मङ्गलार्थं 'उलूलु' इति स्त्रीभिः उद्गीयमानशब्दतरङ्गैः । **'स्मेरस्मरजयारवं'** विकस्वरकामविजय-ध्वनिम् ॥ १२३ ॥ **'प्राज्यभोज्याज्य-साम्राज्यैः'** स्फारभोज्यघृतसाम्राज्यैः । **'पक्वान्नैः'** पक्वैः अन्नैः मिष्टान्नैः । **व्यञ्जनैः** । **'फलावलीपयःपूरैः'** फलश्रेणिभिः दुग्धपूरैश्च । **'विश्वावारितसत्रवत्'** विश्वस्य अवारितं अविरतं सन्ततं प्रवर्तमानं सत्रं दानशाला तत्तुल्यम् ॥ १२४ ॥ **'सन्मान्यमानस्वजनं'** सन्मान्यमानाः स्वजनाः यत्र । **'प्रीतयाचकचातकं'** प्रीताः तुष्टाः याचकाः एव चातकाः यत्र । **'अवार्यतूर्यनिर्घोषं'** अवार्यः तूर्यनिर्घोषो यस्मिन् तम् । **'जिनार्चाभिः'** जिनपूजाभिः जिनप्रतिमाभिर्वा । अर्चाशब्दः प्रतिमायामपि । **'अधिष्ठितं'** आश्रितम् ॥ १२५ ॥ **'प्रगल्भाभिः'** कुशलाभिः । **'पुरन्ध्रीभिः'** महिलाभिः । **'सत्यापितविधिक्रमं'** सत्यापितः सुविहितः विधिक्रमः यत्र । **'लक्ष्मीपूरपरीवाहं'** लक्ष्मीपूरस्य प्रवृद्धस्य लक्ष्मीजलप्रवाहस्य परीवाहः निर्गममार्गः यत्र । **'सुमहामहं'** मनोज्ञ-महोत्सवः यत्र तम् ॥ १२६ ॥ **'पौलोम्याः इव'** इन्द्राण्याः इव । **'भद्रायाः'** गोभद्रप्रियायाः । **'पुलकावहं'** रोमाञ्चकरम् । **'वासवः'** इन्द्रः । **'जयन्तस्य इव'** तत्पुत्रस्य (इन्द्रपुत्रस्य) इव । **'गोभद्रः'** शालिपिता । **शालिभद्रस्य वीवाहं कारयामास** ॥ १२७ ॥

**निरन्तरस्फुरद्व्याख्या, विषमेष्वर्थदीपिकाः । कामसूत्रे चिरण्टीकाः, चिरण्टीः कायवत्तराः ॥ १२८ ॥**

**विभाव्य भूषणानीन्दु-विभाव्ययकराण्यदात् । ताभ्यश्चक्षुर्महेभ्यः स, महेभ्यः सभ्यसौरभः ॥ १२९ ॥**

'**कामसूत्रे**' कामशास्त्रे । '**निरन्तरस्फुरद्व्याख्याः**' निरन्तरं स्फुरन्त्यः व्याख्याः यासु ताः । वधूपक्षे–निरन्तरं स्फुरन्त्यः व्याख्याः वचनानि विशेषेण आख्याः नामानि वा यासां ताः । '**विषमेष्वर्थदीपिकाः**' विषमेषु पदेषु अर्थप्रकाशिकाः। पक्षे–विषमेषुः कामः तस्य अर्थदीपिकाः कामभावदर्शिकाः इत्यर्थः । '**चिरण्टीकाः**' प्राचीनटीकातुल्याः । '**कायवत्तराः**' प्रकृष्टदेहाः । '**चिरण्टीः**' वधूटीः पुत्रवधूः । '**विभाव्य**' विलोक्य ज्ञात्वा इत्यर्थः । '**सभ्यसौरभः**' सभ्येषु सभासदेषु गुणसौरभं यस्य सः । '**महेभ्यः**' श्रेष्ठी गोभद्रः । '**चक्षुर्महेभ्यः**' नयनोत्सवभूताभ्यः । '**ताभ्यः**' वधूभ्यः । '**इन्दुविभाव्ययकराणि**' चन्द्रप्रभातिरस्कारकराणि । '**भूषणानि**' आभरणानि । '**अदात्**' ददाति स्म ॥ १२८ ॥ १२९ ॥

**चक्रादिलक्षणव्यूहा, गुणाढ्यचतुराञ्चिता । गुरुडम्बरश्रृङ्गाराः, कायमानमनोरथाः ॥ १३० ॥**

**गजेन्द्रगतिविस्तारा, गन्धर्वकलया कलाः । शताङ्गगुणसन्दोहाः, पदातिरुचिरश्रियः ॥ १३१ ॥**

**उत्सर्पद्दर्पकन्दर्प-राजराजस्य दिग्जये । ताः शालिकलिताः सेनाः, सेना आवासिता इव ॥ १३२ ॥ ( विशेषकम् )**

'**उत्सर्पद्दर्पकन्दर्पराजराजस्य**' उत्सर्पन् दर्पः यस्य सः कन्दर्पः कामः राजराजः महाराजः तस्य । '**दिग्विजये**' दिग्जये। '**ताः**' शालिभद्रकान्ताः । '**सेनाः**' इनेन भर्त्रा शालिभद्रेण सहिताः शालिकलिताः । '**आवासिताः**' सन्निवेशिताः । '**सेनाः इव**' वाहिन्यः इव । '**रेजुः**' राजन्ते स्म । कथम्भूताः ताः ? '**चक्रादिलक्षणव्यूहाः**' देहे चक्राङ्कुशादि–लक्षणसन्दोहाः।

सेनापक्षे-चक्रव्यूह-गरुड-व्यूहादिलक्षणाः । **'गुणाढ्यचतुराञ्चिताः'** गुणपूर्णप्रवीणपुरुषेण शालिभद्रेण अञ्चिताः युताः । पक्षे-गुणाढ्य-हस्तिशालायुताः । 'हस्तिशाला तु चतुरा' इति हैम्याम् । **'गुरुडम्बरशृङ्गाराः'** महाऽऽडम्बरमण्डनाः । पक्षे गुरुडम्बरः अत्याडम्बरः एव श्रृङ्गारः भूषणं यासु ताः । **'कायमानमनोरमाः'** कायमानेन परिमितेन देहप्रमाणेन मनोरमाः मनोहराः । पक्षे-तृणोटजमनोज्ञाः । 'कायमानं तृणौकसि' इति हैम्याम् । **'गजेन्द्रगतिविस्तारा'** गजेन्द्रवत् गत्या रमणीयगत्या विस्तारो यासां ताः । पक्षे-गजेन्द्रगतिभिः हस्तीन्द्रगमनैः विस्तारो यासां ताः । **'गन्धर्वकलया'** देवगायनकलया । **'कलाः'** मधुररवाः । पक्षे-गन्धर्वकलया अश्वकलया कलाः मनोहराः । 'गन्धर्वोऽर्वा सप्तिवीति' इति हैम्याम् । **'शताङ्ग-गुणसन्दोहाः'** शतानां अङ्गगुणानां समूहाः यासां ताः । पक्षे-शताङ्गनानां युद्धरथानां गुणसमूहः यासु ताः । 'शताङ्गः स्यन्दनो रथः' इति हैम्याम् । **'पदातिरुचिरश्रियः'** पदाभ्यां स्वस्वपदाभ्यां अतिरुचिरा अतिमनोहरा श्रीः शोभा यासां ताः । पक्षे-पदातिभिः पत्तिभिः अतिरुचिरा अतिमनोज्ञा श्रीः शोभा यासां ताः ॥ १३० ॥ १३१ ॥ १३२ ॥

**अनासक्तः शालिभद्रः ।**

**असौ हिरण्यवर्णासु तास्वन्तः प्रतिबिम्बितः । रसोर्मिलालितोऽप्यागात् सुधामूर्तिर्न लोलताम् ॥ १३३ ॥**

**'हिरण्यवर्णासु'** सुवर्णवर्णासु । पक्षे-नदीषु । 'नदी हिरण्यवर्णा स्याद्' इति हैम्याम् । **'तासु'** प्रियतमासु । **'अन्तःप्रतिबिम्बितः'** हृदये सङ्क्रान्तः । **'सूधामूर्तिः'** अमृतघटितदेहः । **'रसोर्मिलालितोऽपि'** रसेन प्रियास्नेहेन लालितोऽपि । पक्षे-रसोर्मिभिः जललहरीभिः लालितोऽपि स्नापितोऽपि । **'असौ'** शालिभद्रः । **'लोलतां'** गृद्धिम् । **'न आगात्'** न प्रापत् ॥ १३३ ॥

**रङ्गभूमौ मिलन्तीभिः, गजेन्द्रगतिविभ्रमात् । स ताभिः प्रीतितृप्ताभिः, नारीकुञ्जरतां ययौ ॥ १३४ ॥**

**'गजेन्द्रगतिविभ्रमात्'** गजराजगमनलीलया । **'गजेन्द्रगतिभिः भ्रमात्'** इति वा पाठान्तरे भ्रमात् भ्रमणात् गमनात् गजेन्द्रगतिभिः ताभिः । **'रङ्गभूमौ'** रङ्गस्य रागस्य नृत्यस्य वा । **'भूमौ'** स्थाने । **'मिलन्तीभिः'** सङ्गच्छन्तीभिः । **'प्रीतितृप्ताभिः'** प्रीत्या शालिप्रीत्या तृप्ताभिः तुष्टाभिः । **'ताभिः'** प्रियतमाभिः । **'सः'** शालिभद्रः । **'नारीकुञ्जरतां'** नारीषु कुञ्जरताम् । **'ययौ'** गतवान् ॥ १३४ ॥

**कुलावतंसकः सोऽथ, स्वप्रासादावतंसके । मृदङ्गोत्तुङ्गधोङ्कारैः, सुखौङ्कारैरिव स्फुटम् ॥ १३५ ॥**

**प्रवीणवीणाझात्कारैः, सत्यङ्कारैर्मनोऽर्पणे । गीतैर्दिव इवानीतैर्लास्यैरास्यैर्मुदामिव ॥ १३६ ॥**

**विषमायुधभूपस्य, कटकैरिव नायकैः । निन्ये कालं पञ्चाङ्गैर्मोहमन्त्रसखैः सुखैः ॥ १३७ ॥ ( विशेषकम् )**

**'स्वप्रासादावतंसके'** निजोत्तममन्दिरे । **'कुलावतंसकः'** कुलश्रेष्ठः । **'सः'** शालिभद्रः । **'स्फुटं'** स्पष्टम् । **'सुखौङ्कारैः'** सुखार्थं प्रणवैरिव । **'मृदङ्गोत्तुङ्गधोङ्कारैः'** मृदङ्गानां मुरजानां उत्तुङ्गधोङ्कारैः उच्चधोङ्कारनादैः ॥ १३५ ॥ **'मनोऽर्पणे'** मनो-विक्रये । **'सत्यङ्कारैः'** सत्यापनैरिव । 'डीपोझीट' (सूथी) इति भाषायाम् । **'प्रवीणवीणाझात्कारैः'** प्रवीणवीणानां झात्कारशब्दैः । **'दिवः'** स्वर्गात् । **आनीतैरिव** । **'गीतैः'** सङ्गीतैः । **'लास्यैः'** नाट्यैः । 'लास्यं नाट्यं च ताण्डवम्' इति हैम्याम् । **'मुदां'** आनन्दानाम् । **'आस्यैरिव'** वदनैरिव ॥ १३६ ॥ **'विषमायुधभूपस्य'** कामनृपस्य । **'कटकैरिव'** बलैरिव । **नायकैः** । **'मोहमन्त्रसखैः'** मोहभूपस्य मन्त्रे मन्त्रणायां विचारणायां सखिभिः मित्रैः । **'पञ्चाङ्गैः'** पञ्चेन्द्रियजन्यैः । **सुखैः** । **'सः'** शालिभद्रः । **कालं निन्ये** नयति स्म ॥ १३७ ॥

**आद्यन्तग्रहणे मध्य-स्यापि ग्रहणमित्यसौ । आद्यन्तग्राहितामूहे, त्रिवर्गे स्वर्गिवर्गवत् ॥ १३८ ॥**

**'त्रिवर्गे'** धर्मार्थकामरूपे । **'स्वर्गिवर्गवत्'** देववृन्दवत् । तस्य शालिभद्रस्य । **'आद्यन्तग्राहितां'** धर्मकामग्राहिताम् । **'ऊहे'** चिन्तयामि । कथं तत् ? इति न्यायं दर्शयन्नाह-**'आद्यन्तग्रहणे'** आदेः अन्तस्य च ग्रहणे मध्यस्यापि ग्रहणं भवति एव । इत्यसौ शालिभद्रः विललास । न कदापि तेन शालिभद्रेण अर्थोपार्जननिमित्तं वाणिज्यादि चक्रे, यथा देवाः न कुर्वन्ति ॥ १३८ ॥

**रत्नावापनिपातिकान्तिसलिलः, स्वर्णोज्ज्वलस्कन्धभूः, लक्ष्मीपुष्पसुपल्लवो मरकत-प्रोल्लासिपत्रावलिः ।**

**मुक्तापुष्पभरः प्रकल्पितफलः, पुण्याढ्यदृग्गोचरः, सोऽयं कल्पतरुः स्वलङ्कृततनुः, श्रीशालिभद्रः किल ॥ १३९ ॥**

**सोऽयं स्वलङ्कृततनुः** सुमण्डिताङ्गः । **श्रीशालिभद्रः किल कल्पतरुः** । कल्पद्रुसादृश्यं दर्शयन्नाह- **'रत्नावापनिपातिकान्ति-सलिलः'** रत्नावापेषु मणिनिर्मितकङ्कणेषु निपाति निपतनशीलं कान्तिसलिलं देहप्रभाजलं यस्य सः । 'पारिहार्यावापौ च कङ्कणम्' इति हैम्याम् । कल्पतरुपक्षे-रत्ननिर्मितालवाले निपतनशीलं कान्तिपूर्णजलं यस्य । 'आलवालमावालमावापः' इति हैम्याम् । **'सुवर्णोज्ज्वलस्कन्धभूः'** सुवर्णवत् उज्ज्वलः स्कन्धभूः अंसप्रदेशः यस्य सः । पक्षे-सुवर्णवत् उज्ज्वलः स्कन्धभूः प्रकाण्डभागः यस्य सः । **'लक्ष्मीपुष्पसुपल्लवः'** लक्ष्मीः सम्पत्तिरेव पुष्पाणि सुपल्लवाश्च यस्य सः । अथवा-लक्ष्मीपुष्पवत् माणिक्यवत् रक्तः सुपल्लवः सुपदोः शोभनचरणयोः लवः भागः यस्य सः । पक्षे-लक्ष्मीपुष्पवत् पद्मरागवत् रक्ताः सुपल्लवाः किसलयानि यस्य सः । 'लक्ष्मीपुष्पोऽरुणोपलः' इति हैम्याम् । **'मरकतप्रोल्लासिपत्रावलिः'** मरकतानां हरिन्मणीनां प्रोल्लासिनीनां देदीप्यमानानां पत्रावलीनां रचना यस्य सः । पक्षे-मरकतवत् हरिन्मणिवत् प्रोल्लासिनां देदीप्यमानानां पत्राणां पर्णानां आवलिः श्रेणिः यस्य सः । **'मुक्तापुष्पभरः'** मुक्तापुष्पाणां भरः

समूहः यस्य सः । कल्पतरु-पक्षेऽपि एवमेव । '**प्रकल्पितफलः**' प्रकल्पितं निर्मितं फलं दानफलं येन सः । पक्षे-प्रकल्पितानि समुत्पन्नानि फलानि यस्मिन् सः । '**पुण्याढ्यदृग्गोचरः**' पुण्याढ्यानां श्रेणिकतुल्यानां पुण्यशालिनां दृग्गोचरः नयनविषयः अपुण्यैरदृश्यत्वात् । कल्पतरुरपि पुण्यशालिभिरेव दृश्यते ॥ १३९ ॥

**प्रासादे लसदिन्द्रनीलकिरणा-लक्ष्यप्रवेशान्तरे, कृष्णाङ्गागरुधूम्यया‌ऽथ कबरी-कान्त्या तमः सम्भृते ।**
**कान्तानां वदनेन्दुभिर्मणिमया-लङ्कारभाभिः प्लुते, नो जानात्युदितं न चास्तमितम-प्युद्यद्दिनश्रीरयम् ॥ १४० ॥**

'**उद्यद्दिनश्रीः**' सदोदितदिवसश्रीकः रात्रावपि रत्नैः प्रकाश्यमानत्वात् । '**अयं**' श्रीशालिभद्रः । '**प्रासादे**' निजमन्दिरे। सूर्यस्य रवेः । '**नो उदितं**' न उदयम् । '**न च अस्तमितं**' न च अस्तम् । **जानाति** । कथम्भूते प्रासादे ? '**लसदिन्द्रनीलकिरणलक्ष्यप्रवेशान्तरे**' लसदिन्द्रनीलकिरणैः स्फुरन्नीलमणिकिरणैः अलक्ष्यः अन्यप्रवेशः अन्यकिरणप्रवेशः यत्र तस्मिन् । **अथ कृष्णाङ्गागरुधूम्यया** श्यामवर्णाऽगरुधूमसमूहैः । '**कबरीकान्त्या**' प्रियतमानां केशवेषप्रभया च । '**तमःसम्भृते**' अन्धकारपूर्णे । इन्द्रनीलमणिः, कृष्णागरुधूमः, कबरी-इमानि त्रीणि श्यामवर्णानि अतः तत्कान्तिरपि श्यामैव स्यात् । ततः प्रासादोऽपि तमः सम्भृतः भवति एव । 'तमःसंसृते तमःपूरिते तमःसंवृत्ते' इति त्रीणि पाठान्तराणि । '**कान्तानां**' प्रियतमानाम् । '**वदनेन्दुभिः**' मुखचन्द्रैः । '**मणिमयालङ्कारभाभिः**' रत्नमयाभूषणकान्तिभिश्च । '**प्लुते**' प्रकाशिते। अयं भावः-शालिभद्रप्रासादे बाह्याऽनपेक्षौ एव प्रकाशान्धकारौ जायेते । रत्न-भूषण-मुखचन्द्रैः प्रकाशः, इन्द्रनील-धूम-कबर्यादिभिश्च अन्धकारः भवति । तस्मात् प्रासादान्तर्वर्तिनौ प्रकाशान्धकारौ न सूर्योदयास्तौ अपेक्षेते । तेन शालिभद्रः सूर्यस्य उदयास्तौ न जानाति ॥ १४० ॥

श्री शालिचरिते धर्म-कुमारसुधिया कृते । श्रीप्रद्युम्नधिया शुद्धे, द्वितीयः प्रक्रमोऽभवत् ॥ १४१ ॥

इति-कच्छवागडदेशोद्धारक-तपागच्छाचार्य-विजय कनकसूरि-प्रशिष्याचार्य
विजय कलापूर्णसूरि शिष्य मुनिश्री कलाप्रभ विजयजी (आचार्य कलाप्रभसूरि) शिष्य मुनिश्री
(पंन्यासश्री) मुक्तिचन्द्रविजयजी शिष्य मुनिश्री (पंन्यासश्री) मुनिचन्द्र विजय-
विरचितायां श्रीशालिभद्रमहाकाव्यस्य
सानुवादटीकायां द्वितीयः
प्रक्रमोऽभवत् ।

इति श्रीशालिभद्रचरिते जन्मविवाहवर्णनो नाम द्वितीयः प्रक्रमः ।

# ॥ अथ तृतीयः प्रक्रमः ॥

**अथ श्रीशालिसौभाग्य-भाग्याभोगसुधाम्बुधेः । सुपर्वसन्निधेर्वेला-वृद्धिहेला विलोक्यताम् ॥ १ ॥**

अथ '**श्रीशालिसौभाग्यभाग्याभोगसुधाम्बुधेः**' श्रीशालेः श्रीशालिभद्रस्य सौभाग्यं च भाग्यं च सौभाग्यभाग्ये तयोः आभोगः विस्तारः तद्रूपः सुधाम्बुधिः अमृतार्णवः तस्य । सुधाम्बुधिपक्षे-श्रिया शालते शोभते श्रीशाली, श्रीशालिसौभाग्य-भाग्यविस्ताररूपः यः सुधाम्बुधिः अमृतसागरः तस्य । '**सुपर्वसन्निधेः**' सुपर्वाणः देवाः सन्निधौ समीपे यस्य तस्य । पक्षे-सुपर्व पूर्णिमा सन्निधौ यस्य तस्य । '**वेलावृद्धिहेला**' वेलावृद्धिः सम्पत्तिसमयवर्धनं तस्य हेला विलासः । पक्षे-वेला समुद्रतीरं तस्य वृद्धेः हेला विलासः । '**विलोक्यतां**' दृश्यतां श्रूयतामित्यर्थः । पूर्णिमासान्निध्यात् यथा समुद्रवृद्धिः तथा देवसान्निध्यात् शालिभद्रस्य सम्पत्तिवृद्धिरिति भावः ॥ १ ॥

**गोभद्रश्चिन्तयामास, सुतास्याम्भोजवीक्षणम् । यतिधर्माध्वपान्थस्य, ममाऽस्तु शकुनः शुभः ॥ २ ॥**

'**गोभद्रः**' शालिपिता । '**चिन्तयामास**' चिन्तयति स्म । किं तदित्याह-'**यति-धर्माध्वपान्थस्य**' साधुधर्ममार्गप्रवासिनः । **मम** । '**सुताम्भोजवीक्षणं**' पुत्र मुखकमलदर्शनम् । **शुभः शकुनः** अस्तु । मार्गे किल कमलदर्शनं शुभं गण्यते ममापि चारित्रमार्गे सुतवदनपङ्कजदर्शनं शुभमेवेति गोभद्रश्चिन्तयति स्मेति भावः ॥ २ ॥

**यतो द्यूतमिव प्रायः, केऽपि वित्तहृतः सुताः । पूर्णं प्रार्णमिवाऽन्ये तु, चिन्तासन्तापहेतवः ॥ ३ ॥**

**'यतः'** यस्मात् । **'केऽपि सुताः'** पुत्राः । **'द्यूतमिव'** दुरोदरवत् । **'वित्तहृतः'** धनहरणशीलाः । अन्ये तु केचन पूर्णं प्रार्णमिव प्रकृष्टं ऋणं प्रार्णं तद्वत् । **चिन्तासन्तापहेतवः** जायन्ते । इति गोभद्रचिन्तनम् ॥ ३ ॥

**अगण्यपुण्यवत् केऽपि, सम्पदानन्ददायिनः । सम्पूर्णीकृतधर्मांशा, द्वित्राः कृतयुगोपमाः ॥ ४ ॥**

**'अगण्यपुण्यवत्'** असीमसुकृतवत् । **'केऽपि'** पुत्राः । **'सम्पदानन्ददायिनः'** सम्पदं च आनन्दं च ददतीत्येवंरूपाः । **'सम्पूर्णीकृतधर्मांशाः'** असम्पूर्णाः सम्पूर्णाः कृताः धर्मस्य अंशाः भागाः यैः ते । **'कृतयुगोपमाः'** सत्ययुगसमाः । **'द्वित्राः'** द्वौ वा त्रयो वा एव भवन्ति ॥ ४ ॥

**असौ मम पुनः सूनुः, श्रीवृद्धौ कृष्णचित्रकः । चिन्ताशल्यविशल्येव, धर्ममन्दारनन्दनम् ॥ ५ ॥**

**मम पुनः असौ सूनुः** पुत्रः शालिभद्रः । **'श्रीवृद्धौ'** लक्ष्मीवृद्धौ । **'कृष्णचित्रकः'** कृष्णा चित्रवल्ली । भाषायां 'चित्रावेली' । कृष्णचित्रकसन्निधौ श्रीः वृद्धिं गच्छति इति श्रुतिः । **'चिन्ताशल्यविशल्या इव'** चिन्तारूपशल्यदूरीकरणे विशल्यासती इव । रावणमुक्तशक्तिशल्येन प्रहतः मूर्च्छितः लक्ष्मणः किल विशल्यासतीस्पर्शतः सचेतनः जातः इति जैनरामायणे । **'धर्ममन्दारनन्दनं'** धर्ममन्दार (कल्पवृक्ष) रोहणे नन्दनं देववनम् । वर्तते ॥ ५ ॥

**चतुरेऽनातुरे धीरे, द्विधाऽस्मिन् भाद्रमातुरे । मुद्वहे न्यस्य तद्भार-मुद्वहे व्रतमुद्वहे ॥ ६ ॥**

**'तद्'** तस्मात् । **'चतुरे'** कुशले। **'अनातुरे'** औत्सुक्यरहिते । **'धीरे'** धैर्ययुते । **'द्विधा भाद्रमातुरे'** सतीपुत्रः भाद्रमातुरः कथ्यते तस्मिन् भाद्रमातुरे भद्रा च माता यस्यासौ तस्मिन्निति एवं द्विधा भाद्रमातुरे । **'मुद्वहे'** मुदं वहतीत्येवंशीले ।

**'तस्मिन् उद्वहे'** पुत्रे । 'उद्वहोऽङ्गात्मजः सूनुः' इति हैम्याम् । **'भारं'** कुटुम्बभारम् । **'न्यस्य'** संस्थाप्य । **'व्रतं'** प्रव्रज्याम्। **'उद्वहे'** गृह्णामीति गोभद्रश्चिन्तयामास ॥ ६ ॥

**सुप्रतीके सति प्रीते, प्रतीते दिग्गजेऽङ्गजे । नैशानीं यस्त्यजत्याशां, सत्यं पशुपतिः स तु ॥ ७ ॥**

**'सुप्रतीके'** शोभनाङ्गे । 'एकदेशे (शरीरस्य) प्रतीकोऽङ्गावयवाऽपघना अपि' हैम्याम् । शङ्करपक्षे-सुप्रतीकनामा ईशानदिग्गजः तस्मिन् । **दिग्गजे** । **'अङ्गजे'** पुत्रे । **'प्रीते'** तुष्टे । **'प्रतीते'** प्रख्याते सति । **'यः'** पिता । **'ऐशानीमाशां'** ऐशानीं स्वामितां गृहस्वामितासम्बन्धिनीं आशां आकाङ्क्षाम् । पक्षे-ऐशानीं आशां दिशम् । **'न त्यजति'** न परिहरति। **'सः'** पिता । **'पशुपतिः'** गोपालः । पक्षे-महादेवः अस्ति ॥ ७ ॥

**तद्रूपास्तेऽत्र चिद्रूपा, ईश्वरास्ते च भास्वराः । श्रीवीरं वरिवस्यन्ति, नमस्यन्ति च ये सदा ॥ ८ ॥**

**'अत्र'** भूतले । **'ते चिद्रूपाः'** सहृदयाः ज्ञानवन्तः । **'तद्रूपाः'** ये श्रीवीरमयाः । **'ते ईश्वराः'** श्रेष्ठिनः । **'भास्वराः'** कान्तिमन्तः । **ये सदा श्रीवीरं वरिवस्यन्ति** सेवन्ते **नमस्यन्ति** प्रणमन्ति । चः समुच्चये ॥ ८ ॥

**एवं भावयते तस्मै, सद्य उद्यानपालकः । श्रीवीरागमनं नीरा-गमनं धर्मवीरुधाम् ॥ ९ ॥**

**विज्ञायाऽभ्येत्य विज्ञाय, सुपुण्याय व्यजिज्ञपत् । स्पृहामात्रं विलम्बो हि, प्रियप्राप्तौ महात्मनाम् ॥ १० ॥**

**'एवं भावयते'** चिन्तयते । **'विज्ञाय'** विचक्षणाय । **'सुपुण्याय'** शोभनं पुण्यं यस्य तस्मै सुकृतिने । **'तस्मै'** गोभद्राय। **'धर्मवीरुधां'** सुकृतवल्लीनाम् । **'नीरागमनं'** जलागमनरूपम् । **श्रीवीरागमनम्**। **'विज्ञाय'** ज्ञात्वा । **'सद्यः'**

सपदि । **'उद्यानपालकः'** आरामिकः । **'व्यजिज्ञपत्'** विज्ञापितवान् । **'महात्मनां'** महानुभावानाम् । **'प्रियप्राप्तौ'** इष्टलाभे । **'स्पृहामात्रे'** इच्छाकरणमात्रे । हिः निश्चये । **विलम्बः** भवति । महात्मानो हि यद् वस्तु यावन्नेच्छन्ति तावदेव तेभ्यः दूरे । अर्थात् जातमात्रेच्छायां तद् वस्तु तैः प्राप्यते ॥ ९ ॥ १० ॥

**अथ स्नातानुलिप्ताङ्गः, शुचिवस्त्रविभूषणः । आर सारपरीवारः, श्रीवैभारधराधरम् ॥ ११ ॥**

**अथ 'स्नातानुलिप्ताङ्गः'** आदौ स्नातं पश्चाद् अनुलिप्तं अङ्गं यस्य सः । **'शुचिवस्त्रविभूषणः'** पवित्रनेपथ्याभरणः । **'सारपरीवारः'** सारभूतः परिवारः यस्य पार्श्वे सः । गोभद्रः । **'श्रीवैभारधराधरं'** श्रीवैभाराख्यपर्वतम् । **'आर'** जगाम ॥ ११ ॥

**स त्रिः प्रदक्षिणीकृत्य, वर्धमानशुभाशयः । श्रीवर्धमानमानम्य, सम्यक् शुश्राव देशनाम् ॥ १२ ॥**

**'वर्धमानशुभाशयः'** वर्धमानः शुभाशयः कुशलाशयः यस्य सः । **'सः'** गोभद्रः । **'श्रीवर्धमानं'** श्रीवीरजिनम् । **'त्रिः'** त्रिवारम् । **'प्रदक्षिणीकृत्य'** प्रदक्षिणां दत्वा । **'आनम्य'** प्रणम्य । **'देशनां'** उपदेशम् । **'सम्यक्'** शुश्रूषादि-धीगुणयुक्ततया सम्यक् । **'शुश्राव'** श्रृणोति स्म ॥ १२ ॥

**तृष्णाकारिणि संसारे, मरावपतराविह । धर्मो दशभिदा भिन्नः, किल कल्पद्रुमायते ॥ १३ ॥**

**'अपतरौ'** वृक्षविहीने । **'मरौ'** मरुदेशे । **'तृष्णाकारिणि'** विषयाद्याशाविधायके । मरुपक्षे-पिपासाकारिणि । **'संसारे'** भवे । **'दशभिदाभिन्नः'** क्षान्त्यादिदशप्रकारैः भिन्नः । **धर्मः किल** । **'कल्पद्रुमायते'** कल्पवृक्षतुल्यः अस्ति-इति श्रीवीर-विभोः देशना-सारः ॥ १३ ॥

**घनागमस्य मूलेन, शुचिना वचसा विभोः । स शुक्लपाक्षिकत्वेन, धर्ममानसमानशे ॥ १४ ॥**

**'घनागमस्य'** घनः बहलः आगमः सिद्धान्तः तस्य । आषाढपक्षे-मेघागमनस्य । **'मूलेन'** कारणेन । **'विभोः'** श्रीवीरस्य। **'शुचिना'** पवित्रेण । पक्षे-आषाढमासेन । 'अथाऽऽषाढः शुचिः' इति हैम्याम् । **'वचसा'** वचनेन । **'सः'** गोभद्रः । **'शुक्लपाक्षिकत्वेन'** आसन्नभव्यत्वेन । पक्षे-शुक्लपक्षः राजहंसः राजहंसत्वेन । **'धर्म मानसं'** धर्मचेतः । पक्षेमानसरोवरम्। **'आनशे'** व्याप्नोति स्म । अयं भावः यथा आषाढमासे मेघागमनेन राजहंसाः मानसरोवरं व्याप्नुवन्ति तथा श्रीवीरवचसा गोभद्रः धर्ममानसं (धर्ममयचेतः) प्राप्तः ॥ १४ ॥

**दीक्षा कृते गोभद्रस्य पत्नी-पुत्राभ्यां सह विचारणा–**

**स स्वामिनमनुज्ञाप्य, याप्ययानेऽधिरुह्य च । गृहमागत्य सुप्रीतः, प्रेयसीमित्यभाषत ॥ १५ ॥**

**'सः'** गोभद्रः । **'स्वामिनं'** वीरजिनम् । **'अनुज्ञाप्य'** अनुज्ञां प्राप्य । **'याप्ययाने'** शिबिकायाम् । **'अधिरुह्य'** आरुह्य । **'गृहं'** गेहम् । **आगत्य** । **'सुप्रीतः'** सुतुष्टः । **'प्रेयसीं'** पत्नीं भद्राम् । **'इति'** अग्रे वक्ष्यमाणम् । **'अभाषत'** अकथयत् ॥ १५ ॥

**वामाङ्गसङ्गतां मुष्टि-ग्राह्यमध्यां सुवंशजाम् । आसन्नभव्यजीवां च, कषरेखापरीक्षिताम् ॥ १६ ॥**

**बिभ्राणां मार्गणांश्चाप-यष्टिवत् त्वामवाप्य हे । धर्माभ्यासवतां सीमा, सीमन्तिनि ! किलाभवम् ॥ १७ ॥**

**'वामाङ्गसङ्गतां'** वामाङ्गं मनोहरशरीरं तेन सङ्गतां युताम् । धनुःपक्षे-सव्याङ्गसहिताम् । धनुः किल शरमोचनसमये वामहस्तेन गृह्यते । **'मुष्टिग्राह्यमध्यां'** मुष्टिना ग्राह्यो मध्यभागो यस्याः सा । धनुःपक्षेऽपि मध्यभागः कृशः एव भवति। **'सुवंशजां'** सुकुलसम्भूताम् । पक्षे-सुवेणुनिर्मिताम् । **'आसन्नभव्यजीवां'** मुक्तेः आसन्नः भव्यः जीवः यस्या सा । पक्षे-आसन्ना संलग्ना भव्या जीवा धनुर्ज्या यस्याः सा । **'कषरेखापरीक्षितां'** कषरेखाभिः शाणरेखाभिः । निकषतुल्यरेखाभिः

परीक्षिताम् । धनुःपक्षेऽपि एवमेव, वंशयष्ट्यां रेखाः विद्यन्ते एव ॥ १६ ॥ **'चापयष्टिवत्'** कार्मुकयष्टिवत् । **'मार्गणान्'** याचकान् । पक्षे-शरान् । **'बिभ्राणां'** त्वां भद्रां अवाप्य । **'सीमन्तिनि'** हे स्त्रि ! । अहं किल । **'धर्माभ्यासवतां'** धर्माध्ययनवताम्। पक्षे-शस्त्रधर्माभ्यासवताम् । **'सीमा'** अवधिः । **अभवम्** । धनुःयष्टिसमां त्वामवाप्य **हे** भद्रे ! अहं परम धार्मिकः जातः इति गोभद्रस्य भद्रां प्रति कथनम् ॥ १७ ॥

**त्वं च पुण्यप्रतिष्ठाना, फलकान्तगुणोच्चया । असङ्ख्यगुणलाभार्थ-मङ्गिनी मङ्गिनीव मे ॥ १८ ॥**

**त्वं च मे** । **'पुण्यप्रतिष्ठाना'** पुण्यं पवित्रं प्रतिष्ठानं प्रसिद्धिः यस्याः सा । नौपक्षे-पुण्यं पवित्रं प्रतिष्ठानं उपवेशनस्थानं यस्याः सा । **'फलकान्तगुणोच्चया'** फलरूपा ये कान्ता गुणाः ते एव उच्चयो नीवी यावत् मूलधनं यस्याः सा । पक्षे-फलकस्य अन्ते गुणानां रज्जूनां उच्चयः समुदायः यस्यां सा । **'मङ्गिनीव'** नौः इव त्वम् । **'अङ्गिनी'** सधर्मिणी । **'असङ्ख्यगुणलाभार्थं'** मम अनेकगुणप्राप्त्यर्थम् । पक्षे-असङ्ख्यगुण कलान्तरा(व्याज)द्यधिकफलार्थम् । असि ॥ १८ ॥

**त्वया सुधानुवादिन्या, रससिद्ध्येव मूर्तया । साधुसिद्धः प्रसिद्धोऽस्मि, दाता भोक्ताऽप्ययाचकः ॥ १९ ॥**

**'सुधानुवादिन्या'** अमृतानुकारिण्या । **'मूर्तया'** मूर्तिमत्या । **'रससिद्ध्या इव'** सुवर्णादिरससिद्ध्या इव । **त्वया** । अहं **दाता भोक्ताऽपि अयाचकः** सर्वेभ्यो-यच्छन् स्वयं भुञ्जानोऽपि केभ्योऽपि याचनां न करोमि । **'साधुसिद्धः'** साधुषु सज्जनेषु सिद्धः प्रतीतः । पक्षे-सिद्धः साधुरिव । **प्रसिद्धोऽस्मि** । भवत्येव सिद्धसाधुसमीपे रससिद्धिः ॥ १९ ॥

**साम्प्रतं पुत्रमित्रादि-सम्बन्धाप्रतिबन्धिनः । अभ्यमित्रीणतां मोह-शत्रुं प्रति यियासतः ॥ २० ॥**

**तृष्णाहरणनिष्णाता, छेका प्रोत्साहने मम । वीरपत्नीव्रतं तीव्रं, प्रादुर्भावय गेहिनि ! ॥ २१ ॥**

**पुरः श्रीवीरनाथस्य, दीक्षामादाय सादरम् । चतुर्थपुरुषार्थश्री-साम्राज्यं साधये यथा ॥ २२ ॥**

**'साम्प्रतं'** अधुना । **'पुत्रमित्रादिसम्बन्धाऽप्रतिबन्धिनः'** पुत्रमित्रादीनां सम्बन्धं प्रति अप्रतिबन्धिनः । रागरहितस्य। मोहशत्रुं प्रति । **'अभ्यमित्रीणतां'** यस्तु शत्रून् प्रति पुरः याति सोऽभ्यमित्रीणः तस्य भावः तत्ता ताम् । **'यियासतः'** यातुमिच्छोः ॥ २० ॥ **मम प्रोत्साहने** उल्लासप्रदाने । **'छेका'** कुशला । **'गेहिनि !'** हे प्रिये ! । **'तृष्णाहरणनिष्णाता'** भवत्येव वीरपत्नी युद्धं प्रति प्रस्थितस्य पत्युः पुत्रादितृष्णाविनाश-कुशला । त्वम् । **'तीव्रं'** उग्रम् । **'वीरपत्नीव्रतं'** वीरस्य पत्नी तस्याः व्रतम् । **'प्रादुर्भावय'** प्रकटय ॥ २१ ॥ यथा **'श्रीवीरनाथस्य'** भगवतः श्रीमहावीरस्य । **'पुरः'** अग्रे । **'सादरं'** आदरपूर्वकम् ! **'दीक्षां'** प्रव्रज्याम् । **'आदाय'** गृहीत्वा । **'चतुर्थपुरुषार्थश्री-साम्राज्यं'** मोक्षलक्ष्मीसाम्राज्यम् । **'साधये'** जित्वा आत्मसात् करोमि ॥ २२ ॥

**जगाद गद्गदं भद्राथाश्रुमिश्रविलोचना । हृदयालुर्दयालुस्त्वमदयालुरिवाऽभवः ॥ २३ ॥**

**अथ अश्रुमिश्रविलोचना** बाष्पायितनयना **भद्रा** । **'गद्गदं'** गद्गदाक्षरम् । **'जगाद'** उवाच । **'त्वं हृदयालुः'** सहृदयः। **'दयालुरपि'** कृपावानपि । **'अदयालुरिव'** निष्कृप इव । **'अभवः'** जाताऽसि ॥ २३ ॥

**एकपत्नीव्रतरतेः, सत्यं भावयतस्तव । व्रतं वेश्मनि वा वासः, पुण्यायैव प्रकल्पते ॥ २४ ॥**

**'सत्यं'** सत्यतत्त्वम् । **'भावयतः'** चिन्तयतः । **'एकपत्नीव्रतरतेः'** एकपत्न्याः व्रतं तस्मिन् रतिः यस्य तस्य तव । **'व्रतं'** दीक्षा । **'वेश्मनि वा'** गेहे वा । **'वासः'** निवासः । **'पुण्यायैव'** सुकृतायैव । **'प्रकल्पते'** भवति । अयं भावः-हे प्रियतम! त्वं सत्यनिष्ठोऽसि । अतः दीक्षायां गृहस्थावस्थायां वा निवसतस्ते पुण्यमेव भविष्यति इति पतिं प्रति भद्रोक्तिः ॥ २४ ॥

**एकपुत्राऽहमबला, बालश्च तव नन्दनः । तेन केन बलेनावां, निर्दाक्षिण्य ! विमोक्ष्यसि ॥ २५ ॥**

'**अहं एकपुत्रा**' एकः एव शालिभद्रः पुत्रः यस्याः सा ।'**अबला**' बलहीना स्त्रीत्यर्थः ।**तव बालश्च** शालिः नन्दनः लघुवयाः । '**तेन**' तस्मात् । **केन बलेन** । '**आवां**' बालं च मां च । '**निर्दाक्षिण्य**' हे आनुकूल्यरहित ! । '**विमोक्ष्यसि**' त्यक्ष्यसि ? ॥ २५ ॥

**प्रेमहेलामहेलां मां, महिलामवमन्यसे । बालं लक्ष्मीलताऽऽवालं, नाऽलं भोक्तुं भवानपि ॥ २६ ॥**

'**प्रेमहेलां**' स्नेहविलासाम् । '**अहेलां**' हीलना अवज्ञा तया रहिताम् । **मां महिलां** स्त्रियम् । '**अवमन्यसे**' उपेक्षां कुरुषे अपि । किन्तु '**लक्ष्मीलताऽऽवालं**' लक्ष्मीलतायाः आवालं सिञ्चनस्थानकम् । '**बालं**' शालिभद्रम् । '**मोक्तुं**' त्यक्तुम् । **भवानपि नाऽलं** न समर्थः । ॥ २६ ॥

**पद्मिनीं पदयोर्लग्नां, पुन्नागः प्रसभं क्षिपेत् । विमुञ्चत्यङ्गजं पद्मं, कथं गम्भीरवेद्यपि ॥ २७ ॥**

'**पदयोः**' चरणयोः । **लग्नाम्** । '**पद्मिनीं**' प्रियाम् । हस्तिपक्षे-कमलिनीम् । '**पुन्नागः**' श्रेष्ठपुरुषः । पक्षे-श्रेष्ठकुञ्जरः । '**प्रसभं**' बलात् । '**क्षिपेत्**' दूरीकुर्याद् अपि । किन्तु । '**अङ्गजं**' पुत्रम् । पक्षे-अङ्गजातम् । '**पद्मं**' पद्मसमम् । पक्षे-बिन्दुजालम् । तारुण्ये हि हस्तिनो देहे पद्मवद् रक्ताः बिन्दवः स्युः तत् 'पद्मं' इति प्रोच्यते । '**गम्भीरवेदी**' गम्भीरवेत्ता। पक्षे-गम्भीरवेदी गजः । तल्लक्षणं चेदम्-त्वग्भेदाच्छोणितश्रावा-दामांस व्यथनादपि । संज्ञां न लभते यस्तु, गजो गम्भीरवेद्यसौ ॥

एतादृगपि गम्भीरवेदी गजः अपि कथं विमुञ्चति ? गम्भीरवेद्यपि गजः पदलग्नां कमलिनीं विमुञ्चति किन्तु स्वशरीरस्थं बिन्दुजालं मोक्तुं न शक्नोति तद्वत् त्वमपि मां विमुञ्चसि किन्तु पुत्रं कथं विमुञ्चसि ? ॥ २७ ॥

**बालेन मृदुनैकेन, स्नेहार्हेण सुतेजसा । वशामपि श्रियं व्याला-मालानयसि धिक् कथम् ॥ २८ ॥**

**'मृदुना'** सुकुमारेण । **'स्नेहार्हेण'** प्रेमोचितेन । केशपक्षे-तैलयोग्येन । **'सुतेजसा'** तेजस्विना । केशपक्षेऽपि एवमेव। एकेन बालेन शिशुना । पक्षे-एकेन केशेन । **धिक् कथं व्यालां** दुष्टाम् । लक्ष्मीः किल अनेकलोकभोग्या तत एव दुष्टा । पक्षे-दुष्टहस्तिनीम् । **'वशामपि'** स्वाधीनामपि । पक्षे-हस्तिनीम् । **'श्रियं'** लक्ष्मीम् । **'आलानयसि'** बध्नासि ? आलानं-गजबन्धनम् । अयं भावः-यथा एकेन बालेन (केशेन) व्याला हस्तिनी न बध्यते तथा एकेन लघुबालेन शालिभद्रेण श्रीः न भन्त्स्यते ॥ २८ ॥

**स्तम्भः सौधं न तु स्थूणा, यूथं हस्ती न हस्तिनी । दुरालानं लता नैव, रथमुक्षा न गौर्यथा ॥ २९ ॥**

**एवमुच्चैः कुलाभारं, सात्त्विकः पुरुषोऽर्हति । अबला नाम-धामभ्यां, न नारी कोविदाऽप्यहो ॥ ३० ॥**

**यथा सौधं** प्रासादम् । **स्तम्भः** वोढुमर्हति **न तु स्थूणा** कीलिका । **एवं यूथं हस्ती न तु हस्तिनी** । **'दुरालानं'** दुःखेन आलायते गृह्यते इति दुरालानः तम् । शासू-युधि-दृशि-धृषि-मृषा-ऽऽतोऽनः ।५।३।१४१॥ इत्यनः । दुष्टगजमित्यर्थः । **न एव लता** बध्नाति । **'रथं'** स्यन्दनम् । **'उक्षा'** वृषभः । **न तु गौः** धेनुः वहति ॥ २९ ॥ **एवम् । उच्चैः कुलाभारं** कुलस्य आभारं आ-समन्तात् भारः वीवधः तम् । **सात्त्विकः** सत्त्वशाली पुरुषः । **अर्हति** योग्यः अस्ति । **अहो** आश्चर्ये। **'नाम-धामभ्यां'** अभिधान-पराक्रमाभ्याम् द्विधाऽपि अबला स्त्रियाः नामाऽपि अबला पराक्रमोऽपि अबलः अतः द्विधा अबला । **'कोविदाऽपि'** विचक्षणाऽपि नारी न वोढुमर्हति ॥ ३० ॥

**सार्थवाहस्ततः प्राह, प्रवीणे ! विधुराऽसि किम् । त्वं बालशारदेवासि, जिनतत्त्वविशारदे ॥ ३१ ॥**

**'ततः'** तत्पश्चात् । **'सार्थवाहः'** गोभद्रः । **'प्राह'** उवाच । **'प्रवीणे'** हे कुशले । **किं विधुरा** व्याकुला **असि** ? **'जिनतत्त्वविशारदे'** हे अर्हत्तत्त्वविज्ञे ! । **'त्वं बालशारदेव'** बालसरस्वतीव **असि** ॥ ३१ ॥

**अन्तरङ्गं बलं पुण्यं, भावानामुद्भवान्तयोः । बहिरङ्गाः कुरङ्गाक्षि ! पुरुषोपक्रमक्रमाः ॥ ३२ ॥**

**'भावानां'** धनादिपदार्थानाम् । **'उद्भवान्तयोः'** उत्पत्तिविनाशयोः । **'अन्तरङ्गं'** आन्तरम् । **'बलं'** शक्तिः । **'पुण्यं'** सुकृतमस्ति । **'कुरंगाक्षि'** हे मृगनयने ! **'पुरुषोपक्रमक्रमाः'** पुरुषप्रयत्नपरम्पराः । **'बहिरङ्गाः'** बाह्याः शक्तयः सन्ति । धनधान्यादिप्राप्तौ पुण्यमेव मुख्यं कारणम् । पुरुषप्रयत्नास्तु गौणकारणमिति भावः । यदुक्तम्-

हे लक्ष्मि ! क्षणिके स्वभावचपले मूढे च पापेऽधमे, न त्वं चोत्तमपात्रमिच्छसि खले प्रायेण दुश्चारिणी । ये देवार्चनसत्यशौचनिरता, ये चापि धर्मे रताः, तेभ्यो लज्जसि निर्दये ! गतमतिर्नीचो जनो वल्लभः ॥ १ ॥

लक्ष्मीप्रत्युत्तरम्-

नाऽहं दुश्चरिणी न चापि चपला मूर्खो न मे रोचते, नो शूरो न च पण्डितो न च शठो हीनाक्षरो नैव च । पूर्वस्मिन् कृतपुण्ययोगविभवो, भुङ्क्ते स मे सत्फलं, लोकानां किमसह्यता सखि ! पुनर्दृष्ट्वा परां सम्पदम् ॥ ३२ ॥

**धर्मो निरवकाशोऽयं, सावकाशः सदान्तकः । बलाबलं स्वयं तेषु, विचारय सुलक्षणे ! ॥ ३३ ॥**

**'अयं धर्मः निरवकाशः'** कदाचित् साध्यत्वात् । मानवजीवनं प्रायः क्रीडा-निद्रा-विषयासेवन-धनार्जनादि कार्येषु एव गच्छति, तेषु धर्मस्य कुत्र अवकाशः ? अतः **धर्मः 'निरवकाशः'** कथ्यते । **'अन्तकः'** यमः मृत्युः । **'सदा'** नित्यम् । **'सावकाशः'** कदाचिदपि तस्य शक्यत्वात् । गर्भस्थ-बाल-युव-वृद्धाद्यवस्थासु शक्य एव मृत्युः कदाचिदपि । यदुक्तम्-

अनित्यानि शरीराणि, विभवो नैव शाश्वतः । नित्यं सन्निहितो मृत्युः, कर्तव्यो धर्मसञ्चयः ॥

'**सुलक्षणे**' हे सुलक्षणयुते ! । '**तेषु**' धर्ममरणादिषु । '**स्वयं**' आत्मनैव । '**बलाबलं**' धर्मे बलं मृत्यौ अबलम् । '**विचारय**' चिन्तय ॥ ३३ ॥

**सिंहार्कनृपदेवेषु, 'बाल' इत्यवहीलना । गूढप्रौढप्रतापेषु, विदुषां नहि युज्यते ॥ ३४ ॥**

'**गूढप्रौढप्रतापेषु**' गूढः गुप्तः प्रौढः प्रतापः येषां तेषु । गूढप्रौढप्रभावेषु इत्यपि पाठान्तरम् । '**सिंहार्कनृपदेवेषु**' सिंहसूर्यभूपसुरेषु । '**बालः**' इति कथनात् '**अवहीलना**' कर्तुं विदुषां बुधानां न हि युज्यते । आशैशवाद्धि सिंहार्कनृपदेवाः सविक्रमाः भवन्ति, न ते बालाः अयं शालिभद्रोऽपि तत्सम एव ॥ ३४ ॥

**दिव्यवाण्येकनिर्देशा, सिंही चैकसुता यथा । एकाक्षरा महाविद्या, रुद्राक्षैकमुखी शुभा ॥ ३५ ॥**

**तथा त्वमेकपुत्राऽपि, प्रभावाद्भुतवैभवा । संसार कार्यवद्धर्म-कार्येष्वपि समृद्धिदा ॥ ३६ ॥ ( युग्मम् )**

**यथा** '**एकनिर्देशा**' एकः एव निर्देशः आदेशः यस्याः सा । '**दिव्यवाणी**' देववाणी शुभा । '**एकसुता**' एकः एव सुतः पुत्रः यस्याः सा । '**सिंही**' सिंहवधूः शुभा । चः समुच्चये । '**एकाक्षरा**' एकमेव अक्षरं यस्यां सा । '**महाविद्या**' शुभा । '**एकमुखी**' एकमेव मुखं यस्यां सा । **रुद्राक्षा** शुभा भवति ॥ ३५ ॥

**तथा** '**एकपुत्रा**' एकः शालिभद्रः एव पुत्रः यस्याः सा एकपुत्रापि त्वम् । '**प्रभावाद्भुतवैभवा**' प्रभावात् सुतप्रतापात् अद्भुतः वैभवः यस्याः सा । **संसारकार्यवत् धर्मकार्येषु अपि समृद्धिदा** असि । यदुक्तम्-

एकेनाऽपि सुपुत्रेण, सिंही स्वपिति निर्भयम् । सहैव दशभिः पुत्रै, भारं वहति गर्दभी ॥ ३६ ॥

**या स्वामिनमतिक्रम्य, दिगन्तमपि गच्छति । कालरूपा च सा देहच्छाया नैति सतीतुलाम् ॥ ३७ ॥**

'**या**' स्त्री । '**स्वामिनं**' पतिम् । '**अतिक्रम्य**' उल्लङ्घ्य । '**दिगन्तमपि**' कीर्ति-प्रतिष्ठादिद्वारा । **गच्छति** । '**सा**' पत्नी । '**कालरूपा**' श्यामवर्णा मृत्युरूपा वा । छायापक्षे-कृष्णवर्णा । '**देहच्छाया**' शरीरच्छाया । '**सतीतुलां**' सतीसमानताम् । '**न एति**' न प्राप्नोति । प्रगे सायं च देहच्छाया मूलपुरुषादपि महती सती दिगन्तरं गच्छति, सा देहच्छाया कथं सतीतुल्या स्यात् ! नहि सती स्त्री कदाचिदपि स्वामिनं अतिक्रम्य किञ्चिदपि करोति । ततः यत् लोकैः 'यत्र पतिः तत्र छायावत् सती' इति प्रोच्यते तन्न पूर्णसत्यमिति गोभद्र-कथनभावः ॥ ३७ ॥

**त्वं तु च्छायाद्रुमच्छाया, मानौन्नत्यनिदर्शनम् । राजमित्राऽभियोगेऽपि, नातिक्रामसि मां पतिम् ॥ ३८ ॥**

**त्वं** '**तु**' परन्तु हे भद्रे त्वम् । '**छायाद्रुमच्छाया**' यस्मिन् सदैव छाया भवति सः 'छायाद्रुमः' कथ्यते, तस्य छायातुल्या । '**मानौन्नत्यनिदर्शनं**' गौरवोन्नतिदृष्टान्तभूता । छायाद्रुमपक्षे-प्रमाणोच्चतादृष्टान्तरूपा । '**राजमित्राऽभियोगेऽपि**' नृपमित्रबलात्कारेऽपि । पक्षे-चन्द्रसूर्याक्रमणेऽपि । 'राजा निशा रत्नकरौ च चन्द्रः' 'मित्रो ध्वान्तारातिः' इति च हैम्याम् । '**पतिं**' मां स्वामिनम् । '**न अतिक्रामसि**' न उल्लङ्घसि ॥ ३८ ॥

**मदङ्गजगुणग्रामोपबृंहणपरायणा । तिष्ठ प्रतिष्ठिता पश्चात्, कीर्तिर्मूर्तेव निर्मला ॥ ३९ ॥**

'**मदङ्गजगुणग्रामोपबृंहणपरायणा**' मत्पुत्रशालिभद्रगुणसमूहप्रशंसापरा । '**पश्चात्**' तदनु । '**प्रतिष्ठिता**' स्थिता । '**मूर्तिः**' देहधारिणी । '**निर्मला**' मलरहिता । **कीर्तिः इव** त्वं तिष्ठ मद्गृहे वस ॥ ३९ ॥

**स्निग्धेन मोदकेनाढ्य-रसेन प्रौढिशालिना । वचसा रुद्धकण्ठेव, योषा जोषमियेष सा ॥ ४० ॥**

**'स्निग्धेन'** प्रेमपूर्णेन । मोदकपक्षे-घृतस्निग्धेन **'आढ्यरसेन'** आढ्याः शान्तादिरसा यस्मिन् तेन । पक्षे-शर्करादिरसाढ्येन । **'प्रौढिशालिना'** उत्साहसामर्थ्यसहितेन । पक्षे-महत्त्व (बृहत्त्व) युतेन । **'मोदकेन'** आह्लादकेन । पक्षे लड्डुकेन। **'वचसा'** वचनेन । **'रुद्धकण्ठा इव'** रुद्धः कण्ठः यस्याः सा तद्वत् । **सा** भद्रा **योषा**-स्त्री । **'जोषं'** मौनम् । **'इयेष'** प्राप्ता । प्रमाणातिशायिमोदककवलरुद्धकण्ठः पुरुषः यथा वक्तुं न शक्नोति तथा भद्राऽपि वक्तुमशक्ता जातेत्यर्थः ॥ ४० ॥

**प्रेरिता सार्थवाहेन, पवनेनेव सा भृशम् । साश्रुधाराऽभ्रलेखेव, सुतसौधाद्रिमाद्रवत् ॥ ४१ ॥**

**'पवनेन इव'** वायुना इव । **'सार्थवाहेन'** गोभद्रेण । **'भृशं'** अत्यन्तम् । **'प्रेरिता'** नोदिता । **'साश्रुधारा'** अश्रुधारासहिता। मेघश्रेणिपक्षे-जलधारायुता । **'सा'** भद्रा । **'अभ्रलेखा इव'** मेघश्रेणिः इव । **'सुतसौधाद्रिं'** पुत्रप्रासादपर्वतं गत्वा । **'आद्रवत्'** द्रुतवती रुदितेत्यर्थः । अभ्रपक्षे-ववर्ष । यथा पवनप्रेरितपर्जन्यः पर्वते वर्षति तथा भद्राऽपि शालिभद्रसौधं गत्वा साश्रुधारा रुरोद ॥ ४१ ॥

**क्षीरोदसङ्गतां गङ्गा-मिवालोक्य स मातरम् । पित्रा समं समायान्ती-मभ्युत्तस्थौ स्थितिं विदन् ॥ ४२ ॥**

**'क्षीरोदसङ्गतां'** क्षीरोदधिसहिताम् । **'गङ्गामिव'** जाह्नवीमिव । **'पित्रा'** जनकेन । **'समं'** सार्धम् । **'समायान्तीं'** समागच्छन्तीम् । **'मातरं'** जननीम् । **'अवलोक्य'** दृष्ट्वा । **'स्थितिं'** मर्यादाम् । **'विदन्'** जानन् । **'सः'** शालिभद्रः। **'अभ्युत्तस्थौ'** अभ्युत्थानं कृतवान् । पित्रोः दृष्टयोः अभ्युत्तिष्ठति हि सुविनीतः सुतः ॥ ४२ ॥

**प्राज्यैर्दन्तांशुभिर्दुग्धै-र्गोरसै र्मधुभिस्ततः । गन्धोदकैश्च विनयै-श्चञ्चत्पञ्चामृतैरिव ॥ ४३ ॥**

**स्नपयित्वा पदाम्भोजे, पित्रोः सिंहासनस्थयोः । स ननाम महान्तो हि, जातु मुञ्चन्ति नौचितीम् ॥ ४४ ॥**

**'प्राज्यैः'** प्रभूतैः । पक्षे-प्रकृष्टमाज्यं घृतं तैः । **'दन्तांशुभिः'** दन्तकिरणैः । **'दुग्धैः'** पयोभिः । **'मधुभिः'** मधुरैः । पक्षेः-मधुभिः । **'गोरसैः'**-वचनरसैः । पक्षे-दधिभिः, । **'गन्धोदकैश्च'** सुरभिजलैश्च । **'चञ्चत्पञ्चामृतैः'** एतत्स्वरूपैः पञ्चामृतैः । घृत-दुग्ध-मधु-दधि-जलानि पञ्चामृतं कथ्यते । अत्र दुग्धस्थाने दन्तकिरणाः, मधुस्थाने मधुरवचनानि, विनयस्थाने गन्धोदकं इत्यादीनि द्रष्टव्यानि ॥ ४३ ॥ **'सिंहासनस्थयोः'** सिंहासनस्थितयोः । **'पित्रोः'** जननी-जनकयोः । **'पदाम्भोजे'** चरण-कमले । **'स्नपयित्वा'** उपर्युक्तैः पञ्चामृतैः । **'सः'** शालिभद्रः । **'ननाम'** नमति स्म । **'महान्तः'** महापुरुषाः । **'हिः'** निश्चये । **'जातु'** कदाचित् । **'औचितीं'** औचित्यम् । **'न मुञ्चन्ति'** न परिहरन्ति ॥ ४४ ॥

**भोगीन्द्रं विबुधेन्द्रं च, नृचक्रे चक्रिणं पिता । प्राह त्रिभुवनीसारं, सुतमुत्सङ्गसङ्गिनम् ॥ ४५ ॥**

**'भोगीन्द्रं'** भोगिलोकेषु नागलोकेषु मुख्यम् । **'विबुधेन्द्रं'** विबुधेषु देवेषु मुख्यम् । **'नृचक्रे'** नरसमूहे च । **'चक्रिणं'** चक्रवर्तितुल्यम् । **'त्रिभुवनीसारं'** अधोलोके भोगीन्द्रः, ऊर्ध्वलोके विबुधेन्द्रः, मर्त्यलोके च चक्री मुख्यः अयं शालिभद्रस्तु सर्वेषु मुख्यः इति त्रिभुवनीसारः तम् । त्रिजगतीसारमित्यपि पाठः । **'उत्सङ्गसङ्गिनं'** अङ्कोपविष्टम् । **'सुतं'** पुत्रम् । **'पिता'** गोभद्रः । **'प्राह'** उवाच ॥ ४५ ॥

**रुपश्रीवत्स ! हे वत्स ! च्छेकानुत्सेक ! वत्सल ! अनुत्सुकमहोत्साह !, विचारय वचो मम ॥ ४६ ॥**

**'रुपश्रीवत्स'** रुपेण श्रीवत्स विष्णुतुल्य ! श्रीवत्सो देवकीसूनुः इति हैम्याम् । **'छेकानुत्सेक'** छेकः विद्वानपि

अनुत्सेकः अभिमान रहितः तत्सम्बोधने । **'अनुत्सुकमहोत्साह'** अनुत्सुकोऽपि महान् उत्साहः उल्लासः यस्य तत्सम्बोधने । **'हे वत्सल वत्स'** हे वात्सल्यपूर्ण पुत्र ! । **मम वचः** वचनम् । **'विचारय'** विचिन्तय ॥ ४६ ॥

**सुधोज्ज्वलस्त्वया प्रांशुः, प्रासाद इव मेऽन्वयः । कल्याणकलशेनालञ्चक्रेऽभ्युदयशालिना ॥ ४७ ॥**

**'कल्याणकलशेन इव'** मङ्गलकुम्भेन इव, प्रासादपक्षे-सुवर्णकलशेन । **'अभ्युदयशालिना'** उत्तरोत्तरवर्धमानवैभवेन शालते शोभते इत्येवंशीलेन । **त्वया** । **'सुधोज्ज्वलः'** अमृतशुभ्रः । **'प्रांशुः'** उच्चः । **प्रासाद इव** । **'मे अन्वयः'** मम कुलम्। **'अलञ्चक्रे'** भूषितम् । यदुक्तम्-

"प्रदोषे दीपकश्चन्द्रः, प्रभाते दीपको रविः । त्रैलोक्यदीपको धर्मः, सुपुत्रः कुलदीपकः ॥" ॥ ४७ ॥

**त्रैलोक्यसुन्दरं नाम्ना, प्रासादं नृभवं निजम् । बाल्य-यौवन-वार्धक्य-त्रिभूमं श्रीनिबन्धनम् ॥ ४८ ॥**

**दान-शील तपोभाव-चतुःशालेन शालितम् । संयमस्वर्णकुम्भेन, साहाय्यात् तव योजये ॥ ४९ ॥ (युग्मम्)**

**'त्रैलोक्यसुन्दरं'** इति नाम्ना अभिधानेन । **'बाल्ययौवनवार्धक्यत्रिभूमं'** बाल्ययौवनवार्धक्यानि तिस्रः भूमयः यस्य तत् । **'श्रीनिबन्धनं'** चारित्रश्रीकारणम् । प्रासादपक्षे-सम्पत्तिहेतु । **'दानशीलतपोभावचतुःशालेन'** दानशीलतपोभावाः एव चतुःशालानि चतस्रः शालाः अपवरकाः यस्मिन् तेन । **'शालितं'** शोभितम् । **'निजं'** आत्मीयम् । **'नृभवं'** नरभवरूपम् । **'प्रासादं'** सौधम् । **तव साहाय्यात्** । **'संयमस्वर्णकुम्भेन'** चारित्रकनक-कलशेन । **'योजये'** प्रासादोपरि संयमस्वर्णकुम्भं स्थापयामीत्यर्थः ॥ ४८ ॥ ४९ ॥

**त्वदधिष्ठिततन्त्रस्य, ममावापविधायिनः । अभ्यस्तसमितेः स्वापा, भावारिविजिगीषुता ॥ ५० ॥**

**'त्वदधिष्ठिततन्त्रस्य'** त्वदधिष्ठितपरिवारकृत्यस्य । 'परिच्छदः परिबर्हस्तन्त्रोपकरणे अपि ।' इति हैम्याम् । नृपपक्षे-त्वदधिष्ठितस्वराष्ट्रचिन्तस्य । 'तन्त्रं स्वराष्ट्रचिन्ता स्यात्' इति हैम्याम् । **'आवापविधायिनः'** रागद्वेषादिशत्रून् प्रति चिन्तनकारिणः। पक्षे-अरिचिन्तनकारिणः । 'आवापस्त्वरिचिन्तनम्' इति हैम्याम् । **'अभ्यस्तसमितेः'** अभ्यस्ता समितयः (गुप्तयः) येन तस्य । पक्षे-अभ्यस्तयुद्धस्य । 'राटिः समितिसङ्गरौ' इति हैम्याम् । **'मम'** गोभद्रस्य । **'भावारि-विजिगीषुता'** आन्तर-शत्रु-विजयेच्छा । **'स्वापा'** सुखेन आप्यते स्वापा-सुलभा भविष्यति ॥ ५० ॥

**तदादत्स्व कुलाभारं, मम धीरधुरन्धर ! । त्वन्मात्रा ज्ञास्यते मात्रा, माऽत्राऽऽयासीत्तव श्रमः ॥ ५१ ॥**

**'तद्'** तस्मात् । **'धीरधुरन्धर'** हे धीरपुरुषेषु धुरन्धर अग्रेसर ! । **मम 'कुलाभारं'** कुटुम्बभारम् । **'आदत्स्व'** गृहाण। **'अत्र तव श्रमः मा आयासीत्'** मा आगच्छतु इति **'त्वन्मात्रा'** तव जनन्या, **'मात्रा'** लेशः, ज्ञास्यते । मम अनुपस्थितौ अपि अयं शालिभद्रः कुटुम्बभारोद्वहने समर्थोऽस्तीति भद्रा ज्ञास्यति इति गोभद्रकथनभावः ॥ ५१ ॥

**अस्याः कुटुम्बकं चिन्ता-नदीं मद्बुद्धिबेडया । उत्तीर्णमिति याचेऽह-मातरं तव मातरम् ॥ ५२ ॥**

**'अस्याः'** भद्रायाः । **कुटुम्बकम्** । **'मद्बुद्धिबेडया'** मम मतिनावा । **'चिन्तानदीं'** निर्वाह-विवाहादिचिन्तासरितम्। **'उत्तीर्णं'** पारगतम् । **इति अहं तव 'मातरं'** भद्राम् । **'आतरं'** नौभाटकं दीक्षानुमतिरुपमवक्रयम् । 'स्यात्तरपण्यमातरः' इति हैम्याम् । **'याचे'** प्रार्थये ॥ ५२ ॥

**शालिरालपत् ज्ञात-ब्रह्मणस्ते सरस्वती । सातार्णवे निधित्सुर्मे, चिन्तासंवर्तकं पितः ! ॥ ५३ ॥**

**'शालिः'** शालिभद्रः । **'आलपत्'** उवाच । **'पितः'** हे जनक ! । **'ज्ञातब्रह्मणः'** विदितात्मनः ज्ञातत्त्वस्य ।

पक्षे-ब्रह्मणः विधातुः । '**ते**' तव । '**सरस्वती**' वाणी । पक्षे-भारती नदी वा । '**मे**' मम । '**सातार्णवे**' सुखसागरे । '**चिन्तासंवर्तकं**' चिन्तावडवानलम् । '**निधित्सुः**' पातनेच्छावती । सर्वं जगद् भक्षयिष्यामि इति भाषमाणः वडवानलः ब्रह्मादेशात् सरस्वत्या समुद्रे क्षिप्तः इति पौराणिकाः ॥ ५३ ॥

**स्वसामर्थ्यादलं मातः ! तातः शैलेशतोलने । मयि क्षिपति पोते तु, कुलाचलभरं कथम् ॥ ५४ ॥**

'**मातः**' हे जननि ! । '**स्वसामर्थ्यात्**' निजशक्त्या । '**शैलेशतोलने**' मेरूत्पाटने । '**अलं**' समर्थः । '**तातः**' पिता गोभद्रः । '**मयि पोते**' बाले । पक्षे-प्रवहणे । '**कुलाचलभरं**' कुलस्य अचलं भारम् । पक्षे-'कुलाचलः' इतिनामा पर्वतः तस्य भारम् । **कथं क्षिपति** ? ॥ ५४ ॥

**पित्रोर्यत्र न शुश्रुषा, सदोदरपिशाचता । धर्मनाशं गृहावासं, पशुधर्ममुशन्ति तम् ॥ ५५ ॥**

'**यत्र**' गृहावासे । '**पित्रोः**' जननीजनकयोः । '**न शुश्रूषा**' न सेवा । '**सदा**' नित्यम् । '**उदरपिशाचता**' उदरभरणे राक्षसवृत्तिः । '**तं गृहावासं**' संसारवासम् । '**धर्मनाशं**' धर्मस्य नाशः यत्र । '**पशुधर्मं**' पशूनामेव धर्मः आहारमैथुनादिकः यत्र । '**उशन्ति**' वदन्ति ॥ ५५ ॥

**संसारजालमाच्छिद्य, स्वयं रोहितमत्स्यवत् । पितः ! प्रयासि हित्वाऽस्मान्, कान्दिशीकानिहैव किम् ॥ ५६ ॥**

'**पितः**' हे तात ! **स्वयं** '**रोहितमत्स्यवत्**' मत्स्यराजमत्स्यवत् । '**संसारजालं**' भवबन्धनम् । रोहितमत्स्यपक्षे-मत्स्यग्रहणजालम् । '**आच्छिद्य**' भित्वा । **अस्मान्** '**कान्दिशीकान्**' भयद्रुतान् । '**इहैव**' संसारे एव । '**हित्वा**' त्यक्त्वा । '**किं**' कथम् । '**प्रयासि**' गच्छसि ॥ ५६ ॥

**साध्यसिद्ध्यै पिताऽवादीद्, वादीवोत्तरमुत्तरम् । वितण्डाताण्डवं त्यक्त्वा, प्रामाणिकशिरोमणिः ॥ ५७ ॥**

'**वितण्डाताण्डवं**' व्यर्थप्रलापरूपं नाटकम् । वादिपक्षे-वितण्डावादनटनम् । '**त्यक्त्वा**' हित्वा । '**प्रामाणिकशिरोमणिः**' सज्जनमुख्यः । पक्षे-प्रमाणशास्त्रिमुख्यः । '**पिता**' संयमेच्छुः गोभद्रः । '**साध्यसिद्ध्यै**' संयमसाधनाय । पक्षे-स्वपक्ष-साध्यसिद्ध्यै । **वादी इव** । '**उत्तरं**' उत्तरन्ति भवसागरं अस्मात् तद् वचनम् । पक्षे-उत्तमम् । '**उत्तरं**' प्रतिवचः । '**अवादीत्**' जगाद् ॥ ५७ ॥

**जनकं स्वं कलावन्तं, बुधः सन्निहितः सुतः । त्रायते वत्स ! नो सूर-मपि मन्दस्तमोग्रहात् ॥ ५८ ॥**

'**वत्स**' हे पुत्र ! । '**तमोग्रहात्**' पापग्रहणात् । सूर्यचन्द्र-पक्षे-राहुग्रहणात् । 'तमो राहुः सैंहिकेयो' इति हैम्याम् । '**सन्निहितः**' समीपस्थः । '**बुधः**' पण्डितः । पक्षे-बुधग्रहः । '**सुतः**' पुत्रः । '**स्वं जनकं**' आत्मीयं पितरम् । '**कलावन्तं**' कलायुक्तम् पक्षे-चन्द्रम् । '**नो त्रायते**' न रक्षति । '**मन्दः**' अलसः पुत्रः । पक्षे शनिः । 'मन्दः क्रोडो नील-वासाः' इति हैम्याम् । '**सूरमपि**' शूरवीरमपि जनकम् । पक्षे-सूर्यमपि । सूर्यः खलु शनिपिता । न त्रायते ॥ ५८ ॥

**प्रदीपनेऽत्र संसारे, पतन्त्येके हया इव । त्रस्यन्ति पुरुषव्याघ्रास्तस्मात्तेनाऽयमुद्यमः ॥ ५९ ॥**

'**प्रदीपने**' अग्निरूपे दावानले । '**अत्र संसारे**' इह भवे । '**एके**' केचन जनाः । '**हयाः इव**' अश्वाः इव पतन्ति । '**पुरुषव्याघ्राः**' श्रेष्ठपुरुषाः व्याघ्रतुल्याः पुरुषाः । '**त्रस्यन्ति**' त्रासं प्राप्नुवन्ति । त्रस्यन्ति एव अनलदर्शनात् व्याघ्राः । '**तेन**' तस्मात् । '**अयं**' दीक्षाविषयकः । '**उद्यमः**' प्रयासोऽस्ति ॥ ५९ ॥

**शृङ्गार-परभागाय, तवैवायमुपक्रमः । पितृणां स्वर्गभोगाङ्गैर्महीयन्ते यतः सुताः ॥ ६० ॥**

**तव एव**। **'श्रृङ्गार-परभागाय'** श्रृङ्गारगुणोत्कर्षाय। **'अयं उपक्रमः'** आरम्भः। **'यतः'** यस्मात्। **'सुताः'** पुत्राः। **'पितृणां'** दिवंगतपितृणाम्। **'स्वर्गभोगाङ्गैः'** दिव्यभोगांशैः। **'महीयन्ते'** गौरवं प्राप्नुवन्ति। भाविकाले गोभद्रदेव-प्रेषितदिव्यर्ध्दिभोगात् शालिभद्रः गौरवं गमिष्यति तेनेदं कवि-कथनम् ॥ ६० ॥

**भद्रे त्वमपि सद्बुद्धिर्मनसोऽपि परा मम। प्रीणीयाः सुतमात्मानं, विशुद्धाध्यवसायिनी ॥ ६१ ॥**

**'भद्रे !'** हे प्रिये ! **त्वमपि**। **'सद्बुद्धिः'** शोभना बुद्धिः यस्याः सा। **'मनसोऽपि'** चित्तादपि। **'परा'** परमा निर्मला। **'विशुद्धाध्यवसायिनी'** पवित्रविचारणामयी। **'आत्मानं'** स्वम्। **'सुतं'** पुत्रं च। आत्मीयमित्यपि पाठान्तरम्। **'प्रीणीयाः'** सन्तोषं दद्याः ॥ ६१ ॥

**द्वात्रिंशता स्नुषाभिस्त्वं, ताराभिरिव रेवती। धिष्ण्यं श्रिता सुते भूयाः, कार्याणां सिद्धियोगकृत् ॥ ६२ ॥**

**'ताराभिः'** तारकैः परिवृत्ता। **'रेवतीव'** रेवतीनक्षत्रवत्। **द्वात्रिंशता 'स्नुषाभिः'** पुत्रवधूभिः परिवृता। **'धिष्ण्यं'** भवनम्। 'धिष्ण्यमावसथः स्थानं' इति हैम्याम्। रेवतीपक्षे-शुक्रग्रहम्। 'दैत्यगुरुर्धिष्ण्यः' इति हैम्याम्। **'श्रिता'** अधिष्ठिता। **'सुते'** पुत्रविषये। **'कार्याणां'** सांसारिक-धार्मिक-कृत्यानाम्। **'सिद्धियोगकृत्'** सफलताकारिणी। **'भूयाः'** भव। रेवतीनक्षत्रशुक्रयोगे सिद्धियोगो भवतीति ज्योतिर्विदः ॥ ६२ ॥

**एवं विनीय निर्णीय, शालिमालिङ्ग्य साञ्जसम्। अभ्यषिञ्चदिवामन्दा-नन्दनीरैर्निजे पदे ॥ ६३ ॥**

**'एवं'** उपर्युक्तवचनैः। **'विनीय'** विज्ञापय्य। **'निर्णीय'** दीक्षार्थं निश्चित्य। **'साञ्जसं'** प्राञ्जलं सरलम्। **'शालिं'**

शालिभद्रम्। **'आलिङ्ग्य'** परिरभ्य । **'अमन्दानन्दनीरैः'** भूरिहर्षाश्रुजलैः । **'निजे पदे'** स्वस्थाने । **'अभ्यषिञ्चदिव'** सिषेच इव ॥ ६३ ॥

**गोभद्रस्य दीक्षा स्वर्गगमनं च–**

**अष्टाह्निकामथाह्नाय, विधाय जिनवेश्मसु । पात्रदानैर्दयादानै-राराधितविधिक्रमः ॥ ६४ ॥**

**कृतनिष्क्रमणोत्साहः, सार्थवाहः स्वसूनुना । श्रीवीरप्रभुहस्तेन, व्रतमादत्त सत्तमः ॥ ६५ ॥**

**अथ 'अह्नाय'** क्षिप्रम् । **'जिनवेश्मसु'** जिनमन्दिरेषु । **'अष्टाह्निकां'** अष्टाह्निकमहोत्सवम् । **'विधाय'** कृत्वा । **'पात्रदानैः'** सुपात्रदानैः । **दयादानैः** अनुकम्पादानैः । **'आराधितविधिक्रमः'** आराधितः विधिक्रमः विधिपरम्परा येन सः ॥ ६४ ॥ **'स्वसूनुना'** शालिभद्रेण । **'कृतनिष्क्रमणोत्साहः'** कृतः निष्क्रमणोत्साहः संयम-महोत्सवः यस्य सः । **'सत्तमः'** सतां सत्सु वा उत्तमः सज्जनशिरोमणिः इत्यर्थः । **'सार्थवाहः'** गोभद्रः । **'श्रीवीरप्रभुहस्तेन'** श्रीमहावीरस्वामिकरेण । **'व्रतं'** दीक्षाम् । **'आदत्त'** जग्राह ॥ ६५ ॥

**प्राप्य व्याजं विना मूलद्रव्यं पञ्चमहाव्रतीम् । यापयन् शकटं देहमक्षोपाङ्गस्य मात्रया ॥ ६६ ॥**

**नयन् नवनवान् देशानायव्ययविवेचकः । निश्चय-व्यवहाराख्यवृषपोषविशेषवित् ॥ ६७ ॥**

**बोधयित्वेन्द्रियग्रामं, युक्त्या पञ्चकुलं किल । सुप्तानेव विमुच्याऽथ, कषायप्रतिसारकान् ॥ ६८ ॥**

**द्विचत्वारिंशतं भिक्षादोषान् पथिकसन्निभान् । त्याजं त्याजं चरंश्चर्यां, देशकालविभागतः ॥ ६९ ॥**

**उग्रग्रासैषणा दोषहिण्डिपञ्चकुलग्रहे । अप्राप्तोऽथागञ्जितश्च, चौरैरिव परीषहैः ॥ ७० ॥**

**मषीभेदमकुर्वाणः, सार्थवाहमहामुनिः । प्रभूतं सारभूतं स, पुण्यद्रव्यमुपार्जयत् ॥ ७१ ॥**

'**सार्थवाहमहामुनिः**' सार्थवाहसमानः गोभद्रमुनिपुङ्गवः । **सारभूतम्** । '**प्रभूतं**' पुष्कलम् । '**पुण्यद्रव्यं**' सुकृतधनम् । सार्थवाह पक्षे-पवित्रधनम्, न्यायेनोपार्जितत्वात् । '**उपार्जयत्**' लब्धवान् । कथम्भूतः सः सार्थवाहमहामुनिः ? '**व्याजं विना**' कपटं विना । सार्थवाहपक्षे-कलान्तरं विना । '**मूलद्रव्यं**' मूलधनम् । '**पञ्चमहाव्रतीं**' पञ्चमहाव्रतरूपम् । '**प्राप्य**' लब्ध्वा । '**अक्षोपाङ्गस्य**' इन्द्रियोपाङ्गस्य । पक्षे रथचक्रमध्यभागरूपस्य उपाङ्गस्य । '**मात्रया**' मात्रानुसारेण '**शकटं**' शकटरूपं । पक्षे-शकटम् । '**देहं**' शरीरम् । '**यापयन्**' निर्वाहयन् ॥ ६६ ॥ '**आयव्ययविवेचकः**' लाभालाभविवेकी । '**नवनवान्**' नवान् नवान् । '**देशान्**' विषयान् '**नयन्**' परिभ्रमन् । **निश्चयव्यवहाराख्यवृषपोषविशेषवित्** निश्चय-व्यवहाराख्यौ यौ वृषौ वृषभौ तयोः पोषे विशेषवित् विशिष्टविज्ञः ॥ ६७ ॥ '**पञ्चकुलं**' पञ्च कुलानि यत्र । '**इन्द्रियग्रामं**' इन्द्रियसमूहम् । पक्षे-ग्रामम् । '**बोधयित्वा**' प्रतिबोध्य । पक्षे-मानयित्वा । अथ '**कषायप्रतिसारकान्**' कषायमन्त्रभेदकान् । '**सुप्तानेव**' निद्राणानेव । '**विमुच्य**' त्यक्त्वा ॥ ६८ ॥ '**पथिकसन्निभान्**' प्रवासितुल्यान् । '**द्विचत्वारिंशतं भिक्षादोषान्**' उत्पादादीन् गोचरीदोषान् । पक्षे-भिक्षया-याचनया लघुतादीन् दोषान् । '**त्याजं त्याजं**' त्यक्त्वा त्यक्त्वा । '**देशकालविभागतः**' क्षेत्रसमयानुसारेण । '**चर्यां**' क्रियाम् । पक्षे-व्यापार-प्रवृत्तिम् । '**चरन्**' कुर्वन् ॥ ६९ ॥ '**उग्रग्रासैषणादोषहिण्डिपञ्चकुलग्रहे**' उग्राः तीव्राः ग्रासैषणादोषाः भोजनसमयजन्याः पञ्च अङ्गारादिदोषाः तेषु, हिण्डिषु विहारेषु, पञ्चकुलानां इन्द्रियाणां ग्रहे ग्रहणे वशे । '**अप्राप्तः**' अगृहीतः अमूढत्वात् । पक्षे-उग्रा या ग्रासैषणा ग्रासस्य भोजनकवलस्य एषणा याचना तस्याः दोषे, '**हिण्डिषु**' भाषायां 'हुंडी' तासु, '**पञ्चकुलस्य**' ग्राममध्ये निर्णायकाः पञ्चजनाः

'पञ्चकुलं' कथ्यते, (भाषायां 'पञ्चायत') तस्य ग्रहे वशे । **'अप्राप्तः'** अवञ्चितः चतुरत्वात् । **'चौरैरिव'** स्तेनैरिव । **'परीषहैः'** क्षुदादिपरीषहैः । **'अगञ्जितः'** अपराजितः। **'मषीभेदं'** चौर्यं असत्यम् । पक्षे–दानचौर्यं असत्यवचनं असत्यलेखनम् । मषीभेदेन कूटलेखम् । दानादिचौर्यमसत्यं च मषीभेदस्तम् । **अकुर्वाणः** ॥ ७० । ७१ ॥

**मन्त्रस्येवोत्तरां सेवां, विधायानशनक्रियाम् । स्ववर्गे सपदि सौधर्मेऽसौ धर्मेण सुरोऽजनि ॥ ७२ ॥**

**'मन्त्रस्य'** मन्त्रजापस्य । **'उत्तरां'** पाश्चात्याम् । **'सेवामिव'** उपासनामिव । **अनशनक्रियाम्** । **'विधाय'** कृत्वा । **'असौ'** सार्थवाहमुनिः । **'धर्मेण'** चारित्रधर्मेण । **'सौधर्मे स्वर्गे'** प्रथमे वैमानिकदेवलोके । **'सुरः'** देवः । **'अजनि'** जातः । यदुक्तम्–'जेण कयं सामन्नं छम्मासे झाणसंजमरएण । तं मुनिमुदारकित्तिं गोभद्दरिसिं नमस्सामि' ॥ ७२ ॥

**सचिन्तमग्रजं दानं, वीक्ष्य शालेः सुखार्पणे । तपसा तत्पिता प्रैषि, किल देवर्द्धिहूतये ॥ ७३ ॥**

**'शालेः'** शालिभद्रस्य । **'सुखार्पणे'** सुखसमर्पणे । **'अग्रजं'** अग्रजभ्रातरम् । **'दानं'** दानधर्मम् । **'सचिन्तं'** चिन्ताप्रपन्नम्। **'वीक्ष्य'** दृष्ट्वा । **'तपसा'** तपश्चर्यया । 'तपसा' इति कर्तृभूतं पदम् । **'तत्पिता'** गोभद्रः । **'किलः'** निश्चये । **'देवर्द्धिहूतये'** सुरसमृद्धेः आह्वानाय । **'प्रैषि'** प्रहितः । दानादिचतुर्भ्रातृषु 'शालिभद्राय' किं देयम् ? इति चिन्तामग्नं दानभ्रातरं विलोक्य अनुजेन तपसा भ्रात्रा किल गोभद्रः देवर्द्धिप्रेषणाय स्वर्गे प्रहितः इति भावः ॥ ७३ ॥

**वृत्ताक्षराभिरामश्री, रेजे स्वःश्रीनिमन्त्रणे । विशेषोल्लेखिहल्लेखः, स लेखः किल लेखवत् ॥ ७४ ॥**

**'स्वःश्रीनिमन्त्रणे'** स्वर्गलक्ष्मीनिमन्त्रणे । **'सः'** गोभद्रः । **'लेखः'** देवः । 'दैवतनाकिलेखाः' इति हैम्याम् । **किलः** निश्चये । **'लेखवत्'** आमंत्रण–पत्रस्य लेखवत् । **'रेजे'** राजते स्म । कथम्भूतः सः देवः (लेखः) ? **'वृत्ताक्षराभिरामश्रीः'**

वृत्तैः आचारैः अक्षरा अविनश्वरा स्वायुःपर्यन्तस्थायिनी अभिरामा मनोहरा श्रीः सम्पत्तिः यस्य सः । लेखपक्षे-वृत्तैः वर्तुलैः अक्षरैः वर्णैः अभिरामा मनोहरा श्रीः शोभा यस्य सः । **'विशेषोल्लेखिहृल्लेखः'** विशेषेण उल्लेखनशीलः उल्लेखः औत्सुक्यं यस्य सः । हृल्लेखोत्कलिके इति हैम्याम् । पक्षे-विशेषेण उल्लेखी उल्लिखितः उल्लेखः हृदयोर्मिः यस्मिन् सः ॥ ७४ ॥

**चित्रं गोभद्रगीर्वाणः, शाणोत्तीर्णविशुद्धधीः । पस्पर्श ज्ञानतः पुत्रं, पुण्याढ्यपरमावधिम् ॥ ७५ ॥**

**'गोभद्रगीर्वाणः'** गोभद्रदेवः । पक्षे-बाणः । बवयोरभेदः । **'शाणोत्तीर्णविशुद्धधीः'** निकषपरीक्षितशुद्धबुद्धिः । बाणपक्षे-शाणेन उत्तीर्णत्वात् विशुद्धा धीः कर्म यस्य सः । **'पुण्याढ्यपरमावधिं'** पुण्याढ्येषु पुण्यशालिषु परमावधिं परममर्यादाभूतं प्रकृष्टपुण्यशालिनमित्यर्थः । **'पुत्रं'** शालिभद्रम् । **'ज्ञानतः'** अवधिज्ञानेन । **'पस्पर्श'** स्पृष्टवान् । **'चित्रं'** ज्ञानतः स्पृष्टवानिति आश्चर्यम् । लोहमयो बाणः शरीरं स्पृष्ट्वा विध्यति । अयं गोभद्रगीर्वाणः ज्ञानतः एव शालिभद्रं पस्पर्श इति आश्चर्यम् ॥ ७४ ॥

**दध्यौ सोऽथ पितुः प्रायो, विन्ध्यस्येवाङ्गजा गजाः । बलादुन्मूलयन्त्येव, सुखसारद्रुमावलीम् ॥ ७६ ॥**

अथ **'सः सुरः'** गोभद्रदेवः । **'दध्यौ'** चिन्तयामास । **'प्रायः'** बहुधा । **'विन्ध्यस्येव'** विन्ध्याचलस्य इव । **'पितुः'** जनकस्य । **'अङ्गजाः'** पुत्राः । **'गजाः'** हस्तिनः । **'सुखसारद्रुमावलीं'** सुख-सार एव द्रुमावली वृक्षश्रेणिः ताम् । **'बलात्'** हठात् । **'उन्मूलयन्ति एव'** मर्दयन्ति एव । यथा विन्ध्यगिरिजाताः गजाः विन्ध्यपर्वतस्थितामेव वृक्षावलीं उन्मूलयन्ति तथा केचन पुत्राः पितुः सम्पत्तिमेव नाशयन्ति-इति गोभद्रदेवचिन्तनम् ॥ ७६ ॥

**मुनेरप्यार्द्रकस्येह, दोषज्ञस्यापि दुस्त्यजम् । स लावण्यरसस्नेह-सन्धानं विदधे सुतः ॥ ७७ ॥**

**'इह'** संसारे। **'दोषज्ञस्याऽपि'** दोषवेदिनोऽपि। सन्धानपक्षे वैद्यस्याऽपि। **'मुनेरपि'** साधोरपि। **'आर्द्रकस्य'** आर्द्रकनामा मुनिः तस्य। पक्षे श्रृङ्गबेरस्य। **'दुस्त्यजं'** दुःखेन त्यज्यते इत्येवंशीलम्। **'लावण्यरसस्नेह सन्धानं'** लावण्यरसप्रेमसंयोगम्। पक्षे–लावण्यरसः लवणस्य रसः स्नेहः तैलं ताभ्यां सहितं सन्धानम्। 'अथाणुं' इति भाषायाम्। **'सः'** सुतः' शालिभद्रः'। **'विदधे'** कृतवान्। दुस्त्यजं स्नेह सन्धानं शालिभद्रेण विदधे येनाऽहं तं स्वर्गतोऽपि स्मरामीति भावः ॥ ७७ ॥

**गोत्रोद्धारवराहात्तु, महार्घ्यं मौक्तिकं किल। मया सुतनयाल्लेभेऽमुष्मादामुष्मिकं फलम् ॥ ७८ ॥**

**'गोत्रोद्धारवराहात्'** गोत्रोद्धारे कुलोद्धारकरणे वराहात् वरं अहः दिनं वराहं यस्मात्। पक्षे–गोत्रा पृथ्वी, तस्याः उद्धारे वराहावतारात् विष्णोः। पुराणमतेषु दशावतारेषु तृतीयो वराहावतारः। **अमुष्मात् 'सुतनयात्'** सुपुत्रात्। पक्षे–सुतः उत्पन्नः नयः न्यायः यस्मात्। **'महार्घ्यं'** महामूल्यम्। **'मौक्तिकं'** मुक्तिप्रदं मोक्षप्रदम। पक्षे मुक्ताफलम्। **'आमुष्मिकं'** पारलौकिकम्। **'फलं'** सद्गतिरूपम्। **'मया'** गोभद्रेण। **'लेभे'** प्राप्तम्। यदुक्तम्–स्वगर्भशुक्तिनिर्भिन्नं, सुवृत्तं सुतमौक्तिकम्। वंशश्रीतिलकीभूतं, मन्दभाग्यस्य दुर्लभम् ॥ १ ॥ ७८ ॥

**मया च रणशूरेण, शरणं जिनमीयुषा। तदैककः सुतोऽमोचि, गृहद्वन्द्वस्य सङ्कटे ॥ ७९ ॥**

**'जिनं'** अर्हन्तं वीरम्। **'शरणं'** आश्रयम्। **'ईयुषा'** गच्छता। **'रणशूरेण'** कर्मभिः सह युद्धवीरेण। **'मया'** संयमेच्छुना। **'तदा'** प्रव्रजनकाले। **'गृहद्वन्द्वस्य'** गृहस्थाश्रम–चिन्तायाः। **'संङ्कटे'** आपत्तौ। **'एककः'** एकाकी। **'सुतः'** पुत्रः। **'अमोचि'** मुक्तः ॥ ७९ ॥

**प्राणप्रियं सुखैर्दिव्यैः, पुत्रं नामन्त्रये यदि। कोऽयं सुपर्वतागर्वस्तदा कुक्षिम्भरेर्मम ॥ ८० ॥**

यदि '**प्राणप्रियं**' प्राणेभ्योऽपि प्रियं पुत्रम् । '**दिव्यैः सुखैः**' स्वर्गभोगैः । '**न आमन्त्रये**' न सहभागिनं करोमि। तद्वा '**कुक्षिम्भरेः**' उदरम्भरेः स्वार्थिनः । **मम कोऽयं** '**सुपर्वतागर्वः ?**' देवत्वाभिमानः ? ॥ ८० ॥

**सुत्तचित्तस्य चित्रस्य, पटीवाऽतिपटीयसी । भद्रा सद्‌गुणरङ्गाढ्या, सदा सन्निहिताऽस्ति चेत् ॥ ८१ ॥**

**तथापि चिन्तादुःखाग्नेः, सन्तापः सम्भवी पुनः । निजालोकसुधावृष्ट्या, तत्तं निर्वापये रयात् ॥ ८२ ॥**

'**सुतचित्तस्य**' पुत्रचेतसः । '**चित्रस्य**' आलेख्यस्य । '**पटी इव**' पट्टिका इव । '**अतिपटीयसी**' अतिचतुरा । '**सद्‌गुणरङ्गाढ्या**' सद्‌गुणानां रङ्गैः रागैः आढ्या पूर्णा । चित्रपटीपक्षे शोभनगुणपूर्णैः रङ्गैराढ्या । '**चेत्**' यद्यपि । '**भद्रा**' शालिमाता । '**सदा सन्निहिता**' नित्यं समीपवर्तिनी । **अस्ति** ॥ ८१ ॥ **तथापि** '**चिन्तादुःखाग्नेः**' चिन्तायाः दुःखं तदेव अग्निः तस्मात् । '**सन्तापः**' मनस्तापः । '**सम्भवी**' उत्पिसुः । '**तत्**' तस्मात् । '**तं**' सन्तापम् । '**निजालोकसुधावृष्ट्या**' स्वदर्शनामृत-वर्षणेन । '**निर्वापये**' शान्ति नयामि ॥ ८२ ॥

**नवनवतिं पेटिकाः प्रेषयन् गोभद्रदेवः ।**

**विचार्येत्यवधीर्य स्वः श्रियं वन्ध्यामिव स्त्रियम् । युक्तं सन्तानशृङ्गारं, नन्दनं स ययौ सुरः ॥ ८३ ॥**

'**इति**' उक्तप्रकारेण । '**युक्तं**' समुचितम् । '**विचार्य**' चिन्तयित्वा । '**वन्ध्यां**' पुत्रौत्पत्तौ अयोग्याम् । '**स्त्रियमिव**' नारीमिव । '**स्वःश्रियं**' स्वर्गलक्ष्मीम् । '**अवधार्य**' अवगणय्य । '**सन्तानशृङ्गारं**' सन्तानेषु शृङ्गारस्वरूपम् । नन्दनवन-पक्षे सन्तानाः कल्पवृक्षाः तैः शृङ्गारो यत्र । '**नन्दनं**' पुत्रम् । पक्षे नन्दनवनं प्रति । '**सः सुरः**' गोभद्रदेवः । '**ययौ**' गतः ॥ ८३ ॥

**सर्वाङ्गीणाः किरीटाद्याः, दिव्यालङ्कारमण्डलीः । श्रीशालेर्भाग्यहेलेः किं, तरुणाः किरणावलीः ॥ ८४ ॥**

**देवदूष्याण्यदूष्याणि, व्यूतानीन्दोः करैरिव । हरिचन्दनचर्चाश्च, मन्दारकुसुमस्रजः ॥ ८५ ॥**

**सङ्ख्यया च त्रयस्त्रिंश-दलङ्काराँश्चतुर्विधान् । त्रायस्त्रिंशैर्भृशं प्रीतैस्त्रिदशैः प्रहितानिव ॥ ८६ ॥**

**स प्रियाय तनूजाय, सप्रियाय ददौ मुदा । सांयात्रिकः समानीत-हृद्यश्रीरिव हृद्यकम् ॥ ८७ ॥**

'**सप्रियाय**' सभार्याय । '**प्रियाय**' इष्टाय । '**तनूजाय**' पुत्रार्थम् । '**समानीतहृद्यश्रीः**' समानीता हृद्या सुन्दरा श्री लक्ष्मीः येन सः । '**सांयात्रिकः इव**' पोतवणिगिव । '**स सुरः**' गोभद्रदेवः । '**मुदा**' प्रीत्या । '**हृद्यकं**' मनोहरं दिव्यं वस्तु । '**ददौ**' अर्पितवान् ॥ किं ददौ तद्दर्शयति– '**सर्वाङ्गीणाः**' सर्वाङ्गसम्बन्धिनीः । '**किरीटाद्याः**' मुकुटाद्याः । '**दिव्यालङ्कारमण्डलीः**' दिव्यभूषणश्रेणीः । '**शालेः**' शालिभद्रस्य '**भाग्यहेलेः**' भाग्यमेव हेलिः सूर्यः तस्य । किं '**तरुणाः**' मध्याह्नसम्बन्धिनीः । '**किरणावलीः**' अंशुश्रेणीः ॥ '**इन्दोः**' चन्द्रस्य । '**करैः**' किरणैः । '**व्यूतानीव**' ग्रथितानि इव । '**अदूष्याणि**' निर्दोषाणि । '**देवदूष्याणि**' देवसम्बन्धिवस्त्राणि । '**हरिचन्दनचर्चाः**' गोशीर्षचन्दनलेपाः । '**मन्दारकुसुमस्त्रजः**' कल्पवृक्षपुष्पमालाः । '**भृशं**' अत्यन्तम् । '**प्रीतैः**' तुष्टैः । '**त्रायस्त्रिंशैः**' इन्द्रगुरुस्थानीयैः त्रयस्त्रिंशद्–भेदैः । '**त्रिदशैः**' देवैः । '**प्रहितानिव**' प्रेषितानिव । चः समुच्चये । **सङ्ख्यया च त्रयस्त्रिंशद्** । '**चतुर्विधान्**' हेमरजतादिभेदान् । '**अलङ्कारान्**' भूषणानि । ददाविति सण्टङ्कः ॥ ८४ ॥ ८५ ॥ ८६ ॥ ८७ ॥

**यावज्जीवति तन्माता, तावत्कोऽपि सुतार्थकृत् । दयितैव प्रिया तस्य, परमार्थान्न नन्दनः ॥ ८८ ॥**

**यावत् तन्माता**–पुत्रजननी **जीवति तावत् कोऽपि**–कश्चिदेव पिता **सुतार्थकृत्**–पुत्रप्रयोजनकारी भवति यतः **तस्य**–सामान्यपितुः '**दयितैव**' पत्नी एव । '**परमार्थतः**' वस्तुतः । '**प्रिया**' इष्टा । '**न नन्दनः**' न तु पुत्रः ॥ ८८ ॥

**विवाह्य बाह्यलोकेषु, सुतं शेते सुखं पिता । लोकलज्जैव सज्जैतच्चित्ते स्नेहो न देहजे ॥ ८९ ॥**

'**बाह्यलोकेषु**' सामान्यजनेषु । '**सुतं**' पुत्रम् । '**विवाह्य**' उद्वाह्य । '**पिता**' जनकः । '**सुखं**' सुखपूर्वकम् । '**शेते**' विश्रान्तिं करोति निश्चिन्तो भवतीत्यर्थः । '**एतच्चित्ते**' सामान्य-पितृचित्ते । '**लोकलज्जा**' लोकेभ्यः लज्जा, यदि अहं पुत्रं न विवाह-सम्बन्धेन योक्ष्ये तर्हि लोकः न जाने किं कथयिष्यति इत्येवम्भूता लज्जा । **एव**कारः अवधारणे । '**सज्जा**' मनसि स्थिता । '**न देहजे**' न पुत्रे । '**स्नेहः**' प्रीतिरस्ति ॥ ८९ ॥

**तातः प्रीतिपरः कोऽपि, द्रव्यभागार्पणावधि । पृथग्भूतं यथा प्राहुः, तद्वक्तुमपि नेष्यते ॥ ९० ॥**

'**कोऽपि**' कश्चित् । '**तातः**' जनकः । '**द्रव्यभागार्पणावधि**' सुतेषु धनविभाजनं यावत् । '**प्रीतिपरः**' स्नेहसहितः भवति '**पृथग्भूतं**' स्वतः वियुक्तम् पुत्रम् । '**यथा**' येन प्रकारेण । '**प्राहुः**' वदन्ति गालिप्रदानादिना । '**तद्**' पितृभाषणम्। '**वक्तुमपि**' भाषितुमपि । '**नेष्यते**' न शक्यते इत्यर्थः ॥ ९० ॥

**विरलः सरलः कोऽपि, सुकृती निकृतिं विना । यावज्जीवं सुतार्थानां, धर्मवत्पोषकः पिता ॥ ९१ ॥**

'**विरलः**' पेलवः । '**सरलः**' प्राञ्जलः । '**सुकृती**' पुण्यवान् । **कोऽपि पिता**-जनकः भवति । यः '**निकृतिं विना**' कपटं स्वकीयस्वार्थम् विना । '**यावज्जीवं**' आजीवनम् । '**सुतार्थानां**' पुत्रप्रयोजनानाम् । **धर्मवत् पोषकः** स्यात् ॥ ९१ ॥

**सुद्रव्यस्य सुतस्यार्थे, नोद्वहत्यपरां प्रियाम् । अनीतिमिव कोऽप्येकः, कन्दर्पाकम्पितः पिता ॥ ९२ ॥**

'**सुद्रव्यस्य इव**' न्यायोपार्जितधनस्य इव । '**सुतस्य अर्थे**' पुत्रस्य कृते । **अनीतिमिव** । '**अपरां**' अन्याम् । '**प्रियां**' पत्नीम् । '**कन्दर्पाकम्पितः**' कन्दर्पेण कामेन अकम्पितः अजितः । **कोऽपि एकः पिता** । '**न उद्वहति**' न परिणयति ॥ ९२ ॥

**सूनवेऽसूनवेक्षेत, तृणवज्जनकः परः । तदीय-विरहे पृथ्वी-नाथो दशरथो यथा ॥ ९३ ॥**

**'परः'** अन्यः । **'जनकः'** पिता । **'सूनवे'** पुत्रहेतोः । **तृणवत्** । **'असून्'** स्वप्राणान् । **'अवेक्षेत'** वीक्षेत त्यजेदित्यर्थः । **यथा 'तदीय-विरहे'** राम-वियोगे । **'पृथ्वीनाथः'** राजा । **दशरथः** प्राणान् तत्याजः । इदं लौकिकमतमपेक्ष्योक्तं प्रतिभाति । अन्यथा रामवनवाससमये दशरथेन दीक्षा गृहीता, न प्राणाः त्यक्ताः ॥ ९३ ॥

**श्रीरामं सुगुणारामं, देवभूयमितस्तु सः । विधुरेऽपि न सस्मार, स्मरापस्मारघस्मरः ॥ ९४ ॥**

**'देवभूयं'** देवत्वम् । **'इतः'** प्राप्तः । **'स्मरापस्मारघस्मरः'** स्मरस्य-कामस्य अपस्मारः-धातुवैषम्यजः आवेशः तेन घस्मरः भक्षकः भोगीत्यर्थः । **'सः'** दशरथजीवः । **'सुगुणारामं'** सुगणोद्यानम् । **श्रीरामम्** । **'विधुरेऽपि'** सीताविरहाद् व्याकुलेऽपि तस्मिन् रामे । **'न सस्मार'** न स्मृतवान् ॥ ९४ ॥

**कश्चिद् घुणाक्षरन्यायात् सुतं स्मरति कर्हिचित् । तद् याचते समृद्धोऽपि, बुभुक्षा-वप्र-विप्रवत् ॥ ९५ ॥**

**'घुणाक्षरन्यायात्'** अनाभोगात् काष्ठकीटकृताक्षरवत् । **'कर्हिचित्'** कदाचित् । **'कश्चित्'** पिता । **'सुतं'** पुत्रम् । **स्मरति । तत् समृद्धोऽपि**-धनादिना पूर्णोऽपि । **'सः'** पिता । **'याचते'** पुत्रात् याचनां करोति । कः इव ? **'बुभुक्षावप्रविप्रवत्'** बुभुक्षायाः वप्रः क्षेत्रं स्थानं विप्रः ब्राह्मणः तद्वत् । अथ कदाचित् कोऽपि जनकः पुत्रं स्मरति, तदपि बुभुक्षितब्राह्मणयाचनातुल्यमेवावसेयमित्यर्थः ॥ ९५ ॥

**देवोऽस्य सविता शस्यश्रीहेतुः कान्तिमान् पुनः । चिन्तासन्तापहन्ताऽभूत् मनोवाञ्छितवृष्टिभिः ॥ ९६ ॥**

**'अस्य'** शालिभद्रस्य । **'कान्तिमान्'** द्युतिमान् । सूर्यपक्षे-किरणवान् । **'सविता'** पिता । पक्षे-सूर्यः । **देवः** अमरः। पक्षे मेघः । **'शस्यश्रीहेतुः'** मङ्गललक्ष्मीकारण् । सूर्य-मेघपक्षे-धान्यसम्पत्तिहेतुः । **'मनोवाञ्छितवृष्टिभिः'** मनइष्टभूषणादिदानैः। पक्षे मनोऽभीष्टवर्षणैः । **'चिन्ता-सन्तापहन्ता'** चिन्तायाः सन्तापः तस्य हन्ता निवारकः । **अभूत्** । यथा सूर्यः सस्यहेतुः कान्तिमाँश्च भवति, यथा च मेघः सस्यहेतुः मनोवाञ्छितवृष्टिभिश्च सन्तापहर्ता भवति तथाऽयमपि देवः इत्यर्थः ॥ ९६ ॥

**श्रीशालेर्मानतुङ्गस्य, भोगलक्ष्मीं नृजन्मनाम् । हृदयास्पर्शिनीं मत्वा, जनकः किल कौतुकी ॥ ९७ ॥**

**आनिनाय सुतायात्र, समानां त्रिदशश्रियम् । प्रौढां चारित्रमन्त्रेण, श्रीणामाकृष्टिविद्यया ॥ ९८ ॥**

**'मानतुङ्गस्य'** मानेन गौरवेण तुङ्गस्य उच्चस्य। **'श्रीशालेः'** श्राशालिभद्रस्य। **'नृजन्मनां'** मनुष्याणाम्। **भोगलक्ष्मीम्**। **'हृदयास्पर्शिनीं'** स्पर्शनाऽयोग्यामशुचित्वात् । **'मत्वा'** ज्ञात्वा । **'कौतुकी'** कुतुहलप्रियः । **'जनकः'** गोभद्रदेवः । **किलः** निश्चये ॥ ९७ ॥

**'सुताय'** पुत्राय । **'समानां'** तुल्यामनुरूपाम् । **'श्रीणां'** लक्ष्मीणाम् । **'आकृष्टिविद्यया'** आकर्षणविद्यया, **'चारित्रमन्त्रेण'** पर्वगृहीतं चारित्रमेव मन्त्रस्तेन । चकारोऽत्रावसेयः । **'प्रौढां'** महतीम् । **'त्रिदशश्रियं'** देवलक्ष्मीम् । **'अत्र'** शालिमन्दिरे। **'आनिनाय'** आनयति स्म ॥ ९८ ॥

**शालिभद्रस्य अद्भुतं वैभवम्–**

**तद्दत्तदिव्यभोगाङ्गैः, शालिः कन्दर्पदर्पहृत् । प्रत्यक्ष इव श्रृङ्गार-रसराजौ विराजते ॥ ९९ ॥**

**'तद्दत्तदिव्यभोगाङ्गैः'** तद्दत्तैः गोभद्रदत्तैः भोगाङ्गैः भोगासाधनैः । **'कन्दर्पदर्पहृत्'** रूपेण कन्दर्पस्य कामस्य दर्पहृत् गर्वहारी ।**'शालिः'** शालिभद्रः ।**'प्रत्यक्षः'** साक्षात् ।**'शृङ्गार रसराजः इव'** रसाधिराजशृङ्गारः इव ।**'विराजते'** शोभते ॥ ९९ ॥

**तत्पिष्टपेषणं चक्रुरथ चर्वितचर्वणम् । देवास्तमेव शृङ्गारं, यावज्जीवं वहन्ति यत् ॥ १०० ॥**

**'देवाः'** सुराः । **'तमेव'** पूर्वपरिभुक्तमेव **'शृङ्गारं'** भूषणादिकम् **'यावज्जीवं'** जीवनपर्यन्तम् । **यद् वहन्ति** धारयन्ति **तत्** । **'पिष्टपेषणं'** पिष्टस्य पेषणम् । अथवा **'चर्वितचर्वणं'** चर्वितस्य चर्वणम् । **'चक्रुः'** कुर्वन्ति स्म ॥ १०० ॥

**सुधीर्वक्तेव नव्यार्थं, नव्यं काव्यं महाकविः । प्रतिप्रभातमाधत्त, स शृङ्गारं नवं नवम् ॥ १०१ ॥**

**'सुधीः वक्ता इव'** विद्वान् व्याख्याता यथा । **'नव्यार्थं'** नूतनचिन्तनम् । **'महाकविरिव'** महान् कविः यथा । **नव्यं काव्यम्**। तथा **'प्रतिप्रभातं'** प्रतिप्रगे । **'सः'** शालिभद्रः । **नवं नवम्** । **'शृङ्गारं'** भूषणादिकम् । **'आधत्त'** धारयति स्म ॥ १०१ ॥

**वासांस्यनुपरक्तानि, वनमालाममीलिताम् । सुरा नोज्झन्ति ताम्बूल-मिव ग्रामेयकाश्चिरम् ॥ १०२ ॥**

**'ग्रामेयकाः इव'** ग्रामीणजनाः इव ।' **'चिरं'** चिरकालं यावत् । **'ताम्बूलं'** मुखवासादिकम् । **'न उज्झन्ति'** न त्यजन्ति । तथा **सुराः** अपि देवाः अपि । **'अनुपरक्तानि'** प्रस्वेदरेण्वादिभिः अमलिनानि । **'वासांसि'** वस्त्राणि । **'अमीलितां'** अम्लानाम् । **'वनमालां'** पुष्पमालाम् । न उज्झन्ति ॥ १०२ ॥

**पार्थिवः सुरपुष्पौघः प्रबुद्धोऽपि सदा चिरम् । तदङ्गसङ्गमं नाप, तस्य पुण्यमियत्कुतः ? ॥ १०३ ॥**

**'पार्थिवः'** पृथ्वीजातः । पक्षे-राजा श्रेणिकः । **'प्रबुद्धोऽपि'** विकसितोऽपि । पक्षे-विद्वानपि । **'सुरपुष्पौघः'**

देवप्रेषितकुसुमसमूहः **'तदङ्गसङ्गमं'** शालिदेहसंस्पर्शम् । **'सदा'** चिरम् । **'न आप'** न प्राप्तः । **'तस्य'** सुरपुष्पौघस्य श्रेणिकस्य च । इयत् पुण्यं कुतः ? विकसितः सुरप्रेषितपुष्पसमूहः सदा तत्स्पर्शं न प्राप । विद्वान् श्रेणिकराजाऽपि चिरं तस्य सङ्गमं न प्राप । तयोः इयत् पुण्यं कुतः ? इति भावः ॥ १०३ ॥

**देवानामपि साध्येषु, पूर्वं व्याप्रियते मनः । तस्यार्थास्तु स्वयं सिद्धाः, तेभ्यः पुण्याधिकः स तत् ॥ १०४ ॥**

**'देवानामपि'** सुराणामपि । **'साध्येषु'** करणीयेषु कार्येषु । **'पूर्वं'** प्रथमम् । **'मनः'** चेतः । **'व्याप्रियते'** अवधिज्ञानेन प्रयुज्यते । तदनन्तरं तैः पदार्थाः प्राप्यन्ते । **'तस्य'** शालिभद्रस्य । **'अर्थाः'** पदार्थाः । **'स्वयं' सिद्धाः'** विचारणामन्तरेणाऽपि प्राप्ताः । **'तत्'** तस्मात् । **'तेभ्यः'** देवेभ्यः । **'सः'** शालिः । **'पुण्याधिकः'** अधिकपुण्यवान् ॥ १०४ ॥

**भुवनाधीश्वरा बिभ्रत्यासुरीं भावनां ततः । द्वेधाऽप्यधस्कृतास्तेन, नरकप्रातिवेश्मिकाः ॥ १०५ ॥**

**'भुवनाधीश्वराः'** भुवनपतयः देवाः । **'आसुरीं'** दानवीम् । **'भावनां'** विचारणाम् । **'बिभ्रति'** धारयन्ति । **'तेन'** तेन कारणेन । **'नरकप्रातिवेश्मिकाः'** नरकनिकटवर्तिनः ते असुराः । **द्वेधापि'** उत्तरदक्षिणविभागात् द्विधापि । **'ततः'** शालिभद्रात् । **'अधस्कृताः'** रत्नप्रभाभूमिमध्यभागे नीचस्थाने स्थापिताः । वसन्ति हि भुवनपतिदेवा रत्नप्रभापृथिव्याम् ॥ १०५ ॥

**व्यन्तरैरन्तरं दूरं, जन्मान्यत्रापि पक्षिवत् । भ्राम्यन्ति ये करम्भादि-लाभलोलुपचेतसः ॥ १०६ ॥**

**'व्यन्तरैः'** देवविशेषैः । **'पक्षिवत्'** विहङ्गवत् । **'जन्म'** जीवनम् । **'आपि'** लब्धम् । ये करम्भादिलाभलोलुपचेतसः करम्भः दधिमिश्रितसक्तुकं ('करंबो' इति भाषायाम्) इत्यादिलाभे लोलुपं चेतः येषां ते । पक्षिपक्षे–करम्भाः भृष्टाः

यवाः राजादन्यश्च इत्यादीनां लाभे लोलुपं चेतो येषां ते पक्षिणः । **'अन्यत्र'** स्वजन्मस्थानात् अन्यस्थाने । **दूरम**न्तरम् । **'भ्राम्यन्ति'** अटन्ति । पक्षे उड्डयन्ते ॥ १०६ ॥

**ज्योतिष्काः सेवकप्राया, निश्चितागमनिर्गमाः । बालवृद्धोदयास्तोक्त्या, किञ्च नित्यं विडम्बिताः ॥ १०७ ॥**

**'ज्योतिष्काः'** सूर्यचन्द्रादिसुराः । **'सेवकप्रायाः'** दासतुल्याः । **'निश्चितागमनिर्गमाः'** निश्चितौ आगमनिर्गमौ येषां ते । **'बालवृद्धोदयास्तोक्त्या'** बालवृद्धौ उदयास्तौ इत्याद्युक्त्या इत्यादिवचनैः । **किञ्च नित्यं** सदा । **'विडम्बिताः'** विडम्बनां प्राप्ताः । कुर्वन्ति हि गणकाः सूर्यादिग्रहेषु बालवृद्धोदयास्तशब्दप्रयोगान् ॥ १०७ ॥

**अपि वैमानिका देवाः, स्वामिसेवकभावतः । परतन्त्रा विषादाद्यैरन्तः शल्यैश्च दुःखिताः ॥ १०८ ॥**

**'वैमानिकाः'** सौधर्मादिविमानवासिनः । **'देवाः अपि'** सुराः अपि । **स्वामिसेवकभावतः** । **'परतन्त्राः'** पराधीनाः । **'विषादाद्यै'** **'अन्तःशल्यैः'** हृदये शल्यतुल्यैः विषादेर्ष्याद्यैः । देवाङ्गनादीनां वियोगेऽपहरणे वा भवति हि विषादेर्ष्यादिकम् । चः समुच्चये । **'दुःखिताः'** दुःखं प्राप्ताः ॥ १०८ ॥

**कल्पातीता असत्कल्पा, अर्हत्कल्याणकेष्वपि । अधिकस्त्वेष देवेभ्यः, पुरुषार्थत्रयीमयः ॥ १०९ ॥**

**'कल्पातीताः'** ग्रैवेयकानुत्तरदेवाः । **'अर्हत्कल्याणकेषु अपि'** अर्हतां जिनानां जन्मादिकल्याणकेषु अपि । **'अस्तप्रायाः'** असद्भूततुल्याः, तत्र अविद्यमानत्वात् । कल्पातीताः देवाः न कदापि अत्र आगच्छन्ति, अर्हत्कल्याणकेषु अपि न आगच्छन्ति, ततः ते असत्कल्पाः । **'पुरुषार्थत्रयीमयः'** धर्मार्थकाममयः । **'एषः'** शालिः । **'देवेभ्यः'** भवनपति–व्यन्तर–ज्योतिष्क–वैमानिक–कल्पातीत–देवेभ्यः । **'अधिकः'** अधिकपुण्यवान् अस्ति ॥ १०९ ॥

**अदृष्टमश्रुतं पूर्वं, परानीतमचिन्तितम् । एकान्तस्वादु सम्पूर्णमद्वितीयमखण्डितम् ॥ ११० ॥**

**स्पर्धाहीनं च निर्मायमगर्वं नानुतापि च । स्थानादूर्ध्वं स्ववंशोच्चं, धनसम्भावनाधिकम् ॥ १११ ॥**

**सन्तोषपोषकं दानं षोडशांशमदादयम् । तादृगाप सुखं कार्यं, निदानानुगुणं यतः ॥ ११२ ॥**

'**अयं**' शालिभद्रः । '**षोडशांशं**' षोडश अंशाः यस्मिन् तत्, सम्पूर्णमित्यर्थः । षोडशाऽऽनकैरेकं पूर्णं रूप्यकं भवति, षोडशकलाभिश्च पूर्णः चन्द्रः । अत्रापि षोडश विशेषणानि दानस्य । **दानम्** । '**अदात्**' ददौ । **सुखमपि** । '**तादृग्**' दानसदृशम् । '**आप**' प्राप्तः । '**यतः**' यस्मात् । **कार्यम्** । '**निदानानुगुणं**' कारणानुरूपम् भवति ॥ ११२ ॥ कथम्भूतं तद्दानं तत्सुखं च ? '**पूर्वं**' प्राग् । '**अदृष्टं**' अप्रेक्षितम् । '**अश्रुतं**' अनाकर्णितम् । सङ्गमेन तादृग् दानं पूर्वं कदापि न दृष्टं श्रुतं वा । न च शलिभद्रेण पूर्वभवेषु तादृक् सुखं दृष्टं श्रुतं वा । '**परानीतं**' परैः सङ्गमाद् अन्यैः अनीतं-अकृतम् । सुखपक्षे परेण गोभद्रदेवेन आनीतं परानीतं सुखम् । '**अचिन्तितं**' अचिन्तनात् । मुनिः आयास्यति तस्मै च दानं दास्यामीति पूर्वं सङ्गमेन न चिन्तितम् । सुखपक्षे-शालिभद्रेणाऽपि कदापि न चिन्तितं यत् अहं गोभद्रदेवप्रेषितं सुखं लप्स्ये । '**एकान्तस्वादु**' सर्वथा सुन्दरं दानं सुखं च । '**सम्पूर्णं**' समस्तपरमान्नादानात् सम्पूर्णम् । दिव्यवस्त्रभोज्यभूषणलाभात् सुखमपि सम्पूर्णम् । '**अद्वितीयं**' अनन्यम् । '**अखण्डितं**' भावधाराऽखण्डनात् अखण्डितं दानम् । शालिसुखमपि शत्रुजनैः अखण्डितत्वात् अखण्डितमेव ॥ ११० ॥ '**स्पर्धाहीनं**' सङ्गमेन तदा केनाऽपि नैव स्पर्धा कृता । शालिभद्रस्य सुखमपि स्पर्धाहीनमेव । '**निर्मायं**' माया-रहितम् । '**अगर्वं**' गर्वरहितम् '**न अनुतापि**' न पश्चात्तापसहितम् । मम्मणजीववत् सङ्गमेन न पश्चात्तापः कृतः । शालिसुखमपि न अनुतापि न सन्तापकारि । '**स्थानाद्**

**ऊर्ध्वं**' सड्मेन किल ऊर्ध्वंस्थितेन मुनये परमान्नं प्रदत्तमतः स्थानाद् ऊर्ध्वम् । प्रवर्धमानभावधारया भावतोऽपि ऊर्ध्वम्। शालिसुखमपि अन्यजनस्थानात् ऊर्ध्वं उपरिस्थितम् । '**स्ववंशोच्चं**' स्ववंशे उच्चं उन्नतम् । '**धनसम्भावाधिकं**' धनसम्भावनायाः अधिकम् । स्वधनादपि अधिकम् । सुखपक्षेऽपि स्वधनाद् अधिकत्वाद् अधिकम् । '**सन्तोषपोषकं**' सम्यक् तोषस्य आनन्दस्य पोषकम् पुष्टिकारि । शालिसुखमपि सन्तोषपोषकमेव ॥ ११० ॥ १११ ॥ ११२ ॥

**प्रत्यक्षा लक्षणानां ता, आयाता देवता इव । मिथुनार्हर्विभागस्य, द्वात्रिंशद् घटिका इव ॥ ११३ ॥**

**तत्पुण्यस्य विदेहस्य, विजया वा समस्थितेः । रसाविर्भावपात्राणि, पात्राणि प्रेमनाटके ॥ ११४ ॥**

**विषमायुधयोधस्य, भल्लयः गुणवल्लयः । श्रियो देशसहस्त्राणां, भारतानामिवाहृताः ॥ ११५ ॥**

**श्रीसौधर्मविमानीय-लक्षाणां सौख्यवर्णिकाः । सम्पूर्ण पुरुषाहार-प्रदानस्य फलानि वा ॥ ११६ ॥**

**त्रिलोकीललनालोक-ललामसुषमा क्षमाः । शशालिरे विशालाक्ष्यः, श्रीशालेः पुण्यशालिनः ॥ ११७ ॥**

'**पुण्यशालिनः**' पुण्याढ्यस्य । '**श्रीशालेः**' श्रीशालिभद्रस्य । '**विशालाक्ष्यः**' विपुलनयनाः द्वात्रिंशत् प्रियाः । '**शशालिरे**' शोभन्ते स्म । कथम्भूताः ताः द्वात्रिंशत् प्रियाः ? '**लक्षणानां**' द्वात्रिंशल्लक्षणानाम् । '**प्रत्यक्षाः**' साक्षात् । '**आयाताः**' आगताः। '**देवताः इव**' देव्यः इव । '**मिथुनार्हर्विभागस्य**' मिथुनस्थसूर्यदिनविभागस्य । **द्वात्रिंशद् घटिकाः इव** । सूर्ये मिथुनस्थे द्वात्रिंशद्घटिकाप्रमाणो दिवसो भवति ॥ '**समस्थितेः**' समानस्थितिकस्य पुण्यस्य । महाविदेहपक्षे-समसमयस्थितेः, महाविदेहे किल चतुर्थारकप्रारम्भसमयसमः एव सर्वदा समयः भवति । '**विदेहस्य**' देहहीनस्य अमूर्तस्य पुण्यस्य । लौकिकदृष्ट्या पुण्यममूर्तं गण्यते । पक्षे महाविदेहक्षेत्रस्य । '**विजयाः**' द्वात्रिंशत् जयाः । पक्षे-महाविदेहक्षेत्र

विजयाः, ते च द्वात्रिंशत् सन्ति । **प्रेमनाटके** । '**रसाविर्भावपात्राणि**' रसप्रादुर्भावभाजनानि । '**पात्राणि इव**' द्वात्रिंशत् पात्राणि इव ॥ '**विषमायुधयोधस्य**' विषमायुधः कामः, सः एव योधः सुभटः तस्य । '**भल्ल्यः**' कुन्ताः । '**गुणवल्ल्यः**' द्वात्रिंशद् गुणानां वल्लिरूपाः । '**देशसहस्राणां**' देशानां द्वात्रिंशत्सहस्राणि तेषाम् । '**भारतानां**' भरतस्य इमानि भारतानि तेषाम् । '**श्रियः इव**' द्वात्रिंशत् लक्ष्म्यः इव । '**आहृताः**' समानीताः ॥ '**श्रीसौधर्मविमानीयलक्षाणां**' द्वात्रिंशल्लक्षसौधर्म-विमानानाम् । '**सौख्यवर्णिकाः**' सुखावयवाः । (वर्णिकाः-वानगी इति भाषायाम्) सम्पूर्णपुरुषाहारप्रदानस्य । फलानि । द्वात्रिंशद्वार्णिकाभिः कवलैर्वा सम्पूर्णपुरुषाहारो भवति ॥ पुनः कथम्भूताः ताः ? '**त्रिलोकीललनालोकललामसुषमाक्षमाः**' त्रिजगतीरमणीजनेषु ललामानि तिलकानि तेषां सुषमा-अतिशायिनी शोभा तस्यां क्षमाः समर्थाः ॥ ११३ ॥ ११४ ॥ ११५ ॥ ११६ ॥ ११७ ॥

**महामुनौ धृतिमती, उक्तियुक्तीव वादिनि । बुद्धिसिद्धि इवामात्ये, भुक्तिमुक्तीव योगिनि ॥ ११८ ॥**

**पुष्पदन्तप्रभे मेरौ, गङ्गासिन्धू महार्णवे । वैताढ्यपर्वते विद्या-धरश्रेण्याविवोत्तमे ॥ ११९ ॥**

**प्रथमप्रावृडम्भोदे, विद्युद्वृष्टी महीहिते । मर्त्यामर्त्यश्रियौ विश्वोत्तरेऽत्रैव समीयतुः ॥ १२० ॥**

'**महामुनौ इव**' मुनिपुङ्गवे इव । '**धृतिमती**' धैर्यधियौ । '**वादिनि इव**' तार्किके इव । '**उक्तियुक्ती**' वचनतर्कौ । '**अमात्ये इव**' मन्त्रिणि इव । '**बुद्धिसिद्धी**' मति-कार्यसिद्धि । **योगिनि इव** । '**भुक्तिमुक्ती**' निजानन्दभोगरूपा भुक्तिः, रागादिविभावाच्च मुक्तिः ते ॥ ११८ ॥ **मेरौ** । '**पुष्पदन्तप्रभे**' सूर्यचन्द्रकान्ती । 'पुष्पदन्तावेकोक्तया शशिभास्करौ' इति हैम्याम् । '**महार्णवे**' महासागरे लवणे । '**गङ्गासिन्धू**' तन्नाम्यौ नद्यौ । **वैताढ्यपर्वते इव** । '**उत्तमे**' श्रेष्ठे । '**विद्याधरश्रेण्यौ**'

उत्तरदक्षिणश्रेण्यौ ॥ १११ ॥ '**प्रथमप्रावृडम्भोदे**' प्रथमवर्षावारिदे । '**महीहिते**' मह्यां पृथिव्यां हिते हितरूपे । '**विद्युद्वृष्टी**' विद्युत् तडित्, वृष्टिः वर्षणं, ते । तद्वत् । '**मर्त्यामर्त्यश्रियौ**' देवनरलक्ष्म्यौ । '**विश्वोत्तरे**' जगदुत्तमे । '**अत्रैव**' शालिभद्रे एव । '**समीयतुः**' समागते ॥ १२० ॥

**मन्दारमालया मूर्तिर्यस्याऽमन्दा रमालया । भेजुस्तं ऋतवो भद्रानन्दनं नन्दनं वनम् ॥ १२१ ॥**

'**यस्य**' शालेः । '**अमन्दा**' स्फूर्तिमती । '**मूर्तिः**' शरीरम् । '**मन्दारमालया**' कल्पवृक्षमालया । '**रमालया**' रमायाः लक्ष्म्याः आलयरूपा निवासरूपा अस्ति । '**तं भद्रानन्दनं**' भद्रापुत्रं भद्रामातुर्वा आनन्दनः आनन्दकरस्तम् । '**नन्दनं वनं**' नन्दनवनतुल्यं शालिभद्रम् । **ऋतवः** वसन्तादि षड् ऋतवः । '**भेजुः**' सिषेविरे ॥ १२१ ॥

**तत्रानङ्गस्तदङ्गेन, विजितो जितकाश्यपि । प्रजिघाय मधुं मित्रं, साधुसन्धानसन्धया ॥ १२२ ॥**

'**तत्र**' शालिविषये । '**जितकाशी अपि**' जितयुद्धोऽपि । 'जिताहवो जितकाशी' इति हैम्याम् । '**अनङ्गः**' कामः । '**तदङ्गेन**' शालिभद्रशरीरेण । '**विजितः**' पराभूतः सन् । '**साधु सन्धानसन्धया**' साधु सम्यक्प्रकारेण सन्धाने-शरसन्धाने सन्धया-कृतया प्रतिज्ञया । '**मित्रं**' स्वसुहृदम् । '**मधुं**' चैत्रमासं वसन्तं ऋतुम् । '**प्रजिघाय**' प्रेषितवान् ॥ १२२ ॥

**वसन्तवर्णनम्**

**दिगन्तानपि सौरभ्यकलया लालयत्यलम् । दूरितोद्दामदुर्गन्धमालया मलयानिलः ॥ १२३ ॥**

'**दूरितोद्दामदुर्गन्धमालया**' दूरिता अपास्ता उद्दामदुर्गन्धमाला उत्कटदुर्गन्धश्रेणिः यया सा तया । '**सौरभ्यकलया**' सुगन्धकलया । '**मलयानिलः**' मलयाद्रिपवनः । **दिगन्तानपि** । '**अलं**' अत्यर्थम् । '**लालयति**' सुगन्धेन पूर्णीकरोति ॥ १२३ ॥

**किलासौ हंसचारज्ञः, सुरभिर्दक्षिणानिलैः । श्वासैर्नासान्तरन्यासैः, मानिनीर्वशमानयत् ॥ १२४ ॥**

**किलः** निश्चये । **'असौ'** शालिभद्रः । **'हंसचारज्ञः'** स्वरसञ्चारविज्ञः । वसन्तपक्षे-सूर्यचारविज्ञः । हंसविहारविज्ञो वा 'ब्रुध्नो हंसश्चित्रभानुर्विवस्वान्' इति हैम्याम् । **'दक्षिणानिलैः'** अनुकूल श्वासैः । पक्षे-दक्षिण-दिक्पवनैः मलयानिलैः । मलयाद्रिः किल दक्षिणदिशि वर्तते अतः तद्दिशः वायुः मलयानिलः कथ्यते । **'सुरभिः'** सुगन्धः तद्रूपः शालिभद्रः । पक्षे-वसन्तः । 'वसन्त इष्यः सुरभिः' इति हैम्याम् । **'नासान्तरन्यासैः'** नासान्तरे नासिकायाः अन्यच्छिद्रे न्यासः स्थापना येषां तैः । **'श्वासैः'** सव्यापसव्यश्वासैः । पक्षे-पवनैः । **'मानिनीः'** कामिनीः । **'वशमानयत्'** वशीचक्रे । यन्नासिकाच्छिद्रे श्वासश्चलति तत्पार्श्वे स्थापिताः कामिन्यः किल वशीभवन्तीति स्वरविदः ॥ १२४ ॥

**वसन्तः श्वसनी सर्पः, श्वासैः स्वैर्मलयानिलैः । तदीयश्वाससम्पृक्तैः, पान्थानुन्मन्थयत्यहो ॥ १२५ ॥**

**'श्वसनी'** श्वसनः-पवनः सोऽस्ति यस्य सः श्वसनी फूत्कार-कारी । **'सर्पः'** अहिः फूत्कारभीषणः । **'वसन्तः'** फूत्कारकारिसर्पतुल्यः वसन्तः । **'तदीयश्वाससम्पृक्तैः'** शालिश्वाससंयुक्तैः । **'स्वैः'** निजैः । **'मलयानिलैः'** मलयगिरिपवनैः । **श्वासैः** । **'अहो'** आश्चर्ये । **'पान्थान्'** प्रवासिनः । **'उन्मन्थयति'** व्याकुलयति उन्मादयतीत्यर्थः ॥ १२५ ॥

**काचकुम्भं कलाकेलिं किं मधुः काचकारकः । मलयानिलफूत्कारैः, रसपात्रमसूत्रयत् ॥ १२६ ॥**

**'काचकारकः'** क्षारकारकः क्षारादिद्रव्यसंयोगकारी धातुवादीत्यर्थः । **'मधुः'** वसन्तः । **मलयानिलफूत्कारैः** । **'काचकुम्भं'** क्षारघाटरूपम् । **'कलाकेलिं'** कामम् । 'कलाकेलि रनन्यजोऽङ्गजः' इति हैम्याम् । **किं रसपात्रं**-पारदमात्रम् । **'असूत्रयत्'** कृतवान् ? ॥ १२६ ॥

**भुजङ्गान् भापयत्येष, बकुलै र्नकुलैरिव । वशीकरोति वश्यैकतिलकैस्तिलकैरिव ॥ १२७ ॥**

**'एषः'** वसन्तः । **'नकुलैरिव'** सर्पहभिरिव । **'बकुलैः'** बकुलवृक्षैः । **'भुजङ्गान्'** सर्पान् वेश्यागामिजनान् वा । **'भापयति'** भयं प्रापयति । **'वश्यैकतिलकैः'** वशीकरणे एकतिलकैः । **'तिलकैः'** तिलकवृक्षैः । **'वशाः'** नारीः । वशीकरोति । वशीकरणतिलकैः कृतैः स्त्रियो वशीभवन्तीति तज्ज्ञाः ॥ १२७ ॥

**सीव्यन्ति मनसी यूनो, र्ये सूच्या वलितैर्गुणैः । रजः कञ्चुकिता नैव, केतकैः के तकैः कृताः ? ॥ १२८ ॥**

**'ये'** केतकाः । **'सूच्या'** सूचनया युव-युवतीनां परस्परं हावभावजन्यान् सङ्केतान् दर्शयति सा सूचिः सूचना तया सेवनी (सोय इति भाषायाम्) रूपया । **'वलितैः'** नतैः प्रोतैरित्यर्थः । गुणैः सुगन्धाद्यैः सूत्ररूपैः **'यूनोः'** युवक-युवत्योः । **'मनसी'** चेतसी । **'सीव्यन्ति'** योजयन्ति । **'तकैः'** तैः । कः स्वार्थिकः । **'केतकैः'** क्रकचच्छदवृक्षैः । **'के'** जनाः । **'रजःकञ्चुकिताः'** केतकरजःकवचिताः । रजोभावेन रागभावेन वा कञ्चुकिताः । **नैव कृताः** ? अपि तु कृताः एव ॥ १२८ ॥

**अकुण्ठः कलकण्ठीनां, कलः कलकलः कलाम् । भेजे पुष्पायुधव्याधगोचरीगीतिकागताम् ॥ १२९ ॥**

**'कलकण्ठीनां'** कोकिलानाम् । **'अकुण्ठः'** अरुद्धः । **'कलः'** मधुरः । **'कलकलः'** ध्वनिः । **'पुष्पायुध-व्याधगोचरीगीतिका-गतां'** पुष्पायुधः कामः सः एव व्याधः लुब्धकः तद्गोचरीं तद्विषयां गीतिका-गतां सङ्गीतगताम्। कलाम् । **'भेजे'** आश्रितवान् । व्याधः खलु मृगग्रहणार्थं प्रयुङ्क्ते एव सङ्गीतम् । वसन्तेनाऽपि कोकिलध्वनिच्छलाद् गीतमारब्धमिति भावः ॥ १२९ ॥

**माकन्दमञ्जरीहस्तै-र्नृत्यन्तीव वनावली । भ्रमद्भृङ्गझणत्कारि-वर्यवैडूर्यकङ्कणा ॥ १३० ॥**

'**भ्रमद्भृङ्गझणत्कारिवर्यवैडूर्यकङ्कणा**' भ्रमन्तो ये भृङ्गाः भ्रमराः ते एव झणत्कारिवर्यवैडूर्यकङ्कणानि झणत्कार-नादकारीणि उत्तमवैडूर्यनिर्मितानि कङ्कणानि यस्याः सा । '**वनावलिः**' वनश्रेणिः । '**माकन्दमञ्जरीहस्तैः**' सहकारमञ्जरीरूपैः हस्तैः । **नृत्यन्ती इव** ॥ १३० ॥

**ग्रीष्मवर्णनम्**

**ग्रीष्मे कदम्बसन्दोहा, भान्ति पुष्पकदम्बकैः । शालेर्विशाललावण्या-लोकैः पुलकिता इव ॥ १३१ ॥**

'**ग्रीष्मे**' ग्रीष्मर्तुसमये । '**शालेः**' शालिभद्रस्य । '**विशाललावण्यालोकैः**' विपुल-लवणिमदर्शनैः । '**पुलकिताः इव**' रोमाञ्चिताः इव । '**कदम्बसन्दोहाः**' कदम्बवृक्षसमूहाः । '**पुष्पकदम्बकैः**' कुसुम-समूहैः । '**भान्ति**' शोभन्ते ॥ १३१ ॥

**चन्द्रकान्तशिलाकान्त-चन्द्रशालाविलासिनः । चन्द्रिकाचारुचीरस्य, चन्द्रचूर्णाञ्चितद्युतेः ॥ १३२ ॥**

**शालेः सौख्यसुधासिन्धु-र्लिल्ये कल्लोललोलताम् । ग्रीष्मः पद्माकराणां हि, भीष्मस्तुच्छरसश्रियाम् ॥ १३३ ॥**

'**चन्द्रकान्तशिलाकान्तचन्द्रशालाविलासिनः**' चन्द्रकान्तशिलाकान्तादिरत्ननिर्मितायां चन्द्रशालायां विलसतीत्येवंशीलस्तस्य शालिभद्रस्य । '**चन्द्रिकाचारुचीरस्य**' चन्द्रिकावत् चारूणि धवलानि चीराणि वस्त्राणि यस्य तस्य । '**चन्द्रचूर्णाञ्चितद्युतेः**' कर्पूरचूर्णैः अञ्चिता युक्ता द्युतिः कान्तिः यस्य ॥ १३२ ॥ '**शालेः**' शालिभद्रस्य । '**सौख्यसुधासिन्धुः**' सुखामृतसागरः । '**कल्लोललोलतां**' तरङ्गचापल्यम् । '**लिल्ये**' प्राप्तः । '**ग्रीष्मः**' ग्रीष्मसमयः । **हि** निर्णये । '**तुच्छरसश्रियां**' हीनजललक्ष्मीणाम् । '**पद्माकराणां**' जलायशानाम् । '**भीष्मः**' भयङ्करः । न तु जलनिधेः । तुच्छलक्ष्मीणां दरिद्राणां ग्रीष्मः भीष्मः, न तु शालिभद्रस्य शुष्यन्ति हि तटाकनद्यादयः ग्रीष्मर्तौ, न तु समुद्रः । तद्वत् ग्रीष्मे अन्ये तापं कलयन्ति, शालिस्तु सौख्येमेवेति भावः ॥ १३३ ॥

**वर्षावर्णनम्**

**जीमूता विद्युदुद्योतैर्जगदालोक्य गर्जितैः । घोषयन्तीव भूपीठे, न शालेः सुन्दरः परः ॥ १३४ ॥**

'**जीमूताः**' मेघाः । '**विद्युदुद्योतैः**' तडित्प्रकाशैः । '**जगत्**' विश्वम् । '**आलोक्य**' दृष्ट्वा । '**गर्जितैः**' गर्जारवैः । '**भूपीठे**' पृथ्वीतले । '**शालेः**' शालिभद्रात् । '**सुन्दरः**' मनोरमः । '**परः**' अन्यः । **न** अस्तीति । '**घोषयन्तीव**' ज्ञापयन्तीव ॥ १३४ ॥

**प्रभवन्ति गिरीन्द्रात्तु, सरितः कूलमुद्रुजाः । काष्ठाकूलङ्कषा भद्रानन्दनादिव कीर्तयः ॥ १३५ ॥**

'**गिरीन्द्रात्तु**' हिमालयादिपर्वतेभ्यः, अत्र जातौ एकवचनम् । '**कूलमुद्रुजाः**' कूलानि तीराणि उद्रुजन्ति हानिं प्रापयन्ति ताः । कूलादुद्रुजौद्वहः ।५।१।१२२॥ इत्यनेन कूलमुद्रुजाः । '**सरितः**' नद्यः । '**प्रभवन्ति**' जायन्ते । '**भद्रानन्दनात्**' भद्रापुत्रात् शालिभद्रात् । '**काष्ठाकूलङ्कषाः**' काष्ठाः दिशः ताः एव कूलानि तानि कषन्तीत्येवंशीलाः । **कीर्तयः इव** । शोभन्ते इति शेषः ॥ १३५ ॥

**सौधस्याभ्रंलिहे श्रृङ्गे, जलकान्तमणीमये । सदा कृष्णागरुक्षोद-धूमनीलतमः प्रभे ॥ १३६ ॥**

**असौ सौदामिनी भामि-र्वल्लभाभिः पुरस्कृतः । घनाघन इवोदारः, सदाऽऽसेचनकोऽजनि ॥ १३७ ॥**

'**सौधस्य**' प्रासादस्य । '**अभ्रंलिहे**' गगनस्पर्शिनि । '**जलकान्तमणीमये**' चन्द्रकान्तरत्ननिर्मिते । '**सदा**' नित्यम् । '**कृष्णागरुक्षोदधूमनीलनभः प्रभे**' कृष्णागरुचूर्णधूमैः नीला श्यामा नभःप्रभा यस्य तस्मिन् । '**श्रृङ्गे**' शिखरे ॥ १३६ ॥ '**सौदामिनी-भाभिः**' विद्युत्कान्तिभिः । '**वल्लभाभिः**' प्रियाभिः । '**पुरस्कृतः**' मुख्यरूपेण परिवृतः इत्यर्थः । '**असौ**'

॥ १३४ ॥

शालिः । **'घनाघनः इव'** मेघः इव । **'उदारः'** उदात्तः । **'सदा'** नित्यम् । **'आसेचनकः'** अतिदर्शनीयः । 'तदाऽऽसेचनकं यस्य दर्शनाद् दृग् न तृप्यति' इति हैम्याम् । **'अजनि'** जातः ॥ १३७ ॥

**शरद् वर्णनम्-**

**सितच्छदच्छदापातैः, पुङ्खसूत्कारसूचनैः । मेनेऽसौ स्मरवीरस्य, शरदं शरदण्डवत् ॥ १३८ ॥**

**'सितच्छदच्छदापातैः'** हंसपक्षपतनैः । शरपक्षे-सितच्छदवत् श्वेता ये छदाः पर्णानि तेषां पातैः । भवन्ति हि बाणपृष्ठे पर्णानि । **'पङ्खसूत्कारसूचनैः'** पुङ्खाः-पुष्कलाः ये सूत्कारशब्दाः हंसोड्डयनजाताः ते एव सूचनानि तैः । पक्षे बाण-पृष्ठसूत्कारसूचनैः । **असौ** शालिः । **'शरदं'** ऋतुम् । **'स्मरवीरस्य'** कामयोधस्य । **'शर-दण्डवत्'** बाणदण्डवत् । **'मेने'** मनुते स्म । वर्षासमाप्तौ उड्डयन्ते हंसाः, युध्यन्ते च राजानः, तेनेयं कल्पना कवेः ॥ १३८ ॥

**अविश्रान्ताऽथ विश्रान्ता, वृष्टिसृष्टिः पयोमुचाम् । गोभद्रस्य न दिव्यश्री-दानध्यानरतिर्मतिः ॥ १३९ ॥**

**'अथ'** शरदि । **'पयोमुचां'** मेघानाम् । **'अविश्रान्ता'** अविरता । **'वृष्टिसृष्टिः'** वर्षणकरणम् । **'विश्रान्ता'** विरता। किन्तु **'गोभद्रस्य'** सुरस्य । **'दिव्यश्रीदानध्यानरतिः'** दिव्यलक्ष्मीदानस्य ध्याने एव रतिः यस्याः सा । **'मतिः'** बुद्धिः। **न विश्रान्ता** ॥ १३९ ॥

**निशाऽऽसीद्दिनदेशीया, हिमांशोर्महसां भरैः । नरलक्ष्मीरिव स्वर्गकल्पाऽस्य सुकृतोदयैः ॥ १४० ॥**

**'अस्य'** शालिभद्रस्य । **'सुकृतोदयैः'** पुण्योदयैः । **'नरलक्ष्मीः'** मनुष्यश्रीः । **'इव'** यथा । **'स्वर्गकल्पा'**

देवलोकतुल्या अभूत् । तथा शरदृतौ '**हिमांशोः**' चन्द्रस्य । '**महसां**' तेजसाम् । '**भरैः**' समूहैः । '**निशा**' रात्रिः । '**दिनदेशीया**' दिवसतुल्या। '**आसीत्**' अभूत् । शरदि किल आकाशस्य स्वच्छत्वात् चन्द्रकिरणाः भास्वरा भवन्ति । अतः निशाऽपि दिवसतुल्या भातीत्यर्थः ॥ १५० ॥

**राजसु द्वादशस्वेष, जिगीषुः शारदः शशी । गृहिव्रतेषु सर्वेषु, श्रीशालेर्दानधर्मवत् ॥ १४१ ॥**

'**श्रीशालेः**' श्रीशालिभद्रस्य। '**सर्वेषु**' '**द्वादशसु**' '**गृहिव्रतेषु**' श्रावकव्रतेषु। **दानधर्मवत्**। '**द्वादशसु**' चैत्रादिमासानां द्वादश-चन्द्रेषु । '**राजसु**' चन्द्रेषु नृपतुल्येषु । '**जिगीषुः**' जयेच्छुः । एषः '**शारदः**' शरदः अयं शारदः । '**शशी**' चन्द्रः। शोभते स्म ॥ १४१ ॥

**रविर्नव इवाभाति, जलदावरणात्ययात् । प्राग्जन्मनैः स्वनिर्णाशात्, तस्येव सुकृतोदयः ॥ १४२ ॥**

'**प्राग्जन्मनैः स्वनिर्णाशात्**' सङ्गमभवदारिद्र्यनाशात्। '**तस्य**' शालेः। '**सुकृतोदयः इव**' पुण्योदयः इव। '**जलदा-वरणात्ययात्**' मेघावरणक्षयात् '**रविः**' सूर्यः। '**नवः इव**' नूतनः इव। '**आभाति**' शोभते। यथा सङ्गमभवस्य दारिद्र्यनाशात् शालिभद्रस्य सकृतोदयः सर्वाधिकः शोभते तथा मेघघटानाशात् शारदो रविरित्यर्थः ॥ १४२ ॥

**मारुतैर्मालतीगन्धस्तायते भुवनान्तरे । बन्दिवृन्दैरिवामुष्य, यशः प्रसरसौरभम् ॥ १४३ ॥**

'**बन्दिवृन्दैः**' चारणसमूहैः। '**अमुष्य**' शालिभद्रस्य '**यशःसौरभमिव**' कीर्तिप्रसार-सुगन्ध इव। '**भुवनान्तरे**' जगति। '**मारुतैः**' वायुसमूहैः । '**मालतीगन्धः**' जातिपुष्पसुरभि । '**तायते**' व्याप्नोति ॥ १४३ ॥

**परं प्रसादमासेदुः, पयांसि शरदागमात् । सज्जनानां मनांसीव, शालिलीलाविलोकनात् ॥ १४४ ॥**

**'शालिलीलाविलोकनात्'** शालिभद्रक्रीडादर्शनात् । **'सज्जनानां'** सताम् । **'मनांसीव'** चेतांसि इव । **'शरदागमात्'** शरदृतुसमागमनात् । **'पयांसि'** जलानि । **'परं'** उत्तमम् । **'प्रसादं'** निर्मलताम् । **'आसेदुः'** प्राप्तानि ॥ १४४ ॥

**हेमन्तवर्णनम्-**

**हेमन्ते हिमसम्पातै र्जिह्मश्री रविरप्यभूत् । नाप क्वापि पुनर्मान्द्यं, श्रीशालेर्भाग्यभास्करः ॥ १४५ ॥**

**'हेमन्ते'** हेमन्तर्तौ । **'हिमसम्पातैः'** तुहिनसम्पातैः । **'रविरपि'** सूर्योऽपि । **'जिह्मश्रीः'** भङ्गुरशोभः । **अभूत् । न पुनः श्रीशालेः** । **'भाग्यभास्करः'** भाग्यरविः । **'क्वापि'** कुत्रापि स्थाने समये वा । **'मान्द्यं'** मन्दताम् । **'आप'** प्राप्तः ॥ १४५ ॥

**तदीयकान्तकान्तासु, सुरङ्गसरसीष्विव । कुङ्कुमस्तबका रेजू, रक्तप्रालेयपिण्डवत् ॥ १४६ ॥**

**'सुरङ्गसरसीषु इव'** सुरङ्गाः सुन्दरश्रियः सरस्यः जलाशयाः तासु इव । **'तदीयकान्तकान्तासु'** शालिभद्रसुन्दरसुन्दरीषु । **'कुङ्कुमस्तबकाः'** घुसृणगुच्छा कुङ्कुमगुच्छा वा । **'रक्तप्रालेयपिण्डवत्'** लोहिततुहिनपिण्डवत् । **'रेजुः'** शुशोभिरे ॥ १४६ ॥

**शिशिरवर्णनम्-**

**ततः प्रववृते प्राज्य-शिशिरः शिशिरः शनैः । कमलानां शिरः शूलं, सौख्यमूलं विलासिनाम् ॥ १४७ ॥**

**'ततः'** हेमन्तानन्तरम् । **'शनैः'** मन्दं मन्दम् । **'प्राज्यशिशिरः'** प्राज्यः पुष्कलः शिशिरः तुषारः यस्मिन् सः । **'शिशिरः'** ऋतुः **'प्रववृते'** प्रारब्धवान् । स च कीदृशः ? **'कमलानां'** पद्मानां, के-शरीरे मलः येषां ते कमलाः-दरिद्राः तेषाम् । **'शिरःशूलं'** मस्तकशूलं दुःखरूपमित्यर्थः । भवन्ति हि शिशिरे कमलानि म्लानानि दरिद्राश्च वस्त्रहीनत्वात् शीतर्त्ताः । **'विलासिनां'** भोगिनाम् । **'सौख्यमूलं'** सुखकारणम् बहुभोजनादिभोगार्हत्वात् शिशिरस्य ॥ १४७ ॥

**विषीदत्यथ पुष्पौघे, चिरं मरुबके यथा । रुचिर्मरुबके चारु, विचचार विचारिणाम् ॥ १४८ ॥**

**अथ यथा** । **'मरुबके'** मरोः मरुदेशस्य बकः बलाकः तस्मिन्, मरुबकतुल्ये । मारुदेशे बकः सीदति तद्वत् । **'पुष्पौघे'** कुसुमसमूहे । चिरं विषीदति-विषादं गच्छति सति । **'विचारिणां'** विचारशीलानां विहारशीलानां वा जनानाम् । **'रुचिः'** अभिलाषः । **'मरुबके'** तन्नामके वृक्षविशेषे । **'चारु'** सुन्दरतया । **'विचचार'** प्रससार । शिशिरसमये अन्यपुष्पसमूहाः म्लानिं यान्ति । मरुबकवृक्षस्तु विकसति । ततः विचारिणां तस्मिन् रुचिः योग्यैव ॥ १४८ ॥

**राशेर्घनप्रसूनानां, मथने शिशिरे किल । सुमनःसु श्रियं प्राप, कुन्द एव मुकुन्दवत् ॥ १४९ ॥**

**'घनप्रसूनानां'** बहुपुष्पाणाम् । **'राशेः'** समूहस्य । विष्णुपक्षे-घनप्रसूनानां मेघोत्पन्नानां जलानां राशेः जलराशेः समुद्रस्य इत्यर्थः । **'मथने'** विनाशके । पक्षे-विलोडने । **किलः** निश्चये । **'शिशिरे'** ऋतौ । **'कुन्दः'** पुष्पविशेषः । **'एवः'** अवधारणे । **'मुकुन्दवत्'** विष्णुवत् । **'सुमनःसु'** पुष्पेषु । पक्षे-देवेषु । **'श्रियं'** शोभाम् । पक्षे-लक्ष्मीम् । **'प्राप'** प्राप्तः । शिशिरे अन्यपुष्पाणां विनाशेऽपि कुन्दपुष्पं शोभां लभते । विष्णुपक्षे समुद्रमथने किल सर्वदेवेषु विष्णुना एव लक्ष्मीः प्राप्ता ॥ १४९ ॥

**शिवप्रियाद्दमनका-दवाप शिशिरः श्रियम् । दमयन्तीं सुतां भीम-भूपो वाचंयमादिव ॥ १५० ॥**

**'शिवप्रियात्'** शिवः शङ्करः प्रियः यस्य तस्मात् । **'दमनकात्'** तन्नामा मुनिः तस्मात् । **'वाचंयमात्'** मुनेः । **'भीमभूपः'** दमयन्तीपिता भीमराजा । **'सुतां दमयन्तीं'** पुत्रीं दमयन्तीम् । **'अवाप'** लब्धवान् । तद्वत् । **'शिवप्रियात्'** शिवस्य प्रियः शिवप्रियः तस्मात् । **'दमनकात्'** तन्नाम्नः पुष्पात् । (डमरो इति भाषायाम्) **'शिशिरः'** ऋतु । **'श्रियं'** शोभाम् । **'अवाप'** प्राप्तः ॥ १५० ॥

**अयं माघविचारेऽपि, कथं जाड्येन ताड्यते । विबुधोऽन्ते गुरुर्यस्य, दुःसाधार्थप्रसाधकः ॥ १५१ ॥**

‘**अयं**’ शालिभद्रः । ‘**माघविचारेऽपि**’ माघमासप्रचारेऽपि । काव्यपक्षे-माघकाव्य विचारणायामपि । माघकवेः काव्यानि श्रेष्ठानि गण्यन्ते । यदुक्तम्-उपमा कालिदासस्य, भारवेरर्थगौरवम् । दण्डिनः पदलालित्यं, माघे सन्ति त्रयो गुणाः ॥ १ ॥ **कथम्** । ‘**जाड्येन**’ शैत्येन । पक्षे मूर्खतया । ‘**ताड्यते**’ बाध्यते पक्षे-ग्रस्यते । **यस्य** । ‘**अन्ते**’ अन्तिके पार्श्वे । ‘**दुःसाधार्थप्रसाधकः**’ दुःशककार्यविधायकः । पक्षे दुर्ज्ञेयपदार्थ-प्रबोधकः । ‘**विबुधः**’ देवः । पक्षे-पण्डितः । ‘**गुरुः**’ पिता । पक्षे-अध्यापकः । अस्ति ॥ १५१ ॥

**शिशिरः किं करोत्वस्य, द्वात्रिंशद् यस्य वल्लभाः । हसन्त्यः सन्ति जाज्वल्य-माना वसुभरोद्धुराः ॥ १५२ ॥**

‘**यस्य**’ शालिभद्रस्य । ‘**जाज्वल्यमानाः**’ देदीप्यमानाः । अङ्गारशकटीपक्षे-दन्दह्यमानाः । ‘**वसुभरोद्धुराः**’ धनसमूहोत्कटाः आभूषणधारिण्यः इत्यर्थः । पक्षे अग्निभरोत्कटाः । ‘अनिलसख-वसू’ इति हैम्याम् । ‘**हसन्त्यः**’ हसनशीलाः । पक्षे-अङ्गारशकट्यः । ‘सगडी’ इति भाषायाम् । **द्वात्रिंशत्** । ‘**वल्लभाः**’ प्रियाः । **सन्ति** । ‘**अस्य**’ शालेः । **शिशिरः** । **किं करोतु** ॥ १५२ ॥

**गुणा इव महीशस्य, भाषाभेदाः कवेरिव । वादीन्द्रस्येव षट् तर्काः, प्रबलाग्ने रसा इव ॥ १५३ ॥**

**गृहाद्या इव लग्नस्य, व्रतानीव महामुनेः । सर्वेऽस्य ऋतवोऽभूवन्, पुण्याढ्यस्य सुखावहाः ॥ १५४ ॥**

‘**महीशस्य**’ राज्ञः । ‘**गुणाः इव**’ सन्धि-विग्रह-यानाऽऽसन-द्वैधाश्रया- षड् गुणाः इव । कवेः ‘**भाषाभेदाः इव**’ संस्कृत-प्राकृत-मागधी-शौरसेनी-पैशाच्यपभ्रंशलक्षणा षड् भाषाभेदाः इव । ‘**वादीन्द्रस्य**’ वादिवरस्य । ‘**तर्काः इव**’ आर्हत-

सौगत-नैयायिक-साङ्ख्य-वैशेषिक-चार्वाकशास्त्ररूपाः षट् तर्काः इव । **'प्रबलाग्नेः'** प्रबलो जठराग्निः यस्य तस्य । **'रसाः इव'** मधुराऽऽम्ल-लवण-कटु-तिक्त-कषायाः षड् रसाः इव ॥ १५३ ॥ **'लग्नस्य'** कुण्डलिकाप्रथमस्थानस्य । **'गृहाद्याः इव'** गृह-होरा-द्रेष्काण-नवांश-द्वादशांश-त्रिंशांशाः इव । **'महामुनेः'** मुनिसत्तमस्य । **'व्रतानि इव'** रात्रिभोजन सहितानि षड् व्रतानि इव । **'पुण्याढ्यस्य'** पुण्यशालिनः । **'अस्य'** शालिभद्रस्य । **'सर्वे ऋतवः'** षड् ऋतवः । **'सुखावहाः'** सुखकारिणः । **'अभूवन्'** जाताः ॥ १५४ ॥

**रत्नालोककले विमान-विमले, प्रासाद-श्रृङ्गगाङ्गणे, प्रत्यक्षामरसुन्दरीभिरभितः, कान्ताभिरभ्यन्वितः ।**
**रम्भाऽऽरम्भितनाटकैः प्रकटितं, श्रीवासवाध्यासितं, सान्द्रानन्दमन्दिताद्भुततमं श्रीशालिदेवः सदा ॥ १५५ ॥**

**( शार्दूल )**

**'रत्नालोककले'** रत्नालोकैः-रत्नप्रकाशैः कले-मनोहरे, रत्नप्रकाशानां वा कला यस्मिन् । **'विमानविमले'** विमानवत् देवविमानवद् विमले उज्ज्वले । **'प्रासादश्रृंगाङ्गणे'** सौध-चन्द्रशालाऽजिरे । **'प्रत्यक्षामरसुन्दरीभिः'** साक्षात् देवाङ्गनाभिः । **'कान्ताभिः'** प्रियाभिः । **'अभितः'** परितः । **'अभ्यन्वितः'** युक्तः । **'श्रीशालिदेवः'** देवरूपः श्रीशालिभद्रः । **'सदा'** नित्यम् । **'रम्भाऽऽरम्भितनाटकैः'** रम्भात् संरम्भात् आरम्भितैः प्रवर्तितैः नाटकैः । देवपक्षे-रम्भा-तन्नाम्नी देवी तया आरम्भितनाटकैः । **'प्रकटितं'** आविष्कृतम् । **'श्रीवासवाध्यासितं'** श्रीवासवैः-लक्ष्मीन्द्रैः लक्ष्मीपतिभिः श्रेष्ठिभिः अध्यासितं-अधिष्ठितम् । पक्षे-श्रीवासवैः श्रीदेवेन्द्रैः अध्यासितम् । **'अद्भुततमं'** अत्यद्भुतम् । **'सान्द्रानन्दं'** सान्द्रं गाढं आनन्दम् । **'अविन्दत'** प्राप ॥ १५५ ॥

**तोयान्तः प्रतिबिम्बितेन्दुतरलं, सौख्यं हि मानुष्यकं, हृल्लेखैः कलुषं च लेखसुखमप्यालेख्यसख्योन्मुखम्।**
**चिन्तासन्तिततन्तुजालकलना-ऽतीतं नितान्तं निरा-तङ्कं सत्यतया विशालममलं, श्रीशालिहेलासुखम् ॥ १५६ ॥**
**( शार्दूल )**

'**मानुष्यकं**' मनुष्याणामिदम् । '**सौख्यं**' सुखम् । **हिः** निश्चये । '**तोयान्तःप्रतिबिम्बितेन्दुतरलं**' जलान्तः प्रतिबिम्बितचन्द्रवत् तरलं चपलम् अस्ति । '**लेखसुखमपि**' देवसुखमपि । '**आलेखसख्योन्मुखं**' चित्रमैत्रीसन्मुखम् । अर्थात् चित्रवत् दर्शनेनैव रमणीयं न तु वस्तुतः । चित्राङ्किताः मोदका यथा दर्शनेनैव रमणीयाः न तु तृप्तिकारकाः, तथा देवसुखमपि। '**हृल्लेखैः**' अरतिभिः । '**कलुषं**' मलिनं च देवसुखम् । '**श्रीशालिहेलासुखं**' श्रीशालिभद्रविलाससुखं तु । '**चिन्तासन्ततितन्तुजालकलनाऽतीतं**' चिन्ता परम्परातन्तुजालघटनाभ्यः । '**अतीतं**' अतिक्रान्तम् । '**नितान्तं**' अत्यन्तम् । '**निरातङ्कं**' आतङ्करहितम् । '**सत्यतया**' सत्यरूपेण '**विशालं**' विपुलम् । '**अमलं**' मलरहितं च ॥ १५६ ॥

**श्रीशालिचरिते धर्म-कुमार सुधिया कृते । श्रीप्रद्युम्नधिया शुद्धे, तृतीयः प्रक्रमोऽभवत् ॥ १५७ ॥**

**इति कच्छवागडदेशोद्धारक तपागच्छाचार्य-विजय-कनकसूरि-प्रशिष्याचार्य विजय-कलापूर्ण सूरि-शिष्य-मुनिश्री कलाप्रभविजयजी (आ. कलाप्रभसूरि) शिष्य- मुनिश्री (पंन्यासश्री)-मुक्तिचन्द्र विजयजी-शिष्य मुनिश्री (पंन्यासश्री) मुनिचन्द्रविजय-विरचितायां श्रीशालिभद्रमहाकाव्यस्य सानुवादटीकायां तृतीयः प्रक्रमोऽभवत् ।**

**इति श्रीशालिभद्रचरिते गोभद्रागमन-ऋतुषट्क-वर्णनो नाम तृतीयः प्रक्रमः ।**

## ॥ अथ चतुर्थः प्रक्रमः ॥

**अथ श्रीशालिभोगानां, राजवैद्यविचारतः । रसवीर्यविपाकश्री-र्निष्प्रपञ्चं प्रपञ्च्यते ॥ १ ॥**

अथ '**श्रीशालिभोगानां**' श्रीशालिभद्र-भोगसुखानाम् । शालिधान्यपक्षे-कलमौदनभोजनानाम् । '**राजवैद्यविचारतः**' वैद्यराजस्य विचारतः वैद्यराजस्य विचारतः चिन्तनेन । '**रस-वीर्य-विपाकश्रीः**' शालिभद्र-भोगानां रस-वीर्य-विपाकाः तेषां श्रीः शोभा । अनासक्तियोगात् शालिभोगानां रस-वीर्य-विपाकाः शुभा एव । पक्षे ओदनानां रस-वीर्य-विपाकश्रीः । **निष्प्रपञ्चं** निश्छलम् । '**प्रपञ्च्यते**' विस्तारतः कथ्यते ॥ १ ॥

**तदा तदेव भूपीठे, राजते राजतेजसा । नगरं नग-रङ्कत्व-दायि देवगृहोन्नतेः ॥ २ ॥**

'**तदा**' तस्मिन् काले । '**देवगृहोन्नतेः**' देवालयोच्चत्वात् । '**नग-रङ्कत्वदायि**' नगानां पर्वतानां रङ्कत्वदातृ हीनतादायि । '**तदेव**' राजगृहमेव नगरम् । '**भूपीठे**' पृथ्वीतले । '**राजतेजसा**' राजतुल्येन उत्कृष्टेन तेजसा । '**राजते**' शोभते ॥ २ ॥

**त्रिवर्गवर्गणाप्राय-नरवर्गस्य यस्य च । श्रीवीरः प्रददौ मर्त्य-भवस्येवाग्रभूमिताम् ॥ ३ ॥**

'**मर्त्यभवस्य इव**' मनुष्यावतारस्य इव । '**त्रिवर्गवर्गणाप्रायनरवर्गस्य**' धर्मार्थकामलक्षण त्रिवर्गोपार्जनाप्रायो नरवर्गो यत्र तस्य नगरस्य । '**यस्य**' राजगृहस्य । '**अग्रभूमितां**' मुख्यताम् विहारादिद्वारा । '**श्रीवीरः**' चरमोऽर्हन् । **प्रददौ** । अयं भावः-यथा चतुर्गतिषु मनुष्यगतिः प्रधाना तथा सर्वनगरेषु राजगृहनगरस्य प्रधानतां श्रीवीरः प्रददौ । श्रूयते च श्रीवीरेण राजगृहनगरस्य नालन्दपाटके चतुर्दश चतुर्मासाः कृताः ॥ ३ ॥

**तदा च सर्वदेशेभ्यो, रत्नान्यखिलवस्तुषु । ऐयरुर्नररत्नाना-मकुण्ठोत्कण्ठया किल ॥ ४ ॥**

**तदा च** । '**अखिलवस्तुषु**' समस्तपदार्थेषु । '**रत्नानि**' मुख्यानि वस्तूनि । '**नररत्नानां**' नरपुङ्गवानाम् । '**अकुण्ठोत्कण्ठया**' अरुद्धोत्कण्ठया । '**किलः**' निश्चये । '**सर्वदेशेभ्यः**' नेपालादिसमस्तदेशेभ्यः । '**ऐयरुः**' आगच्छन्ति स्म ॥ ४ ॥

**देशान्तरादथाजग्मुस्तत्र वाणिज्यकारकाः । सुकुले पुण्यपण्याढ्या, जीवा इव भवान्तरात् ॥ ५ ॥**

'**भवान्तरात्**' अन्यभवात् । '**सुकुले**' शोभने कुले । '**पुण्यपण्याढ्यः**' पुण्यमेव पण्यं तैः आढ्याः । **जीवाः इव** । '**पुण्यपण्याढ्यः**' पुण्यं पवित्रं पण्यं तैः आढ्याः । '**वाणिज्य-कारकाः**' वणिजः । अथ तत्र '**देशान्तरात्**' अन्यदेशात् । '**आजग्मुः**' आगच्छन्ति स्म ॥ ५ ॥

**नेपालस्य वणिजां श्रेणिकस्य पार्श्वे समागनम्–**

**लोभाद् दुर्लभलाभस्य, विघ्नराजमिवाथ ते । श्रीश्रेणिकमहाराजं, प्रागेवाययुरुत्सुकाः ॥ ६ ॥**

**अथ** '**दुर्लभलाभस्य**'-महालाभस्य । '**लोभात्**' आशया '**विघ्नराजमिव**' गणपतिमिव । **श्रीश्रेणिकमहाराजम्** । '**प्रागेव**' प्रथममेव । '**उत्सुकाः**' आतुराः । '**ते**' वणिजः । '**आययुः**' आजग्मुः ॥ ६ ॥

**भूपतिः प्राह तान् भद्राः ! यूयं कौतस्कुता इह । अनायत्ताः समायाताकाणक्रीतक्रयाणकाः ॥ ७ ॥**

'**भूपतिः**' श्रेणिकनृपः । '**तान्**' वणिजः । '**प्राह**' वदति । '**भद्राः**' भो महानुभावाः । **यूयम्** । '**कौतस्कुताः**'

कुतस्त्याः-कुतः कुतः आगताः कुत्र निवासिनः इत्यर्थः । **'अनायत्ताः'** केषामपि नैवाधीनाः अर्थात् स्वायत्ताः । **'समायाताऽकाणक्रीतक्रयाणकाः'** समायातं अकाणक्रीतं दानचौर्यरहितक्रीतं क्रयाणकं पण्यं येषां ते वणिजः ॥ ७ ॥

**तेऽप्यूचुर्व्यवहारेण, हारेणैव महाशयाः । प्रसाधयन्ति कमलां, विमलां व्यवसायिनः ॥ ८ ॥**

**'तेऽपि'** वणिजोऽपि । **'महाशयाः'** महानुभावाः । **'हारेणैव'** मनोहरेण एव । **'व्यवहारेण'** वर्तनेन **'उचुः'** भाषितवन्तः । **'यतः'** यस्मात् । **'व्यवसायिनः'** व्यवहारिणः । **'हारेणैव'** हारिणा प्रियेण एव । **'व्यवहारेण'** व्यापारेण । **'विमलां'** विशुद्धां नीतियुतामित्यर्थः । **'कमलां'** लक्ष्मीम् । **प्रसाधयन्ति** उपार्जयन्ति ॥ ८ ॥

**सम्राड् देशेषु भूपाल ! नेपालो यत्र भूभुजाम् । शिरःसु बलधूलीव, गन्धधूल्यधिरोहति ॥ ९ ॥**

**'भूपाल'** हे राजन् ! **देशेषु सम्राट्**-मुख्यः **नेपालः** देशः अस्ति । **'यत्र'** नेपाले । **'भूभुजां'** पर्वतानाम् । पक्षे-राज्ञाम् । **'शिरःसु'** शिखरेषु । नृपपक्षे मस्तकेषु । **'बलधूलीव'** सैन्यरेणुरिव । **'गन्धधूली'** कस्तूरी । **'अधिरोहति'** आरोहति अयं भावः-यथा भूपमस्तकेषु सैन्यरेणुः पतति तथा नेपालदेशस्थितपर्वतशिखरेषु कस्तूरी अधिरोहति । कस्तूरीमृगाणां तत्राऽवस्थानात् ॥ ९ ॥

**यस्य स्फारैः स्फुरद्रत्नकम्बलैश्च बलैरिव । आकम्पः सप्रतापानां, भूपानामपि जायते ॥ १० ॥**

**यस्य च** । **'बलैरिव'** सैन्यैरिव । **'स्फारैः'** विशालैः । **'स्फुरद्रत्नकम्बलैः'** देदीप्यमानैः रत्नकम्बलैः । **'सप्रतापानां'** प्रभाव-सहितानाम् । **'भूपानामपि'** राज्ञामपि । **'आकम्पः'** शिरोधूननरूपः । सैन्यपक्षे-भयजन्यः आकम्पः । **'जायते'** भवति ॥ १० ॥

**वयं ततः समायाता, रत्नकम्बलशम्बलाः । तत्त्वां मिलन्तु रत्नानि, नयरत्नाकरं प्रभो ! ॥ ११ ॥**

'**ततः**' नेपालात् । '**रत्नकम्बलशम्बलाः**' रत्नकम्बलपाथेयाः रत्नकम्बलसहिताः इत्यर्थः । **वयं समायाताः**-समागताः । '**ततः**' तस्मात् । '**विभो**' हे स्वामिन् ! । '**प्रभो**' इत्यपि पाठः । '**नयरत्नाकरं**' नयसागरम् । **त्वाम्** । '**रत्नानि**' रत्नकम्बलानि । **मिलन्तु** । 'सङ्गच्छन्तु' इति पाठान्तरम् ॥ ११ ॥

**हेमन्ते ये धृतोष्माणः, सम्पाते विपदामिव । भीष्मग्रीष्मे सुशीताश्च, सम्पदामिव सङ्गमे ॥ १२ ॥**

**शिरीषसुकुमाराश्च, निर्विकाराश्च सर्वदा । अत्यन्तविपुलाश्चित्त-चारा इव महात्मनाम् ॥ १३ ॥**

**महामूल्यांस्ततो रत्न-कम्बलान् भूधनाय ते । अदीदृशन् प्रबुद्धाय, स्वग्रन्थान् कवयो यथा ॥ १४ ॥ ( विशेषकम् )**

'**विपदां**' दुःखानाम् । '**सम्पाते इव**' समागमे इव । '**हेमन्ते**' शीतकालसमये । '**ये**' रत्नकम्बलाः । '**धृतोष्माणः**' कृतघर्माः । '**सम्पदां**' सुखानाम् । '**सङ्गमे इव**' मीलने इव । '**भीष्मग्रीष्मे**' भीष्मे भयङ्करे ग्रीष्मे-उष्णकालसमये । '**सुशीताः**' अतिशीतलाः ॥ १२ ॥ '**महात्मनां**' महानुभावानाम् । '**चित्तचाराः इव**' मनोविचाराः इव । '**अत्यन्तविपुलाः**' अत्युदाराः । '**शिरीषसुकुमाराः**' शिरीषपुष्पवत् सुकुमाराः सुकोमलाः । '**सर्वदा**' नित्यम् । '**निर्विकारां**' विकृतिं न गच्छन्तीत्येवंशीलाः सन्ति । चः सर्वत्र समुच्चये ॥ १३ ॥ '**ततः**' तत्पश्चात् । '**ते**' वणिजः । '**महामूल्यान्**' महार्घ्यान् । रत्नकम्बलान् । '**भूधनाय**' राज्ञे । '**भूधवाय**' इत्यपि पाठः । '**अदीदृशन्**' दर्शयन्ति स्म । यथा कवयः-काव्यरचयितारः । '**स्वग्रन्थान्**' स्वरचितकाव्यशास्त्राणि । '**प्रबुद्धाय**' विदुषे दर्शयन्ति ॥ १४ ॥

**ऊर्णायुर्वर्णिकां तूर्णं, निर्वर्ण्याऽऽह नयार्णवः । दक्षाः ! साक्षात् परीक्षाऽपि, काऽप्येतेषु निरीक्ष्यते ॥ १५ ॥**

**'तूर्णं'** क्षिप्रम् । **'ऊर्णायुवर्णिकां'** रत्नकम्लबम् । **'निर्वर्ण्य'** विलोक्य । **'नयार्णवः'** नीतिनीरधिः । **'नृपः'** श्रेणिकः । **'आह'** वदति । **'दक्षाः'** हे चतुराः । **'एतेषु'** रत्नकम्बलेषु । **काऽपि परीक्षाऽपि** । **'साक्षात्'** प्रत्यक्षम् । **'निरीक्ष्यते'** दृश्यते ? ॥ १५ ॥

**तेऽप्यूचुर्माघयामिन्यां, घृतकुम्भो विलीयते । अमुनाऽऽलिङ्गितो लौहः, स्त्रीरत्नेनेव पुत्रकः ॥ १६ ॥**

**'स्त्रीरत्नेन'** चक्रिणः प्रधानराज्ञ्या । **'आलिङ्गितः'** आश्लिष्टः । **'लौहः'** लोहमयः । **पुत्रकः इव** । **'अमुना'** रत्नकम्बलेन । आलिङ्गितः । **'घृककुम्भः'** सर्पिर्घटः । **'माघयामिन्यां'** माघनिशायाम् । **'विलीयते'** द्रवति । इति **तेऽपि** वणिजोऽपि । **'ऊचुः'** वदन्ति स्म ॥ १६ ॥

**स्त्यायत्याज्यघटो भीष्मे, ग्रीष्मे मध्यन्दिनातपे । अमुष्माद् युक्तिविन्यस्तात्, सिद्धकल्काद् यथा रसः ॥ १७ ॥**

**'युक्तिविन्यस्तात्'** युक्तिपूर्वकं स्थापितात् । **'अमुष्मात्'** रत्नकम्बलात् । **'भीष्मे ग्रीष्मे'** भीषणे उष्णकाले । **'मध्यन्दिनातपे'** मध्याह्नप्रकाशे । **'आज्यघटः'** घृतकुम्भः । **'स्त्यायति'** स्त्यानीभवति । **यथा सिद्धकल्कात् रसः** स्त्यायति । 'कल्कोऽघविष्टयोः दम्भे पापिनि किट्टे च' इत्यनेकार्थः ॥ १७ ॥

**ऊर्णेयं पुण्यपूर्णानां, भोगाऽऽभोगाय जायते । भ्रूमध्यावर्तमध्यस्थमूर्णारोमेव लक्षणम् ॥ १८ ॥**

**'भ्रूमध्यावर्तमध्यस्थं'** भ्रुवोः मध्ये आवर्तः तन्मध्ये स्थितम् । **'ऊर्णारोम'** ऊर्णावत् रोमाणि यस्मिन् तत् । **लक्षणमिव** । इयं ऊर्णा-रत्नकम्बलः । **'पुण्यपूर्णानां'** सुकृतशालिनाम् जनानाम् । **'भोगाभोगाय'** विलासविस्ताराय । **'जायते'** भवति ॥ १८ ॥

**किंमूल्या इति राज्ञोक्ते, जगुस्ते जगतीपते । अमीषां स्वर्णलक्षेण, क्षुल्लं मूल्यं प्रचक्षते ॥ १९ ॥**

'**किंमूल्या**' किं मूल्यं येषां ते रत्नकम्बलाः ?" इति '**राज्ञा**' नृपेण । '**उक्ते**' कथिते सति । '**ते**' वणिजः । '**जगुः**' भाषन्ते स्म । '**जगतीपते**' हे पृथ्वीश । '**अमीषां**' रत्नकम्बलानाम् । '**स्वर्णलक्षेण**' स्वर्णमुद्राणां लक्षेण । '**क्षुल्लं**' अल्पम् । **मूल्यम्** । '**प्रचक्षते**' कथयन्ति । तज्ज्ञाः इति शेषः ॥ १९ ॥

**इति तेषां वचः श्रुत्वा, राजा विस्मितमानसः । वाणिज्यकारकान् प्राह, श्रूयतां मे विचारणा ॥ २० ॥**

'**इति**' उपर्युक्तम् । '**तेषां**' वणिजाम् । '**वचः**' वचनम् । '**श्रुत्वा**' आकर्ण्य । '**विस्मितमानसः**' आश्चर्याञ्चितचेताः । '**राजा**' श्रेणिकः । **वाणिज्यकारकान्** । '**प्राह**' वदति । '**मे**' मम । '**विचारणा**' चिन्तनम् । '**श्रूयतां**' निशम्यताम् ॥ २० ॥

**गजाश्वनररत्नानां, द्रव्यलक्षेण सङ्ग्रहः । सङ्ग्रामे विजयं धत्ते, कम्बलं किम्बलं पुनः ॥ २१ ॥**

'**द्रव्यलक्षेण**' द्रव्याणां सुवर्णमुद्राणां लक्षेण ।'**गजाश्वनररत्नानां**' हस्ति-हय-मर्त्यरत्नानाम् ।'**सङ्ग्रहः**' परिग्रहः ।'**सङ्ग्रामे**' युद्धे । **विजयम्** ।'**धत्ते**' प्रापयति । **कम्बलं पुनः** ।'**किम्बलं**' किं बलं-शक्तिः यस्य तत् । अबलमेव सङ्ग्रामे इत्यर्थः । यदुक्तम्- "लक्षेणाऽसमविक्रमः स करटी, कश्चित् समापद्यते, येनालङ्क्रियते स्वराज्यमखिलं द्वारि स्थितेनाऽप्यलम् । युद्धे वैरिबलं विजित्य निखिलं, लक्षाण्यनेकान्यपि, प्राप्यन्ते तदमीभिरत्र किमहो ! कर्तव्यमूर्णांशुकैः ?" (शार्दूल.) ॥ २१ ॥

**मार्गणेषु द्विधा राज्ञां, युज्यते लक्षयोजना । वस्त्रादिषु तु श्रृङ्गार-हारिणां व्यवहारिणाम् ॥ २२ ॥**

'**मार्गणेषु**' शरेषु याचकेषु च । '**राज्ञां**' नृपाणाम् । '**द्विधा**' द्विप्रकारा । '**लक्षयोजना**' शरपक्षे लक्ष्यवेधः याचकपक्षे

लक्षदानं तयोः योजना-घटना । **'युज्यते'** घटते । **'वस्त्रादिषु'** रत्नकम्बलादिषु । **लक्षयोजना**-लक्षस्वर्णव्ययः । **'श्रृङ्गारहारिणां'** श्रृङ्गारप्रियाणाम् । **'व्यवहारिणां'** वणिजाम् । **युज्यते** ॥ २२ ॥

**गलकम्बलवद्रत्नकम्बलस्यार्थहीनताम् । कुर्वतीत्थं नृपगवी, वर्णवित्ता यदृच्छया ॥ २३ ॥**

**चरन्ती चरणाक्षेपै र्ममर्द व्यवहारिणाम् । आशावल्लीं सुविस्तीर्णा-मपि स्थानकरोपिताम् ॥ २४ ॥**

**'इत्थं'** एवं नृपवचनेन । **'गलकम्बलवत्'** गोः कण्ठकम्बलवत् । **रत्नकम्बलस्य** । **'अर्थहीनतां'** व्यर्थताम् । **'कुर्वती'** विदधती । **'वर्णवित्ता'** अक्षरप्रसिद्धा । धेनुपक्षे वर्णधना । **'यदृच्छया'** स्वेच्छया । **'चरन्ती'** चलन्ती । पक्षे-खादन्ती चलन्ती वा । **'नृपगवी'** भूपवाणी । पक्षे-नृन् पाति दुग्धादिना इति नृपा गवी-धेनुः । **'व्यवहारिणां'** वणिजाम् । **'स्थानकरोपितां'** योग्यस्थाने आलवाले वा रोपिताम् । **'सुविस्तीर्णामपि'** सुविशालामपि । **'आशावल्लीं'** मनोरथलताम् । **'चरणाक्षेपैः'** पदाक्षेपैः । **'ममर्द'** मर्दयति स्म ॥ २३ ॥ २४ ॥

**आदानमुक्तिविच्छाया, दानमुक्तिप्रमोदिनः । वाणिज्यकारकास्तेऽपि, शालिभद्रालयं ययुः ॥ २५ ॥**

**'अदानमुक्तिविच्छाया'** ग्रहणमुक्तेः विक्रयाभावात् विच्छायाः म्लानवदनाः । **'दानमुक्तिप्रमोदिनः'** करमुक्तेः कराग्रहणात् प्रमोदभाजः । **ते वाणिज्यकारकाः अपि** व्यवहारिणोऽपि । **'शालिभद्रालयं'** शालिभद्रस्य आलयं गृहम् । **'ययुः'** गच्छन्ति स्म ॥ २५ ॥

**सार्थवाही महीकामा-ऽनड्वाही निजगोरसैः । तापं निर्वापयामास, निर्व्याजं वणिजामथ ॥ २६ ॥**

**'महीकामानड्वाही'** मह्याः पृथिव्याः कामाऽनड्वाही कामधेनुः । **'सार्थवाही'** गोभद्र सार्थवाहस्य भार्या भद्रा ।

**'निजगोरसैः'** निजवचनरसैः । धेनुपक्षे दध्यादिभिः । **वणिजाम्** । **'तापं'** चिन्तातापम् । **'निर्व्याजं'** निष्कपटम् । **'निर्वापयामास'** शान्तिं नयति स्म ॥ २६ ॥

**रत्नकम्बलसम्पत्ति-प्रश्ने प्रस्ताविते तया । तेऽचीकथन्नथ पृथुं, पृथिवीनाथसङ्कथाम् ॥ २७ ॥**

**'तया'** भद्रया । **'रत्नकम्बलसम्पत्तिप्रश्ने'** रत्नकम्बलमूल्यप्रश्ने । **'प्रस्ताविते'** उपक्रान्ते आरब्धे सति । **'पृथुं'** विशालाम् । स्वरादुतो गुणादखरोः ।२।४।३५।। इत्यनेन स्त्रीलिङ्गे पृथ्वीवत् 'पृथुः' अपि । **'ते'** वणिजः । **'पृथिवीनाथसङ्कथां'** श्रेणिकनृपवृत्तान्तम् । **'अचीकथन्'** कथयन्ति स्म ॥ २७ ॥

**भद्राऽऽह मम हे भद्राः ! मनसो रत्नकम्बलैः । भवेद् द्वात्रिंशता तृप्ति-र्नरस्य कवलैरिव ॥ २८ ॥**

**'भद्रा'** सार्थवाही । **'आह'** वदति । **'भद्राः'** हे महाशयाः । **'नरस्य'** पुरुषस्य । **द्वात्रिंशता कवलैरिव** ग्रासैरिव। **द्वात्रिंशता रत्नकम्बलैः । मम मनसः तृप्तिः** शान्तिः **भवेत्** ॥ २८ ॥

**अष्टौ स्थानानि वर्णाना-मिवाष्टौ मङ्गलानि च । अस्माकमासते रत्न-कम्बलानीति तेऽभ्यधुः ॥ २९ ॥**

**'वर्णानां'** अक्षराणाम् । **'अष्टौ स्थानानीव'** शिरःकण्ठादीनि अष्टौ उच्चारस्थानानि इव । अष्टौ मङ्गलानि इव भद्रासनादीनि इव । **अस्माकं** समीपे । **अष्टौ रत्नकम्बलानि । आसते**-सन्ति । **इति ते** वणिजः । **'अभ्यधुः'** ऊचुः ॥ २९ ॥

**वीरक्रयेण च क्रीत्वा, तानष्टौ वीरसूरसौ । प्रियाणां दानवीरस्य, क्रमसंमार्जनान्यधात् ॥ ३० ॥**

**'असौ वीरसूः'** वीरमाता भद्रा । 'वीरमाता च वीरसूः' इति हैम्याम् । **'वीरक्रयेण'** वरनरो यथा क्रीणाति तथा।

'**अष्टौ तान्**' रत्नकम्बलान् । '**क्रीत्वा**' मूल्येन आदाय । '**दानवीरस्य**' शालेः । '**प्रियाणां**' कान्तानाम् । '**क्रमसंमार्जनानि**' पादसंमार्जनरूपाणि । '**अधात्**' कृतवती ॥ ३० ॥

**किल केवलसुस्पर्शाः, पञ्चाङ्गविषयोत्तरैः । शालेरधः कृता युक्तं, स्त्रीरत्नैः रत्नकम्बलाः ॥ ३१ ॥**

'**शालेः**' शालिभद्रस्य । '**पञ्चाङ्गविषयोत्तरैः**' पञ्चाङ्गेषु पञ्चप्रकारेषु विषयेषु रूपादिषु उत्तरैः उत्तमैः । '**स्त्रीरत्नैः**' शालिप्रियाभिः । **किलः** निश्चये । '**केवलसुस्पर्शाः**' केवलः सुस्पर्शः एव येषां ते । **रत्नकम्बलाः** । **अधःकृता** पादसम्मार्जनरूपाः कृताः । '**युक्तं**' तद् युक्तमेव । अयं भावः-ते रत्नकम्बलाः किल एकसुस्पर्शगुणाः एव, शालिभद्रप्रियास्तु मनोहररूप-शब्द-गन्धादिमत्यः । अतः रत्नकम्बलेभ्यः ताः उत्तमाः । एवं शालिप्रियाभिः ते अधःकृता तद् युक्तमेव ॥ ३१ ॥

**पूर्णमूर्णायुवर्गेण, शीतभीतार्तिरक्षणैः । कृत्वा च धौतिकारूपं, देवार्चासु यदर्जितम् ॥ ३२ ॥**

**तेनागण्येन पुण्येन, स्वजातौ प्राप्य रत्नताम् । कम्बलाः शालिकान्तानामंह्रिसेवामिवासदन् ॥ ३३ ॥ ( युग्मम् )**

'**ऊर्णायुवर्गेण**' कम्बलवर्गेण । '**शीतभीतार्तिरक्षणैः**' शीतपीडितजनपीडारक्षणैः । '**देवार्चासु**' देवपूजासु । '**पूर्णं**' सम्पूर्णतया । '**धौतिकारूपं**' अधोवस्त्ररूपम । '**कृत्वा**' विधाय । '**यत्**' पुण्यम् । '**अर्जितं**' प्राप्तम् ॥ ३२ ॥ तेन अगण्येन अमितेन । '**पुण्येन**' सुकृतेन । '**स्वजातौ**' कम्बलजातौ । '**शालिकान्तानां**' शालिपत्नीनाम् । '**अंह्रिसेवामिव**' पादपर्युपासनामिव । '**कम्बलाः**' रत्नकम्बलाः । '**आसदन्**' प्राप्ताः ॥ ३३ ॥

**इमे विलोमाः कामस्य, स्कन्धारूढाः क्षमाभृताम् । भूपीठेऽलोढयंस्तेन, कामिन्यो रत्नकम्बलान् ॥ ३४ ॥**

'**क्षमाभृतां**' क्षमाश्रमणानां मुनीनाम् । '**स्कन्धारूढाः**' अंसाधिरूढाः । '**इमे**' रत्नकम्बलाः । '**कामस्य**' स्मरस्य । '**विलोमाः**' प्रतिकूलाः । भवन्ति हि मुनयः स्मरविजेतारः । '**तेन**' तस्मात् कारणात् । '**कामिन्यः**' शालिस्त्रियः । रत्नकम्बलान्। '**भूपीठे**' पृथ्वीतले । '**अलोठयन्**' अवगुण्डयन्ति स्म ॥ ३४ ॥

**जनी-जनाय सा स्थूल-लक्षा लक्षं व्ययेऽक्षिपत् । आददे स्वेन वात्सल्ये, कोटिं श्वश्रूषु विश्रुताम् ॥ ३५ ॥**

'**स्थूललक्षा**' उदारा । 'स्थूललक्षो बहुप्रदः' इति हैम्याम् । '**सा**' भद्रा '**जनीजनाय**' पुत्रवधूजनार्थम् । 'सूनोः स्नुषा जनी वधूः' इति हैम्याम् । '**व्यये**' व्ययकरणे । '**लक्षं**' शतसहस्रम् स्वर्णमुद्राणाम् । '**अक्षिपत्**' अस्यति स्म । '**स्वेन**' आत्मना । '**वात्सल्ये**' वत्सलभावे । '**श्वश्रूषु**' पतिमातृषु । '**विश्रुतां**' विख्याताम् । '**कोटिं**' उत्तमकक्षाम् । '**आददे**' जग्राह। भद्रया लक्षदानेन कोटिः गृहीता इत्यर्थः ॥ ३५ ॥

**प्रायः प्रावृट् चिरण्टीवानागतेष्टाऽऽगतां पुनः । प्रजेव शपति श्वश्रूर्न्यूनां मात्राधिकां च ताम् ॥ ३६ ॥**

'**प्रायः**' बहुधा । '**चरण्टी**' पुत्रवधूः । '**प्रावृडिव**' वर्षा इव । '**अनागता**' आगमनात् पूर्वम् । '**इष्टा**' प्रिया भवति । '**आगतां**' गृहायातां वधूम् । **पुनः** । '**श्वश्रूः**' पतिमाता । '**प्रजा इव**' जनता इव । '**न्यूनां**' हीनाम् । '**मात्राधिकां**' मात्रया अधिकाम् । **चः** समुच्चये । '**तां**' पुत्रवधूं वर्षां च । '**शपति**' आक्रोशति । यथा हीनां वर्षां जनः शपति तथा अधिकामपि शपति । एवं पुत्रवधूमपि गुणहीनां गुणाधिकां वा श्वश्रूः शपति एव ॥ ३६ ॥

**वधूमाद्रियते काचि-दप्रौढामाम्लिकामिव । जिनधर्माऽनभिज्ञेव, विद्वेष्टि महतीं पुनः ॥ ३७ ॥**

**'जिनधर्माऽनभिज्ञा इव'** जैनशासनाऽज्ञा इव । **'काचित्'** श्वश्रूः । **'अप्रौढां'** अपक्वाम् । **'आम्लिकामिव'** चिञ्चामिव। **'अप्रौढा'** लघ्वीम् । **वधूं** पुत्रवधूम् । **'आद्रियते'** सन्मानयति । **'महतीं'** प्रौढां वधूं पुनः । **'विद्वेष्टि'** विद्वेषं करोति ॥ ३७ ॥

**वधूं बालामबालां च, काचित्तु बहु मन्यते । श्वश्रूः सर्वास्ववस्थासु चूतस्येव फलावलीम् ॥ ३८ ॥**

**'काचित्'** श्वश्रूः । **'चूतस्य'** सहकारस्य । **'फलावलीमिव'** फलश्रेणिमिव । **'सर्वासु'** समस्तासु । **'अवस्थासु'** दशासु । **'बालां'** लघ्वीम् । **'अबालां'** प्रौढाम् । **वधूं बहु मन्यते**–अति सन्मानयति ॥ ३८ ॥

**सुकलत्रस्य सम्पत्तिः, पुंसां भाग्यनिबन्धनात् । या प्रीतिः जननीजन्योः, सा सौभाग्यस्य मञ्जरी ॥ ३९ ॥**

**'भाग्यनिबन्धनात्'** पुण्यवशात् । **'पुंसां'** नराणाम् । **'सुकलत्रस्य'** सुभार्यायाः । **'सम्पत्तिः'** सम्प्राप्तिः भवति । तत्प्राप्तावपि। **'जननीजन्योः'** अम्बावध्वोः । **या प्रीतिः** प्रेम । **सा** तु **सौभाग्यस्य**–पुण्योदयस्य । **'मञ्जरी'** वल्लरिः । 'मञ्जा मञ्जरि र्वल्लरिश्च सा' इति हैम्याम् । विरलविरलैव दृश्यते विश्वे श्वश्रूः–वधू–प्रीतिः । ॥ ३९ ॥

**धर्मसिद्धिः प्रसिद्धिश्च, तस्य सिद्धिसमृद्धिदे । कविता च सुगीतिश्च, तस्याभ्यासवशंवदे ॥ ४० ॥**

**दिव्यमन्त्रमयी सिद्धिः, तस्य बुद्धिश्च निश्चिते । जाह्नवी-यमुने मन्ये, तस्य सीमासु खेलतः ॥ ४१ ॥**

**लोकद्वयहिता माता, गृहिणी च मनोमता । यस्य गेहे च [ ऽव ? ] तिष्ठेते, प्रीतिशीते परस्परम् ॥ ४२ ॥ ( विशेषकम् )**

यस्य गेहे मन्दिरे। **'लोकद्वयहिता'** इहलोकपरलोक–कल्याणी। **'माता'** जननी। **'मनोमता'** चेतोऽभीष्टा। **चः** समुच्चये ।

**'गृहिणी'** पत्नी । **'परस्परं'** मिथः । **'प्रीतिशीते'** प्रीत्या प्रेम्णा शीते शीतले कलहाभावात् । **[ अव ? ] 'तिष्ठेते'** वसतः । **तस्य धर्मसिद्धिः**–सुकृतसिद्धिः । **'प्रसिद्धिश्च'** कीर्तिश्च । **'सिद्धिसमृद्धिदे'** मुक्तिभुक्तिप्रदे भवतः । **'सिद्धेः समृद्धिदे'** इत्यपि पाठः । **'कविता च'** काव्यं च । **'सुगीतिश्च'** सङ्गीतं च । **तस्य** । **'अभ्यासवशंवदे'** अभ्यासाधीने । **तस्य 'दिव्यमन्त्रमयी'** उत्कृष्टमन्त्रपूर्णा । **'सिद्धिः'** प्राप्तिः । **'बुद्धिश्च'** मतिश्च । **'निश्चिते'** निर्णीते । **तस्य 'सीमासु'** अङ्गने इत्यर्थः । **'जाह्नवीयमुने'** गङ्गायमुने । **'खेलतः'** क्रीडतः । इत्यहं **मन्ये**–चिन्तयामि । दुष्करदुष्करा खलु जनी–जननी प्रीतिः ॥ ४० ॥ ४१ ॥ ४२ ॥

**श्वश्रूवध्वौ वातपित्त–प्रकृती इव के अपि । परस्परविरोधिन्यौ, सपत्नीभावमापतुः ॥ ४३ ॥**

**'वातपित्तप्रकृती इव'** वायुमायुस्वभावौ इव । 'पित्तं मायुः' इति हैम्याम् । **'परस्परविरोधिन्यौ'** मिथः प्रतिकूले । **'के अपि'** श्वश्रू–वध्वौ–जनीजनन्यौ । **'सपत्नीभावं'** शत्रु–भावम् । **'आपतुः'** प्राप्नुतः स्म ॥ ४३ ॥

**धूर्तमैत्र्याऽथ केचिच्च, स्वार्थसार्थसमर्थने । बिभ्रतो निभृतं मन्त्रि–पारिग्रहिकविग्रहम् ॥ ४४ ॥**

**अथ केचिच्च**–के अपि च श्वश्रूवध्वौ । **'स्वार्थसार्थसमर्थने'** निजप्रयोजनसमूहसमर्थने । समर्थनैरित्यपि पाठः **'धूर्तमैत्र्या'** कपटसुहृत्तया । **'मन्त्रिपारिग्रहिकविग्रहं'** मन्त्रिकोशाध्यक्षयोः इव, **'निभृतं'** मौनपूर्वकम्, **'विग्रहं'** युद्धम् । **बिभ्रतः** धारयतः । अयं भावः–यथा मन्त्री कोषाध्यक्षात् द्रव्यमिच्छति, कोशाध्यक्षश्च मन्त्रिसकाशात् अधिकारमिच्छति, एवं द्वावपि अन्तर्द्वेषिणौ बाह्याचारेण मैत्रीं धारयतः । तथा के अपि श्वश्रु–वध्वावपि ॥ ४४ ॥

**एकस्वभावसुभगे, समप्राधान्यमान्यते । दृष्टी इवावतिष्ठेते, सखीसौख्येन के अपि ॥ ४५ ॥**

**'एकस्वभावसुभगे'** एक स्वभावात्च समप्रकृतेः सुभगे प्रिये । **'समप्राधान्यमान्यते'** समं प्राधान्यं–सत्ता समा

च मान्यता ययोः ते । **'के अपि'** श्वश्रूवध्वौ । **'दृष्टी इव'** नयने इव । **'सखीसौख्येन'** सखीवत् वयस्यावत् सौख्येन सुखेन। **'अवतिष्ठेते'** वसतः ॥ ४५ ॥

**योगक्षेमक्षमे मूल-स्नपनप्रतिमे इव । जननीनन्दिनीप्रीत्या, व्याप्रियेते च केचन ॥ ४६ ॥**

**'मूलस्नपनप्रतिमे इव'** मूलनायकस्नपनप्रतिमे इव । मन्दिरगर्भगृहस्थिता मूलनायकप्रतिमा । या लघ्वी प्रतिमा स्नात्रार्थं बहिरपि आनीयते सा स्नपनप्रतिमा । **'योगक्षेमक्षमे'** अप्राप्तस्य प्रापणं योगः, प्राप्तस्य रक्षणं क्षेमं तत्र क्षमे-समर्थे । **'केचन'** श्वश्रू-वध्वौ । **'जननी-नन्दिनीप्रीत्या'** अम्बापुत्रीप्रीत्या । **'व्याप्रियेते'** प्रवृत्तिं कुरुतः ॥ ४६ ॥

**भद्रायास्तु स्नुषा एव, पुत्रात् पुत्र्याश्च वल्लभाः । जीवितव्याच्च लक्ष्म्याश्च, सत्याः शीलकला इव ॥ ४७ ॥**

**'सत्याः'** सतीस्त्रियाः । **'शीलकलाः इव'** शीलपालनप्रयत्नाः इव । **भद्रायास्तु** । **'पुत्रात्'** सूनोः । **'पुत्र्याः'** तनयायाः । **'जीवितव्यात्'** जीवनात् । **'लक्ष्म्याश्च'** सम्पत्तेश्च । **'स्नुषाः एव'** पुत्रवध्वः एव । **'वल्लभाः'** प्रियाः । अभूवन् ॥ ४७ ॥

**रत्नकम्बलस्य कृते चेल्लणायाः आग्रहः—**

**इतश्च चेल्लणादेवी, दासीविज्ञप्तिकावशात् । रत्नकम्बलवृत्तान्तं, श्रुत्वा राज्ञे व्यजिज्ञपत् ॥ ४८ ॥**

**'इतश्च'** श्रेणिकराजभवने च । **'दासीविज्ञप्तिकावशात्'** चेटीज्ञापनकारणात् । **'चेल्लणादेवी'** श्रेणिकमहिषी । **'रत्नकम्बलवृत्तान्तं'** नेपालदेशतः रत्नकम्बलविक्रेतारः राजमन्दिरे आयाताः राज्ञा च एकोऽपि रत्नकम्बलो न गृहीतः इत्येवं वृत्तान्तम् । **'श्रुत्वा'** आकर्ण्य । **'राज्ञे'** श्रेणिकाय । **'व्यजिज्ञपत्'** ज्ञापितवती ॥ ४८ ॥

**महीं चारयता युक्त्या, विचार्य किमु कारणम् । त्वया दण्डभृताऽग्राहि, न महीपाल ! कम्बलः ॥ ४९ ॥**

'**महीपाल**' हे भूपाल ! पक्षे-गोपाल ! (मही-धेनु) । '**युक्त्या**' युक्तिपूर्वकम् । '**महीं**' पृथ्वीम् । गोपालपक्षे-गाम् । '**चारयता**' शासता पालयता । पक्षे-चारयता । '**दण्डभृता**' करग्राहिणा । पक्षे दण्डधरेण गोपालेन । **त्वया** । '**कम्बलः**' रत्नकम्बलः । पक्षे-ऊर्णायुः । '**किमु कारणम्**' कं हेतुम् । **विचार्य** चिन्तयित्वा '**न अग्राहि**' न गृहीतः ? ॥ ४९ ॥

**श्रीनिकाय्य ! प्रणाय्योऽपि, कम्बलः प्राज्यपाज्यभूः । प्रसह्य मह्यमानाय्य, सप्रदर्पं समर्प्यताम् ॥ ५० ॥**

'**श्रीनिकाय्य**' हे लक्ष्मीमन्दिर ! 'निकाय्यो भवनं कुट' इति हैम्याम् । '**प्राज्यपाज्यभूः**' बहुमानस्थानभूतम् । '**प्रणाय्योऽपि**' असम्मतोऽपि । 'प्रणाय्योऽसम्मतः' इति हैम्याम् । '**कम्बलः**' रत्नकम्बलः । '**प्रसह्य**' बलात् । '**मह्यं**' मदर्थम् । '**सप्रदर्पं**' साहङ्कारम् । '**आनाय्य**' ग्राहयित्वा । '**समर्प्यतां**' दीयताम् ॥ ५० ॥

**अथ लक्षव्यये बद्धलक्षः क्षोणिपतिः क्रमात् । भेदकं प्राञ्जलं तत्र, प्रैषीत् पुरुषमाशुगम् ॥ ५१ ॥**

**अथ लक्षव्यये**-शतसहस्रस्वर्णव्ययकरणे । '**बद्धलक्षः**' दत्तचेताः । '**क्षोणिपतिः**' पृथ्वीशः श्रेणिकः । '**क्षणात्**' तूर्णम् । '**तत्र**' रत्नकम्बलव्यहारिपार्श्वे । '**भेदकं**' वाणिज्यकारके भेदोत्पादकम् । '**प्राञ्जलं**' बाह्याचारेण ऋजुम् । '**आशुगं**' शीघ्रगामिनम् । **पुरुषं प्रैषीत्**-प्राहिणोत् ॥ ५१ ॥

**तेनादिश्यन्त वणिजः प्रयत्नाद् रत्नकम्बलान् । मन्त्रानिव सुदुर्लम्भान्, राजा प्रत्युत याचते ॥ ५२ ॥**

'**तेन**' पुरुषेण । '**प्रयत्नात्**' प्रयासात् । '**वणिजः**' व्यवहारिणः । '**आदिश्यन्ता**' आदिष्टाः । **मन्त्रानिव सुदुर्लम्भान्**-सुदुष्प्रापान् रत्नकम्बलान् । **राजा प्रत्युत याचते**-ग्रहीतुमिच्छति ॥ ५२ ॥

**तैरूचेऽनादृतान् राज्ञा, कमलानीव कम्बलान् । स्वीचक्रे हेलया शालिमाता हेलिप्रभेव तान् ॥ ५३ ॥**

'**तैः**' वणिग्भिः । '**ऊचे**' कथितम् । '**राज्ञा**' नृपेण । पक्षे-चन्द्रेण । 'राजा निशारत्नकरौ च चन्द्रः' इति हैम्याम् । '**अनादृतान्**' अस्वीकृतान् । '**कमलानीव**' पद्मानि इव । '**कम्बलान्**' रत्नकम्बलान् । '**हेलिप्रभा इव**' सूर्यप्रभा इव । 'द्वादशात्मा च हेलिः' इति हैम्याम् । '**शालिमाता**' भद्रा । '**तान्**' रत्नकम्बलान् । '**स्वीचक्रे**' गृहीतवती । **राज्ञा** (चन्द्रेण) **अनादृताः** कमलतुल्याः रत्नकम्बलाः सूर्यप्रभातुल्यया भद्रया गृहीताः । विकसन्ति हि कमलानि सूर्यप्रभया इति भावः ॥ ५३ ॥

**तेनाऽभ्येत्य नृपायैवं, स्वरूपेऽथ निरूपिते । विस्मितः सस्मितश्चेति, भूपतिः पर्यभावयत् ॥ ५४ ॥**

**अथ** । '**तेन**' नरेण । '**अभ्येत्य**' समागत्य । '**नृपाय**' राज्ञे । '**एवं स्वरूपे**' इतिवृत्तान्ते । '**निरूपिते**' ज्ञापिते । '**विस्मितः**' आश्चर्यान्वितः । '**सस्मितश्च**' स्मितसहितश्च । '**भूपतिः**' राजा । '**इति**' अग्रे वक्ष्यमाणम् । '**पर्यभावयत्**' विचारयति स्म ॥ ५४ ॥

**स्नुहिर्महातरुर्वह्निर्बृहद्भानुर्यथोच्यते । सारतेजोवियोगेऽपि, नरदेवास्तथा वयम् ॥ ५५ ॥**

**यथा** । '**स्नुहिः**' वज्रवृक्षः ('थोर' इति भाषायाम्) 'स्नुहिर्वज्रो महातरुः' इति हैम्याम् । '**महातरुः**' इति नाम्ना । '**उच्यते**' कथ्यते । **यथा** । '**वह्निः**' अग्निः । '**बृहद्भानुः**' इति नाम्ना । 'वह्निर्बृहद्भानुः' इति हैम्याम् । **उच्यते** । **तथा** '**सारतेजोवियोगेऽपि**' सारतेजसः प्रतापस्य वियोगेऽपि विरहेऽपि वयं नरदेवाः इति अभिधानधारिणः एव, न परमार्थतः ॥ ५५ ॥

**पूर्वमेताननादित्सुः, कृपणः कलितो जनैः । अहं साम्प्रतमेवेच्छुर्व्यञ्जितः स्त्रीजितः पुनः ॥ ५६ ॥**

'**पूर्वं**' प्रथमम् । '**एतान्**' रत्नकम्बलान् । '**अनादित्सुः**' अग्रहणेच्छुः । **अहम्** । **जनैः कृपणः**-कदर्यः । '**कलितः**'

ज्ञातः । **'साम्प्रतमेव'** अधुनैव । **'तदिच्छुः'** कम्बलग्रहणेच्छुः । **अहं पुनः** । **'स्त्रीजितः'** महिलापराभूतः, **'व्यञ्जित'** प्रकाशितः ॥ ५६ ॥

**तथापि श्रीमहादेव्याः, कर्ताऽस्मि मनसः प्रियम् । यदेकस्तम्भसंस्त्यायश्रद्धाऽपूरि पुरा मया ॥ ५७ ॥**

**तथापि** । **'श्रीमहादेव्याः'** श्रीचेल्लणायाः । **मनसः प्रियम्** । **'कर्ताऽस्मि'** करिष्यामि । **'यत्'** यतः । **'पुरापि'** पूर्वमपि । **मया** । **'एकस्तम्भसंस्त्यायश्रद्धा'** एकस्तम्भधवलप्रासादाभिलाषः । 'पस्त्यं संस्त्याय आश्रयः' इति हैम्याम् । **'अपूरि'** पूरितः ॥ ५७ ॥

**विमृश्येति प्रतीहारं, प्रैषीद् भद्रां प्रति प्रभुः । कम्बलाय जलायाब्धितटीमब्दमिवाशुगः ॥ ५८ ॥**

**'इति विमृश्य'** इत्थं विचिन्त्य । **'प्रभुः'** श्रेणिकः । **'आशुगः'** वायुः । 'पवनाशुगौ' इति हैम्याम् । **'जलाय'** सलिलाय । **'अब्धितटीं'** समुद्रतटम् । **'अब्दमिव'** मेघमिव । **'प्रतीहारं'** वेत्रिणम् । **'कम्बलाय'** रत्नकम्बलाऽऽनयनार्थम् । **भद्रां प्रति** प्राहिणोत् । अयं भावः-यथा वायुः जलदान् जलार्थं जलधिं प्रति गमयति तथा श्रेणिकः कम्बलार्थं प्रतीहारं भद्रां प्रति अजीगमत् ॥ ५८ ॥

**तत्रैत्य वेत्री श्रीशालि-सावित्रीमित्यभाषत । आदेशो वासवस्येवा-देशं दत्ते नृपः शुभे ! ॥ ५९ ॥**

**'तत्र'** भद्रागृहे । **'एत्य'** आगत्य । **'वेत्री'** प्रतीहारः । **'श्रीशालिसावित्रीं'** श्रीशालिभद्रमातरम् । **'इति'** एवम्भूतम्, **'अभाषत'** उक्तवान् । **'शुभे'** हे कल्याणि । **'वासवस्य'** इन्द्रस्य । **'आदेशः इव'** आज्ञा इव । **'नृपः'** श्रेणिकभूपः । **'आदेशं दत्ते'** आज्ञां करोति ॥ ५९ ॥

**यथामूल्यममूल्योऽपि, रत्नवद् रत्नकम्बलः । दीयतां दयितो देव्या, ग्रहशान्तिविधौ बलिः ॥ ६० ॥**

**'ग्रहशान्तिविधौ'** शन्यादिग्रहाणां शान्तेः विधौ-अनुष्ठाने । **'बलिः इव'** उपहारः इव । 'उपहारबली समौ' इति हैम्याम्। देवीपक्षे-ग्रहः रत्नकम्बलग्रहणे ग्रहः आग्रहः तस्य शान्तौ । **'देव्याः'** चेल्लणायाः । **'दयितः'** प्रियः । **रत्नवत् अमूल्योऽपि रत्नकम्बलः** । **'यथामूल्यं'** मूल्यमनतिक्रम्य । **'दीयतां'** समर्प्यताम् ॥ ६० ॥

**पद्मासन्नप्रसन्नास्यमुद्रा भद्रा जगाद तम् । मूल्यं हृत्प्रातिकूल्यं च, स्वाम्यादेशे न शस्यते ॥ ६१ ॥**

**'पद्मासन्नप्रसन्नास्यमुद्रा'** पद्मे-कमले आसन्ना-उपविष्टा लक्ष्मीरित्यर्थः, लक्ष्मीवत् प्रसन्ना विषादरहिता आस्यमुद्रा मुखमुद्रा यस्याः सा। **'भद्रा'** शालिमाता। **'तं'** प्रतीहारम्। **'जगाद'** उवाच। **'स्वाम्यादेशे'** राजाज्ञायाम्। **'मूल्यं'** वस्नम्। **'हृत्प्रतिकूल्यं'** हृदः चेतसः प्रातिकूल्यं वैपरीत्यम् । **चः** समुच्चये । **'न शस्यते'** न युज्यते, न चिन्त्यते इत्यर्थः ॥ ६१ ॥

**किन्तु मन्दतरायातस्त्वं प्राप्ताऽसि न हि प्रियम् । वाहावृषभवद्देवस्वर्णपट्टमिव स्फुटम् ॥ ६२ ॥**

**किन्तु वाहावृषभवत्**-शकटवृषभवत् **'देवस्वर्णपट्टमिव'** देवस्य सुवर्णपट्टमिव । देयस्वर्णपट्टमित्यपि पाठः । शकटवृषभाः देवपट्टं स्वर्णपट्टं नैव प्राप्नुवन्ति तद्वत् । **'मन्दतरायातः'** विलम्बेन आगतः । **त्वम्** । **'प्रियं'** इष्टरत्नकम्बलम् । **'नहि प्राप्ताऽसि'** नैव लब्धाऽसि ॥ ६२ ॥

**यतस्तानागतानैवौरभ्रानभ्रपुटानिव । दीपालयकृतेऽभैत्सं, वधूकार्याय सार्जवा ॥ ६३ ॥**

**'यतः'** यस्मात्। **'आगतानेव'** आयातानेव। **'तान् औरभ्रान्'** ऊर्णायून् रत्नकम्बलान्। **'दीपालयकृते'** प्रदीपगृहार्थम्।

('फानस' इति भाषायाम्) **'अभ्रपुटानिव'** अभ्रकपुटानिव, प्रदीपगृहे काचस्थाने तदा अभ्रकाणां प्रयोगः सम्भाव्यते । **'सार्जवा'** आर्जवसहिता सरला अहम् । **'वधूकार्याय'** पुत्रवध्वर्थम् । **'अभैत्सं'** पाटितवती ॥ ६३ ॥

**प्रत्यक्षो देव एवास्ते, सूनुर्मे तस्य वल्लभाः । द्वात्रिंशत् सह्यशय्यास्था, नव्याः काव्यस्तुतिप्रभाः ॥ ६४ ॥**

**मम सूनुः**-पुत्रः शालिभद्रः । **'प्रत्यक्षः'** साक्षात् **देवः एव आस्ते**-वर्तते । **तस्य नव्याः**-नवीना **'काव्यस्तुतिप्रभाः'** काव्यैः स्तुति प्रशस्तिः प्रभा कान्तिश्च यासां ताः । **'सह्यशय्यास्थाः'** सह्यो महेन्द्रपर्वतः तद्वत् उच्चा शय्या-शयनीयं तस्यां स्थिताः । अथवा सह्यं आरोग्यं तद्रूपा शय्या तस्यां स्थिताः । 'सह्याऽऽरोग्ये' इति हैम्याम् । **द्वात्रिंशद् वल्लभाः**-प्रियाः सन्ति ॥ ६४ ॥

**तासां श्रृङ्गारसाराणां, सुकुमारपदस्थितौ । मया न्यस्ता विभागेनाऽलङ्कारा इव कम्बलाः ॥ ६५ ॥**

**'श्रृङ्गारसाराणां'** शोभासाराणाम् । काव्यस्तुतिपक्षे-श्रृङ्गाररसप्रधानानाम् । **'तासां'** वल्लभानाम् । पक्षे-काव्यस्तुतीनाम् । **'सुकुमारपदस्थितौ'** सुकोमलचरणस्थाने पक्षे सुकुमाराणां पदानां, स्त्याद्यन्तं पदं तेषां स्थितौ-स्थाने । **मया** । **'अलङ्काराः इव'** भूषणानीव । पक्षे-श्लेषाद्याः काव्यशास्त्रोक्ताः अलङ्कारा इव । **'कम्बलाः'** रत्नकम्बलाः । **'विभागेन'** पाटनाद् विभागकरणेन । पक्षे-श्लेषादिविभागेन । **'न्यस्ताः'** स्थापिताः ॥ ६५ ॥

**परं परः शताः सन्ति, चिरत्ना रत्नकम्बलाः । कार्यक्षमाः क्षमाभर्त्तुर्यदि ते तन्निवेद्यताम् ॥ ६६ ॥**

**'परं'** परन्तु । **'चिरत्नाः'** चिरन्तनाः । **रत्नकम्बलाः** । **'परःशताः'** शताधिकाः । परः शतादि ।३।१।७५॥ इत्यनेन निपातः । **'सन्ति'** मत्पार्श्वे वर्तन्ते । **यदि** । **'ते'** कम्बलाः । **'क्षमाभर्तुः'** राज्ञः श्रेणिकस्य । **'कार्यक्षमाः'** कार्ये समर्थाः । **'तत्'** तर्हि । **'निवेद्यतां'** ज्ञाप्यताम् ॥ ६६ ॥

**स कीदृगस्यास्तनयः, किंरूपास्तस्य ताः प्रियाः । इत्यसौ विस्मितोऽभ्येत्य, वेत्री राज्ञे व्यजिज्ञपत् ॥ ६७ ॥**

'**अस्याः**' भद्रायाः । '**सः तनयः**' शालिभद्रः कीदृग् ? **तस्य ताः प्रियाः किंरूपाः**–कीदृश्यः ? इति विचारणात् '**विस्मितः**' आश्चर्यमग्नः । '**वेत्री**' प्रतीहारः '**अभ्येत्य**' आगत्य । '**राज्ञे**' श्रेणिकाय । '**व्यजिज्ञपत्**' ज्ञापितवान् ॥ ६७ ॥

**हेलायां वणिजस्तस्य, वेलायामिव वारिधेः । निमज्जति महेन्द्रोऽपि, के स्वल्पे भूभृतः परे ॥ ६८ ॥**

'**वारिधेः**' समुद्रस्य । '**वेलायामिव**' समुद्रजलविकारे इव । '**तस्य वणिजः**' व्यवहारिणः' '**हेलायां**' विलासे । '**महेन्द्रोऽपि**' सुरेन्द्रोऽपि समुद्रपक्षे–महेन्द्रपर्वतोऽपि । '**निमज्जति**' ब्रुडति । तर्हि । '**स्वल्पे**' अत्यन्तक्षुद्राः । 'नेमाऽर्ध' ।१।४।१०॥ इत्यनेन प्रथमाबहुवचने अल्पे अल्पाः वा । '**परे**' अन्ये । '**भूभृतः**' राजानः पक्षे–गिरयः । '**के**' कियन्मात्राः ? ते तु सुतरां निमज्जन्ति एव ॥ ६८ ॥

**यतः श्रीशालिभद्रस्य, जननी मन्त्रवित्तमा । प्रत्यङ्गिरामहामन्त्रमण्डलोद्धारकर्मणि ॥ ६९ ॥**

**मूलमन्त्रपरीवारे, स्नुषाः कूटाक्षरप्रभाः । औरभ्रकेतकी पत्रशकलैः समभावयत् ॥ ७० ॥**

'**यतः**' यस्मात् । '**प्रत्यङ्गिरामहामन्त्रमण्डलोद्धारकर्मणि**' '**प्रत्यङ्गिरा**' मन्त्रमहोदधिशास्त्रोक्ता तन्नाम्नी देवी तस्याः मन्त्रमण्डलस्य उद्धारकर्मणि । '**मन्त्रवित्तमा**' मन्त्रवित्सु मुख्या । '**श्रीशालिभद्रस्य जननी**' भद्रा माता ॥ ६९ ॥

'**मूलमन्त्रपरीवारे**' मूलमन्त्रस्य परीवारे । '**कूटाक्षरप्रभाः**' कूटाक्षरवत् प्रभाः यासां ताः । '**स्नुषाः**' पुत्रवधूः । '**औरभ्रकेतकीपत्रशकलैः**' कम्बलरूपैः केतकीपर्णखण्डैः । '**समभावयत्**' अपूजयत् । अयं भावः–यथा

'**प्रत्यङ्गिरादेवीमन्त्रमण्डलोद्धारे** मान्त्रिकाः मूलमन्त्रपरिवारे कूटाक्षराणि केतकीपत्रैः पूजयन्ति तथा शालिमात्रा भद्रया रत्नकम्बलैः पुत्रवध्वः पूजिताः इति श्रेणिकं प्रति प्रतीहारोक्तिः ॥ ७० ॥

**वारयन्तु पुराणास्तु, महाग्राहमिवाग्रहम् । देव्या रङ्गतरङ्गिण्या, आविका नाविका इव ॥ ७१ ॥**

'**नाविकाः इव**' कर्णधाराः इव । '**पुराणाः**' चिरन्तनाः । '**आविकाः**' कम्बलाः । '**रङ्गतरङ्गिण्याः**' विलासनद्याः । '**देव्याः**' चेल्लणायाः । '**महाग्राहमिव**' दुष्टजलजन्तुमिव '**आग्रहं**' स्त्रीग्रहम् । '**निवारयन्तु**' दूरीकुर्वन्तु ॥ अयं भावः- यथा नाविकाः नद्यां ग्राहाभिधजलजन्तुं निवारयन्ति तथा भद्रायाः पुराणाः रत्नकम्बलाः चेल्लणायाः आग्रहं निवारयन्तु । भद्रापार्श्वात् चेल्लणाकृते पुराणान् रत्नकम्बलान् गृह्णातु भवानित्यर्थः ॥ ७१ ॥

**सार्थवाही सार्थवाही-दृशं सदृशमात्मनः । निर्व्याजं व्याजहारेति, विज्ञप्ता चेल्लणाऽवदत् ॥ ७२ ॥**

'**सार्थवाही**' वणिक्पत्नी भद्रा । '**आत्मनः सदृशं**' स्वोचितम् । '**इदृशं**' एवंरूपम् । '**सार्थवाहि**' अर्थसहितं कार्यम् । '**निर्व्याजं**' निश्छलम् । '**व्याजहार**' कथयामास इति राज्ञा '**विज्ञप्ता**' ज्ञापिता । **चेल्लणा** । '**अवदत्**' उवाच ॥ ७२ ॥

**अहं साहित्यविद्येव, श्रृङ्गारहृदयङ्गमा । शिरःशून्यकथारूपैः पुराणैः किं करोमि तैः ॥ ७३ ॥**

**अहं साहित्यविद्या इव** । '**श्रृङ्गारहृदयङ्गमा**' श्रृङ्गारः भूषणादिकं हृदयङ्गमा-प्रियः यस्याः सा । साहित्यविद्यापक्षे श्रृङ्गाररसेण हृदयङ्गमा । '**तैः शिरःशून्यकथारूपैः**' मुख्यभागरहितैः कन्थारूपैः (कन्था-'गोदडी' इति भाषायाम्) पक्षे-मस्तकरहिता-तर्कविचारशून्या कथा तद्रूपैः । '**पुराणैः**' जीर्णैः । पक्षे-पुराणशास्त्रैः । **किं करोमि** । यथा साहित्यरसिकाय तर्कशून्यानि पुराणशास्त्राणि नैव रोचन्ते तथा मह्यं कन्थातुल्याः पुराणाः कम्बलाः नैव रोचन्ते इति चेल्लणोक्तिः ॥ ७३ ॥

**एक आत्महितार्थेऽपि, त्वया नादायि कम्बलः । आमुष्मिकं द्विषां भीष्म ! कदर्येणेव शम्बलम् ॥ ७४ ॥**

**'द्विषां भीष्म'** शत्रूणां भयङ्कर हे भूप ! । **'कदर्येण'** कृपणेन । **'आमुष्मिकं'** पारलौकिकम् । **'शम्बलमिव'** पाथेयमिव । शम्बलशब्दः पुंक्लीबलिङ्गः, अत्र प्रथमान्तः कर्मणि प्रयोगे । **'त्वया'** राज्ञा । **'आत्महितार्थे'** आत्महिताय आत्मीयजनाय । कदर्यपक्षे आत्मनः कल्याणाय । **एकोऽपि कम्बलः** रत्नकम्बलः । **'न आदायि'** न गृहीतः ? यथा कृपणः दानादिना पारलौकिकपाथेयं न गृह्णाति तथा हे राजन् ! त्वया अस्मत्कृते एकोऽपि कम्बलः न गृहीतः इत्यर्थः ॥ ७४ ॥

**क्व जन्तुजातजीवातु-र्जीमूतः क्व महाम्बुधिः । क्व वा मलयशैलेशः, क्व च मेरुरगोचरः ॥ ७५ ॥**

**नर-जन्मावतारः क्व ? क्व वासवपदोदयः ? सहकारतरुः कुत्र ? कुत्र जम्बूः सुदर्शनः ? ॥ ७६ ॥**

**सर्वाङ्गसुभगाभोगः क्व शालिविभवोद्भवः । क्वाभिमानसुखास्वादः, स्वामिंस्ते राज्य-विस्तरः ॥ ७७ ॥**

**क्व जन्तुजातजीवातुः**–प्राणिसमूहजीवनौषधः । **'जीमूतः'** मेघः ? **क्व 'महाम्बुधिः'** महासागरः ? **क्व वा मलयशैलेशः**–मलयाद्रिः ? **क्व च अगोचरः**–अस्मादृशाम् अविषयः मेरुः ? ॥ ७५ ॥ **क्व नरजन्मावतारः**–मानव-जन्मप्राप्तिः ? **क्व वासव-पदोदयः**–इन्द्रपदोदयः ? **कुत्र 'सहकारतरुः'** आम्रवृक्षः ? **कुत्र 'सुदर्शनः जम्बूः'** सुदर्शन-नामा जम्बूवृक्षः ? ॥ ७६ ॥ **क्व शालिविभवोद्भवः**–शालिसमृद्धिजातः **सर्वाङ्गसुभगाभोगः**–सर्वाङ्गसुभगविस्तरः ? **'स्वामिन्'** हे नाथ ? **क्व च ते अभिमानसुखास्वादः** अभिमानः एव सुखास्वादः यत्र सः । **राज्यविस्तरः** ? यथा मानवलोके मेघमलयमनुष्यसहकारादयः उपयोगिनो भवन्ति न तथा सागरमेरुदेवेन्द्र-जम्बूवृक्षादयः, तथा शालिभोगाः कार्यभाजः, न तव राज्यविस्तरः इति श्रेणिकं प्रति चेल्लणोक्तिः ॥ ७७ ॥

**यासां प्रमाणे पुण्यस्य, याति ब्रह्माऽपि जिह्मताम् । तस्य ता गृहिणीत्वेन, प्रमदाः प्रमदास्पदम् ॥ ७८ ॥**

'**तस्य**' शालिभद्रस्य । '**गृहिणीत्वेन**' पत्नीत्वेन । **ताः प्रमदाः**-कान्ताः । '**प्रमदास्पदं**' हर्षस्थानम् । '**यासां**' शालिपत्नीनाम्। '**पुण्यस्य**' सुकृतस्य । '**प्रमाणे**' मानकरणे । '**ब्रह्माऽपि**' विधिरपि । '**जिह्मतां**' मन्दताम् । '**याति**' गच्छति। शालिपत्नीपुण्यप्रमाणकरणे ब्रह्माऽपि मन्दमतिः स्यादित्यर्थः ॥ ७८ ॥

**सौराज्यश्रीस्तव न्यायगम्भीरक्षीरनीरधेः । आविष्कृताऽनन्तभोगभाजा श्रीपतिनाऽमुना ॥ ७९ ॥**

'**अनन्तभोगभाजा**' अगण्यभोगभोगिना । विष्णुपक्षे-शेषाहिशरीरशायिना । विष्णुः किल क्षीरसमुद्रे शेषाहिशरीरोपरि स्वपिति इति पौराणिकाः । अनन्तः शेषाहिः । '**श्रीपतिना**' सम्पत्तिपतिना । पक्षे-लक्ष्मीपतिना विष्णुना । '**अमुना**' शालिभद्रेण। '**न्यायगम्भीरक्षीरनीरधेः**' न्याये न्यायकरणे गम्भीरक्षीरनीरधिः गम्भीरक्षीरसागरः तत्तुल्यस्य । यथा समुद्रः मर्यादां न उल्लङ्घते तथा राजाऽपि न्यायमर्यादां न उल्लङ्घते । '**तव**' श्रेणिकस्य । '**सौराज्यश्रीः**' शोभनराज्यलक्ष्मीः । '**आविष्कृता**' प्रकटिता ॥ ७९ ॥

**प्रेमवेमबलेनेति, देवीवाक्चातुरी तुरी । उवाय तद्गुणै राज्ञि, चित्रं पटमिवोज्ज्वलम् ॥ ८० ॥**

'**एवं**' एवम्भूतया वचनरचनया । '**प्रेमवेमबलेन**' प्रीतिवानदण्डशक्तया । (वेम-साळ इति भाषायाम्) '**देवीवाक्चातुरी**' चेल्लणावाणीकौशल्यं तद्रूपा । '**तुरी**' तन्तुवायसाधनविशेषः । '**तद्गुणैः**' शालिभद्रगुणैः । पटपक्षे तन्तुभिः । '**इव**' जाने। '**उज्ज्वलं**' अवदातम् । '**पटं**' वस्त्रम् । '**राज्ञि**' राजमानसे । '**उवाय**' निर्मितवती । **इति** '**चित्रं**' आश्चर्यम् । अयं भावः-तन्तुवायः वेमतुर्यादिना वस्त्रं वयति, किन्तु देव्या श्रेणिकमनसि सूत्ररूपैः शालिगुणवर्णनैः प्रेमबलेन वस्त्रं व्यूतमिति आश्चर्यम् ॥ ८० ॥

**मिष्टं वैद्योपदिष्टं च, मन्वानः कौतुकोत्सुकः । भूपादेशात् प्रतीहारः शालिशालां पुनर्ययौ ॥ ८१ ॥**

**'भूपादेशात्'** श्रेणिकाऽऽज्ञातः । **'मिष्टं'** मधुरम् । **'वैद्योपदिष्टं'** भिषग्दर्शितं । **चः** समुच्चये । **'मन्वानः'** मन्यमानः । **'कौतुकोत्सुकः'** कौतुकेन कुतुहलेन उत्सुकः उत्कण्ठितः । **'प्रतीहारः'** वेत्री । **'शालिशालां'** शालिगृहम् । **'पुनः'** भूयः । **'ययौ'** गतवान् ॥ ८१ ॥

**तेनाऽथ वेत्रिणा नेत्रपात्रीकर्तुं निमन्त्रिते । पुत्रे भूपं सवित्री साऽभ्येत्य सत्यमदोऽवदत् ॥ ८२ ॥**

**अथ तेन वेत्रिणा**–प्रतीहारेण । **'नेत्रपात्रीकर्तुं'** नयनगोचरीकर्तुम् । **'पुत्रे'** शालिभद्रे निमन्त्रिते । **सा सावित्री**–माता भद्रा । **'भूपं'** श्रेणिकनृपम् । **'अभ्येत्य'** संमुखं आगत्य । **'अदः'** इदं अग्रे वक्ष्यमाणम् । **'सत्यं'** तथ्यम् । **'अवदत्'** भाषितवती ॥ ८२ ॥

**दिवो नहि बहिर्मूलवैक्रियं क्रमते वपुः । यथा स्वर्गसदां तीर्थकरकल्याणकेष्वपि ॥ ८३ ॥**

**यथा वा रथयात्रादौ, प्रासादान्मूलनायकः । यथाऽऽर्यदेशान्निर्याति, धर्मः सर्वहितोऽपि न ॥ ८४ ॥**

**कुमारः सुकुमाराङ्गस्तुङ्गप्रासादशृङ्गतः । सनीडेऽपि तथाऽऽक्रीडे, न हि क्रीडति कर्हिचित् ॥ ८५ ॥**

**यथा 'स्वर्गसदां'** देवानाम् । **'मूलवैक्रियं वपुः'** जन्मवैक्रियं शरीरम् । **तीर्थकरकल्याणकेषु अपि । बहिः । 'न क्रमते'** न गच्छति ॥ ८३ ॥ **यथा वा रथयात्रादौ** । **'प्रासादात्'** देवालयात् । **'मूलनायकः'** मन्दिरगर्भगृहे मूलनायकत्वेन स्थिता प्रतिमा । **न निर्याति । यथा** । **'आर्यदेशात्'** सार्धपञ्चविंशतिसङ्ख्याकात् । **'सर्वहितोऽपि'** सर्वजनीनोऽपि । **'धर्मः'** अर्हदुक्तः

धर्मः । न निर्याति ॥ ८४ ॥ **तथा** । **'तुङ्गप्रासादशृङ्गतः'** उच्चसौधचन्द्रशालातः । **'सुकुमाराङ्गः'** कोमलदेहः । **'कुमारः'** शालिभद्रः । **'सनीडेऽपि'** समीपेऽपि । **'आक्रीडे'** उद्याने । **'कर्हिचित्'** कदापि । **'न हि क्रीडति'** न खेलति ॥ ८५ ॥

**श्रेणिकाय स्वगृहागमनार्थं विज्ञप्तिः—**

**सुधोज्ज्वलं श्रियां हेतुं, तन्महामहिमोदयम् । प्रासादं च प्रसादं च, स्वयं स्वामिन्नलङ्कुरु ॥ ८६ ॥**

**'तत्'** तस्मात् । **'स्वामिन्'** हे प्रभो ! **'सुधोज्ज्वलं'** अमृतावदातम् । **'श्रियां'** लक्ष्मीणाम् । **'हेतुं'** कारणम् । **'महामहिमोदयं'** महामहिम्नः उदयः यत्र तम् । **'प्रासादं'** सौधम् । **'प्रसादं च'** कृपां च । **'स्वयं अलङ्कुरु'** पादावधारणेन स्वयमेव समागच्छतु ॥ ८६ ॥

**क्षणं क्षमस्व क्षोणीश ! गृहक्षणमिव स्वकम् । क्षणावतारादक्षूणं, मङ्क्षु काङ्क्षामि वर्त्म यत् ॥ ८७ ॥**

**'क्षोणीश'** हे पृथ्वीपते ! **'क्षणं'** मनाक् । **'क्षमस्व'** विलम्बस्व । **'यत्'** यस्मात् । **'स्वकं'** आत्मीयम् । **गृहक्षणमिव** गृहोत्सवमिव । **'मङ्क्षु'** क्षिप्रम् । **'क्षणावतारात्'** उत्सवावतारात् । **'अक्षूणं'** अन्यूनं सम्पूर्णमित्यर्थः । **'वर्त्म'** मार्गम् । **'काङ्क्षामि'** इच्छामि । हे राजन् ! भवतामागमनं अस्मद्गृहे उत्सवरूपमस्ति । अतः क्षणं प्रतीक्षस्व यावत् सम्पूर्णमार्गं उत्सवमयं करोमीति भावः ॥ ८७ ॥

**इत्युदीर्योर्जितं भद्रा, गोभद्रेण सुपर्वणा । हरिश्चन्द्रपुरीरम्यां, हट्टशोभामचीकरत् ॥ ८८ ॥**

**'इति'** एवंरूपम् । **'ऊर्जितं'** ऐश्वर्ययुक्तं वचनम् **'उदीर्य'** कथयित्वा । **भद्रा** । **'गोभद्रेण सुपर्वणा'** गोभद्रदेवेन।

'देवाः सुपर्व' इति हैम्याम्। '**हरिश्चन्द्रपुरीरम्यां**' हरिश्चन्द्रनगरीवत् सौभनगरीवत् रम्यां रमणीयाम्। '**हट्टशोभां**' आपणभूषाम्। '**अचीकरत्**' कारयामास ॥ ८८ ॥

**हरिचन्दनकाश्मीरच्छटाच्छोटधरा धरा । पद्मरागशिलाशालिसद्यः पद्योद्यमाऽद्युतत् ॥ ८९ ॥**

'**पद्मरागशिलाशालिसद्यःपद्योद्यमा**' पद्मरागशिलाभिः माणिक्यखण्डैः शालिनी शोभायमाना सद्यः क्षिप्रं च पद्याभिः-मार्गैः उद्यमा-प्रगुणा। 'पदव्येकपदी पद्या' इति हैम्याम्। '**हरिचन्दनकाश्मीरच्छटाच्छोटधरा**' गोशीर्षघृसृणानां छटा कान्तिः येषां ते आच्छोटाः विप्रुषः बिन्दवः तान् धारयतीत्येवंशीला। '**धरा**' पृथ्वी। '**अद्युतत्**' प्रकाशते स्म ॥ ८९ ॥

**पारिजातकमन्दारप्रसूनगृहकावली । भातीव दिवमुत्पित्सुर्महीन्दोः कीर्तिमण्डली ॥ ९० ॥**

'**महीन्दोः**' मह्यां पृथिव्यां चन्द्रतुल्यस्य शालेः। '**दिवं**' गगनं स्वर्गं वा। '**उत्पिसुः**' उत्पतनेच्छुका। '**कीर्तिमण्डली इव**' यशःपुञ्जः इव। '**पारिजातकमन्दारप्रसूनगृहकावली**' पारिजातकमन्दारादिकल्पवृक्षविशेषाणां प्रसूनगृहकावली-पुष्पशालाश्रेणिः '**भाति**' शोभते ॥ ९० ॥

**देवदूष्यवितानानि, वितीर्णानि विरेजिरे । ऐष्यन्त्याः किल नासीरकेतनानि दिवः श्रियः ॥ ९१ ॥**

'**ऐष्यन्त्याः**' प्राप्स्यमानायाः। '**दिवः**' स्वर्गस्य। '**श्रियः**' लक्ष्म्याः। **किलः** निश्चये। '**नासीरकेतनानि**' सैन्यस्य अग्रयानध्वजाः इव। '**वितीर्णानि**' विशालानि। '**देवदूष्यवितानानि**' देवदूष्यचन्द्रोदयाः। 'चन्दरवा' इति भाषायाम्। '**विरेजिरे**' राजन्ते स्म ॥ ९१ ॥

**घृताची-मेनका-रम्भाः, प्राप्तमन्दारमालिकाः । साक्षात् तत्र स्थिता यन्त्र-पुत्रिका इव रेजिरे ॥ ९२ ॥**

**'प्राप्तमन्दारमालिकाः'** प्राप्ताः मन्दारमाला कल्पवृक्षमालाः याभिः ताः । **'साक्षात्'** प्रत्यक्षम् । **'घृताची-मेनका-रम्भाः'** अप्सरो-विशेषाः । **'तत्र'** मार्गे **'स्थिताः इव'** अवतीर्णाः इव । **'यन्त्रपुत्रिकाः'** यन्त्रैः भ्राम्यन्त्यः पुत्रिकाः शालभञ्जिकाः। **'रेजिरे'** शोभन्ते स्म ॥ ९२ ॥

**तयाऽट्टशोभयाऽतीत्य, पद्ययेव पुराऽर्णवम् । सौधं पोतमिवायासीत्, हेलया राजकुञ्जरः ॥ ९३ ॥**

**'तया पद्यया इव'** सेतुरूपमार्गेण इव । **'अट्टशोभया'** आपणभूषया । **'पुरार्णवं'** नगर समुद्रम् । **'अतीत्य'** उल्लङ्घ्य **'राजकुञ्जरः'** नृपश्रेष्ठः श्रेणिकः । पक्षे-गजराजः । **'पोतमिव'** प्रवहणमिव । हस्तिपक्षे दशवर्षीयहस्तिनमिव । **'सौधं'** प्रासादम्। **'हेलया'** लीलया । **'आयासीत्'** आगतः ॥ ९३ ॥

**पुरतो राजतस्तम्भा, महानीलदलावली । राजावर्तदला शातकुम्भस्तम्भा च दक्षिणात् ॥ ९४ ॥**

**उत्तरेण मणिस्तम्भा, कुरुविन्दकपल्लवा । पूर्वाप्राक्पश्चिमाम्भोधि-प्रहितप्राभृतप्रभा ॥ ९५ ॥**

**प्रवेशे ददृशे तस्य भूभृता तोरणत्रयी । तत्त्वत्रयीव भव्येन, जैनधर्मस्य भास्वतः ॥ ९६ ॥**

**'भव्येन'** भव्यजीवेन । **'भास्वतः'** सूर्यसमस्य तेजस्विनः' **'जैनधर्मस्य'** अर्हद्धर्मस्य । **'तत्त्वत्रयी इव'** देव-गुरु-धर्मरूपतत्त्वत्रयीव **'तोरणत्रिकं'** बहिर्द्वारत्रिकम् 'बहिर्द्वारं तु तोरणम्' इति हैम्याम् । **'तस्य'** सौधस्य । **'प्रवेशे'** अन्तर्गमने। **'भूभृता'** राज्ञा । **'ददृशे'** दृश्यते स्म ॥ ९६ ॥ कथम्भूता सा ? **'पुरतः'** अग्रतः । **'राजतस्तम्भा'** रजतघटितस्तम्भा । **'महानीलदलावली'** नीलमणिपर्णश्रेणिः । **दक्षिणाच्च** । **'राजावर्त्तदला'** वैराटरत्नपर्णा । **'शातकुम्भस्तम्भा'** सुवर्णस्तम्भा ॥ ९४ ॥ **'उत्तरेण'** उत्तरदिग्विभागेन । **'मणिस्तम्भा'** रत्नस्तम्भा, **'कुरुविन्दकपल्लवा'**

हिङ्गुलकिसलया । '**पूर्वाप्राक्प-श्चिमाम्भोधिप्रहितप्राभृतप्रभा**' पूर्वाप्राक्पश्चिमाम्भोधिषु पूर्वदक्षिणपश्चिमसागरेषु प्रहिता प्रेषिता **प्राभृतरूपा** उपहाररूपा **प्रभा** कान्तिः यया सा । त्रिसमुद्रं यावत् प्रभामयी **तोरणत्रयी** इत्यर्थः ॥ ९४ ॥ ९५ ॥ ९६ ॥

**निशि शीतांशुशीतांशुप्रभवामृतपूरितात् । पाञ्चालीकरचन्द्राश्मक रकादाचमन् शुचिः ॥ ९७ ॥**

**वैडूर्यगोमुखं मुक्तास्वस्तिकं स्फाटिकाङ्गणम् । प्रविवेश विशामीशः, कृतकौतुकमङ्गलः ॥ ९८ ॥**

'**निशि**' रात्रौ । '**शीतांशुशीतांशुप्रभवामृतपूरितात्**' चन्द्रशीतकिरणोद्भूतपीयूषपूरितात् । '**पाञ्चालीकरचन्द्राश्मकरकात्**' सालभञ्जीहस्तचन्द्रकांतघटितवार्धान्याः । 'वार्धान्यां तु गलन्त्यालुः कर्करी करकः' इति हैम्याम् । '**आचमन्**' पिबन् । अमृतमिति शेषः ॥ ९७ ॥ '**कृतकौतुकमङ्गलः**' कृतं कौतुकमङ्गलं यस्य सः । '**विशामीशः**' राजा । '**वैडूर्यगोमुखं**' वैडूर्यरत्ननिर्मितं गोमुखं-गोमुखाकृतिः तत्र । 'गोमुखमुपले पनेऽपि स्यात्' इत्यनेकार्थः । '**मुक्तास्वस्तिकं**' मुक्तामयानि स्वस्तिकानि यत्र तत् । '**स्फाटिकाङ्गणं**' स्फटिकनिर्मितं अङ्गणं अजिरम् । '**प्रविवेश**' प्रविशति स्म ॥ ९८ ॥

**पिण्डस्थमिव सौन्दर्यं, पदस्थमिव वैभवम् । कौतुकं किल रूपस्थं, रूपातीतं दिवोऽपि हि ॥ ९९ ॥**

**प्रधानं चतुराधानध्यानसन्धानसाधनम् । ज्योतिर्मयं यदाभाति, महोदयनिबन्धनम् ॥ १०० ॥**

कीदृशं तदङ्गणमिति दर्शयन्नाह '**पिण्डस्थमिव**' देहस्थमिव । '**सौन्दर्यं**' सुन्दरता । '**पदस्थमिव**' स्थानस्थितमिव । '**वैभवं**' सम्पत्तिः । '**रूपस्थं**' मूर्तिमत् । **किलः** निश्चये । '**कौतुकं**' कुतुहलम् । '**दिवोऽपि हि**' स्वर्गादपि हि । '**रूपातीतं**' देवलोकरूपातिक्रान्तम् । '**प्रधानं**' मुख्यम् । '**तुराधानध्यान-सन्धानसाधनं**' चतुराणां दक्षाणां आधानध्यानसन्धाने-अवधानध्यानसन्धाने साधनं कारणम् । ध्यानपक्षे-पिण्डस्थादिचतुष्प्रकारं ध्यानसन्धिहेतुम् । '**यत्**'

अङ्गणम् । **'ज्योतिर्मयं'** प्रकाशमयम् । पक्षे-आत्मज्योतिर्मयम् । **'महोदयनिबन्धनं'** महाऽभ्युदयकारणम् । पक्षे-मोक्षकारणम् । महोदयः सर्वदुःखक्षयो निर्याणमक्षरम् इति हैम्याम् । **'आभाति'** शोभते ॥ ९९ ॥ १०० ॥

**किमिदं कीदृशं चाग्रे भावीति नृपतेर्मतिः । बाढं मूढा नवोढेव, तत्राभूत् प्रौढनायके ॥ १०१ ॥**

**इदं किम् ? 'अग्रे'** पुरतश्च । **'कीदृशं'** किंरूपम् । **'भावि'** भविष्यति । **इति 'प्रौढनायके'**-प्रौढपत्यौ । **'नवोढेव'** नव-परिणीतवधूरिव । **'नृपतेः'** श्रेणिकस्य । **'मतिः'** बुद्धिः । **'तत्र'** अङ्गणे । **'मूढा'** मुग्धा । **'अभूत्'** जाता ॥ १०१ ॥

**क्वापि खस्फटिकाबद्धमध्यसिद्धजलभ्रमा । परितो नीलरत्नालीकूलकन्दलकालिमा ॥ १०२ ॥**

**दूरं दूरान्तरस्थाऽपि, जगज्जीवनधर्मतः । यद्भूर्वेदोक्तहिंसेव, विदग्धानपि वञ्चयेत् ॥ १०३ ॥ (युग्मम्)**

**'क्वापि'** कुत्रचित् स्थाने । **'खस्फटिकाबद्धजलभ्रमा'** खस्फटिकैः सूर्यकान्तचन्द्रकान्तमणिभिः, 'सूर्यकान्तचन्द्रकान्तौ द्वौ अपि खस्फटिकाख्यौ' इति हैमीटीकायाम्, आबद्ध मध्यभागे सिद्धजलभ्रमा गङ्गाजलभ्रमा सिद्धो वा जलभ्रमो यत्र सा । **'परितः' नीलरत्नालीकूलकन्दलकालिमा'** इन्द्रनील-रत्नश्रेणिमये कूले-तीरे कन्दलैः नवप्रवालैः कालिमा-श्यामता यत्र । **'जगज्जीवनधर्मतः'** जगतां जीवनरूपं जलं तद्धर्मतः तत्स्वभावतः । पक्षे-अहिंसामूलधर्मतः । **'दूरं दूरान्तरस्थापि'** अतिदूराऽपि । **'यद्भूः'** या भूमिः । **वेदोक्तहिंसा इव । 'विदग्धानपि'** पण्डितानपि । **वञ्चयेत्** । यथा पण्डिताः वेदे हिंसाप्रतिपादनं दृष्ट्वा हिंसारताः भूत्वा आत्मानं वञ्चयन्ति तथा अजलाऽपि सूर्यकान्तादिमणिभिः सजला सा भूमिः दृश्यते। अतः पण्डिताः अपि तत्र वञ्च्यन्ते इति भावः ॥ १०२ ॥ १०३ ॥

**शातकुम्भस्तम्भशोभं, वर्यवज्राङ्कभित्तिवत् । दिव्योल्लोचं देवपुष्पैः, कृतपुष्पगृहावलि ॥ १०४ ॥**

**तमसा न समाक्रान्तं, घण्टाकारेन्दुसूर्यवत् । महीयोमहसां गेहं, यन्महेन्द्रविमानवत् ॥ १०५ ॥**

**किं हेमाचलमारोहा-म्याहोस्विदस्मि रोहणम् । नन्दनं वा वनं यामि, त्रिदिवं वा विशाम्यहम् ॥ १०६ ॥**

**एवं विकल्पसङ्कल्पकल्पनाऽनल्पतल्पगः । मध्यमध्यास्त सौधस्य, तस्याऽसौ वसुधाधवः ॥ १०७ ॥**

**'शातकुम्भस्तम्भशोभं'** शातकुम्भस्तम्भानां सुवर्णस्तम्भानां शोभा यत्र तत् । **'वर्यवज्राङ्कभित्तिवत्'** उत्तमवज्ररत्न(अङ्करत्न)भित्तिसहितम् । **'दिव्योल्लोचं'** दिव्यचन्द्रोदयम् । **'देवपुष्पैः'** अमरदत्तकुसुमैः । **'कृतपुष्पगृहावलि'** कृता पुष्पगृहाणां आवलिः श्रेणिः यस्मिन् तत् ॥ १०४ ॥ **'घण्टाकारेन्दुसूर्यवत्'** घण्टाकारौ सूर्यचन्द्रौ यत्र स्तः तत्सहितम्। **'तमसा'** अन्धकारेण । **'न समाक्रान्तं'** न ग्रस्तम् । **'यद्'** गेहम् । **'महेन्द्रविमानवत्'** देवराजविमानवत् । **'महीयोमहसां'** बृहत्तेजसाम् । **'गेहं'** निकेतनम् ॥ १०५ ॥ **किम् हेमाचलं मेरुम् । आरोहामि ? 'आहोस्वित्'** उत । **'रोहणं'** रोहणगिरिम् **'अस्मि'** आरोहमाणोऽस्मि **'नन्दनं वा वनं'** देववनं वा । **'यामि'** गच्छामि **'त्रिदिवं वा'** स्वर्गं वा **अहं विशामि ?** ॥ १०६ ॥ **एवम्** । **'विकल्पसङ्कल्पकल्पनाऽनल्पतल्पगः'** विकल्पसङ्कल्पानां या कल्पना तद्रूपः अनल्पतल्पः-महाशय्या तस्मिन् गतः । **तस्य सौधस्य**-प्रासादस्य । **'मध्यं'** मध्यभागम् । **'असौ वसुधाधवः'** श्रेणिकभूपः । **'अध्यास्त'**-आजगाम ॥ १०४ ॥ १०५ ॥ १०६ ॥ १०७ ॥

**उत्कण्ठां विस्मयं भ्रान्तिं, निश्चयं प्रमदं मदम् । निर्वेदं नृपतिर्विन्दन्, भावसङ्क्रमाप सः ॥ १०८ ॥**

**'उत्कण्ठां'** औत्सुक्यम्, अग्रे किम् ? इत्थम्भूतम् । **'विस्मयं'** आश्चर्यम्, एवं कदापि न दृष्टम् । **'भ्रान्तिं'** भ्रमम्, जलं स्थलं वा इदम् ? स्वप्नं सत्यं वा ? **'निश्चयं'** निर्णयम्, शालिसौध एवायम् । **'प्रमदं'** हर्षम्, धन्योऽहं यद्राज्ये एवंविधः

ऋद्धिमान् शालिभद्रः वसति । '**मदं**' गर्व-गौरवम्, मद्राज्ये इत्थम्भूता सम्पत्तिः ? '**निर्वेदं**' मत्पार्श्वे नैवंविधं किमपि इत्येवंरूपं निर्वेदम् । '**विन्दन्**' प्राप्नुवन् । '**सः नृपतिः**' श्रेणिकनृपः । '**भावसङ्करं**' विचारमिश्रताम् । '**आप**' प्राप्तः ॥ १०८ ॥

**अतीत्य भूमिं त्रितयीं, पुरुषार्थत्रयीमिव । भुवं चतुर्थीं मोक्षार्थप्रवृत्तिमिव संश्रितः ॥ १०९ ॥**

**मैत्रीप्रमोदकारुण्यमाध्यस्थ्यानां समुच्चयम् । चतुष्कावसरं राजा, योगीवाङ्गीचकार सः ॥ ११० ॥**

'**पुरुषार्थत्रयीमिव**' धर्मार्थकामरूपामिव । '**त्रितयी भूमिं**' भूमित्रयम् । '**अतीत्य**' उल्लङ्घ्य । '**मोक्षार्थप्रवृत्तिमिव**' मोक्षपुरुषार्थप्रवर्तनमिव । '**चतुर्थीं भुवं**' तुर्यां भूमिम् । '**संश्रितः**' प्राप्तः ॥ १०९ ॥ **सः राजा योगी इव** । '**मैत्रीप्रमोदकारुण्यमाध्यस्थ्यानां**' चतुर्णां भावानाम् । '**समुच्चयं**' समूहरूपम् । '**चतुष्कावसरं**' यस्योपरि सिंहासनं स्थाप्यते तत् (भाषायां-'चौकी') '**अङ्गीचकार**' स्वीकृतवान् ॥ ११० ॥

**सौवर्णपूर्णकलशे, मणिमणिकमण्डिते । नानारत्नलसत्पात्रे, महानीलमयूरके ॥ १११ ॥**

**तत्र मारकताऽमत्रस्फारोदारयवारके । रत्नसिंहासने राजा, सभायां समभाजयत् ॥ ११२ ॥**

'**मणिमणिकमण्डिते**' रत्नमाणिक्यभूषिते । '**सौवर्णपूर्णकलशे**' सौवर्णाः कनकमयाः पूर्णकलशाः पूर्णकुम्भाः यत्र तस्मिन् । '**नानारत्नलसत्पात्रे**' नानारत्नैः विविधरत्नैः लसन्ति शोभायमानानि पात्राणि यत्र तस्मिन् । '**महानीलमयूरके**' महानीलनिर्मितौ इन्द्रनीलनिर्मितौ सिंहासनस्य द्विपार्श्वे मयूरौ कलापिनौ यस्मिन् ॥ १११ ॥ **तत्र सभायां**-पर्षदि । '**मारकताऽमत्रस्फारोदारयवारके**' मारकताऽमत्रे मरकतमयभाजने स्फाराः-विशालाः उदाराः उत्तमाः यवारकाः-यवगोधूमादीनां

स्तम्बाः ('ज्वारा' इति भाषायाम्) यत्र तस्मिन् । '**रत्नसिंहासने**' रत्ननिर्मिते सिंहासने । '**राजा**' श्रेणिकः । '**समभाजयत्**' शालिमालिङ्गनादिनाऽऽनन्दनार्थं उपविष्टः ॥ १११ ॥ ११२ ॥

**चित्राऽभिसङ्गता सद्यो, राजयोगचिकीरथ । सोमस्य सविधे सूनोर्भद्रा तिथिरिवाययौ ॥ ११३ ॥**

**अथ** '**चित्राऽभिसङ्गता**' आश्चर्यान्विता । भद्रातिथिपक्षे-चित्रानक्षत्रयुक्ता । '**राजयोगचिकीः**' श्रेणिकराजसंयोगेच्छुका । पक्षे-राजयोगकरणेच्छुका । '**भद्रा तिथिः इव**' ज्योतिःशास्त्रप्रसिद्धा भद्रातिथिः तद्वत् । '**भद्रा**' शालिमाता । '**सोमस्य सूनोः**' चन्द्रतुल्यस्य सौम्यस्य वा पुत्रस्य । पक्षे-चन्द्रपुत्रस्य बुधस्य । '**सविधे**' समीपे । '**सद्यः**' सपदि । '**आययौ**' आगता । चित्रानक्षत्र-भद्रातिथि-मीलने किल राजयोगः भवतीति ज्योतिर्विदः ॥ ११३ ॥

**तं प्राह सद्गुणश्रेणे ! श्रृणु श्रेणिकमागतम् । विचक्षण ! क्षणादेत्य, दृशा सम्भावय स्वयम् ॥ ११४ ॥**

'**तं**' शालिभद्रम् । '**प्राह**' भद्रा वदति । '**सद्गुणश्रेणे**' सद्गुणानां श्रेणिः आवलिः यस्मिन् सः तत्ससम्बोधने। '**श्रृणु**' आकर्णय । '**विचक्षण**' हे विज्ञ ! । '**स्वयं**' आत्मना । '**क्षणात्**' मनाग् । '**एत्य**' आगत्य । **आगतं** श्रेणिकम्। '**दृशा सम्भावय**' विलोकय ॥ ११४ ॥

**स जगादाऽथ सोद्वेगं, वेगादेतत् क्रयाणकम् । परीक्ष्य तोलयित्वा च, युक्तमूल्येन गृह्यताम् ॥ ११५ ॥**

**अथ** । '**सः**' शालिभद्रः । '**सोद्वेगं**' उद्वेगपूर्वकम् । '**वेगात्**' रभसा । '**जगाद**' उवाच । '**एतत्**' श्रेणिकाख्यम्। '**क्रयाणकम्**' पण्यम् । '**परीक्ष्य**' परीक्षां विधाय । '**तोलयित्वा च**' तुलायां तोलयित्वा च । '**युक्तमूल्येन**' उचितवस्नेन। '**गृह्यतां**' आदीयताम् । किमत्र मां पृच्छसि ? यदुक्तम्-

"कृत्वा महर्घं' यदिवाऽमहर्घं क्रयाणकं श्रेणिकनामधेयम्। यथायथं मातरिदं गृहाण, प्रमाणमम्बैव किमत्र पृच्छा ?॥ ११५ ॥

**माता रोमाञ्चिता दध्यौ, स्त्रीषु धन्याहमेकिका । यस्या एवंविधः पश्य, लीलागर्भेश्वरः सुतः ॥ ११६ ॥**

'**रोमाञ्चिता**' पुलकिता । '**माता**' भद्रा । '**दध्यौ**' चिन्तयति स्म । '**स्त्रीषु**' महिलासु । **अहं एकिका**-एका । '**धन्या**' प्रशस्या अस्मि । **यस्याः एवंविधः**-श्रेणिकमपि क्रयाणकं मन्यते एवंरूपः । '**लीलागर्भेश्वरः**' लीलया गर्भाद् एव ईश्वरः श्रीमान् । '**सुतः** तनयोऽस्ति । '**पश्य**' विलोकय रे जीव ! इति स्वं प्रति सम्बोधनम् ॥ ११६ ॥

**चिन्तयित्वेति साऽवादी-दनादीनवमात्मजम् । भूचक्रेऽयं ननु स्वामी, न क्रेयं वस्तु किञ्चन ॥ ११७ ॥**

**इति चिन्तयित्वा**-विचार्य । '**अनादीनवं**' निर्दोषम् । 'दोषे त्वादीनवाश्रवौ' इति हैम्याम् । '**आत्मजं**' पुत्रम्। '**सा**' भद्रा '**अवादीत्**' अवोचत् । '**अयं**' श्रेणिकः । **ननुः** विरोधवचनार्थः । '**भूचक्रे**' पृथ्वीमण्डले । '**स्वामी**' नाथः **न** पुनः **किञ्चन** । '**क्रेयं**'-ग्राह्यम् । '**वस्तु**'-अर्थजातम् ॥ ११७ ॥

**स्वामीति शब्देन शालिभद्रस्य व्यथा–**

**ज्योत्स्नयेव दिनेशस्य, करस्थसरसीरुहम् । वृष्ट्येव ब्रह्मणो हंसः, श्रृणिसूच्येव दिग्गजः ॥ ११८ ॥**

**जन्मनः पूर्वमस्पृष्टः, तयाऽसौ स्वामिवार्तया । सर्वतः सुकुमारश्री-र्यतिधर्म इवाव्यथि ॥ ११९ ॥**

'**दिनेशस्य**' सूर्यस्य । '**ज्योत्स्नया इव**' प्रकाशेन इव । '**करस्थसरसीरुहं**' हस्तस्थितकमलं पीड्यते । '**वृष्ट्या इव**' मेघवर्षणेन इव । '**ब्रह्मणः**' विधेः । '**हंसः**' वाहनरूपः मराल । '**श्रृणिसूच्या इव**' श्रृणिः-अङ्कुशः स एव सूची

तया। **'दिग्गजः'** दिङ्नागः ॥ ११८ ॥ **'तया'** भद्रोक्तया । **'स्वामिवार्तया'** श्रेणिकः स्वामी अस्ति इति वार्तया । **'जन्मनः'** आरभ्य इति शेषः । **'पूर्वं'** प्रथमम् । **'अस्पृष्टः'** अनाश्लिष्टः । **'सर्वतः'** अभितः । **'सुकुमारश्रीः'** सुकोमलदेहशोभः। **'असौ'** शालिभद्रः । **'यतिधर्मः इव'** साधुधर्मः इव । **'अव्यथि'** व्यथां प्राप्तः । तथा साधुधर्मः (साधूनां धर्मः यस्मिन् सः साधुः) स्वामिवार्तया 'हे साधो ? अहं तव स्वामी' इति वार्तया व्यथते तथा शालिभद्रः अव्यथीत्यर्थः ॥ ११९ ॥

**श्रुतिः स्वामीति सन्ताप-माततानैक पद्यपि । चित्रं शतपदीवास्य, कर्णजाहाऽवगाहिनी ॥ १२० ॥**

**'कर्णजाहाऽवगाहिनी'** कर्णमूलावगाहिनी । **'शतपदी इव'** पदानां शब्दात्मकपदानां शतमस्याः शतपदी तद्वत् । विरोधपरिहारे-कर्णजलौकाः इव । **'अस्य'** शालिभद्रस्य । **'स्वामी'** इति । **'एकपदी अपि'** एकं **'स्वामी' इति** पदं यस्याः साऽपि । **'श्रुतिः'** श्रवणम् । **'सन्तापं'** चिन्तातापम् । **'आततान'** चकार । **इति चित्रं**-आश्चर्यम् । अयं भावः- शतपदी (कर्णजलौकाः, अपमानकारकशब्दात्मकपदानां शतं वा) कर्णं गच्छती सती व्यथां उत्पादयति, किन्तु शालिभद्रकर्णे एकपदी (स्वामीति श्रुतिः) अपि व्यथां उदपादयदिति अत्राश्चर्यम् ॥ १२० ॥

**दध्यौ धीरः पराक्रान्तो, भव एव पराभवः । यन्ममापि समानांह्रिपाणिः प्राणी परः प्रभुः ॥ १२१ ॥**

**'पराक्रान्तः'** 'परेण' राज्ञा **'आक्रान्तः'** अधरीकृतः । **'धीरः'** धैर्यवान् शालिः । **'दध्यौ'** चिन्तयामास । **'भवः'** संसारः । **एवः** अवधारणे । **'पराभवः'** पराजयस्थानम् । **'यत्'** यस्मात् । **'मम समानांह्रिपाणिः'** मम समानौ अंह्रिपाणी पादहस्तौ यस्य सः । **'परः'** अन्यः । **प्राणी अपि** । **'प्रभुः'** स्वामी भवति ॥ १२१ ॥

**ग्रहेषु द्वादशात्मायं, सहस्त्रकरशोभया । शेषराजश्च सर्पेषु, सहस्त्रफणसङ्ख्यया ॥ १२२ ॥**

**सहस्त्राक्षतया स्वर्गि-वर्गे च किल वासवः । राजायतां नितान्तेन विशेषावयवाधिकः ॥ १२३ ॥**

'**ग्रहेषु**' चन्द्रादिग्रहेषु । '**सहस्त्रकरशोभया**' सहस्त्रकिरणश्रिया । **अयं द्वादशात्मा**–सूर्यः । 'द्वादशात्मानो रूपाणि अस्य द्वादशात्मा । 'द्वादश ह्यादित्या इति रूढिः' इति हैमीटीकायाम् । ग्रहेषु सूर्यस्य गणना लौकिकापेक्षया मन्तव्या । विशेषावयवाधिकः राजायताम् । '**सर्पेषु**' नागलोकषु । '**सहस्त्रफणसङ्ख्यया**' फणासहस्त्रेण । '**शेषराजः**' वासुकिसर्पराजः । **राजायताम्** ॥ १२२ ॥ '**स्वर्गिवर्गे**' देववृन्दे । **चः** समुच्चये । '**सहस्त्राक्षतया**' अक्षिसहस्त्रेण । **किलः** निश्चये । '**वासवः**' इन्द्रः । '**विशेषावयवाधिकः**' अन्येभ्यः विशेषावयवैः अधिकः उत्कृष्टः । '**नितान्तेन**' स्पष्टतया । '**राजायतां**' राजा भवतु । १२३ ॥

**संसारसरसीवारिबुद्बुदाकारधारिणः । बुधैरस्य कथङ्कारं, पार्थिवत्वं समर्थ्यते ? ॥ १२४ ॥**

किन्तु । '**संसारसरसीवारिबुद्बुदाकारधारिणः**' संसारसरसीवारिणि भवजलाशयस्य वारिणि जले बुद्बुदाकारधारिणः बुद्बुदवत् चञ्चलजीवितस्य । '**अस्य**' श्रेणिकस्य । '**पार्थिवत्वं**' राजत्वम् । पक्षे–पृथ्वीत्वम् । '**बुधैः**' विद्वद्भिः । **कथं** समर्थ्यते ? कथ्यते ? अयं भावः–पृथ्वीजन्याः दृषदः कियत्कालस्थायिनः किन्तु बुद्बुदास्तु जन्मानन्तरमेव विनाशिनः, तथा देवादिकाः जगत्यां कियत्कालस्थायिनः, तेषां प्रधानता भवतु, किन्तु अल्पायुषां मानवानां कथं प्रधानत्वम् ? इति शालिचिन्तनम् ॥ १२४ ॥

**परायत्तपरीभोगां, चञ्चलां चञ्चलस्थितिम् । वारवेश्याङ्गनादेश्यां, धिगिमामसतीं श्रियम् ॥ १२५ ॥**

'**परायत्तपरीभोगां**' परायत्तः पराधीनः परीभोगः यस्याः ताम् । '**चञ्चलां**' चपलाम् । '**चञ्चलस्थितिं**' चञ्चला

स्थितिः अवस्थितिः यस्याः ताम् । **'वारवेश्याङ्गनादेश्यां'** वाराङ्गना वेश्याङ्गना तया समानाम् । **'असतीं'** कुलटाम् । **'श्रियं'** लक्ष्मीम् । **धिगस्तु** ॥ १२५ ॥

**परकाव्यैः कवित्वं यद्, गर्वो याचितभूषणैः । या च याचनया तृप्तिस्तदेतन्मूर्खलक्षणम् ॥ १२६ ॥**

**यत् परकाव्यैः**-अन्यरचितकविताभिः । **'कवित्वं'** कवित्वाभिमानः । **'याचितभूषणैः'** परेभ्यः मार्गितमण्डनैः । **'गर्वः'** मदः । **या च** पुनः । **याचनया** याञ्चया **'तृप्तिः'** तर्पणम् । **तदेतत्** । **'मूर्खलक्षणं'** मूढचिह्नम् ॥ १२६ ॥

**सति त्रिभुवनीनाथे, श्रीवीरे स्वपदप्रदे । चतुरङ्गनृपेणेव, किमनेन शिखण्डिना ॥ १२७ ॥**

**'त्रिभुवनीनाथे'** त्रिलोकस्वामिनि । **'स्वपदप्रदे'** निजप्रभुत्वपददायिनि । **'श्रीवीरे'** श्रीवर्धमानस्वामिनि । **'सति'** विद्यमाने । **'चतुरङ्गनृपेण इव'** द्यूतभूपेन इव । **'शिखण्डिना'** निष्फलेन । **'अनेन'** श्रेणिकेन । **किम्** ? यथा द्यूतक्रीडायां कल्पितो राजा भवति । तथैवायं श्रेणिकोऽपि कल्पित एव राजेति शालि-विचारणा ॥ १२७ ॥

**पुण्याधिक्येन चेन्नाथः, पुण्ये साध्ये स्वयं पुनः । अन्योऽपि हि मम स्वामी, जीवन्निति सहेत कः ? ॥ १२८ ॥**

**'चेत्'** यदि । **'पुण्याधिक्येन'** पुण्यस्य अधिकतया । **'नाथः'** कश्चित् स्वामी । तर्हि । **'स्वयं'** आत्मना । **'पुण्ये'** सुकृते । **'साध्ये'** करणीये । **अन्योऽपि हि मम स्वामी** नाथः इति । **'जीवन्'** प्राणान् धारयन् । **'कः'** जनः । **'सहेत'** क्षमेत ? ॥ १२८ ॥

**भोज्यैरिव पराधीनैस्ताम्बूलैरपरार्पितैः । पुष्पैर्वा देवनिर्माल्यैरेभिर्भोगैरलं मम ॥ १२९ ॥**

**'पराधीनैः'** अस्वाधीनैः । **'भौज्यैः'** भोजनैः वा । **अपरार्पितैः** अन्यदत्तैः । **'ताम्बूलैः'** मुखवासैः । **देवनिर्माल्यैः इव** देवेभ्यः देवमूर्तिभ्यः अपनीतैः **निर्माल्यैः इव** । **वा** विकल्पे । **एभिः भोगैः**-संसारसुखैः । **मम 'अलं'** पर्याप्तम् ॥ १२९ ॥

**कलिङ्गेशस्य वैराग्यं, किं पङ्गुवृषभाश्रितम् । राजकुञ्जरमारूढं, शालेः सन्नद्धयोधवत् ॥ १३० ॥**

**'कलिङ्गेशस्य'** कलिङ्गदेशाधिपस्य करगण्डुनृपस्य । **'वैराग्यं'** विरक्तिः **किं पङ्गुवृषभाश्रितं**-शक्तिहीन बलीवर्दारूढम् ? वृद्धवृषभं दृष्ट्वा खलु सविरक्तः । यदुक्तम्-श्वेतं सुजातं सुविभक्तश्रृङ्गं, गोष्ठाङ्गणे वीक्ष्य वृषं जरार्त्तम् । ऋद्धिं त्वऋद्धिं प्रसमीक्ष्य बोधात्, कलिङ्गराजर्षिरवाप धर्मम् । **'शालेः'** शालिभद्रस्य । **'पुनः'** परन्तु । **'संन्नद्धयोधवत्'** कवचितवीरवत्। **'राजकुञ्जरं'** श्रेणिकराजवरम् । वृषभप्रतिपक्षे गजवरम् । **'आरूढं'** अधिष्ठितम् ॥ १३० ॥

**इन्द्रं पतितमालोक्य, पाञ्चालेशो व्यरज्यत । अयं तु नृपमुन्निद्र-प्रमोदामोदमुच्छ्रितम् ॥ १३१ ॥**

**'पाञ्चालेशः'** पाञ्चालदेशाधिपतिः द्विमुखो राजा। **'पतितं'** स्रस्तम् । **'इन्द्रं'** इन्द्रध्वजम् । **'आलोक्य'** दृष्टवा । **'व्यरज्यत'** विरक्तो जातः । **'तु'** किन्तु । **'अयं'** शालिभद्रः । **'उन्निद्रप्रमोदामोदं'** उन्निद्रः प्रफुल्लः प्रमोदः आनन्दः तस्य आमोदः सुगन्धः यस्मिन् तम् । **'उच्छ्रितं'** उच्चम् । उत्थितमित्यपि पाठः । **'नृपं'** श्रेणिकभूपम् । **आलोक्य** ॥ १३१ ॥

**नमेर्वलयमार्गेण, वैराग्यं सङ्गतं मितम् । शालिभद्रस्य तु सदा, राजमार्गेण सङ्गतम् ॥ १३२ ॥**

**'नमेः'** नमिराजर्षेः । **'वलयमार्गेण'** राज्ञीनां कङ्कण-ध्वनिद्वारा । मार्गपक्षे-वलयवत् वक्रमार्गेण । **'मितं'** ध्वनिजातत्वात् परिमितम् । **'वैराग्यं'** विरक्तिः । **'संङ्गतम्'** सम्यक् प्राप्तम् । **शालिभद्रस्य तु सदा**-नित्यम् । **'राजमार्गेण'** श्रेणिकनृपद्वारा। वलयमार्गप्रतिपक्षे राजवर्त्मना । **'सङ्गतं'** प्राप्तम् ॥ १३२ ॥

**नग्गतेश्चूतमासाद्य, संवेगः कोकिलः किल । मत्तोऽभूद् भूधरं प्राप्य, नृसिंहस्यास्य सिंहवत् ॥ १३३ ॥**

**'नग्गतेः'** नग्गतिनृपस्य । **'संवेगः'** वैराग्यम् । **'कोकिलः'** कोकिलतुल्यः । **किलः** निश्चये । **'चूतं'** आम्रतरुम् ।

**'आसाद्य'** प्राप्य । **'मत्तः'** दीप्तः । **अभूत्** । **'अस्य नरसिंहस्य'** नरशार्दूलस्य शालिभद्रस्य । **संवेगः** पुनः । **सिंहवत्**। **'भूधरं'** नृपम् । सिंहपक्षे-पर्वतम् । **प्राप्य मत्तोऽभूत्** । यथा सिंहः स्वप्रतिध्वनिं श्रुत्वा शौर्येण मत्तो भवति तथा शालिरपि भूधरं श्रेणिकं प्राप्य दीप्तवैराग्योऽभूत् ॥ १३३ ॥

**उपरोधारत्परं मातुः, स मेने राजदर्शनम् । शुद्धसम्यक्त्वधारीव, मिथ्यादर्शनमप्रियम् ॥ १३४ ॥**

**'परं'** परन्तु । **'शुद्धसम्यक्त्वधारी'** निर्मलसम्यग्दर्शनभूत् । **'मिथ्यादर्शनमिव'** मिथ्यात्विनमिव । **'राजदर्शनं'** श्रेणिक-विलोकनम् । **'सः'** शालिः । **'मातुः'** भद्रामातुः । **'उपरोधात्'** आग्रहात् । **'मेने'** मनुते स्म । न स्वेच्छातः । यथा शुद्धसम्यक्त्वी मात्रादिगुर्वादीनामभियोगादेव मिथ्यात्विनं विलोकते तथा शालिरपि मातुराग्रहादेव राजानं विलोकते इत्यर्थः ॥ १३४ ॥

**शालिभद्र-श्रेणिकयोः मेलनम्–**

**सप्तमादथ भूभागाद्-गीतध्वनिरिव स्वरात् । जगदानन्दकन्दस्तं, तूर्णं तूर्यमुपेयिवान् ॥ १३५ ॥**

**'गीतध्वनिः इव'** सङ्गीतनादः इव । **'जगदानन्दकन्दः'** विश्वप्रमोदमूलं शालिभद्रः । **'सप्तमात् स्वरादिव'** षड्जादिसप्तस्वरमध्यात् निषधनामकात् सप्तमस्वरादिव सप्तमात् भूभागात् । **'तूर्णं'** क्षिप्रम् । **'तं'** श्रेणिकाश्रितम् । **'तूर्यं'** चतुर्थं भूभागम् । चतुर्थार्थे तुर्यशब्दे 'तूर्यशब्दोऽपि' शब्दकोषे दृश्यते । गीतध्वनिपक्षे-मध्यमनामकं चतुर्थस्वरम् । स्वरनामानि चेमानि-'षड्ज-ऋषभ-गान्धाराः. मध्यमः पञ्चमस्तथा । धैवतो निषधः सप्त, तन्त्रीकण्ठोद्भवाः स्वराः ॥ १ ॥ **'उपेयिवान्'** उपगतः ॥ १३५ ॥

**कान्ताभिः परितो विद्या-धरीभिरिव राजितम् । राजा स्मर-महादुर्ग-शालं शालिमलोकयत् ॥ १३६ ॥**

**'परितः'** अभितः । **'विद्याधरीभिरिव'** विद्याधरपत्नीभिरिव । **'कान्ताभिः'** प्रेयसीभिः । **'राजितं'** शोभितं परिवृतमित्यर्थः । **'स्मरमहादुर्गशालं'** स्मरस्य कामस्य महादुर्गशालं महादुर्गवप्रम् । **'शालिं'** शालिभद्रम् । **'राजा'** श्रेणिकः । **'अलोकयत्'** दृष्टवान् ॥ १३६ ॥

**रूपश्रीपर्वते तत्र, पुण्यज्योतिर्विलोकनात् । राज्ञा कार्पटिकेनेव, मेने निर्मलताऽऽत्मनः ॥ १३७ ॥**

**'रूपश्रीपर्वते'** रूपलक्ष्मीणां पर्वते समूहे । कार्पटिकपक्षे-श्रीपर्वते । **'तत्र'** शालिभद्रे । **'पुण्यज्योतिर्विलोकनात्'** पवित्रकान्तिदर्शनात् । पक्षे-ज्योतिर्दर्शनात् । **'कार्पटिकेनेव'** तथाविधपरिव्राजकेन इव । **'राज्ञा'** श्रेणिकेन । **'आत्मनः'** स्वस्य । **'निर्मलता'** शुद्धिः । **'मेने'** मतवान् । श्रीपर्वते विशाखान्तदिनत्रयेषु ज्योतिः स्वयं यः कार्पटिकः पश्यति स हत्यादिदोषरहितः स्यादिति प्रसिद्धिः ॥ १३७ ॥

**अथ सान्तः पुरः शालिभद्रः शालिभरादिव । श्रीश्रेणिकक्षितीशाय, विनीतो विनतिं व्यधात् ॥ १३८ ॥**

**अथ । 'शालिभरादिव'** शालिपाकभरादिव । **'विनीतः'** विनम्रः । **'सान्तःपुरः'** अन्तःपुर-सहितः **शालिभद्रः** । **'श्रीश्रेणिकक्षितीशाय'** 'श्रीश्रेणिकपृथ्वीपालाय । **'विनतिं'** विशेषेण नतिं प्रणामम् । **'व्यधात्'** अकरोत् ॥ १३८ ॥

**तं घनं नेत्रविश्राम-स्थानमद्भुतमुन्नतम् । आलिङ्ग्य भूभृदुत्सङ्ग-रङ्गे रङ्गान्न्यवीविशत् ॥ १३९ ॥**

**'अद्भुतं'** आश्चर्यकारकम् । **'उन्नतं'** उच्चम् । **'नेत्रविश्रामस्थानं'** नयनविश्रान्तिस्थानम् । **'तं'** शालिम् । **'घनं'** अत्यर्थम्। पक्षे-मेघम् । **'आलिङ्ग्य' 'भूभृत्'** राजा । घनपक्षे-पर्वतः । **'रङ्गात्'** आनन्दात् । **'उत्सङ्गरङ्गे'** अङ्कभागे । पक्षे-उपरिभागे । **'न्यवीविशत्'** अस्थापयत् ॥ १३९ ॥

**परमानन्दमानन्द, तत्सम्बन्धान्महीधरः । व्लीयत च तत्तापाद्, गलदश्रुजलः परः ॥ १४० ॥**

'**तत्सम्बन्धात्**' शालिभद्रसङ्गात् मेघसङ्गाच्च । '**महीधरः**' 'राजा । पक्षे-पर्वतः । '**परमानन्दं**' परमप्रमोदम् । '**आनन्द**' प्राप, 'अन्द्' धातोः परोक्षरूपमिदम् । '**परः**' शालिभद्रः घनश्च । '**तत्तापात्**' श्रेणिकाङ्गतापात् । पर्वतपक्षे-पर्वततपात्। '**गलदश्रुजलपरः**' स्रवद्बाष्पसलिलः । पक्षे-स्रवज्जलः । '**व्लीयत**' द्रुतवान् । पक्षे-ववर्ष ॥ १४० ॥

**भद्राऽऽह देव ! दिव्यस्त्रग्-वस्त्राहारविलेपनैः । सुहितोऽयं नरश्वास-व्यासै र्दोदूयतेतराम् ॥ १४१ ॥**

**कुराज्यं जननिश्वासैः, परश्वासैर्यथा सुखम् । जीवितं श्वसनीश्वासै-रूर्द्ध्वश्वासैर्यथा वपुः ॥ १४२ ॥**

**यथा** । '**जननिश्वासैः**' प्रजान्तःकरणपीडारूपैः । '**कुराज्यं**' कुत्सितनृपराज्यम् । **यथा** । '**परश्वासैः**' परनिःश्वासैः । '**सुखं**' लोकानां धनादिसुखम् । '**श्वसनीश्वासैः**' फूत्कारकारिसर्पविशेषश्वासैः । **यथा** । '**जीवितं**' जीवनम् । '**ऊर्ध्वश्वासैः**' अन्तसमये जायमानैः । **यथा** । '**वपुः**' शरीरम् ॥ १४२ ॥ **तथा** । '**देव**' हे राजन् ! । '**दिव्यस्त्रग्वस्त्राहारविलेपनैः**' देवदत्तमालावसनाशनाङ्गरागैः । '**सुहितः**' तृप्तः । '**अयं**' शालिभद्रः । '**नरश्वासव्यासैः**' मानवश्वासविस्तरैः । न्यासैरित्यपि पाठः । '**दोदूयतेतरां**' अत्यन्तं दुःखितो भवति । **इति भद्रा आह**-वदति ॥ १४१ ॥ १४२ ॥

**पिताऽस्य सवधूकस्य, देवभूयमितो यतः । दिव्यभोगश्रियं दत्ते, कल्पद्रुरिव युग्मिनाम् ॥ १४३ ॥**

'**यतः**' यस्मात् । '**देवभूयं**' देवत्वम् । '**इतः**' गतः । '**पिता**' गोभद्रदेवः । '**अस्य सवधूकस्य**' सभार्यस्य शालिभद्रस्य। '**दिव्यभोगश्रियं**' दिव्यविलासलक्ष्मीम् । '**दत्ते**' यच्छति । '**युग्मिनां**' युगलिकानाम् । '**कल्पद्रुः**' कल्पवृक्षः । '**इव**' यथा। **दिव्यभोगश्रियं दत्ते** ॥ १४३ ॥

**स्वकरात्तदयं देव ! सदयं राजकुञ्जर । मुच्यतां कमलाकेलि-पात्रं कमलकोमलः ॥ १४४ ॥**

**'तत्'** तस्मात् । **'राजकुञ्जर'** हे नृपश्रेष्ठ ! । पक्षे-गजराज ! । **'देव'** हे पूज्य ! । **'कमलाकेलिपात्रं'** लक्ष्मीक्रीडाभाजनम्। **'कमलकोमलः'** कमलं पद्मं तद्वत् कोमलः सुकुमारः । **'अयं'** शालिः । **'स्व-करात्'** निजहस्तात् । गजपक्षे-स्वशुण्डादण्डात् । **'सदयं'** सकरुणम् । **'मुच्यतां'** त्यज्यताम् ॥ १४४ ॥

**तेन पुण्येन मुक्तोऽगात् स शिवं सप्तमं क्षणम् । कलत्रैः ससुखैः सिद्ध-गुणैर्द्वात्रिंशता सह ॥ १४५ ॥**

**'ससुखैः'** सुखसहितैः । ससखैरिति वा पाठः । **'द्वात्रिंशता सिद्धगुणैः'** सिद्धा गुणा येषां तैः कलत्रैः । मोक्ष-पक्षे-सिद्धानां मुक्तात्मनां गुणैः । 'इगतीसाए सिद्धाइगुणेहिं' इति श्रमणसूत्रपाठात् ३१ सिद्धगुणाः ते च अत्र **'ससुखैः'** इति विशेषणात् ससुखाः मन्तव्याः । अतः ३१ सिद्धगुणाः + १ सुखम् = ३२ जाताः । **'कलत्रेण'** प्रियाभिः । **'सह'** सार्धम् । **'तेन पुण्येन'** पवित्रेण श्रेणिकेन । पक्षे-पुण्यकर्मणा । **'मुक्तः'** त्यक्तः । **'सः'** शालिभद्रः । पक्षे-कर्ममुक्तः जीवः । **'क्षणं'** क्षणात् । पक्षे-समयान्तरमस्पृश्य । **'सप्तमं'** सप्तमभूभागम् । पक्षे-सप्तमं राज्यम् । **'शिवं'** कल्याणरूपम्। पक्षे-मोक्षम् । **'अगात्'** जगाम ॥ १४५ ॥

**सूनुर्धर्म इव स्वामिन् !, स्वागमेन प्रतिष्ठितः । स्वानुभूतेर्विभूतिं मे, विद्यामिव पवित्रय ॥ १४६ ॥**

**'स्वामिन्'** हे राजन् ! । **'स्वागमेन'** निजागमनेन । धर्मपक्षे-सुसिद्धान्तेन । **'धर्मः इव'** अर्हद्धर्मः इव । **'सूनुः'** मम पुत्रः । **'प्रतिष्ठितः'** प्रतिष्ठावान् कृतः । पक्षे-स्थापितः । अथ । **'स्वानुभूतेः'** दर्शनपूर्वकात् स्वानुभवात् । पक्षे-आत्मानुभवात् । **'विद्यामिव'** ज्ञानमिव । **'मे'** मम । **'विभूतिं'** सम्पत्तिम् । **'पवित्रय'** पवित्रां कुरु ॥ १४६ ॥

**एवमुच्चवचोवीचिपूरैरप्युत्सुकं नृपम् । भद्रा भद्रानदीवाऽथ, वेगाऽऽवेगादचिस्खलत् ॥ १४७ ॥**

**अथ** । '**भद्रानदी इव**' भद्रा इति नाम धारिणी नदी इव । '**भद्रा**' शालिमाता । '**एवं**' उपर्युक्तप्रकारेण । '**उच्चवचोवीचिपूरैः**' उच्छ्रितवचनतरङ्गपूरैः । '**उत्सुकमपि**' विभूतिदर्शने उत्कण्ठितमपि । '**नृपं**' राजानम् । '**वेगावेगात्**' वेगस्य हर्ष-वेगस्य आवेगात्-आवेशात् । '**अचिस्खलत्**' स्खलयति स्म ॥ १४७ ॥

**लक्षपाकैस्ततस्तैलैः, परिणाममनोहरैः । दर्शनानन्दनैः कर्ण-प्रीणनैर्वचनैरिव ॥ १४८ ॥**

**अङ्गमर्दाः क्षमाभर्तुरङ्गोपाङ्गविदो व्यधुः । संवाहना गणस्येव, गीतार्थास्तां चतुर्विधाम् ॥ १४९ ॥**

'**ततः**' तत्पश्चात् । '**अङ्गोपाङ्गविदः**' शरीराङ्गुलिप्रमुखानि अङ्गोपाङ्गानि तेषां विदः-विज्ञाः । गीतार्थपक्षे-अङ्गानि आचाराङ्गादीनि, उपाङ्गानि-औपपातिकादीनि तद्विज्ञाः । '**गीतार्थाः इव**' जैनतत्त्वभावित-हृदयाः उत्सर्गापवादविदः गीतार्थाः इव । **गणस्य** 'गच्छस्य' । '**चतुर्विधां**' अस्थिमांसत्वग्रोमभेदैश्चतुर्धा । पक्षे-अशनपानवस्त्रपात्र-रूपाम् । '**अङ्गमर्दाः**' देहमर्दनकराः । '**क्षमाभर्तुः**' राज्ञः । '**संवाहनां**' अङ्गमर्दनाम् । पक्षे-निर्वहणाम् । '**लक्षपाकैः तैलैः**' लक्षौषधपाकेन निर्वृत्तैः तैलैः । '**व्यधुः**' कुर्वन्ति स्म । कथम्भूतैः लक्षपाकतैलैः ? '**कर्णप्रीणनवचनैरिव**' श्रुतिरम्यवचोभिरिव । '**दर्शनानन्दैः**' दर्शनं आनन्दरूपं येषां तैः । '**परिणाममनोहरैः**' फलमधुरैः ॥ १४८ ॥ १४९ ॥

**स्नानीयगन्धचूर्णेना-पनिन्युस्तैलसम्भ्रमम् । परमार्थोपदेशेन, ते पूर्वमिव संस्तवम् ॥ १५० ॥**

'**परमार्थोपदेशेन**' तत्त्वोपदेशेन । '**पूर्वं संस्तवमिव**' पूर्व-कालीनं परिचयमिव । '**ते**' अङ्गमर्दकाः । पक्षे-गीतार्थमुनयः । '**स्नानीय-गन्धचूर्णेन**' स्नानार्हगन्धवासेन । '**तैलसम्भ्रमं**' तैलसंसर्गम् । '**अपनिन्युः**' मर्माजुः ॥ १५० ॥

**भृङ्गारैर्यमुना-गङ्गा-रूपैर्द्विधा त्रिधा जलैः । स्नानपीठे मणिस्वर्ण-मये ते तमसिस्नपन् ॥ १५१ ॥**

‘**मणिस्वर्णमये**’ रत्नकनकमये । ‘**स्नानपीठे**’ मज्जनासने । ‘**भृङ्गारैः**’ कलशैः । ‘**द्विधा**’ द्विप्रकारेण । ‘**यमुनागङ्गारूपैः**’ कालिन्दीजाह्नवीरूपैः । ‘**त्रिधा**’ पुष्पोदक-गन्धोदक-शुद्धोदक-भेदैः । **जलैः** । ‘**ते**’ अङ्गमर्दकाः । ‘**तं**’ राजानम् । ‘**असिस्नपन्**’ स्नापयन्ति स्म ॥ १५१ ॥

**श्रेणिकस्य मुद्रा कूपे पतिता—**

**तदाऽभिषुण्वतस्तस्य, मुद्रा कूपेऽपतद्रयात् । वनिता दुर्विनीतेव, कोपाटोपवशंवदा ॥ १५२ ॥**

‘**तदा**’ तस्मिन्नवसरे । ‘**कोपाटोपवशंवदा**’ रोषावेशवशीभूता । ‘**दुर्विनीता वनिता इव**’ कुलटा स्त्री इव । ‘**अभिषुण्वतः**’ स्नानं कुर्वतः । ‘**तस्य**’ राज्ञः । ‘**मुद्रा**’ हस्ताङ्गुल्या ऊर्मिका । ‘**कूपे**’ अवटे । ‘**रयात्**’ वेगात् । ‘**अपतत्**’ पतिता ॥ १५२ ॥

**गलितेनाङ्गुलीयेन, जाङ्गुलीयपदेन वा । सुवर्णातिशयाढ्येन, नरेन्द्रः प्राप जिह्मताम् ॥ १५३ ॥**

‘**सुवर्णातिशयाढ्येन**’ कनकाऽऽधिक्याऽऽढ्येन । जाङ्गुलीयपक्षे-सुवर्णैः प्रधानाक्षरैः, आढ्येन । ‘**गलितेन**’ पतितेन । पक्षे-स्मृतिभ्रष्टेन विस्मृतेन । ‘**जाङ्गुलीय-पदेन वा**’ जाङ्गुलीयविद्यापदेन इव । अत्र ‘**वा**’ इवार्थे । ‘**नरेन्द्रः**’ श्रेणिकनृपः । पक्षे-गारुडिकः । नरेन्द्रशब्दः गारुडिकार्थोऽपि वर्तते । ‘**जिह्मतां**’ विषादं प्राप ॥ १५३ ॥

**तपस्विनमिवालोक्य, मुद्राभ्रंशादनीदृशम् । विशामीशं दिदेशाथ, दासीं भद्रा विनिद्रधीः ॥ १५४ ॥**

**अथ** । ‘**मुद्राभ्रंशात्**’ ऊर्मिकापातात् । ‘**अनीदृशं**’ अनित्थम्भूतम् अस्वस्थमित्यर्थः । ‘**तपस्विनमिव**’ वराकमिव ।

**'विशामीशं'** राजानम् । **'आलोक्य'** दृष्ट्वा । **'विनिद्रधीः'** विनिद्रा अप्रमत्ता धीः मतिः यस्याः सा । **भद्रा । दासीं दिदेश**–आदिशति स्म ॥ १५४ ॥

**तदाऽऽज्ञया तया तोये, प्रयोगादपकर्षिते । मुद्रारत्नमयत्नेन, भूपः कूपान्तरैक्षत ॥ १५५ ॥**

**'तदाज्ञया'** भद्रादेशेन । **'तया'** दास्या । **'प्रयोगात्'** यन्त्रप्रयोगात् । **'तोये'** कूपस्थे जले । **'अपकर्षिते'** अपनीते बहिष्कृते । **'भूपः'** राजा श्रेणिकः । **'कूपान्तः'** कूपमध्ये । **'मुद्रारत्नं'** अङ्गुलीयम् । **'अयत्नेन'** प्रयासं विना । **'ऐक्षत'** पश्यति स्म ॥ १५५ ॥

**ग्राम्यं पौरेषु सूरेषु, भीरुं धनिषु निर्धनम् । मूर्खं सुधीषु तन्मेने, भूषणेषु गतप्रभम् ॥ १५६ ॥**

**'पौरेषु'** नागरिकेषु । **'ग्राम्यं'** ग्रामीणम् । **'सूरेषु भीरुं'** वीरेषु कातरम् । **'धनिषु निर्धनं'** श्रीमत्सु दरिद्रम् । **'सुधीषु मूर्खं'** विद्वत्सु मूर्खम् । तद्वत् । **'भूषणेषु'** कूपस्थेषु अलङ्कारेषु । **'तत्'** अङ्गुलीयकम् । **'गतप्रभं'** कान्तिहीनम् । **'मेने'** मन्यते स्म ॥ १५६ ॥

**आसीन्महीधरे लीना, या कान्तिजलवाहिनी । सोर्मिका नोर्मिकाष्ठाम-प्याऽऽपालङ्कारसागरे ॥ १५७ ॥**

**'महीधरे'** राज्ञि । पक्षे–पर्वते । **'लीना'** स्थिता । **या 'कान्तिजलवाहिनी'** कान्तिरसमयी नदी । **आसीत् । 'सा ऊर्मिका'** अङ्गुलीयकम् । **'अलङ्कारसागरे'** भूषणसमुद्रे । **'ऊर्मिकाष्ठामपि'** कल्लोलकक्षामपि । **'न आप'** न प्राप्ता ॥ १५७ ॥

**दासीं प्राह महीपालः, किमयं भूषणोच्चयः । साऽवदद्देव ! सद्भूतं, श्रूयतां भुवनाद्भुतम् ॥ १५८ ॥**

**'महीपालः'** पृथ्वीशः श्रेणिकः । **दासीं प्राह**–पृच्छति । **किं** कथम् । **अयं भूषणोच्चयः**–अलङ्कार–समूहः ?

**'सा'** दासी । **अवदत् । 'देव'** हे राजन् ! । **'भुवनाद्भुतं'** भुवने जगति अद्भुतं आश्चर्यरूपम् । **'सद्भूतं'** सत्यम् । **'श्रूयतां'** निशम्यताम् ॥ १५८ ॥

**देवा दासा दशास्यस्य, श्रीरामस्यार्णवः स्थलम् । नलस्येव रविः सूदो, याचकः श्रीपतिर्बलेः ॥ १५९ ॥**

**एवं नृदेवदेवेषु, देवदेवेषु दुर्घटम् । कल्याणमपि निर्माल्य-मेतन्नेतर्ममेशितुः ॥ १६० ॥**

**'दशास्यस्य'** रावणस्य । **'देवाः'** सुराः । **'दासाः'** सेवकाः । **श्रीरामस्य । 'अर्णवः'** समुद्रम् । **'स्थलं'** स्थलसमोऽभूत् । **नलस्य इव रविः सूर्यः 'सूदः'** सूपकारः । **'बलेः'** बलिराजस्य । **'श्रीपतिः'** विष्णुः । **'याचकः'** मार्गणः ॥ १५९ ॥ **एवं 'नृदेव-देवेषु'** नरपुङ्गवमुख्येषु चक्रिषु । **'देवदेवेषु'** इन्द्रेषु अपि । **'दुर्घटं'** दुःशकम् । **'नेतः'** हे स्वामिन् ! **मम ईशितुः**-स्वामिनः । **'कल्याणमपि'** सुवर्णमपि । **'निर्माल्यं'** उपभोगाऽयोग्यं व्यर्थं भवति इति श्रेणिकं प्रति दासी-वचनम् ॥ १६० ॥

**न माल्यमपि निर्माल्यं, स्वर्गिणां किं पुनर्वसु ? । विधूय सवधूकेन, यदनेन विमुच्यते ॥ १६१ ॥**

**यदेतत्सवधूकस्य, जनकेनोपनीयते । तत् पनीपत्यते कूपेऽपमानादिव भूषणम् ॥ १६२ ॥**

**'स्वर्गिणां'** देवानाम् । **'माल्यमपि'** स्रगपि । **'न निर्माल्यं'** न उपभोगाऽयोग्यं भवति । **किं पुनः वसु**-द्रव्यम् ? **यद् 'अनेन'** शालिभद्रेण । **'सवधूकेन'** सभार्येण । **'विधूय'** निष्कास्य । **'विमुच्यते'** परिहीयते ॥ १६१ ॥ **यत् एतत् । 'सवधूकस्य'** सपत्नीकस्य शालिभद्रस्य । **'जनकेन'** गोभद्र-देवेन । **'उपनीयते'** प्रेष्यते । **'तत्'** तस्मात् । **'अपमानादिव'** मानभङ्गादिव । **'भूषणं'** अलङ्कारजातम् । **'कूपे'** अवटे । **'पनीपत्यते'** भृशं पतति । अहं गोभद्रदेवदत्तोऽस्मि । ममैवंविधः अपमानः ? इति निर्वेदात् अलङ्कारः कूपे पतति इति भावः ॥ १६२ ॥

**शालेः परिमलैरेवं, राज्ञोऽभूदाशितम्भवः । अलमन्येन केनापीति मन्ये स शिरोऽधुनोत् ॥ १६३ ॥**

**एवम्** । '**शालेः**' शालिभद्रस्य । पक्षे-शालिपाकस्य । '**परिमलैः**' सुगन्धिपदार्थैः मर्दनं विभूतिदर्शनं इत्यादिकैः परिमलरूपैः । शालिपाकपक्षे-सुगन्धैः । '**राज्ञः**' श्रेणिकस्य । '**आशितम्भवः**' तृप्तिः । '**अभूत्**' जाता । '**अन्येन**' परेण । '**केनाऽपि**' विभूत्यादिना । पक्षे-मिष्टान्नादिकेन । '**अलं**' कृतम् । इति कथयितुमिव । '**सः**' राजा । '**शिरः**' मस्तकम् । '**अधुनोत्**' अकम्पयत् । इत्यहं **मन्ये** । धुनोति एव शिरः तृप्तः जनः अधिकाहार-ग्रहणवेलायाम् । अत्र राज्ञः शिरःकम्पः वस्तुतः आश्चर्येण जातः ॥ १६३ ॥

**सुधीर्भूवल्लभः शाले-र्भोगसूत्रं महार्थयुक् । वर्णाढ्यमश्रुतं पूर्वं, व्याचिख्यासुरचिन्तयत् ॥ १६४ ॥**

'**शालेः**' शालिभद्रस्य । '**भोगसूत्रं**' भोगविलासम् । पण्डितपक्षे-सिद्धान्तम् । '**व्याचिख्यासुः**' कथनेच्छुः । पक्षे-व्याख्यानं कर्तुकामः । '**सुधीः**' निर्मलमतिः । पक्षे-विद्वान् । '**भूवल्लभः**' राजा । '**अचिन्तयत्**' विचारयामास । कथम्भूतं सूत्रम् ? '**महार्थयुक्**' महान् अर्थः-द्रव्यं तेन युक्तम् । पक्षे-महता अर्थेन युक्तम् । '**वर्णाढ्यं**' वर्णैः रूपैः वर्णिकाभिः वा आढ्यम् । पक्षे-अक्षराढ्यम् । '**पूर्वं**' प्राक् । '**अश्रुतं**' अनाकर्णितम् ॥ १६४ ॥

**अस्य पृथ्वीधरेभ्योऽपि, पुण्यं मेरुरिवोच्चकैः । मर्त्यामर्त्यश्रियौ यस्यो-पत्यकाऽधित्यकाश्रये ॥ १६५ ॥**

'**अस्य**' शालिभद्रस्य । '**पृथ्वीधरेभ्योऽपि**' नृपेभ्योऽपि । मेरुपक्षे-पर्वतेभ्योऽपि । **मेरुः इव** । '**उच्चकैः पुण्यं**' उन्नतं सुकृतमस्ति । '**यस्य**' पुण्यमेरोः । '**उपत्यकाऽधित्यकाश्रये**' अधोभागे उपरितनभूभागे च । 'अधित्यकोर्द्ध्वभूमिः स्यादधोभूमिरुपत्यका' इति हैम्याम् । '**मर्त्यामर्त्यश्रियौ**' मनुष्यदेवलक्ष्म्यौ स्तः । मेरोरधस्तनभागे मनुष्यश्रीरस्ति, तत्र

युगलिकादिमानवानां वासात् । उपरितनभागे च देवश्रीः तत्र देवानामागमनात् निवासाच्च । एवं शालिरपि मर्त्याऽमर्त्यश्रीभोक्ता अस्ति इत्यर्थः ॥ १६५ ॥

**वयं हयप्रियाः स्थानभ्रष्टा यद्दलनादिकम् । सहामः सर्वशस्येषु, परं शालिर्न खण्ड्यते ॥ १६६ ॥**

**वयम्** । '**हयप्रियाः**' हयाः अश्वाः प्रियाः येषां ते राजानः । धान्यपक्षे यवाः । 'यवो हयप्रियः' इति हैम्याम् । '**यत्**' यस्मात् । '**स्थानभ्रष्टाः**' राज्यरक्षार्थं इतस्ततः भ्रमणात् स्थानभ्रष्टाः । '**दलनादिकं**' राज्यनाशादिकम् । पक्षे-दलनम् । '**सहामः**' तितिक्षामहे । '**परं**' परन्तु । '**सर्वशस्येषु**' सर्वप्रशस्येषु पुरुषेषु । पक्षे-समस्तधान्येषु । '**शालिः**' शालिभद्रः । पक्षे-शालिव्रीहिः । '**न खण्ड्यते**' न भ्रश्यते । पक्षे-न खण्ड्यते । सहन्ते हि स्थानभ्रष्टाः राजानः यवादिधान्यानि च दलनापमानादिकम् । किन्तु शालिभद्रः शालिव्रीहिर्वा न खण्ड्यते क्वापि ॥ १६६ ॥

**नालीकं शालिरेवायं, शस्यश्रीणां शिरोमणिः । यस्य राजशुकाः पुण्य-कणेभ्यः स्पृहयन्त्यहो ॥ १६७ ॥**

'**न अलीकं**' न असत्यम् । '**शस्यश्रीणां**' प्रशस्यलक्ष्मीणाम् । धान्यपक्षे धान्यलक्ष्मीणाम् । '**शिरोमणिः**' मुख्यः । '**अयं शालिः एव**' शालिभद्रः एव । पक्षे-शालिव्रीहिः एव । **यस्य** । '**पुण्यकणेभ्यः**' पुण्यांशेभ्यः । पक्षे-पवित्र-धान्येभ्यः । '**राजशुकाः**' राजानः । पक्षे-शुकवराः । **अहो** आश्चर्ये । '**स्पृहयन्ति**' इच्छन्ति ॥ १६७ ॥

**तस्मादकस्मादस्माकमपि शालिविलोकनात् । जज्ञे कृतार्थता मन्ये, जिनमूर्तेरिवेक्षणात् ॥ १६८ ॥**

'**तस्मात्**' तत्कारणात् । '**अकस्मात्**' पूर्वमचिन्तनात् । **अस्माकमपि** । '**जिनमूर्तेः**' **ईक्षणात् इव**' अर्हत्प्रतिम-दर्शनादिव । '**शालिविलोकनात्**' शालिभद्रदर्शनात् । '**कृतार्थता**' कृतकृत्यता । '**जज्ञे**' जाता । इति **मन्ये** ॥ १६८ ॥

**अथैवं विस्मितं भद्रा, कल्पद्रुमफलैः कलैः । आहारैरमृतस्येवा-ध्याहारै र्देवनिर्मितैः ॥ १६९ ॥**

**वह्निपाकैर्धूमपाकैः, सूर्यपाकैर्द्विपाकिमैः । चित्रीयमाणं क्षोणीशं, ग्राम्यमारववत् पुरे ॥ १७० ॥**

**दिव्यैर्नव्यैरलङ्कारैर्माल्यैर्गोशीर्षचन्दनैः । वासोभिः सपरीवारं, सादरं समतूतुषत् ॥ १७१ ॥ (विशेषकम्)**

**अथ** । '**एवं**' विभूतिदर्शनेन । '**विस्मितं**' आश्चर्ययुक्तं नृपम् । **भद्रा** । '**कलैः**' मधुरैः । '**कल्पद्रुमफलैः**' सुरतरुफलैः । '**अमृतस्य इव**' सुधायाः इव। '**अध्याहारैः**' क्षेपैः । '**आहारैः**' देवनिर्मितैः भोजनैः ॥ १६९ ॥ '**वह्निपाकैः**' वह्निना पच्यन्ते इति वह्निपाकैः । '**धूमपाकैः**' धूमैः पच्यन्ते इति धूमपाकैः । '**सूर्यपाकैः**' सूर्येण पच्यन्ते इति सूर्यपाकैः । '**द्विपाकिमैः**' वह्नि-सूर्यातप-पाचितैः द्विपाकिमैः । '**पुरे**' नगरे । '**ग्राम्यमारववत्**' ग्राम्यः ग्रामीणः मारवः मरु देशीयजनः तद्वत् । '**क्षोणीशं**' नृपम् । '**चित्रीयमाणं**' आश्चर्यमनुभवन्तम् ॥ १७० ॥ '**दिव्यैः**' परमैः । '**नव्यैः**' नवीनैः । '**अलङ्कारैः**' भूषणैः । '**गोशीर्षचन्दनैः**' हरिचन्दनैः । '**वासोभिः**' वस्त्रैः । '**सपरीवारं**' परिवारसहितं नृपम् । '**सादरं**' आदरपूर्वकम् । '**समतूतुषत्**' तोषयामास ॥ १७१ ॥

**श्रेणिकस्य स्वस्थाने गमनम्–**

**तुङ्गरङ्गरचना तरङ्गिणीपूरगौरवतरत्तरान्तरः । प्रांशुमाशु मगधक्षितिपतिः, सौधशैलशिखराग्रमग्रहीत् ॥ १७२ ॥**

'**तुङ्गरङ्गरचना-तरङ्गिणी-पूरगौरव-तरत्तरान्तरः**' तुङ्गो योऽसौ रङ्गः हर्षः तस्य रचना सैव नदी तस्याः पूरः तस्य गौरवं-गुरुत्वं तत्र 'तरत्तरं'-अतितरत् अन्तरं हृदयं यस्य सः । '**मगधक्षितिपतिः**' मगधसम्राट् श्रेणिकः । '**आशु**' शीघ्रम् । '**प्रांशुं**'

उन्नतम् । '**सौधशैलशिखराग्रं**' प्रासादपर्वतशिखराग्रभागम् । '**अग्रहीत्**' जग्राह । शालिभद्रप्रासादे हर्षनदीपूरे तरन् श्रेणिकः स्वसौधपर्वतं जग्राह । स्वप्रासादं प्रति गतः इत्यर्थः । रथोद्धतावृत्तमिदम् । 'रान्नराविह रथोद्धता लगौ' इति तल्लक्षणात् ॥ १७२ ॥

**सौख्यानामुषयेव भोगकलया, पाणौकृतं प्रौढया, बद्धं बाणनिभेन मोहविभुना, प्रेमाहिपाशैर्भृशम् ।**

**उल्लङ्घ्य स्मर-वह्नि-वप्र-वलयं, मानेन नागारिणा, शालिर्मोचयति स्म केशव इव, स्वेनानिरुद्धं मनः ॥ १७३ ॥**

**( शार्दूल )**

'**केशवः इव**' विष्णुः इव । '**शालिः**' शालिभद्रः । '**स्वेन**' आत्मना । '**अनिरुद्धं**' असंयतम् । विष्णुपक्षे-अनिरुद्धनामकं कामपुत्रं विष्णुपौत्रम् । '**मनः**' चेतः । '**मोचयति स्म**' मुमोच । कथम्भूतं तत् ? '**सौख्यानां**' सुखानाम् । '**उषया**' प्रातःकालरूपया भाजनभूतया । पक्षे-उषा अनिरूद्धभार्या तया । '**प्रौढया**' उत्कृष्टया । पक्षे-प्रौढस्त्रिया । '**भोगकलया**' सुखकलया । पक्षे-भोगमधुरया । '**पाणौकृतं**' अङ्गीकृतम् । पक्षे-विवाहितम् । '**बाणनिभेन**' बाणतुल्येन । पक्षे-बाणाभिधाऽसुरेण । '**मोहविभुना**' मोहराजेन । '**प्रेमाहिपाशैः**' स्नेहनागपाशैः । पक्षे-नागपाशैः । '**भृशं**' अत्यन्तम् । '**बद्धं**' निगडितम् । '**मानेन**' गर्वेण । '**नागारिणा**' सर्पशत्रुणा । '**गरुडेन**' सौपर्णेयेन । '**स्मरवह्निवप्रवलयं**' कामाग्निदुर्गमण्डलम् । '**उल्लङ्घ्य**' अतिक्रम्य । पूर्वं पातालराजस्य बाणासुरस्य उषया गृहीतपाणिं नागपाशबद्धं बाणासुरेणैव कृतवह्निवप्रवलयं अनिरुद्धं प्रद्युम्नपुत्रं गरुडवाहनो माधवो मोचितवानिति पौराणिकाः ॥ १७३ ॥

**श्रीशालिचरिते धर्म-कुमारसुधिया कृते । श्रीप्रद्युम्नधिया शुद्धे, चतुर्थः प्रक्रमोऽभवत् ॥ १७४ ॥**

इति श्रीकच्छवागडदेशोद्धारकतपागच्छाचार्यश्रीविजयकनकसूरि-प्रशिष्याचार्य
विजयकलापूर्णसूरिजी-शिष्य मुनिश्री कलाप्रभविजयजी (आ. विजय कलाप्रभसूरिजी)-शिष्य-
मुनिश्री (पंन्यासश्री) मुक्तिचन्द्र विजयजी-शिष्य
मुनिश्री (पंन्यासश्री) मुनिचन्द्रविजय-
विरचितायां श्रीशालिभद्र महाकाव्यस्य
सानुवादटीकायां चतुर्थः प्रक्रमोऽभवत् ।

इति श्रीशालिभद्रकाव्ये श्रीश्रेणिकागमनवर्णनो नाम चतुर्थः प्रक्रमः ॥

## ॥ अथ पञ्चमः प्रक्रमः ॥

**शालेः पुण्यकणश्रेणिः, किं गणेयाः कथञ्चन । इदमीयः परं मान-महिमा परिभाव्यताम् ॥ १ ॥**

'**शालेः**' शालिभद्रस्य । धान्यपक्षे-शालिव्रीहेः । '**पुण्यकणश्रेणिः**' पुण्यांशावली । पक्षे-पवित्रकणमाला । **किं कथञ्चन**। '**गणेयाः**' गणयितुं शक्याः ? नैवेत्यर्थः । गयहृदयादयः ॥ (उणा-३७०) ॥ इति एये गणेयं निपात्यते । यद् वाचस्पतिः-'गणनीयं तु गणेयम्' इति। '**परं**' परन्तु। '**इदमीयः**' अस्य अयम् इदमीयः। '**मान-महिमा**' गौरवमहिमा । पक्षे-प्रमाणमहिमा । '**परिभाव्यतां**' विचार्यताम् ॥ १ ॥

**राजालोकात् किलोद्वेले, शालेर्वैराग्यसागरे । मर्त्यामर्त्यश्रियौ गङ्गा-सिन्धू वैरस्यमीयतुः ॥ २ ॥**

'**राजालोकात्**' श्रेणिकदर्शनात् । सागरपक्षे-चन्द्र-दर्शनात् । **किलः** निश्चये । '**उद्वेले**' उच्चाः वेलाः तरङ्गाः यस्मिन् तस्मिन् । '**शालेः**' शालिभद्रस्य । **वैराग्यसागरे**। '**मर्त्यामर्त्यश्रियौ**' मनुष्यदेवलक्ष्म्यौ । '**गङ्गासिन्धू**' तन्नाम्न्यौ नद्यौ । '**वैरस्यं**' क्षारतारूपां विरसताम् । '**ईयतुः**' प्रापतुः ॥ २ ॥

**महामात्रेण तेनाऽथ, मानोऽयं गन्धसिन्धुरः । वैराग्यरङ्गसिन्दूर-पूरैः श्रृङ्गारितो बभौ ॥ ३ ॥**

**अथ** । '**महामात्रेण इव**' हस्तिपकेन इव । '**तेन**' शालिभद्रेण । '**अयं मानः गन्धसिन्धुरः**' मानरूपः गन्धहस्ती। '**वैराग्यरङ्गसिन्दूरपूरैः**' विरक्तिरङ्गसिन्दूर-प्रवाहैः । '**श्रृङ्गारितः**' मण्डितः । '**बभौ**' भाति स्म ॥ ३ ॥

**शालिभद्रस्य मन्त्रणा—**

**इन्द्रियेन्द्रेण मनसा, स विवेकबृहस्पतिः । आलुलोचे चतुष्कर्णं, मोहदैत्याभिषणने ॥ ४ ॥**

'**मोहदैत्याभिषणने**' युद्धार्थं मोहासुराभिमुखगमने। सेनया सह वैरिणामभिमुखगमनं '**अभिषेणनम्**'। '**विवेकबृहस्पतिः**' योग्यायोग्यविभागे सुरगुरुसमः। '**सः**' शालिभद्रः। '**इन्द्रियेन्द्रेण**' इन्द्रियाणां इन्द्रेण नाथेन। पक्षे–देवेन्द्रेण। '**मनसा**' चेतसा सह। '**चतुष्कर्णं**' चतुष्कर्णा आलोचना किल द्वयोः पुरुषयोः भवति तयोः चत्वारः एव कर्णाः भवन्ति। अन्येन श्रुताऽऽलोचना विनश्यति। यदुक्तम् – 'षट्कर्णो भिद्यते मन्त्रः, चतुष्कर्णो न भिद्यते'। '**आलुलोचे**' मन्त्रणां चकार ॥ ४ ॥

**प्रातर्मङ्गलतूर्याणि, पौरैः साधारणान्यहो । प्रसादवित्तकैर्भोज्यं, तुरङ्गा मन्दुरानरैः ॥ ५ ॥**

**यामिकैः कलविङ्कैश्च, प्रासादाः शिखराण्यपि । परं ममेति सत्तैव, राज्ञामपि सुखावहा ॥ ६ ॥**

**एवं स्थितेऽपि यद्यन्य-स्वामिना श्रीरधिष्ठिता । तदा दूगस्ति नीरोगा, तारैव पुनरावृता ॥ ७ ॥**

'**अहो**' आश्चर्ये। '**प्रातः**' प्रभाते। '**मङ्गलतूर्याणि**' मङ्गलवादित्राणि। '**पौरैः**' नागरैः। '**साधारणानि**' श्रोतुं सामान्यानि। '**प्रसादवित्तकैः**' कृपापात्रैः। '**भोज्यं**' अन्नं भोक्तुं साधारणम्। '**मन्दुरानरैः**' अश्वशालापुरुषैः। '**तुरङ्गाः**' अश्वाः साधारणाः ॥ ५ ॥ '**यामिकैः**' प्राहरिकैः। '**कलविङ्कैः**' चटकपक्षिभिः। **चः** समुच्चये। '**प्रासादाः**' राजभवनानि। '**शिखराणि अपि**' चन्द्रशालादीनि अपि साधारणानि। '**परं**' परन्तु। '**मम इति सत्ता एव**' अधिकार–भावना एव। **राज्ञामपि सुखावहा** भवति। मङ्गलतूर्याणि, मिष्टान्नभोजनम्, अश्वारोहणम्, प्रासादवसनम्, इत्यादिकानि साधारणजनाः अपि प्राप्नुवन्ति। अस्मिन्नर्थे राज्ञां का विशेषता ? किन्तु 'इदं सर्वं मम' इति ममताभावनैव राज्ञामपि सुखदा भवतीत्यर्थः

॥ ६ ॥ **'एवं स्थितेऽपि'** सर्वसाधारणे सुखे लब्धेऽपि । **'यदि'** चेत् । **'अन्यस्वामिना'** परनाथेन । **'श्रीः'** लक्ष्मीः । **'अधिष्ठिता'** आयत्तीकृता। **तदा** । **'दृग्'** नयनम् । **'नीरोगा'** रोगरहिता । **अस्ति** । किन्तु । **'तारा एव'** कनीनिका एव । **पुनः** । **'आवृता'** आच्छादिता अस्ति । किं तया दृशा यस्यास्तारैवोपहता स्यात् ? मुधैव सा दृगित्यर्थः ॥ ७ ॥

**पुष्पमालाः पराघ्राता, नार्हन्ति मरुतां यथा । मनस्विनां परायत्ता, वित्ता अपि तथा श्रियः ॥ ८ ॥**

**'पराघ्राताः'** 'परैः' अन्यैः 'आघ्राताः' घ्राणविषयीकृताः । **'पुष्पमालाः'** कुसुमस्रजः । **यथा** । **'मरुतां'** देवानाम्। **'न अर्हन्ति'** न योग्याः भवन्ति । **तथा** । **'वित्ता अपि'** विख्याताः अपि । **'श्रियः'** लक्ष्म्यः । चेत् **'परायत्ताः'** पराधीनाः सन्ति तर्हि । **'मनस्विनां'** स्वाभिमानानां न अर्हन्ति ॥ ८ ॥

**नृसिंहा न समीहन्ते, भक्ष्यं कक्षीकृतं परैः । स्वीकुर्वन्ति तु गोष्ठश्वास्तत्कृत्वा विग्रहाग्रहम् ॥ ९ ॥**

**'परैः' 'कक्षीकृतं'** अन्यैः स्वीकृतम्। **'भक्ष्यं'** खाद्यं वस्तु। **'नृसिंहा'** नरोत्तमाः सिंहाश्च। **'न समीहन्ते'** नेच्छन्ति। **'गोष्ठश्वाः'** स्वस्थानस्थाः परद्वेषिणो जनाः, गोष्ठे श्वानः इव । 'स्वस्थानस्थः परद्वेषी' इति हैम्याम् । पक्षे-गोष्ठे-गोस्थाने स्थिताः श्वानः। **'तु'** किन्तु। **'तत्'** भक्ष्यम्। **'विग्रहाग्रहं'** विग्रहस्य युद्धस्य आग्रहम्। **'कृत्वा'** विधाय ॥ **'स्वीकुर्वन्ति'** अङ्गीकुर्वन्ति ॥ ९ ॥

**हेमाप्येकाहभुक्तं चे-न्निर्माल्यं परिकल्प्यते । ध्रुवं तदीश-निर्माल्य-मेवामूर्मम सम्पदः ॥ १० ॥**

**'एकाहभुक्तं'** एकदिनप्रयुक्तम् । **'हेमाऽपि'** सुवर्णमपि । **'चेत्'** यदि । **'निर्माल्यं'** भोक्तुमयोग्यम् । **'परिकल्प्यते'** गण्यते । **'तत्'** तस्मात् । **'ध्रुवं'** निश्चितम् । **अमूः मम** । **'सम्पदः'** विभूतयः । **'ईशनिर्माल्यमेव'** श्रेणिकनृपनिर्माल्यं महादेवनिर्माल्यं चैव सन्ति ॥ १० ॥

**नाहं तिष्ठापयिष्ये तत्, पुण्यकोशं विकाशिधीः । जिगीषुरिव विज्ञातै-र्भोगैरुभयचेतनैः ॥ ११ ॥**

'**तत्**' तस्मात् । '**जिगीषुरिव**' शत्रुजयेच्छुरिव । शालिभद्रो मोहशत्रुजिगीषुरेव । '**विकाशिधीः**' विकसितमतिः । **अहम्** । '**उभयचेतनैः**' उभया मम मोहस्य चापि चेतना येषु तैः । जिगीषुपक्षे-शत्रुपक्ष-स्वपक्षोभयपुरुषैः इत्येवम् । '**विज्ञातैः**' विदितैः । '**भोगैः**' संसारसुखैः । '**पुण्यकोशं**' सुकृतनिधिम् । पक्षे-पवित्रनिधिम् । '**न तिष्ठापयिष्ये**' नाहं स्थापयितुं समीहिष्ये । अत्र 'तिष्ठापयिषिष्ये' इतिरूपमुचितं प्रतिभाति । नहि स्थापयति कोऽपि शत्रुजनपार्श्वे धननिधिम् । शालिपक्षेऽपि मोहशत्रुपक्षीयभोगपार्श्वे स्वपुण्यनिर्धिं स्थापयितुं शालिभद्रो नेच्छति ॥ ११ ॥

**यत्रान्तर्भृत्यतादुःखं, सुखच्छाया बहिष्पुनः । तैः स्वर्गैरप्यलं ताम्रसुवर्णाभरणप्रभैः ॥ १२ ॥**

'**यत्र**' स्वर्गे । '**अन्तर्भृत्यतादुःखं**' मध्ये सेवकत्वकष्टम् । **बहिः पुन** । '**सुखच्छाया**' सुखभ्रान्तिः । '**तैः ताम्रसुवर्णाभरणप्रभैः**' ताम्रेऽपि-ताम्राभरणेऽपि सुवर्णाभरणानां प्रभा येषु तैः । '**स्वर्गैरपि अलं**' देवलोकैरपि पर्याप्तम् ॥ १२ ॥

**राजसर्पः प्रसरन्तं, यकं जेगिल्यतेऽनिशम् । धिगहो भोगिलोकं तं, सकर्णत्वनिराकृतम् ॥ १३ ॥**

'**यकं**' यं भोगिलोकम् । पक्षे-नागलोकं पाताललोकम् । '**प्रसर्पन्तं**' गच्छन्तम् । '**अनिशं**' सदा । '**राजसर्पः**' राजवरः । पक्षे-अजगरः । '**जेगिल्यते**' भृशं गिलति । '**अहो**' आश्चर्ये । '**तं सकर्णत्वनिराकृतं**' दक्षत्वरहितम् । पक्षे-कर्णरहितम् । सर्पस्य दृक्कर्णत्वात् । '**भोगिलोकं**' विलासिजनम् । पक्षे-सर्पलोकम् । **धिगस्तु** ॥ १३ ॥

**तं मन्त्रं साधयिष्यामि, सेविष्ये देवतां च ताम् । आनन्दो राजमान्द्येन, न बन्दीक्रियते यथा ॥ १४ ॥**

**तं मन्त्रं साधयिष्यामि**-सिद्धं करिष्यामि । **तां च देवतां**-देवम् । अत्र देवात् तल् ।७।२।१६२ ॥ इति स्वार्थे तल्प्रत्ययः । **'सेविष्ये'** आराधयिष्यामि । **यथा** मम । **'आनन्दः'** प्रमोदः । **'राजमान्द्येन'** नृपमौर्ख्येण । पक्षे-क्षयरोगेण । **'न बन्दीक्रियते'** न कारागृहे क्षिप्यते ॥ १४ ॥

**धर्मघोषसूरीणामागमनम्–**

**तदेव भव-भङ्गाय, मानसे सम्प्रधारिते । कल्याणमित्रमभ्येत्याकस्मात्तस्मै व्यजिज्ञपत् ॥ १५ ॥**

**तत्** एवं उपर्युक्तविचारणया । **'भवभङ्गाय'** संसारोच्छेदाय । **'सम्प्रधारिते'** निर्णीते । **'मानसे'** चेतसि सति । **'अकस्मात्'** तत्कालम् । **'कल्याणमित्रं'** कल्याणकारि-सुहृत् । **'अभ्येत्य'** आगत्य । **'तस्मै'** शालिभद्राय । **'व्यजिज्ञपत्'** ज्ञापयति स्म ॥ १५ ॥

**श्रीधर्मजययात्रायां, मूर्तं मङ्गलमद्भुतम् । शङ्खघोष इवात्रागात्, धर्मघोषगणेश्वरः ॥ १६ ॥**

**'श्रीधर्मस्य'** श्रीधर्मभूपस्य । **'जययात्रायां'** विजयप्रयाणे । **'अद्भुतं'** आश्चर्यरूपम् । **'मूर्तं'** मूर्तिमत् । **'मङ्गलं'** शुभम् । **'शङ्खघोषः इव'** कम्बुनादः इव । **'धर्मघोष गणेश्वरः'** धर्मघोषनामा गणेश्वरः आचार्यः । **'अत्र'** राजगृहनगरे । **'आगात्'** आगतः ॥ १६ ॥

**एकमुन्माथिता कामं, केकिकेकायितं परम् । जाते रसवतीपाके, प्रियातिथिसमागमः ॥ १७ ॥**

**ग्रामान्तरं प्रतिष्ठासोः, समर्था सार्थसङ्गतिः । प्रौढपोताधिरूढस्य, पवनस्यानुकूलता ॥ १८ ॥**

**यदयं मम धर्मेच्छोर्महेच्छगुरुसङ्गमः । भद्राऽङ्गभूस्तदा भद्राऽङ्गभूरेवमभावयत् ॥ १९ ॥**

**'एकं'** प्रथमं तावत् । **'कामं'** अत्यर्थम् । **'उन्माथिता'** कामाविष्टा बाला । **'परं'** द्वितीयम् । **'केकिकेकायितं'** मयूरध्वनिः अभवत् । **'रसवतीपाके जाते'** भोजने सिद्धे। **'प्रियातिथिसमागमः'** प्रियस्य इष्टस्य अतिथेः समागमः आगमनम् ॥ १७ ॥ **'ग्रामान्तरं'** अन्यग्रामम् । **'प्रतिष्ठासोः'** प्रस्थातुमिच्छुकस्य जनस्य । **'समर्था'** क्षमा । **'सार्थसङ्गतिः'** सार्थमीलनम्। **'प्रौढपोताधिरूढस्य'** महाप्रवहणाधिरूढस्य । **'पवनस्य'** वायोः । **अनुकूलता** ॥ १८ ॥ **यत्** । **'धर्मेच्छोः'** धर्मस्य इच्छोः । **मम** । **'महेच्छगुरुसङ्गमः'** उदारगुरुमीलनम् । अभवत् । **'एवं'** उक्तप्रकारेण । **'भद्राङ्गभूः'** कल्याणकारणस्थानम् । **'भद्राङ्गभूः'** भद्रापुत्रः शालिभद्रः । **'अभावयत्'** अचिन्तयत् ॥ १९ ॥

**तुरङ्गमविमानेन, विमानेनेव रंहसा । विमानेनसमश्रीकः, स विमानेन चेतसा ॥ २० ॥**

**ज्ञान-दर्शन-चारित्र-दुग्ध-दध्याज्य-काम्यया । धर्मघोषमिवाचार्यं, धर्मघोषमुपस्थितः ॥ २१ ॥**

**'रंहसा'** वेगेन । **'विमानेन इव'** विमान-तुल्येन । **'तुरङ्गमविमानेन'** अश्ववाहनेन । **'विमानेनसमश्रीकः'** विमानस्य इनः स्वामी इन्द्रः तस्य समा श्रीः यस्य सः । **'विमानेन'** विगतो मानो यस्मात् तेन । **'चेतसा'** मनसा ॥ २० ॥ **'ज्ञान-दर्शन-चारित्र दुग्धदध्याज्यकाम्यया'** ज्ञान-दर्शन-चारित्राणि एव क्रमशः दुग्धदधिघृतानि तेषां काम्यया वाञ्छया । **'धर्मघोषमिव'** धर्मगोरसनिवासे घोषतुल्यं गोकुलतुल्यम् । 'घोषस्त्वाभीरपल्ली स्यात्' इति हैम्याम् । **'धर्मघोषं आचार्यं'** घर्मघोषनामकं सूरिम् । **'उपस्थितः'** समीपं गतः ॥ २१ ॥

**प्रणम्योपाविशद्दत्वा, विनयागस्त्यदक्षिणाम् । कल्याणदक्षिणां पुण्य-दक्षिणां त्रिः प्रदक्षिणाम् ॥ २२ ॥**

**'प्रणम्य'** प्रकर्षेण नत्वा । **'विनयागस्त्यदक्षिणां'** विनयः एव अगस्त्यर्षिः तस्य निवासाय दक्षिणदिक्समानाम् ।

अगस्त्यर्षेः दक्षिणदिग् निवासस्थानमिति पौराणिकाः । '**कल्याणदक्षिणां**' कल्याणदात्रीम् । '**पुण्यदक्षिणां**' पुण्यानुकूलाम् । '**त्रिः**' त्रिवारम् । **प्रदक्षिणाम्** । '**दत्वा**' कृत्वा । '**उपाविशत्**' उपविष्टः ॥ २२ ॥

**सद्धर्मलक्षणाः सूरिः, सुधाया इव लक्षणाः । मिथ्याविलक्षणा वाचः, प्राह हर्षाविलक्षणाः ॥ २३ ॥**

'**सूरिः**' धर्मघोषाचार्यः । '**सद्धर्मलक्षणाः**' सद्धर्मस्य लक्षणानि यासु ताः (वाचः) । '**सुधायाः इव लक्षणाः**' अमृतसदृश्यः। अत्र अभ्रादिभ्यः ।७।२।४६॥ इत्यनेन मत्वर्थीयः अः प्रत्ययः । '**मिथ्याविलक्षणाः**' मिथ्यात्वविपरीताः । '**हर्षाविलक्षणाः**' हर्षेण आत्मानन्देन आविलः व्याप्तः क्षणः समयः यासु ताः । '**वाचः**' वचनानि । '**प्राह**' वदति ॥ २३ ॥

**तथाहि-**

**भव्याः ! भवाहवे नव्य-शीलसन्नाहशालिनः । सदागमाशिरस्त्राणाः, संयमाश्वसमाश्रिताः ॥ २४ ॥**

**आदाय दर्शनज्ञानाचारशल्यत्रयं करे । विजयध्वं क्षणान्मोहरागद्वेषद्विषत्त्रयम् ॥ २५ ॥**

'**भव्याः**' हे भव्यात्मानः ! । '**भवाहवे**' संसारसङ्ग्रामे । '**नव्यशीलसन्नाहशालिनः**' नवब्रह्मचर्यकवचधारिणः । '**सदागमशिरस्त्राणाः**' सुसिद्धान्तशीर्षण्याः । '**संयमाश्वसमाश्रिताः**' चारित्रतुरङ्गाधिष्ठिताः ॥ २४ ॥ '**करे**' हस्ते । '**ज्ञान-दर्शनाचारशल्यत्रयं**' रत्नत्रयीरूपं त्रिशल्यम् प्रहरणविशेषम् । '**आदाय**' गृहीत्वा । '**क्षणात्**' सद्यः । '**मोहरागद्वेषद्विषत्त्रयं**' मोहादिशत्रुत्रयम् । '**विजयध्वम्**' शत्रून् पराजितान् कुरुत ॥ २५ ॥

**पायं पायं कणेहत्य, तदेतद्देशनामृतम् । स पप्रच्छ स्वसन्देह-चर्च्चां मुनिमर्चचिकाम् ॥ २६ ॥**

**तद् एतद्** । '**देशनामृतं**' वाणीसुधाम् । '**कणेहत्य**' तृप्तिं यावत् । कणेमनस्तृप्तौ ।३।१।६॥ इति गति-संज्ञा ।

**'पायं पायं'** अभीक्ष्णं पानं पायं पायं, पीत्वा पीत्वा इत्यर्थः । 'ख्णम् चा०' ५।४।४९॥ इति ख्णम्, 'आत एः कृः'।४।३।५३॥ इति ऐः , आयादेशे द्वित्वे च रूपम् । **'स'** शालिभद्रः । **'मुनिमर्चिकां'** मुनिपुङ्गवम् । **'स्वसन्देहचर्चां'** निजसंशयविचारणाम्। **'पप्रच्छ'** पृच्छति स्म ॥ २६ ॥

**स्वामिभृत्यप्रवाहोऽयं, मानिचित्तसरः पतन् । केन सत्कर्मबन्धेन, जगद्बन्धो ! निवार्यते ॥ २७ ॥**

**'जगद्बन्धो'** हे विश्वबान्धव ! । **'मानिचित्तसरः'** मनस्विमनोजलाशयम् । **'पतन्'** आगच्छन् । **'अयं स्वामिभृत्यप्रवाहः'** स्वामिसेवकपरम्पराप्रवाहः । **'केन सत्कर्मबन्धेन'** पालि-रूपेण पुण्यार्जनेन । **'निवार्यते'** रुध्यते ॥ २७ ॥

**चारुज्ञानचतुष्काढ्यः क्षमाक्षामोदरीवरः । प्राह श्रीधर्मसाम्राज्यसाधुराजः स राजवत् ॥ २८ ॥**

**'चारुज्ञानचतुष्काढ्यः'** मति-श्रुता-वधि-मनःपर्ययचतुर्ज्ञानयुतः । राजपक्षे चारुज्ञानेन निपुणतया निर्मितेन चतुष्केन संस्थानेन आढ्यः युतः । **'क्षमाक्षामोदरीवरः'** क्षमा क्षामोदरी-कृशोदरी वरः पतिः । पक्षे धरणीरमणीपतिः राजा । **'श्रीधर्मसाम्राज्यसाधुराजः'** श्रीधर्मसाम्राज्ये साधुराजः यतिपतिः । पक्षे-लक्ष्मीधर्मयुत-साम्राज्ये साधुराजः । श्रेष्ठराजा । **'सः'** धर्मघोषाचार्यः । **'राजवत्'** नृपवत् । **'प्राह'** कथयति ॥ २८ ॥

**विशालकमलाकेलि-चतुःशालस्य शालते । अयमन्तर्मुखः प्रश्नस्तवैवान्तः स्फुरत्तरः ॥ २९ ॥**

**'विशालकमलाकेलिचतुःशालस्य'** विशाललक्ष्मीक्रीडार्थं चतुःशालतुल्यस्य । **तव** । **एवः** अवधारणे । **'अन्तःस्फुरत्तरः'** हृदये अतिशयेन स्फुरन् । **'अयं अन्तर्मुखः'** अन्तरङ्गः । **'प्रश्नः'** पृच्छा । **'शालते'** शोभते । स्वामिसेवकभावनिरोधेच्छारूपः प्रश्नः त्वादृशस्य भोगशालिनः एव शोभते, न सामान्यजनानामिति भावः ॥ २९ ॥

**सङ्गत्यागसमुत्तुङ्गकाष्ठासक्तसुधीमृदा । चारित्र-सेतुबन्धेन, सहसा स निवार्यते ॥ ३० ॥**

‘**सङ्गत्यागसमुत्तुङ्ग-काष्ठासक्तसुधीमृदा**’ सङ्गत्यागः एव समुत्तुङ्गं महद्यत् काष्ठं तेन आसक्ता-लग्ना सुधीः-शोभना बुद्धिः एव मृत्-मृत्तिका तया । ‘**चारित्र-सेतुबन्धेन**’ सर्वविरतिपालिकरणेन । ‘**सः**’ स्वामिभृत्यप्रवाहः । ‘**सहसा**’ सपदि । ‘**निवार्यते**’ रुध्यते ॥ ३० ॥

**महास्कन्धाः कदर्थ्यन्ते, पुन्नागा राजकुञ्जरैः । क्षमाभृत्सु पुनस्तेषां, दन्तभङ्गः प्रसङ्गवान् ॥ ३१ ॥**

‘**महास्कन्धाः**’ महांसाः । वृक्षपक्षे-महास्कन्धभागाः । ‘**पुन्नागाः**’ श्रेष्ठपुरुषाः । पक्षे-सुरपर्णिकाख्याः वृक्षविशेषाः । ‘**राजकुञ्जरैः**’ राजमुख्यैः श्रेणिकादिकैः । पक्षे-गजवरैः । ‘**कदर्थ्यन्ते**’ पीड्यन्ते । ‘**तेषां**’ राजकुञ्जराणाम् । ‘**क्षमाभृत्सु**’ पर्वतेषु । पक्षे-मुनिषु । ‘**पुनः**’ परन्तु । ‘**दन्तभङ्गः**’ रदनदलनम् । ‘**प्रसङ्गवान्**’ प्रासङ्गिक : । गजेन्द्राः वृक्षान् पीडयन्ति, न तु पर्वतान् । तथा राजानः सामान्य-जनान् पीडयन्ति, न तु मुनीन् इत्यर्थः ॥ ३१ ॥

**पृथग्रूपं सुखं दुग्धं, राजहंसैर्विविच्यते । जडेभ्यः सुधियस्त्वेकरूपं न प्रशमामृतम् ॥ ३२ ॥**

‘**जडेभ्यः**’ मूर्खेभ्यः । हंसपक्षे-जलेभ्यः, डलयोरैक्यात् । ‘**पृथग्रूपं**’ विविक्तम् । ‘**दुग्धं**’ धनरूपं दुग्धम् । पक्षे-पयः । ‘**राजहंसैः**’ नृपैः । पक्षे-हंसैः । ‘**सुखं**’ सुखपूर्वकम् । ‘**विविच्यते**’ पृथक्क्रियते । ‘**तु**’ परन्तु । ‘**सुधियः**’ शोभनबुद्धेः मुनेः । **एकरूपं प्रशमामृतं न विविच्यते** । यथा हंसः दुग्धमिश्रितजलात् दुग्धं वेवेक्ति न ह्यमृतम् । तथा राजा जडजनेभ्यः धनं सुखं गृह्णाति, न तु सुधीमुनिभ्यः प्रशमामृतमिति भावः ॥ ३२ ॥

**निर्वाप्यन्ते च ताप्यन्ते, राजहंसैर्जलाशयाः । समता स्वर्गगङ्गा तु, न तेषां करगोचरे ॥ ३३ ॥**

**'राजहंसैः'** राजवर्यैः । पक्षे-चन्द्रसूर्यैः, राजा-चन्द्रः हंसः-सूर्यः तैः । 'ब्रध्नो हंसश्चित्रभानुः' इति हैम्याम् । **'जलाशया'** जडाशयाः मूर्खाः । पक्षे-सरोवराणि । **'निर्वाप्यन्ते'** धनदानादिना शीतीक्रियन्ते । पक्षे चन्द्रिकया शीतीक्रियन्ते । **'ताप्यन्ते'** धनग्रहणादिना पीड्यन्ते । पक्षे-भीष्मातपेन उष्णीक्रियन्ते । **'तु'** परन्तु । **'समता स्वर्गगङ्गा'** समतारूपा सुरधुनी । **'तेषां'** राज्ञां राजहंसानां च । **'करगोचरे'** हस्तविषये दण्डविषये वा । पक्षे-किरणगोचरे । **न** भवति ॥ ३३ ॥

**तन्मानिजनमाणिक्यकोटिकोटीर हीर ! ये । त्रियोगकरणैः शुद्धा, रत्नत्रयपवित्रिताः ॥ ३४ ॥**

**निर्धूतदोषत्रितया, गुप्तित्रिकविभूषिताः । भूर्भुवः स्वस्त्रयीवन्द्यास्ते स्युस्त्रिभुवनेश्वराः ॥ ३५ ॥**

**'तत्'** तस्मात् । **'मानिजनमाणिक्यकोटिकोटीरहीर'** हे मनस्विलोकपद्मरागकोटिमौलिरत्न ! शालिभद्र ! **'ये'** मुनयः । **'त्रियोगकरणैः'** मनोवाक्कायैः । **'शुद्धाः'** पवित्राः । **'रत्नत्रयपवित्रिताः'** ज्ञानादिरत्नत्रयेण पवित्रिताः ॥ ३४ ॥ **'निर्धूतदोषत्रितयाः'** निर्धूतं निराकृतं दोषत्रितयं रागद्वेषमोहरूपं यैः ते । **'गुप्तित्रिकविभूषिताः'** गुप्तित्रिकेण मनोवाक्कायरूपेण विभूषिताः । **'ते'** साधवः । **'भूर्भुवःस्वस्त्रयीवन्द्याः'** ऊर्ध्वाधस्तिर्यक्लोकप्रणम्याः । **'त्रिभुवनेश्वराः'** त्रिलोकपतयः । **'स्युः'** भवेयुः ॥ ३५ ॥

**ततः प्रमोदमेदस्वी, स मनस्वी जगौ गुरुम् । भवं मोक्ष्ये मनो मोक्षे, योक्ष्ये यौष्माकशिक्षया ॥ ३६ ॥**

**'ततः'** तत्पश्चात् । **'प्रमोदमेदस्वी'** हर्षमेदुरः । **'सः मनस्वी'** गौरवशाली शालिभद्रः । **'गुरुं'** धर्मघोषाचार्यम् । **'जगौ'** उवाच । हे गुरो । **'यौष्माकशिक्षया'** युष्माकमियं यौष्माकी तया शिक्षया । **'मनः'** चेतः । **'मोक्षे'** मुक्तौ । **'योक्ष्ये'** रमयिष्यामि । **'भवं'** संसारं । **'मोक्ष्ये'** त्यक्ष्यामि ॥ ३६ ॥

**मातरं कातरस्वान्तां, यावदापृच्छय वत्सलाम् । आगच्छामीत्युदीर्यासौ, प्रविवेश पुनः पुरम् ॥ ३७ ॥**

'**कातरस्वान्तां**' चकितचित्ताम् । '**वत्सलां**' वात्सल्यमयीम् । '**मातरं**' जननीम् । '**आपृच्छय**' अनुज्ञाप्य '**यावत्**' अवधिदर्शकमव्ययम् । '**आगच्छामि**' 'आयामि' इति उदीर्य–उक्त्वा । '**असौ**' शालिभद्रः । '**पुनः**' भूयः । '**पुरं**' राजगृहम् । '**प्रविवेश**' प्रविष्टः ॥ ३७ ॥

**प्रतिमानं विमानस्य, स्वप्रासादावतंसकम् । अध्यास्त ध्वस्तसम्मोह-मन्त्रमण्डपसन्निभम् ॥ ३८ ॥**

'**विमानस्य**' देवविमानस्य । '**प्रतिमानं**' प्रतिरूपम् । '**ध्वस्तसम्मोहमन्त्रमण्डपसन्निभं**' ध्वस्तः–नष्टः सम्मोहः–अज्ञानं येषां तेषां जनानां मन्त्रे–मन्त्रणायां विचारणायां मण्डपसमम् । '**स्वप्रासादावतंसकं**' निजोत्तमसौधम् । '**सः**' शालिभद्रः । '**अध्यास्त**' प्रविष्टः ॥ ३८ ॥

**इतश्च देहः सस्नेहं, मनोराजं महौजसम् । पेशलं प्राञ्जलीभूय, सुसेवक इवावदत् ॥ ३९ ॥**

**स्वामिन्नहं स्वभावेन, शीतवातातपाक्षमम् । राजश्वासानिलैर्दूनं, निन्ये भूमिं त्वयेयतीम् ॥ ४० ॥**

**तदद्य मम गोस्वामी, परः स्वामीति दूनधीः । मोहं सर्वाभिसारेणा-भिषिषेणयिषुर्यदि ॥ ४१ ॥**

**तन्ममेदं महापर्व, वल्लभं वीरमानिनाम् । प्रभुप्रसादप्रार्णस्य, ऋणार्णं शोधयेऽधुना ॥ ४२ ॥**

**मा ज्ञासीर्वैक्रियं विज्ञ ! नैवाहारकमेव माम् । जानीह्यौदरिकं मात्रा-धिकमत्यर्थकारिणम् ॥ ४३ ॥**

**तदहं सासहिः कष्टं, वावहिर्भारमाहितम् । चाचलिस्तव निर्देशै-रपकीर्तौ न पापतिः ॥ ४४ ॥**

**भुजिष्यस्ते यतिष्येऽहं, सर्वार्थप्राप्तये तथा । लब्ध्वा यथाऽहमिन्द्रत्वं, गोस्वामी न व्यथिष्यते ॥ ४५ ॥**

**( सप्तभिः कुलकम् )**

'**इतश्च**' शालिभद्रे । '**सुसेवकः इव**' सुदासः इव । '**प्राञ्जलीभूय**' सरलीभूय । '**देहः**' शरीरं कर्तृपदम् । '**महौजसं**' महाबलम् । '**पेशलं**' दक्षम् । '**मनोराजं**' चित्तनृपम् । '**सस्नेहं**' स्नेहपूर्वकम् । '**अवदत्**' अकथयत् । देहः चित्तं प्रति कथयति इति भावः ॥ ३९ ॥ किमवददिति दर्शयन्नाह-'**स्वामिन्**' हे नाथ ! चित्त ! '**अहं**' देहः । '**स्वभावेन**' प्रकृत्या । '**शीतवातातपाक्षमं**' शीतलवायुसहने आतपसहने च अक्षमं असमर्थम् । '**राजश्वासानिलैः**' श्रेणिकश्वास-वायुभिः । '**दूनं**' खिन्नम् । '**त्वया**' मनसा । '**इयतीं भूमिं**' धर्मघोषाचार्यदेशनाभूमिं यावत् । '**निन्ये**' 'नीतं' प्रापितम् ॥ ४० ॥ '**तत्**' तस्मात् । **अद्य** । **मम** । '**परः**' अन्यः । '**गोस्वामी**' पृथ्वीपतिः श्रेणिकः । '**स्वामी**' नाथः अस्ति । इति '**दूनधीः**' खिन्नमतिः । '**मोहं**' महोराजं प्रति । '**सर्वाभिसारणे**' सर्वबलेन । '**यदि**' चेत् त्वम् । '**अभिषिषेणयिषुः**' वैरिसम्मुखं यियासुः ॥ ४१ ॥ **तत्** । '**वीरमानिनां**' आत्मानं वीरं मन्यन्ते इत्येवंशीलाः तेषाम् । '**वल्लभं**' प्रियम् । **मम इदं महापर्व**-महोत्सवः । '**प्रभुप्रसाद-प्रार्णस्य**' शालिभद्रस्वामिकृपारूपस्य प्रकृष्ट-ऋणस्य । '**ऋणार्णं**' ऋणस्य ऋणं व्याजसहितम् । '**अधुना**' साम्प्रतम् । '**शोधये**' दद्याम् । देहः चित्तं प्रति कथयति-शालिभद्रः किल दिव्यभोगैः मां परां पुष्टिं नीतवान्। तस्मादहं ऋणार्णाक्रान्तोऽस्मि । यदि त्वं सहयोगी स्याः, ततः तत् ऋणमहं शोधये इत्यर्थः ॥ ४२ ॥ '**विज्ञ**' हे पंडित !। मां वैक्रियं-विक्रियायां भवं वैक्रियं विकारयुक्तं यथाकामरूपं देवदेहं वा । '**मा ज्ञासीः**' मा अवगच्छ । नैव च । '**आहारकं**' भक्षणशीलं आहारलब्धिमद्देहं वा जानीहि । किन्तु । '**अत्यर्थकारिणं**' अत्यन्तकारिणं मोक्षपुरुषार्थकारकं वा ।

**'मात्राधिकं'** मात्रया अधिकं भद्रामात्रा वा अधिकं-वृद्धिं गतम् । **'औदरिकं'** उदरे भवं औदारकरीरं वा । **'जानीहि'** अवबुध्यस्व ॥ ४३ ॥ **'तत्'** तस्मात् । **'अहं'** देहः । **'कष्टं'** दुःखम् । **'सासहिः'** सोढा । **'आहितं'** न्यस्तम् । **'भारं'** वीवधम् । **'वावहिः'** वोढा । **'तव'** मनसः । **'निर्देशैः'** आदेशैः । **'चाचलिः'** चलिता । **'अपकीर्तौ'** जनापवादे । **'न पापतिः'** न पतिता । 'ङौ सासहिवावहि-चाचलि-पापतिः' ॥५।२।३८॥ इति सूत्रेण यङि द्वित्वे, यङ्लोपे डौ प्रथमा-सिः, तदन्ता निपात्यन्ते ॥ ४४ ॥ **तथा** । **'ते'** तव मनसः आत्मनो वा । **'सर्वार्थप्राप्तये'** सकलहेतुसिद्धये सर्वार्थसिद्धनामकविमानप्राप्तये वा । **'भुजिष्यः'** किङ्करः । **अहम्** **'यतिष्ये'** प्रयत्नं करिष्यामि । **यथा** । **'अहमिन्द्रत्वं'** अहं इन्द्रत्वं-स्वामित्वं कल्पातीतत्वं च । **'लब्धा'** लप्स्यसे । **'गोस्वामी'** आवयोः राजा शालिभद्रः । **'न व्यथिष्यते'** न व्यथां प्राप्स्यते ॥ ४५ ॥

**देहवाहमनः-सादि-साङ्गत्यमवगत्य तत् । स मेने भवमाश्वीन-मद्यश्वीनं जयोत्सवम् ॥ ४६ ॥**

**'तत्'** तस्मात् । **'देहवाहमनः-सादिसाङ्गत्यं'** देहवाहः-शरीराश्वः मनः-सादी-चित्ताश्ववारकः तयोः साङ्गत्यं मित्रताम्। **'अवगत्य'** ज्ञात्वा । **'सः'** शालिभद्रः । **'आश्वीनं'** अश्वमार्गं, 'आश्वीनोऽध्वा स योऽश्वेन दिनेनैकेन गम्यते' इति हैम्याम्। **'भवं'** संसारम् । **'अद्यश्वीनं'** अद्य श्वो वा भवम् । **'जयोत्सवं'** विजयमहम् । **'मेने'** मतवान् ॥ ४६ ॥

**शालिभद्र-भद्रयोः सम्भाषणम्—**

**उपेयिवांसमप्याशु, तं चिरादिव वीक्षितम् । भद्राऽभ्येत्याभ्यधादाय-ल्लकाम्भस्तल्लिका स्वयम् ॥ ४७ ॥**

**'आशु'** क्षिप्रम् । **'उपेयिवांसमपि'** आगतमपि । **'चिरात्'** चिरकालात् । **'वीक्षितमिव'** दृष्टमिव ।

**'आयल्लकाम्भस्तल्लिका'** उत्कण्ठाजलटाकिका । 'रणरणोत्कण्ठे आयल्लकारती' इति हैम्याम् । **'भद्रा'** शालिमाता । **'स्वयं'** आत्मना । **'अभ्येत्य'** आगत्य । **'अभ्यधात्'** उवाच ॥ ४७ ॥

**इयतीर्नियतं काल-कला: कस्तात ! लम्भितः । दशां देशो वसन्तश्री-मिश्रोपवनवासिनीम् ॥ ४८ ॥**

**'तात'** हे पुत्र ! । **'नियतं'** नूनम् । **'इयती: कालकला:'** इयन्तः समयांशाः । **'कः देशः'** कः भूमिभागः **'वसन्तश्रीमिश्रोपवनवासिर्नी'** मधुलक्ष्मीयुक्तक्रीडावनस्थायिनीम् । **'दशां'** अवस्थाम् । **'लम्भितः'** प्रापितः ? यत्र शालिभद्रः तत्र वसन्तः विलसति । इयत्कालं कुत्र स्थितः इति भद्रापृच्छेत्यर्थः ॥ ४८ ॥

**इलातलकलाकेलि-केलिः शालिरथालपत् । मातरद्य मयाऽश्रावि, श्रीधर्मः शर्मकारणम् ॥ ४९ ॥**

**अथ** । **'इलातलकलाकेलि-केलिः'** इलातले पृथ्वीतले कलाकेलिः कामः तत्समा केलिः-लीला यस्य सः । 'कलाकेलिरनन्यजोऽङ्गजः' इति हैम्याम् । **'शालिः'** शालिभद्रः । **'आलपत्'** उवाच । **'मातः'** हे अम्ब ! । **अद्य मया** । **'शर्मकारणं'** सुखनिदानम् । **'श्रीधर्मः'** अर्हद्धर्मः । **'अश्रावि'** श्रुतः ॥ ४९ ॥

**सारस्वतप्रवाहाच्च, वहतः परितो गुरोः । उपदेशपयः पूरः प्रागस्थात् कर्णकुण्डयोः ॥ ५० ॥**

**'गुरोः'** धर्मघोषाचार्यस्य । पक्षे-लक्षणार्थतः पर्वतस्य । **'परितः'** अभितः । **'वहतः'** प्लवमानस्य । **'सारस्वतप्रवाहात्'** वाणीप्रवाहात् । पर्वतपक्षे-नदीप्रवाहात् । **'कर्ण-कुण्डयोः'** मम श्रुतिरूपयोः जलाधारयोः । **'प्राग्'** पूर्वम् । **'उपदेशपयःपूरः'** देशनावारिप्लवः' । **'अस्थात्'** स्थितः ॥ ५० ॥

**ततो विमर्शकुण्डान्तरत्यन्तामलतामितः । घटनालैस्त्रिभिर्ज्ञानादिकैर्व्याप मनः सरः ॥ ५१ ॥**

'**ततः**' तदनु । '**विमर्शकुण्डान्तः**' विचारकुण्डमध्ये । '**अत्यन्तामलतां**' अतिनिर्मलताम् । '**इतः**' प्राप्तः पूरः । '**ज्ञानादिकैः**' ज्ञानदर्शनचारित्रैः । '**त्रिभिः घटनालैः**' त्रिजलमार्गैः । 'गरनाळो' इति भाषायाम् । '**मनःसरः**' मानसजलाशयम् । '**व्याप**' व्याप्तिं गतः ॥ ५१ ॥

**तत्रोच्चरसकल्लोलस्नानानन्दाभिनन्दितः । अनन्तब्रह्मलक्ष्मीकः, श्रीजिनः प्रतिभासते ॥ ५२ ॥**

'**तत्र**' मनःसरसि । विष्णुपक्षे–क्षीरसागरे । '**उच्चरस-कल्लोल-स्नानानन्दाऽभिनन्दितः**' उच्चरसः शान्तरसः तद्रूपे कल्लोले स्नानस्य आनन्देन अभिनन्दितः पूर्णः । पक्षे–उच्चरसानां उच्छ्रितजलानां कल्लोले–तरङ्गे स्नानानन्देन अभिनन्दितः । '**अनन्तब्रह्मलक्ष्मीकः**' अनन्ता परब्रह्मणो विशुद्धात्मनः लक्ष्मीः यस्य सः । पक्षे–अनन्तः-शेषाहिः, ब्रह्म-सत्यतत्त्वम्, लक्ष्मीः–विष्णुपत्नी तद्वान् । लक्ष्मीसहितः विष्णुः शेषनागोपरि क्षीरसागरे शेते इति पौराणिकाः । '**श्रीजिनः**' श्रीवीतरागः । पक्षे–श्रीविष्णुः । 'पीताम्बरो मार्ज–जिनौ' इति हैम्याम् । '**प्रतिभासते**' शोभते ॥ ५२ ॥

**तदयं श्रीमहाधर्मो, मातर्मे रोचतेतराम् । मृष्टं वैद्योपदिष्टं च, भवतात्तु त्वदाज्ञया ॥ ५३ ॥**

**तत्** । '**मातः**' हे जननि ! '**अयं श्रीमहाधर्मः**' अर्हदुक्तः महान् धर्मः । '**मे**' मह्यम् । '**रोचतेतरां**' अत्यर्थं रोचते। '**तु**' किन्तु । '**त्वदाज्ञया**' तवाऽऽदेशेन । '**मृष्टं' वैद्योपदिष्टं च' भवतात्**–भवतु ॥ ५३ ॥

**अम्बार्बुदगुणे पुत्रे, धर्मकृद्वंशभूषणे । मानतुङ्गेऽप्यधिष्ठात्री, श्रीमाता युज्यते यतः ॥ ५४ ॥**

'**अम्ब**' हे मातः ! अर्बुदपक्षे–हे देवि ! '**यतः**' यस्मात् । '**अर्बुदगुणे**' दशकोटिगुणे पुत्रे । पक्षे–अर्बुदपर्वते ।

'धर्मकृद्वंशभूषणे' धर्मकारिकुलालङ्कारे । अर्बुदपक्षे-धनुःकुद्वंशाः-वेणवः भूषणानि यस्मिन् । **'मानतुङ्गेऽपि'** गौरवोच्छ्रितेऽपि। पक्षे-प्रमाणेन उच्चेऽपि । **'पुत्रे'** तनये । **'श्रीमाता'** जननी । पक्षे श्रीमातानामिका देवी । **'अधिष्ठात्री'** रक्षिका । पक्षे-अधिष्ठायिका । **'युज्यते'** घटते ॥ ५४ ॥

**उदात्तया तया वाचा, तदात्वं हि तदात्तया । प्रहृष्यन्तितरा तारं, तमुवाच प्रसूरसौ ॥ ५५ ॥**

**'तदात्वं'** तत्कालम् । **हिः** निश्चये । **'तदात्तया'** तेन शालिभद्रेण आत्तया-गृहीतया उक्त्या इत्यर्थः । **'तदुक्तया'** इत्यपि पाठः । **'उदात्तया'** उत्तमगुणयुतया । **'तया वाचा'** तेन वचनेन । **'प्रहृष्यन्तितरा'** अतिप्रमोदमाना । ऋदुदित् । ३।२।६३॥ इत्यनेन वा ह्रस्वः । **'असौ प्रसूः'** माता । **'तं'** शालिम् । **'तारं'** तारध्वनिना । **'उवाच'** अकथयत् ॥ ५५ ॥

**तात ! तस्य पितुः सूनुर्न बद्धो भोगतन्तुना । यः पुन्नागोऽवगाढोऽपि, कमलां किल नर्मदाम् ॥ ५६ ॥**

**'तात'** हे पुत्र ! त्वम् । **तस्य पितुः**-गोभद्रस्य। **'सूनुः'** पुत्रः । **यः पुन्नागः**-पुरुषश्रेष्ठः । पक्षे-हस्ती । **'कमलां'** श्रियम् । हस्तिपक्षे-कं-जलं मालति-धारयति इत्येवंशीला ताम् । **'नर्मदां'** लीलादात्रीम् । पक्षे-रेवानदीम् । **'अवगाढोऽपि'** निमग्नोऽपि । **'भोगतन्तुना'** विलासतन्तुना । पक्षे-तन्तुना ग्राहेण जलजन्तुविशेषेण । 'ग्राहे तन्तुस्तन्तुनागः' इति हैम्याम्। **'न बद्धः'** न सन्दानितः । पक्षे-न आकृष्टः ॥ ५६ ॥

**जैनतत्त्वं स्फुरत्तेजस्ताताधिक्रियते त्वयि । यतः सिंहीपयः स्वर्ण-पात्र एवावतिष्ठते ॥ ५७ ॥**

**'तात'** हे वत्स ! । **'स्फुरत्तेजः'** विलसत्कान्ति । **'जैनतत्त्वं'** आर्हततत्त्वम् । **'त्वयि'** पुत्रे । **'अधिक्रियते'** स्थातुं अधिकारि भवति । **'यतः'** यस्मात् । **'सिंहीपयः'** सिंह्याः पयः दुग्धम् । **'स्वर्णपात्रे'** कनक-भाजने । **एवः** अवधारणे।

'**अवतिष्ठते**' स्थातुं शक्नोति । यतः उक्तम्-क्षीरं श्वानोदरे सिंहीदुग्धमस्वर्णभाजने । निष्पुण्ये श्रीः रसेन्द्रोऽग्नौ, धर्मस्तिष्ठति नाऽधमे ॥ १ ॥ ५७ ॥

**द्वादशात्मा गेहिधर्मस्तुङ्गे त्वय्युदयाचले । मच्चित्तकमलोल्लासी, त्रयीतेजोमयः शुचिः ॥ ५८ ॥**

**उदेतु धातुरङ्गेण, काष्ठा आपूरयन्निव । सञ्जीवनी दर्शनानां, यत्करप्रसरस्थितिः ॥ ५९ ॥**

**( युग्मम् )**

'**त्वयि**' शालिभद्रे पुत्रे । '**तुङ्गे**' उच्चे । '**उदयाचले**' उदयेन धर्मोदयेन अचले स्थिरे । सूर्यपक्षे-उदयगिरौ । '**द्वादशात्मा**' द्वादशविधः । पक्षे-सूर्यः । 'सूर्यो द्वादशात्मा च हेलिः' इति हैम्याम् । '**गेहिधर्मः**' श्रावकधर्मः । '**उदेतु**' आगच्छतु । पक्षे-उदयं प्राप्नोति । कथम्भूतः सः ? '**मच्चित्तकमलोल्लासी**' मम मनःपद्मविकासी । '**त्रयीतेजोमयः**' ज्ञानदर्शनचारित्रत्रयी प्रकाशमयः। पक्षे-वेदत्रयीमयः । 'त्रयीतेजोमयो भानुरिति वेदविदो विदुः' इति योगशास्त्रे । '**शुचिः**' पवित्रः । पक्षे-तमोनाशकत्वात् पवित्रः । '**धातुरङ्गेण**' सप्तधातुषु रङ्गः रागः धर्मरागः तेन । पक्षे-गैरिकादिधातुतुल्यरक्तरङ्गेण । '**काष्ठाः**' उत्कर्षान् हृदयभावान् । पक्षे-दिशः । 'काष्ठाऽऽशा दिग्' इति हैम्याम् । '**आपूरयन्निव**' वर्धयन्निव । पक्षे बिभ्रदिव । '**यत्करप्रसरस्थितिः**' यदीयकृपापूर्णहस्तप्रसारस्थितिः । पक्षे-किरणप्रसरस्थितिः । '**दर्शनानां**' षड्दर्शनानाम् । पक्षे-लोचनानाम् । '**सञ्जीवनी**' सञ्जीवन्यौषधितुल्या, षड्दर्शनानां जैनधर्मात् जायमानत्वात् । पक्षे-प्रकाशदानेन सम्यग् जीवनदात्री ॥ ५८ ॥ ५९ ॥

**सम्यक्त्वं पदकं यत्र, व्रतद्वादशकं लता । सोऽर्धमाणवहारस्ते, गृहिधर्मोऽस्तु भूषणम् ॥ ६० ॥**

'**यत्र**' गृहिधर्मरुपे अर्धमाणवहारे, '**सम्यक्त्वं**' तत्त्वरुचिरुपं सम्यग्दर्शनम्, '**पदकं**' हारान्तर्मणिः । '**व्रतद्वादशकं**' व्रतानां

प्राणातिपाताद्यणुव्रतानां द्वादशकम्, '**लता**' स्रग्रुपा, 'सरा' इति भाषायाम् । **सः**, '**अर्धमाणवहारः**' द्वादशलतारूपः हारविशेषः, 'द्वादश त्वर्धमाणवः' इति हैम्याम्, '**गृहिधर्मः**' श्रावकधर्मः, '**ते**' तव, '**भूषणं**' अलङ्कारः '**अस्तु**' भवतु ॥ ६० ॥

**हर्म्यिणामेव धर्माय, जनयित्र्याः पवित्रधीः । सांमत्यमित्यवेत्यासौ, विशेषार्थमुदाहरत् ॥ ६१ ॥**

'**हर्म्यिणामेव**' सौधवतां गृहस्थानामेव । '**धर्माय**' धर्मपालनाय । '**जनयित्र्याः**' मातुः । '**सांमत्यं**' संमतेर्भावः सांमत्यम्, अनुमतित्वमित्यर्थः । साङ्गत्यमित्यपि पाठः । **इति पवित्रधीः**-शुचिमतिः । '**असौ**' शालिभद्रः । '**अवेत्य**' ज्ञात्वा । '**विशेषार्थं**' स्वमनःस्थं विशेषभावम् । '**उदाहरत्**' अवदत् ॥ ६१ ॥

**स्वाख्यातकृत्ये विश्रान्ते, कान्ते व्याकरणे निजे । व्याचिख्यासुरसौ न्यास-माशवाचमुपाददे ॥ ६२ ॥**

'**स्वाख्यातकृत्ये**' सु-अतिशयेन आख्यातं-कथितं कृत्यं-प्रयोजनं यस्मिन् तस्मिन् (प्रश्ने) । '**निजे कान्ते**' स्वीये मनोज्ञे । '**व्याकरणे**' प्रतिवचने । '**विश्रान्ते**' विश्रान्तिं गते । वैयाकरणपक्षे-आख्यातकृत्याः प्रत्ययविशेषाः यस्मिन् तस्मिन् विश्रान्ताभिधाने व्याकरणे । '**व्याचिख्यासुः**' वक्तुकामः । पक्षे व्याख्यां कर्तुकामः । '**असौ**' शालिभद्रः । '**आशु**' क्षिप्रम् । '**न्यासं**' स्थापनाम् । पक्षे-न्यासनामकं व्याकरणाङ्गम् । न्यासेन हि व्याख्यायते व्याकरणम् । '**वाचं**' वाणीम् । '**उपाददे**' गृहीतवान् । यथा वैयाकरणः व्याकरणव्याख्यां कर्तुकामः न्यासमुपाददाति तथा शालिभद्रः स्वप्रश्नस्य उत्तरे मात्रा अदत्ते वाचमुपाददे-उवाच इत्यर्थः ॥ ६२ ॥

**अवादीः सङ्गतं मात-र्यदनादीनवं वचः । पितुस्तस्यासि सुनूस्त्व-मित्यस्यार्थो विभाव्यताम् ॥ ६३ ॥**

**'मातः'** हे जननि ! । **'सङ्गतं'** युक्तम् । **'अनादीनवं'** निर्दोषम् । **'वचः'** वचनम् । **'अवादीः'** अकथयः । **यत्** । **'तस्य पितुः**-गोभद्रस्य त्वं सूनुःपुत्रः असि' इति अस्य । **अर्थः** रहस्यम् । **'विभाव्यतां'** विचार्यताम् ॥ ६३ ॥

**अतिजातोऽस्तु दूरेण, सुजातोऽपि कथं सुतः ? । यः पञ्चविषयासक्त-स्तस्याहं मुनिचक्रिणः ॥ ६४ ॥**

**'मुनिचक्रिणः'** साधुसत्तमस्य । **'तस्य'** गोभद्रमुनेः । **'अतिजातः'** पितुः सकाशादधिक-गुणः पुत्रः । **'दूरेण अस्तु'** दूरे भवतु। **'सुजातोऽपि'** समानगुणोऽपि । **कथमहम्** । **'सुतः'** तनयः ? **यः** अहम् । **'पञ्चविषयासक्तः'** संसारसुखलीनोऽस्मि ॥ ६४ ॥

**त्वया मात्रैकयाऽप्येव-महमत्र सुखी यदि । किमुच्यते तु चारित्रे, यत्राष्टौ मातरो हिताः ॥ ६५ ॥**

**त्वया एकया अपि मात्रा**-जनन्या । **'एवं'** इत्थम्भूतेन सुखेन । **अहम्** । **'अत्र'** संसारे । **यदि सुखी** स्याम् । तर्हि । **'यत्र'** संयमे । **'हिताः'** हितकर्यः । **'अष्टौ मातरः'** अष्टौ प्रवचनमातरः समितिगुप्त्यादयः सन्ति । तत्र **'चारित्रे'** संयमे । **'किमुच्यते'** किं कथ्यते ? ॥ ६५ ॥

**क्षमोद्धारवराहेण, पुरुषोत्तममूर्तिना । मया भव सुतेनादिपोत्रिणीवाम्ब ! पुत्रिणी ॥ ६६ ॥**

**'क्षमोद्धारवराहेण'** क्षमायाः आत्मनि प्रच्छन्नायाः क्षमायाः-क्षान्तेः उद्धारकरणे वराणि श्रेष्ठानि अहानि दिनानि यस्मात् तेन । अवतारपक्षे-क्षमायाः पृथिव्याः उद्धारे वराहावतारेण । **'पुरुषोत्तममूर्तिना'** पुरुषोत्तमा पुरुषेषु उत्तमा श्रेष्ठा मूर्तिः शरीरं यस्य तेन । पक्षे-विष्णुना । **मया** । **'सुतेन'** पुत्रेण । **'अम्ब'** हे मातः ! । **'आदिपोत्रिणीव'** आदिवराही इव । **'पुत्रिणी'** सुतवती । **'भव'** एधि ॥ ६६ ॥

**साधुश्रावकयोर्गीता, मेरुसर्षपसाम्यता । गृहिधर्मेण सिद्धार्थः, कथं मातर्भवाम्यहम् ॥ ६७ ॥**

'**साधुश्रावकयोः**' मुनिश्राद्धयोः । '**मेरुसर्षपसाम्यता**' मेरुसिद्धार्थतुल्यता, **साधुः** मेरुसमः **श्रावकः** सर्षपसमः इति तुल्यता । '**गीता**' आगमे कथिता । '**तत्**' तस्मात् । '**मातः**' हे अम्ब ! । '**गृहिधर्मेण**' श्रावकधर्मपालनेन । '**सिद्धार्थः**' कृतकृत्यः सर्षपतुल्यो वा । **अहं कथं भवामि** ? ॥ ६७ ॥

**मच्चित्तभूतले सप्त-तत्त्वधान्यप्ररोहणा । प्रकाशयति चारित्रचैत्यस्थापनयोग्यताम् ॥ ६८ ॥**

'**मच्चित्तभूतले**' मम मानस-पृथ्वीतले । '**सप्ततत्त्वधान्यप्ररोहणा**' जीवाजीवाश्रव-संवर निर्जरा-बन्धमोक्षाभिधानि सप्त तत्त्वरूपाणि धान्यानि तेषां प्ररोहणा । पक्षे-सप्तप्रकाराणि धान्यानि । यत्र प्रासादः स्थाप्यते तत्र प्रथमं शालि-यव-गोधूम-मुद्ग-वल्ल-चणक-चवल धान्यानि उप्यन्ते इति वास्तुव्रते । '**चारित्रचैत्यस्थापनयोग्यतां**' संयम-मन्दिर-निर्माणौचित्यम् । '**प्रकाशयति**' दर्शयति ॥ ६८ ॥

**मातर्मा तद्विलम्बध्वं, कृतकालम्बनैरलम् । वीरसूः पुष्पमालासु, भव चम्पकमालिका ॥ ६९ ॥**

'**मातः**' हे जननि ! । '**तत्**' तस्मात् । '**मा विलम्बध्वं**' मा कालक्षेपं कुरुत । '**कृतकालम्बनैः**' कृत्रिमालम्बनैः । '**अलं**' पर्याप्तम् । '**पुष्पमालासु**' कुसुमस्रक्षु । '**चम्पक-मालिका इव**' हेमपुष्पकदाम इव । '**वीरसूः**' वीरमाता । '**भव**' एधि ॥ ६९ ॥

**झञ्झावातेन तेनाथ, वचसा भ्रमिता भृशम् । भूपीठे लुठिता भद्रा, निष्पत्राकृतवल्लिवत् ॥ ७० ॥**

**अथ** । '**तेन**' शालिभद्रोक्तेन । '**झञ्झावातेन**' वात्यातुल्येन । '**वचसा**' वचनेन । '**भृशं**' अत्यर्थम् । '**भ्रमिता**'

भ्रमिं प्राप्ता । '**भद्रा**' शालिमाता । '**निष्पत्राकृतवल्लिवत्**' निर्गतं पत्रमस्मात् निष्पत्रः, शरीरान्तर्निष्क्रान्तशरः मृगादिः निष्पत्रा कृता उपचारादत्यन्तपीडिता वल्लिः लता तद्वत् । सपत्रनिष्पत्रादतिव्यथने ।७।२।१३८। इति डाच् । '**कृतवल्लिका**' इत्यपि पाठः । '**भूपीठे**' पृथ्वीतले । '**लुठिता**' पतिता ॥ ७० ॥

**दीना मीनादपि मरोः, क्षीणा रीणाऽध्वगादपि । मूर्च्छासमुच्छ्रयच्छेदे, दूना मौनं मुमोच सा ॥ ७१ ॥**

'**मरोः**' मरुदेशस्य । '**मीनादपि**' मत्स्यादपि । '**दीना**' वराका । '**रीणाऽध्वगादपि**' रुग्णप्रवासिनः अपि । '**क्षीणा**' कृशा । '**मूर्च्छासमुच्छ्रयच्छेदे**' मूर्च्छासमुच्छ्रयस्य निश्चेष्टत्वातिशयस्य छेदे विरामे । '**दूना**' दुःखिता, '**सा**' भद्रा । '**मौनं**' तुष्णीम्भावम् । '**मुमोच**' त्यक्तवती । वक्तुमुपक्रान्ता इत्यर्थः ॥ ७१ ॥

**श्रीमण्डपे त्वयि प्रौढा, वत्स ! वत्सलतालता । किमिदं चेष्टितं तत्ते, सन्तापौपयिकं मयि ॥ ७२ ॥**

'**वत्स**' हे पुत्र ! । '**श्रीमण्डपे**' श्रियाः लक्ष्म्याः मण्डपतुल्ये । **त्वयि** । '**मम प्रौढा वत्सलतालता**' मम वात्सल्यरूपा दृढा वल्लिः । स्थिता अस्ति । '**तत्**' तस्मात् । '**ते**' तव । '**मयि**' मातरि । '**इदं**' दीक्षाभिलाषरूपम् । '**सन्तापौपयिकं**' सन्तापस्य उपायः एव औपयिकम् । उपायाद्ध्रस्वश्च ।७।२।१७०। इति इकण् । '**चेष्टितं**' वर्तनम् । '**किं**' कथम् ? ॥ ७२ ॥

**कुलकाश्मीर-केदारकुङ्कुमस्तबकोपमः । विरागाय कथं जात ! जातः स्वपर-रञ्जकः ॥ ७३ ॥**

'**जात**' हे पुत्र ! । '**कुलकाश्मीरकेदारकुङ्कुमस्तबकोपमः**' कुलकाश्मीरकेदारे वंशघुसृणालवाले कुङ्कुमस्तबकोपमः कुङ्कुमगुच्छसमः । '**स्वपररञ्जकः**' निजान्यानन्ददायी त्वम् । पक्षे-स्वपररंगकारी '**विरागाय**' निर्वेदाय । पक्षे-रंगरहिततायै **कथं जातः**-भूतः ? ॥ ७३ ॥

**पुण्याढ्यसार्वभौमेन, दिग्गजेनाङ्गजन्मना । उत्तराऽपि निराधारा, त्वया विरहिता ह्यहम् ॥ ७४ ॥**

**'पुण्याढ्यसार्वभौमेन'** पुण्याढ्येषु पुण्यशालिषु सार्वभौमेन चक्रवर्तिना । दिग्गजपक्षे-सार्वभौमाख्योत्तरदिग्गजेन । **'दिग्गजेन'** दिग्गजतुल्येन । **त्वया** । **'अङ्गजन्मना'** पुत्रेण । **'विरहिता'** वियुक्ता । **हिः** निश्चये । **अहम्** । **'उत्तराऽपि'** उत्तमाऽपि । पक्षे-उत्तरदिगपि । **'निराधारा'** आधारहीनाऽस्मि ॥ ७४ ॥

**सुनक्षत्राऽपि विच्छाया, विनेनं द्यौरिवाङ्गना । किञ्चित्कलावता किन्तु, द्योतते नन्दनेन्दुना ॥ ७५ ॥**

**'इनं'** पतिम् । गगनपक्षे-सूर्यम् । **'विना'** ऋते । **'द्यौरिव'** आकाशमिव । **'अङ्गना'** स्त्री । **'सुनक्षत्राऽपि'** शोभननक्षत्रजाताऽपि । पक्षे-ग्रहगणयुताऽपि । **'विच्छाया'** कान्तिरहिता भवति । **किन्तु** । **'किञ्चित्कलावता'** किञ्चिद्विज्ञानादिकलायुतेन । पक्षे-षोडशकलासु किञ्चित् कलाधरेण (चन्द्रेण) । **'नन्दनेन्दुना'** पुत्रचन्द्रेण । पक्षे-आनन्दकारिणा चन्द्रेण । **'द्योतते'** प्रकाशते ॥ ७५ ॥

**ताम्बूले शर्कराचूर्णं, यथा चैत्रे च वर्षणम् । तथा न वत्स ! वैराग्यं, युज्यते नव-यौवने ॥ ७६ ॥**

**यथा** । **'ताम्बूले'** मुखवासे । **'शर्कराचूर्णं'** सिताक्षोदक्षेपः । **यथा च** । **'चैत्रे'** मधुमासे । **'वर्षणं'** मेघवृष्टिः । **तथा** । **'वत्स'** हे नन्दन ! । **'नव-यौवने'** अभिनववयसि । **'वैराग्यं'** विरक्तिः । **'न युज्यते'** न घटामञ्चति । ताम्बूले वर्याऽपि शर्करा न युक्ता । न च अकाले वृष्टिः वर्या । भाण्डलीपुराणे यतः उक्तम्-'चैत्रमासि जइं वीजविजोइ, वैशाखइं जउ किंसु घोइ । जेठमासि जउ जाइ तपं, तऊँ कुण राषइ जलहर वरसंतउँ ॥ ७६ ॥

**द्वेधा पितुः क्रमेणैव, क्रममाणः प्रमाणवान् । सुतस्तुतस्ततस्तात ! क्रमायातस्त्वयं विधिः ॥ ७७ ॥**

'**पितुः**' जनकस्य । '**द्वेधा**' द्विप्रकारेण भोगत्यागभेदात् । '**क्रमेणैव**' परिपाट्या एव । '**क्रममाणः**' चलन् यतमानः । क्रमोऽनुपसर्गात् ।३।३।४७ ॥ इति सूत्रेण आत्मनेपदम् । '**प्रमाणवान्**' प्रामाणिकः । '**सुतस्तुतः**' सुतेषु पुत्रेषु स्तुतः कीर्तितः भवति । '**ततः**' तस्मात् । '**तात**' हे पुत्र ! । '**क्रमायातः**' क्रमेण आयातः । **तुश्च**कारार्थः । **अयं विधिः**-परम्परा ॥ ७७ ॥

**पुत्रोभयपदी धातुस्त्वं मर्त्यामर्त्यभोगभूः । ततस्ते युज्यते कर्तुं, प्रियंवद ! पदद्वयी ॥ ७८ ॥**

'**पुत्र**' हे वत्स ! **त्वम्** । **उभयपदी धातुः इव** । '**मर्त्यामर्त्यभोगभूः**' नरदेवभोगस्थानमसि । '**ततः**' तस्मात् । '**प्रियंवद**' हे मधुरवचन ! '**ते**' तव । '**पदद्वयी**' इहलोकपरलोकद्वयी । धातुपक्षे-आत्मने-परस्मैपदद्वयी । '**कर्तुं**' विधातुम् । '**युज्यते**' घटते ॥ ७८ ॥

**श्रीः काशयष्टिवच्चाढ्यम्भावुकेनाबुकेन ते । नीतेक्षुसमतां दक्ष ! सप्तक्षेत्रीनिवेशनात् ॥ ७९ ॥**

'**आढ्यम्भावुकेन**' धनाढ्यभविष्णुना । '**ते**' तव । '**आबुकेन**' पित्रा गोभद्रेण । 'पिता त्वाबुकः' इति हैम्याम् । '**काशयष्टिवत्**' काशस्य यष्टिः तद्वत् । काशयष्टिः सप्तवारान् क्षेत्रे निधीयते तदा इक्षुः स्यात् । '**सप्तक्षेत्रीनिवेशनात्**' चतुर्विधसङ्घ-जिन-मन्दिर-जिनमूर्ति-जिनागमरूपेषु सप्तक्षेत्रेषु निवेशनात् । '**दक्ष**' हे कुशल ! । '**श्रीः**' लक्ष्मीः । '**इक्षुसमतां**' रसालतुल्यताम् । '**नीता**' प्रापिता ॥ ७९ ॥

**कुलकानन कर्पूरद्रुम ! त्वमपि पूरय । सर्वाङ्गचङ्ग सर्वाशाः, दानैः परिमलैरिव ॥ ८० ॥**

'**कुलकाननकर्पूरद्रुम**' कुलकानने कर्पूरद्रुम कर्पूरवृक्षसम ! । '**सर्वाङ्गचङ्ग**' सर्वाङ्गसुन्दर ! हे वत्स ! । **त्वमपि** । '**परिमलैरिव**' सुगन्धैरिव । '**दानैः**' धनादिवितरणैः । '**सर्वाशाः**' सकलजनमनोरथान् । कर्पूरपक्षे–सकलदिशः । '**पूरय**' पूर्णीकुरु ॥ ८० ॥

**निन्दात्यागैर्जगद् वश्यं, गीतैः पूजा फलोत्तरा । पित्रोर्भक्त्या महाधर्मः, सन्तोषात् परमं सुखम् ॥ ८१ ॥**

**यथा सुखं सुखेनादस्तथाहि परमार्हतैः । दानशीलतपोभावाः, साध्यन्ते भोगशालिभिः ॥ ८२ ॥**

**यथा** । '**निन्दात्यागैः**' परपरिवादपरिहारैः । '**जगत्**' विश्वम् । '**वश्यं**' वशीभूतं स्यात् । '**गीतैः**' स्तुतिभिः यथा। '**पूजा**' प्रभु-पर्युपासना । '**फलोत्तरा**' फलाधिका भवति । यदुक्तम्–सयं पमज्जणे पुण्णं, सहस्सं च विलेवणे । सयसाहस्सिआ माला, अणंतं गीयवाइए ॥" '**पित्रोः**' जननीजनकयोः यथा । '**भक्त्या**' सेवया । '**महाधर्मः**' परमसुकृतं स्यात् । '**सन्तोषात्**' निर्लोभात् यथा । '**परमं**' उत्तमम् । **सुखं स्यात्** ॥ ८१ ॥ **यथा** च । '**अदः**' इदम् । **सुखं सुखेन**–सुखदानेन स्यात् । '**तथाहि**' तेन प्रकारेण । '**भोगशालिभिः**' भोगाढ्यैः । '**परमार्हतैः**' परमैः आर्हतैः सुश्रावकैः । '**दानशीलतपोभावाः**' चतुर्विधः धर्मः । '**साध्यन्ते**' सेव्यन्ते ॥ ८२ ॥

**त्वया सिंहकिशोरेण, कुलशैले स्वलङ्कृते । सुकृती स कृती कृत्यं, निजं चक्रे पिताऽपि ते ॥ ८३ ॥**

'**सिंहकिशोरेण**' पञ्चाननयूना । '**त्वया**' पुत्रेण । '**कुलशैले**' वंशगिरौ । '**स्वलङ्कृते**' सुमण्डिते । '**सुकृती**' पुण्यवान्। '**कुती**' सुधी । '**ते**' तव । '**पिताऽपि**' जनकोऽपि । '**निजं**' स्वम् । '**कृत्यं**' कार्यम् । '**चक्रे**' कृतवान् ॥ ८३ ॥

**तदीयपदवीपान्थ ! श्रीकल्याणाचलं कुलम् । विबुधानन्दनेन त्वं, नन्दनेन परिष्कुरु ॥ ८४ ॥**

'**तदीयपदवीपान्थ**' पितृपथप्रवासिन् ! हे पुत्र ! । '**विबुधानन्दनेन**' पण्डितानन्दकारिणा । नन्दनवनपक्षे-देवानन्ददायिना । '**नन्दनेन**' पुत्रेण । पक्षे-नन्दनवनेन । **त्वम्** । '**श्री कल्याणाचलं**' श्रीश्च कल्याणं च श्रीकल्याणे ते अचले स्थिरे यत्र तत् । पक्षे-कनकाचलम् मेरुं । 'कल्याणं कनकम्' इति हैम्याम् । '**कुलं**' वंशम् । '**परिष्कुरु**' अलङ्कुरु ॥ ८४ ॥

**पूर्वं दीक्षाऽऽप्रदानान्मे, वत्स ! वात्सल्यनिष्क्रयम् । मातृभक्तिकलाकामधेनुव्रज ! चिरं व्रज ॥ ८५ ॥**

'**दीक्षाऽऽप्रदानात्**' दीक्षायाः आप्रदानात् आदानात् ग्रहणात् । '**पूर्वं**' प्रथमम् । '**मे**' मह्यम् । '**वात्सल्यनिष्क्रयं**' वात्सल्यस्य निष्क्रयं भाटकं मूल्यम् । देहि इति शेषः । '**मातृभक्तिकला-कामधेनुव्रज**' मातृभक्तकला एव कामधेनुः तत्र व्रज गोकुलतुल्य हे पुत्र ! पश्चात् त्वम् । '**चिरं व्रज**' प्रव्रज दीक्षां गृहाणेत्यर्थः । दीक्षाग्रहणात् पूर्वं वात्सल्यप्रत्युपकारं कुरु । पुत्रेण कुलमलङ्कृत्य दीक्षां गृहाणेति भावः ॥ ८५ ॥

**सुश्राद्धधर्मप्रासादे, प्रतिमाभिर्विभूषिते । कल्याणकलशान् पश्चात्, न्यसेः पञ्चमहाव्रतान् ॥ ८६ ॥**

'**सुश्राद्धधर्मप्रासादे**' सुश्राद्धधर्मः सुश्रावकधर्मः सः एव प्रासादः तस्मिन् । '**प्रतिमाभिः**' श्रावकैकादशप्रतिमाभिः । प्रासादपक्षे-देवमूर्तिभिः । '**विभूषिते**' मण्डिते । '**पश्चात्**' तदनन्तरम् । '**कल्याणकलशान्**' कनककुम्भतुल्यान् । '**पञ्चमहाव्रतान्**' प्राणातिपातविरमणादीन् पञ्च । '**न्यसेः**' स्थापयेः ॥ ८६ ॥

**एवं वयस औचित्याद्, धर्मोऽप्याहारवद् वरः । स्वीकृतः कृतिना रुच्या, परिणामेऽतिसुन्दरः ॥ ८७ ॥**

'**एवं**' प्रथमं श्रावकधर्मपालनेन । '**वयसः**' अवस्थायाः । '**औचित्यात्**' योग्यत्वेन । '**कृतिना**' सुधिया । '**रुच्या**'

इच्छया । **'स्वीकृतः'** अङ्गीकृतः । **'आहारवत्'** अन्नवत् । **धर्मः अपि** । **'वरः'** श्रेष्ठः । **'परिणामे'** फले । **'अतिसुन्दरः'** अति-मनोहरः स्यात् ॥ ८७ ॥

**रूपश्रीरमृतप्राशराशश्रीर्जगतीदृशाम् । मूर्ता कल्याणसिद्धिस्ते, भाग्यसिद्धिः प्रसिद्धिभूः ॥ ८८ ॥**

**प्रौढमर्त्यश्रिया बाढो-पगूढः प्रतिवासरम् । दिव्यभोगश्रिया नव्यो-पायनैः परिचर्यसे ॥ ८९ ॥**

**कुलप्राकार ! सर्वाङ्ग-भोगरुद्ध ! कुमार ! तत् । विवेश त्वयि वैराग्यं, कया युक्त्या सुरङ्गया ॥ ९० ॥**

**( विशेषकम् )**

**'जगतीदृशां'** जगन्नेत्राणाम् । 'जगती जगत्' इति हैम्याम् । **'अमृतप्रातराशश्रीः'** सुधाप्रातर्भोजनसम्पत्तिः । **'रूपश्रीः'** तव सौन्दर्यलक्ष्मीरस्ति । **'प्रसिद्धिभूः'** कीर्तिस्थानम् । **'ते'** तव । **'भाग्यसिद्धिः'** सौभाग्यप्राप्तिः । **'मूर्ता'** मूर्तिमती । **'कल्याणसिद्धिः'** सुवर्णसिद्धिः मङ्गलसिद्धिः वा अस्ति ॥ ८८ ॥ **'प्रतिवासरं'** प्रतिदिनम् । **'प्रौढमर्त्यश्रिया'** श्रेष्ठनरलक्ष्म्या । **'बाढोपगूढः'** दृढालिङ्गितः असि । **'दिव्यभोगश्रिया'** देवदत्तभोगलक्ष्म्या । **'नव्योपायनैः'** नवीनप्राभृतैः । **'परिचर्यसे'** सेव्यसे ॥ ८९ ॥ **'सर्वाङ्गभोगरुद्ध'** सर्वाङ्गसम्बन्धिभिः भोगैः रुद्ध परिवृत ! । **'कुलप्राकार'** वंशवप्र ! हे वत्स ! । **'तत्'** तस्मात् । **'त्वयि'** तव हृदि । **'वैराग्यं'** विरक्तिः । **कया युक्त्या** तर्करूपया । **'सुरङ्गया'** भूच्छिद्रेण भूम्यन्तर्मार्गेण । 'सुरंग' इति भाषायाम् । **'विवेश'** प्रविष्टम् ॥ ९० ॥

**गौभद्रिणाऽथ गौर्भद्रा, भद्रां प्रत्यभिधीयत । धर्मरङ्गमहारङ्ग-भूमिरङ्गावलीकला ॥ ९१ ॥**

**अथ** । **'गौभद्रिणा'** गोभद्रपुत्रेण शालिना । अत इञ् ।६।१।३१॥ इति इञ् । गोभद्रस्य अपत्यं पुमान् गौभद्रिः तेन । **'धर्मरङ्गमहारङ्ग-भूमिरङ्गावलीकला'** धर्मरङ्गः धर्मरागः एव महारङ्गभूमिः मण्डपभूमिः तस्यां ये रङ्गाः हर्षाः तेषां आवली-श्रेणिः तया कला-मधुरा । **'भद्रा'** मङ्गला । **'गौः'** वाणी । **भद्रां प्रति** । **'अभ्यधीयत'** उच्यते स्म ॥ ९१ ॥

**अम्बाऽऽत्मनीनमुक्तं य-दर्वाचीनतयैव तत् । समीचीनं पराचीनावस्थायाः प्रतिपन्थि तत् ॥ ९२ ॥**

**'अम्ब'** हे मातः ! । **'आत्मनीनं'** आत्मने हितं आत्मनीनम् । **यद् उक्तं**-अभिहितम् । **तत्** । **'अर्वाचीनतयैव'** इहलोकापेक्षया एव । **'समीचीनं'** सत्यम् । किन्तु । **'पराचीनावस्थायाः'** परलोकावस्थायाः । **तत् प्रतिपन्थि** विरोधि । अस्तीति शेषः ॥ ९२ ॥

**मातः ! कल्याणवार्तेयं, यदाशा दिग्गजेऽङ्गजे । पुण्यैरनन्तरूपा त्वं, ध्रुवश्रीर्भव उत्तरा ॥ ९३ ॥**

**'मातः'** हे अम्ब ! **'दिग्गजे'** सार्वभौमाख्यदिग्गजतुल्ये । **'अङ्गजे'** पुत्रे । **'यत् आशा'** यः मनोरथः, उत्तरा दिक् च । तत् । **'इयं कल्याणवार्ता'** कुशलभाषितमस्ति । किन्तु । **'पुण्यैः'** सुकृतैः । **'अनन्तरूपा'** अविनश्वररूपा । **'ध्रुवश्रीः'** अचलश्रीः । उत्तरदिक्पक्षे ध्रुवतारकलक्ष्मीः । **'उत्तरा भव'** उत्तमा भव । पक्षे-उत्तरा दिग् भव । हे मातः दिग्गजतुल्ये अङ्गजे आशां त्यक्त्वा ध्रुवश्रीयुता उत्तरदिक्तुल्या भव । ध्रुवतारकः किल अचलः तथा त्वमपि पुण्यैः मोक्षेऽनन्तकालं यावत् प्रतिष्ठिता अचला भव इत्यर्थः ॥ ९३ ॥

**नास्तिके शकुनाः कुब्जे, वास्तुदोषाः पशौ च्छलम् । निः स्वे नाहारदोषाः स्युः, न वैराग्यमसात्त्विके ॥ ९४ ॥**

'**नास्तिके**' अश्रद्धालौ । '**शकुनाः**' शुभाशुभसूचकानि निमित्तानि न स्युः । '**कुब्जे**' तृणकुटीरके । '**वास्तु-दोषाः**' शिल्पशास्त्रोक्तदूषणानि न स्युः। '**पशौ**' गवादिके । '**छलं**' माया न गण्यते । '**निःस्वे**' दरिद्रे । **आहारदोषाः न स्युः**। तथा । '**असात्त्विके**' सत्त्वहीने नरे । **वैराग्यं न स्यात्** ॥ ९४ ॥

**शास्त्रं वचस्विनां शस्त्रं, बलिनां महतां निजम् । सर्वं पथ्यं दृढाग्नीनां सर्वं निर्वेदकृत् सताम् ॥ ९५ ॥**

'**वचस्विनां**' वचनपटूनाम् । '**शास्त्रं**' सर्वं शास्त्रं भवति । '**महतां**' शक्तिशालिनाम् । '**शस्त्रं**' सर्वं प्रहरणं भवति। '**महतां**' महापुरुषाणाम् । '**निजं**' सर्वं स्वकीयं भवति । यदुक्तम्-'अयं' निजः परो वेति, गणना लघुचेतसाम् । उदारचरितानां तु, वसुधैव कुटुम्बकम् ॥ १ ॥ '**दृढाग्नीनां**' बलिजठराग्नीनाम् ॥ 'सर्वं' पक्वापक्वान्नम् । '**पथ्यं**' पथ्यकारि भवति । '**सतां**' सज्जनानाम् । '**सर्वं**' जगत् । '**निर्वेदकृत्**' वैराग्यकारि भवति ॥ ९५ ॥

**इत्यम्ब ! मम वैराग्य-कारणं भवतारणम् । आकर्ण्यतां त्वया तूर्णं, वर्ण्यमानं सकर्णया ॥ ९६ ॥**

**इति** ।'**अम्ब**' हे जननि ! '**सकर्णया**' प्रबुद्धया । **त्वया** ।'**भवतारणं**' संसारपारकारि । '**वर्ण्यमानं**' अभिधीयमानम्। **मम वैराग्यकारणं**-निर्वेदनिबन्धनम् । '**तूर्णं**' क्षिप्रम् । '**आकर्ण्यतां**' श्रूयताम् ॥ ९६ ॥

**मिताशङ्किपदन्यासं, गार्हस्थ्यं दिव्यमेव मे । तप्तायोगोलकल्पेऽस्मिन्, शुद्धिः सांशयिकी परम् ॥ ९७ ॥**

'**मिताशङ्किपदन्यासं**' मितं-स्तोकं आशङ्की सशङ्कः पदन्यासः पादस्थापनम् यत्र तत्, कदाचिदेव शालिभद्रस्य गमनात्। '**गार्हस्थ्यं**' गृहस्थता । '**मे**' मम । '**दिव्यमेव**' परममेव अस्ति । '**परं**' परन्तु । '**तप्तायोगोलकल्पे**' तप्तलोहगोलकतुल्ये। '**अस्मिन्**' गार्हस्थ्ये । '**शुद्धिः**' कर्मक्षयरूपा आत्मनः शुद्धिः । '**सांशयिकी**' संशयवती अस्ति ॥ ९७ ॥

**सुखैः केचन तुष्यन्ति, निभृता एव तैः परे । उद्वेलाः सागरा केचि-दन्ये स्थिरतरोदकाः ॥ ९८ ॥**

'**केचन**' लोकाः । '**सुखैः**' वैषयिकैः । '**तुष्यन्ति**' आनन्देन उच्छलन्ति । '**परे**' अन्ये लोकाः । '**तैः**' सुखैः । '**निभृताः**' शान्ताः सन्तोषवन्तः इत्यर्थः । **एवः** अवधारणे । अत्र दृष्टान्तः-**केचित् उद्वेलाः**-उत्तरङ्गाः । '**सागराः**' समुद्राः । '**अन्ये**' अपरे । '**केचित्**' सागराः स्वयम्भूरमणादयः । '**स्थिरतरोदकाः**' स्तिमितजलाः सन्ति ॥ ९८ ॥

**निसर्गेणैव तद्भोगा, अभिष्वङ्गाय नाम्ब ! मे । निर्वेदोद्भेदवेदस्य, प्रणवस्तु प्रणीयते ॥ ९९ ॥**

'**अम्ब**' हे मातः ! '**तत्**' तस्मात् । '**निसर्गेणैव**' स्वभावेन एव । '**मे**' मम । '**भोगाः**' संसारसुखानि । '**न अभिष्वङ्गाय**' न आसक्तये भवन्ति । '**निर्वेदोद्भेदवेदस्य**' निर्वेदात् वैराग्यात् उद्भेदः आविर्भावः वेदस्य संवित्तेः-ज्ञानस्य यस्य सः तस्य । '**प्रणवः**' ओङ्कारः । '**प्रणीयते**' कथ्यते ॥ यथा वैराग्याविर्भूतसंवित्तेः पुरुषस्य ओङ्कारजापः एव मुख्यः न तु संसारभोगाः तथा ममाऽपि संसारभोगाः न आसक्तये इत्यर्थः ॥ ९९ ॥

**साङ्गोपाङ्गाऽपि भोगाङ्ग-सामग्री मे तनूरिव । स्वामिश्रुत्या शिरोऽर्त्याऽसौ, पीड्यतेऽपीड्यते न हि ॥ १०० ॥**

'**तनूरिव**' शरीरमिव । '**मे**' मम । '**साङ्गोपाङ्गाऽपि**' सम्पूर्णाऽपि । तनूपक्षे-अङ्गोपाङ्गसहिताऽपि । '**भोगाङ्गसामग्री**' सुखावयवसाधनम् । '**स्वामिश्रुत्या**' स्वामी इति श्रुत्या-श्रवणेन । '**शिरोऽर्त्या**' मस्तकपीडया । '**असौ**' भोगसामग्री । '**पीड्यते**' व्यथ्यते । **न अपि हि असौ**-भोगसामग्री । '**ईड्यते**' स्तूयते ॥ १०० ॥

**लक्ष्मीर्मे लक्षणालीव, सर्वसौख्यावहाऽपि हा । मूर्ध्नि काकपदेनान्य-स्वामिशब्देन निष्फला ॥ १०१ ॥**

**'लक्षणालीव'** देहलक्षणश्रेणिरिव । **'मे'** मम । **'सर्वसौख्यावहाऽपि'** सकलसुखप्रदाऽपि । 'सर्वसौख्यावहा अपि' इत्यपि पाठः । अस्मिन् पाठे सन्धौ सति सप्ताक्षराणि भवन्ति अतः न सन्धिः क्रियते । **'लक्ष्मीः'** श्रीः । **हा** खेदे । **'मूर्ध्नि'** शिरसि । **'काकपदेनेव'** काकपदतुल्येन **'अन्यस्वामिशब्देन'** अन्यः स्वामी इति शब्देन । **'निष्फला'** फलहीना जाता । हीरके किल काकपदतुल्यकृष्णरेखा तस्य निष्फलत्वं करोति । शरीरे शुभलक्षणावली अपि काकपदतुल्यरेखया निष्फला भवति ॥ १०१ ॥

**जात्यं तेजस्विनं प्रौढं, भोगाभोगं तुरङ्गमम् । अन्यस्वामीति नाम्नाऽपि, शृङ्गेणेव त्यजाम्यहम् ॥ १०२ ॥**

**'जात्यं'** जात्या उत्तमम् । **'तेजस्विनं'** महस्विनम् । **'प्रौढं'** श्रेष्ठम् । **'तुरङ्गममिव'** अश्वमिव । "दूबलकन्ना बंकमुहा, घण आहार सरोष । जे हुइं तुरियह पंच गुण, तेहज स्त्रीअह दोष ॥" इति जात्याश्वलक्षणानि । **'भोगाभोगं'** भोगस्य आभोगं विस्तरम् । अश्वपक्षे-भोगेन-शरीरेण आभोगः विस्तरः यस्य तम् । **'शृङ्गेण इव'** भ्रमरेण इव । शिरसि शृङ्ग-भ्रमरः यस्य अश्वस्य स्यात्, स त्यज्यते । **'अन्यः स्वामी' इति नाम्नाऽपि**-शब्देनाऽपि । **अहं त्यजामि**-परिहरामि । यथा जात्याऽश्वोऽपि भ्रमरदूषितः त्यज्यते तथा 'अन्यः स्वामी' इति शब्ददूषितं भोगविस्तरमहं त्यजामीति भावः ॥ १०२॥

**इयं विषयसामग्री, शुभा रसवतीव मे । उद्धुक्षिता परादेशा-नलैर्मातर्न रोचते ॥ १०३ ॥**

**'मातः'** हे अम्ब ! । **'शुभा'** कल्याणी । **'रसवती इव'** भोजनमिव । **'मे'** मह्यम् । **इयं विषयसामग्री**-भोगसाधनम् । **'परादेशानलैः'** अन्याऽऽज्ञाग्निभिः । **'उद्धुक्षिता'** दग्धा **'न रोचते'** न रुचिं जनयति । सरसाऽपि रसवती अग्निदग्धा न रोचते तथा मह्यमपि दिव्याऽपि भोगसामग्री अन्याऽऽज्ञादग्धा न रोचते इति भावः ॥ १०३ ॥

**उच्छिष्टं क्रियते यत्तु, भूपभूतै र्निरङ्कुशैः । निशाभोज्यमिव त्याज्यं, वैभवं तद्विवेकिना ॥ १०४ ॥**

**यत्तु** । '**निरङ्कुशैः**' उच्छृङ्खलैः । '**भूपभूतैः**' नृपप्रेतैः । '**उच्छिष्टं**' भुक्तशेषत्वात् व्यर्थम् । '**क्रियते**' विधीयते । **तद् वैभवं**-सम्पत्तिः । '**विवेकिना**' विवेकसहितेन विदुषा । '**निशाभोज्यमिव**' रात्रिभोजनमिव । '**त्याज्यं**' हेयम् । यदुक्तं योगशास्त्रे श्रीहेमचन्द्राचार्यैः-अन्नं प्रेत-पिशाचाद्यैः, सञ्चरद्भिर्निरङ्कुशैः । उच्छिष्टं क्रियते यत्र, तत्र नाद्याद्दिनात्यये ॥३/४८॥ १०४ ॥

**पराज्ञा भोगसौख्येषु, सर्वाङ्गसुभगेस्वपि । त्रसरेखेव रत्नेषु, महामहिमहानये ॥ १०५ ॥**

'**सर्वाङ्गसुभगेषु अपि**' सर्वाङ्गतया सम्पूर्णतया सुभगेषु प्रियेषु अपि । '**भोगसौख्येषु**' संसारभोगसुखेषु । '**पराज्ञा**' परस्य-अन्यस्य आज्ञा-आदेशः । '**रत्नेषु**' हीरकेषु । **त्रसरेखा इव** । '**महामहिमहानये**' उच्चरत्नमपि हानिकरं महिमाक्षयकरं च करोति ॥ १०५ ॥

**घृतपूरेषु शूरः स्याद्, दुःखाय यदि कर्करः । सुखे स्त्यान इव प्राज्ये, न कथं भूभृदप्ययम् ॥ १०६ ॥**

'**घृतपूरेषु**' घृतवरेषु मिष्टान्नविशेषेसु । '**यदि**' चेत् । '**दुःखाय**' सुखापनोदाय '**कर्करः**' दृषत्खण्डः । '**शूरः**' समर्थः । '**स्यात्**' भवेत् । तर्हि । '**स्त्याने**' पिण्डीभूते । 'थीजेलुं' इति भाषायाम् । '**प्राज्ये इव**' प्रकृष्टे आज्ये घृते इव । '**सुखे**' शर्मणि। अयं भूभृदपि-नृपः पर्वतश्चापि । **कथं न दुःखाय शूरः स्यात्** । कर्करोऽपि चेद् दुःखाय तर्हि पर्वतः कथं न ? ॥ १०६ ॥

**जनानां शर्कराः पद्या, मृदूनां शालितन्दुलाः । विरक्त्यै दुःखमन्येषां, कुशाग्रीयधियां सुखम् ॥ १०७ ॥**

**'जनानां'** सामान्यनराणाम् । **'शर्कराः'** कर्कराः **'पद्याः'** पादवेधकाः । पादौ विध्यन्ति इति पद्याः । विध्यत्यनन्येन ।७।१।८।। इत्यनेन यः प्रत्ययः । हिम-हति-काषि-ये पद् ।३।२।९६।। इत्यनेन च पादस्य 'पद्' इति आदेशः । **'मृदूनां'** सुकुमाराणां जनानां तु । **'शालितन्दुलाः'** अक्षतकणाः अपि । **पद्याः**-पादवेधकाः भवन्ति एवम् । **'अन्येषां'** साधारणजीवानाम्। **'दुःखं'** सुखाभावः । **'विरक्त्यै'** निर्वेदाय भवति । किन्तु । **'कुशाग्रीयधियां'** सूक्ष्मबुद्धिमताम् । **'सुखमपि'** पञ्चेन्द्रियविषयोपभोगोऽपि किल विरागाय भवति ॥ १०७ ॥

**मातर्माऽतः परं ज्ञासीः, गुरु वैराग्यकारणम् । स्वाजन्ये लघुके पार-वश्यं हि नरकस्य यत् ॥ १०८ ॥**

**'मातः'** हे अम्ब ! । **'अतः परं'** पारवश्यात् अन्यत् । **'गुरु'** महत् । **'वैराग्यकारणं'** निर्वेदनिबन्धनम् । **'मा ज्ञासीः'** मा जानीहि । **'यत्'** यस्मात् । **'लघुके'** तुच्छे-अल्पे । **'स्वाजन्ये'** स्व-अजन्ये-निजोपद्रवे 'अजन्यमीतिरुत्पातः' इति हैम्याम् । **हिः** निश्चये । **'नरकस्य'** कुत्सितनरस्य । कुत्सिताऽज्ञाते ।७।३।३।। इत्यनेन कुत्सितार्थे कः प्रत्ययः । **'पारवश्यं'** पराधीनता वैराग्यकारणं भवति । अल्पोपद्रवे जाते सामान्यजनानामपि पराधीनता वैराग्यकारणं भवति तर्हि शालिभद्रस्य का कथा ? ॥ १०८ ॥

**कल्याणमौलौ श्रीवीर-स्वाम्यादेशे शिरःस्थिते । कथंसुस्थितकप्रायं, राजते राजशासनम् ॥ १०९ ॥**

**'कल्याणमौलौ'** कल्याणेषु मङ्गलेषु मौलिः मुख्यः तस्मिन् । पक्षे-सुवर्णमुकुटे । **'श्रीवीरस्वाम्यादेशे'** श्री महावीरजिनाज्ञायाम् । **'शिरः-स्थिते'** मस्तकस्थायिनि सति । **'सुस्थितकप्रायं'** सुस्थितकतुल्यम् (सुस्थिक-सूथियुं 'इंढुणी' इति भाषायाम्) **'राजशासनं'** श्रेणिकनृपाज्ञा । **'कथं राजते'** मस्तके कथं शोभते ? ॥ १०९ ॥

**राजाज्ञा गृहगोधेव, हिंसाध्याने धुरंधरा । अकस्मात् पतिता मूर्ध्नि, मातः ! सन्तापसूचिका ॥ ११० ॥**

'**हिंसाध्याने**' वध-विचारे । '**धुरंधरा**' तत्परा । '**गृहगोधा इव**' गृहगोलिका इव । 'गरोली' इति भाषायाम् । '**मूर्ध्नि**' शिरसि । '**अकस्मात्**' सहसा । '**पतिता**' स्रस्ता । '**राजाज्ञा**' नृपादेशः । '**सन्तापसूचिका**' विपत्तिज्ञापिका अस्ति । मस्तके पतिता गृहगोलिका अशुभा गण्यते तथा राजाऽऽज्ञाऽपि अशुभेत्यर्थः । यदुक्तम्-श्वेता पल्ली (गृहगोलिका) शिरसि पतिता धनिनो दारिद्र्यं कुरुते दरिद्रस्य लक्ष्मीं च ॥ ११० ॥

**सूरावज्ञारुचिर्नानारूपी चक्रे शिरः स्थितः । कृकलासो नृपादेशः, शिरोर्तिमनिवर्तिकाम् ॥ १११ ॥**

'**सूरावज्ञारुचिः**' सूराणां अवज्ञारुचिः यस्मिन् सः नृपादेशः । कृकलासपक्षे-सूरस्य-सूर्यस्य अवज्ञारुचि यस्य सः। कृकलासस्य नामान्तरमपि प्रतिसूर्यः । स हि सूर्यस्य प्रतीपः-विपरीतः । '**नानारूपी**' अनेकाकारधारी । '**शिरःस्थितिः**' मस्तकस्थः । '**कृकलासः**' शयानकः । 'कार्चीडो' इति भाषायाम् । '**नृपादेशः**' राजाज्ञा । **अनिवर्तिकां**' अविरमणशीलाम् । **शिरोर्ति** मस्तकपीडाम् । '**चक्रे**' कृतवान् ॥ १११ ॥

**आत्मानं घोषयन्नुच्चैः, स्वामिस्वीकारवायसः । अरिष्टं सूचयत्येव, शिरसः स्पर्शनेन मे ॥ ११२ ॥**

'**उच्चैः**' उच्चशब्देन । '**आत्मानं**' स्वम् । '**घोषयन्**' ज्ञापयन् । '**स्वामिस्वीकारवायसः**' स्वामिस्वीकाररूपः वायसः काकः । आगतः काकः किल का... का... का... इति महता शब्देन स्वं घोषयति एव । अतः एव '**आत्मघोषः**' इति तस्य नामान्तरम् । 'काकोऽरिष्टः सकृत्प्रजः । आत्मघोषश्चिरजीवी' इति हैम्याम् । '**मे**' मम । '**शिरसः**' मूर्ध्नः ।

**स्पर्शनेन** । '**अरिष्टं**' अमङ्गलम् । '**सूचयति एव**' दर्शयति एव । यथा काकः मस्तकस्थः अमङ्गलं सूचयति तथा । मम स्वामिस्वीकारः अमङ्गलमेव सूचयति इति भद्रां प्रति शालिभद्रस्य कथनम् ॥ ११२ ॥

**सुमनःसौरभस्वादलोभादपि शिरः स्थिता । प्राणत्यागाय मे राज-सत्ताऽसौ पद्मनागिनी ॥ ११३ ॥**

'**सुमनःसौरभस्वादलोभादपि**' सुमनसा गोभद्रदेवेन निर्मितः सौरभस्वादः सुगन्धपूर्णः स्वादः यस्य तस्य अन्नस्य लोभादपि। नागिनीपक्षे-पुष्पसुरभिस्वादेच्छातोऽपि । आगच्छन्ति एवं पुष्पसौरभेण नागाद्याः । '**शिरःस्थिता**' मस्तकस्था । शिरःश्रिता' इत्यपि पाठः । '**असौ पद्मनागिनी राजसत्ता**' पद्माभिद्यसर्पिणी तुल्या राजसत्ता श्रेणिकशासनम् '**मे**' मम । '**प्राणत्यागाय**' मरणाय । वर्तते इति शेषः ॥ ११३ ॥

**इत्यात्मीयमभिप्रायं, सायं दुष्कर्मणामिव । मातुः प्रकाशयामास, शालिः पालिरिव श्रियाम् ॥ ११४ ॥**

**इति दुष्कर्मणां**-पापानाम् । '**सायमिव**' अस्त-समयमिव । '**आत्मीयं**' स्वकीयम् । '**अभिप्रायं**' मनोगतभावम् । '**श्रियां**' लक्ष्मीणाम् । '**पालिरिव**' सेतुरिव । **शालिः** । '**मातुः**' भद्रायाः पार्श्वे । '**प्रकाशयामास**' प्रकटीचकार ॥ ११४ ॥

**चरणाः प्रस्तरेणाऽपि, स्पृष्टाः स्पष्टतरद्युतः । नेत्रं नेत्राञ्चलस्पर्शा-दपि दोदूयतेतराम् ॥ ११५ ॥**

'**प्रस्तरेणाऽपि**' अश्मनाऽपि । '**स्पृष्टाः**' घृष्टाः । '**चरणाः**' पादाः । '**स्पष्टतरद्युतः**' घर्षणात् स्फुटतरप्रभाः भवन्ति । '**नेत्रं**' नयनं पुनः । '**नेत्राञ्चलस्पर्शादपि**' सुकुमारवस्त्रविशेषा-ञ्चलस्पर्शनादपि । '**दोदूयतेतरां**' अतिदुःखीभवति ॥ ११५ ॥

**सुवर्णं वह्निनिक्षिप्तं, वर्णिकावृद्धिमश्नुते । उष्णश्वासाभियोगेऽपि, मौक्तिकं म्लानिमीयते ॥ ११६ ॥**

**'वह्निनिक्षिप्तं'** अग्निनिहितम् । **'सुवर्णं'** कनकम् । **'वर्णिकावृद्धिं'** वर्णवृद्धिम् । **'अश्नुते'** प्राप्नोति । **'मौक्तिकं'** मुक्ताफलं पुनः । **'उष्णश्वासाऽभियोगेऽपि'** उष्णश्वाससम्पर्केऽपि । **'म्लानिं'** विच्छायताम् । **'ईयते'** गच्छति ॥ ११६ ॥

**सामान्यवसनं क्षारशिलाकुट्टाककुट्टनैः । दीप्यते देवदूष्यं तु, नरस्पर्शेन दूष्यते ॥ ११७ ॥**

**'सामान्यवसनं'** साधारणवस्त्रम् । **'क्षारशिला-कुट्टाक कुट्टनैः'** क्षारः (साबु इति भाषायाम्), शिला-प्रस्तरः, कुट्टाकः-काष्ठदण्डः (धोको इति भाषायाम्) तेषां कुट्टनैः स्फोटनैः । **'दीप्यते'** शुभ्रीभवति । **'देवदूष्यं'** देवसम्बन्धि वस्त्रम् । **'तु'** किन्तु । **'नरस्पर्शेन'** मनुष्यस्पर्श-मात्रादपि । **'दूष्यते'** दूषितं भवति ॥ ११७ ॥

**राजोच्छिष्टान्नभाजोऽपि, हृष्यन्ति श्रीकरीधराः । जुगुप्सन्ते द्विजाः शुक्लाः, भक्तराज्ञां प्रतिग्रहम् ॥ ११८ ॥**

**'श्रीकरीधराः'** श्रीकरीं धारयन्तीत्येवंशीलाः राज्ञां पार्श्ववर्तिनः पुरुषाः । 'छडीदार' इति भाषायाम् । **'राजोच्छिष्टान्नभाजोऽपि'** राजभिः उच्छिष्टं अन्नं भजन्ति भुञ्जते इत्येवंशीलाः अपि । **'हृष्यन्ति'** प्रमोदन्ते । **'शुक्लाः'** शुक्लजातीयाः शुद्धाः वा । **'द्विजाः'** ब्राह्मणाः । **'भक्तराज्ञां'** भक्तानां राज्ञाम् । **'भक्तराजानाम्'** इति अत्र समस्तपदे शुद्धं पदम् । **'भक्तराज्ञाम्'** इति पदं चिन्त्यम् । **'प्रतिग्रहं'** अन्यदत्ताऽऽदानम् । **'जुगुप्सन्ते'** जुगुप्सां कुर्वन्ति। यदुक्तं स्मृतौ-"राजप्रतिग्रहो घोरो, विषमिश्रमधूपमः । पुत्रमांसं वरं भुक्तं, न तु राजप्रतिग्रहः" ॥ ११८ ॥

**राज्ञो दास्येऽपि तुष्यन्ति, प्रायेण प्राकृता जनाः । न्यत्कारं राजसत्कारं, मेने गोभद्रनन्दनः ॥ ११९ ॥**

**'राज्ञः'** नृपस्य । **'दास्येऽपि'** सेवकत्वेऽपि । **'प्राकृताः'** साधारणाः । **'जनाः'** नराः । **'प्रायेण'** बहुधा । **'तुष्यन्ति'** तोषं गच्छन्ति । **'गोभद्रनन्दनः'** शालिभद्रस्तु । **'राजसत्कारं'** नृपसंमानमपि । **'न्यत्कारं'** धिक्कारम् । **'मेने'** मनुते स्म ॥ ११९ ॥

**लोकोत्तराणां कोपाय, सर्वसामान्यसत्कृतिः । यथा सकलदेवानां, मूर्तौ वर्णकविस्तरः ॥ १२० ॥**

**'लोकोत्तराणां'** लोकेषु उत्तराणां उत्तमानाम् । **'सर्वसामान्यसत्कृतिः'** सर्वसाधारणसम्मानः । **'कोपाय'** रोषाय भवति । **यथा** । **'सकलदेवानां'** सकलानां कलया प्रभावकलया सहितानां देवानां सप्रभावाणां स्वयम्भूदेवतानां वा । **'मूर्तौ'** प्रतिमायाम् । **'वर्णकविस्तरः'** वर्णकैः चन्दनाद्यैः विस्तरः रचना-अङ्गरचना कोपाय भवति ॥ १२० ॥

**सुकुमारा बहिर्देहे, भवन्ति किल कोटिशः । अपमानाशनेघातैर्भिद्यते हृदयं न तु ॥ १२१ ॥**

**'बहिः'** बाह्यभागे । **'देहे'** शरीरे । **'सुकुमाराः'** सुकोमलाः । **किलः** निश्चये । **कोटिशः** अनेककोटिसङ्ख्याकाः जनाः । **'भवन्ति'** वर्तन्ते । **'तु'** परन्तु । **'अपमानाशनेः'** अपमान वज्रस्य । **'घातैः'** प्रहारैः । **'हृदयं'** तेषामन्तःकरणम् । **'न भिद्यते'** न स्फुट्यते ॥ १२१ ॥

**शालिभद्रः सुकुमारः, सबाह्याभ्यन्तरो ध्रुवम् । स्वामिश्रुतेर्मनो दूनं, यस्य निश्वासतोऽङ्गकम् ॥ १२२ ॥**

**शालिभद्रः** ।**'सबाह्याभ्यन्तरः'** सह बाह्याभ्यन्तराभ्यां वर्तते यः सः । **'ध्रुवं'** निश्चितम् । **'सुकुमारः'** सुकोमलः । **यस्य मनः**-चेतः । **'स्वामिश्रुतेः'** 'स्वामी' इति श्रुतेः श्रवणात् । **'दूनं'** दुःखितम् । **'अङ्गकं'** शरीरं च । **'निश्वासतः'** श्रेणिकनिश्वासतः दूनम् । बाह्यान्तराभ्यां शरीरमनोभ्यां शालिभद्रः दूनः अतः सः स बाह्याभ्यन्तर सुकुमारः इत्यर्थः ॥ १२२ ॥

**अथ श्रीशालिभद्राऽम्बा, शालिकेदारभूरिव । नेत्रनीरप्लवापूर्णा, विवर्णाऽवददीदृशम् ॥ १२३ ॥**

**अथ** । **'श्रीशालिकेदारभूरिव'** शालिव्रीहिक्षेत्रपृथ्वीव । **'श्रीशालिभद्राऽम्बा'** श्रीशालिभद्रस्य अम्बा-माता । **'नेत्रनीरप्लवापूर्णा'** नयनजलपूरपूर्णा । **'विवर्णा'** विच्छाया । **'इदृशं'** अग्रे वक्ष्यमाणम् । **'अवदत्'** उवाच ॥ १२३ ॥

**हा ! किं राजा मयाऽनायि, राजमान्द्यमिवात्मनः । उदघोषि पुनः किं वा, महावात इवाहितः ॥ १२४ ॥**

हा खेदे । **'आत्मनः'** स्वस्य । **'राजमान्द्यमिव'** क्षयरोगः इव । **'राजा'** श्रेणिकः । **मया** । **किं आनायि** कथं आनीतः ? **किंवा** । **'महावातः इव'** झञ्झावातः इव । **'अहितः'** अकल्याणकरः । **'उदघोषि'** राजा आगतः' इति शालिभद्राग्रे उद्घोषितम् ? ॥ १२४ ॥

**साक्षादजाकृपाणीयमनणीयो विचेष्टितम् । क्षमस्व मे हृदाश्वास ! राजश्वासप्रपीडितः ॥ १२५ ॥**

**'राजश्वासप्रपीडित'** हे राज्ञः श्वासैः प्रपीडितः । **'हृदाश्वास'** हृदयाधार ! पुत्र ! **'मे'** मम । **'साक्षात्'** प्रत्यक्षम् । **'अजाकृपाणीयं'** अजा छागिका कृपाणः क्षुरिका अजाकृपाणः तस्य इदं अजाकृपाणीयम् । अजाकृपाणीयन्यायस्तु अयम्–एका छागिका वधार्थं सौनिकेन आनीता । किन्तु क्षुरिका भूमिरेण्वन्तर्गता न दृश्यते । तदा छागिकया एव स्वपादैः भूमिः विलिखिता । रेणुमध्याच्च क्षुरिका निर्गता । तयैव क्षुरिकया सौनिकेन तस्याः वधः विहितः । तद्वत् । **'अनणीयः'** गुरुतरम् **'विचेष्टितं'** वर्तनम् । **'क्षमस्व'** सहस्व ॥ १२५ ॥

**दुग्धे पूतरका न स्युः, घृते तांस्तु त्वमीक्षसे । यदस्मिन् सुखसाम्राज्ये, दुःखदोषान् विभाषसे ॥ १२६ ॥**

**'दुग्धे'** पयसि । **'पूतरकाः'** जलकृमयः । 'पोरा' इति भाषायाम् । **'न स्युः'** न भवेयुः । **'तु'** किन्तु । **'घृते'** सर्पिषि । **'तान्'** पूतरकान् । **'ईक्षसे'** त्वं पश्यसि । **यत्** । **'अस्मिन् सुखसाम्राज्ये'** देवदत्तसुखपूर्णसाम्राज्ये । **'दुःखदोषान्'** दुःखानि दोषांश्च तान् । **'विभाषसे'** कथयसि ॥ १२६ ॥

**त्वत्पित्राऽहं त्वदालम्बा, मुक्ता युक्त्या कृपालुना । कथं वद निराधारां, मुमुक्षुरसि वत्स ! माम् ॥ १२७ ॥**

**'कृपालुना'** दयालुना । **'त्वत्पित्रा'** गोभद्रेण । **अहम्** । **'त्वदालम्बा'** त्वदाधारा । **'युक्त्या'** विचारपूर्वकम् । **'मुक्ता'** गृहवासे स्थापिताऽस्मि । **कथं निराधारां**-निराश्रयां माम् । **'मुमुक्षुः'** मोक्षमिच्छुः । **'असि'** वर्तसे ? **'वद'** ब्रूहि ॥ १२७ ॥

**नृकुञ्जरस्य ते भाग्या-र्गलितस्य प्रिया इमाः । सुवृत्तभोगसौभाग्य-श्चतुराः सुप्रतिष्ठिताः ॥ १२८ ॥**

**रोधाय विहिताः प्रौढा, धात्रा द्वात्रिंशदर्गलाः । धनाबन्धाः समुल्लङ्घ्य, कथं तात ! प्रयास्यसि ? ॥ १२९ ॥**

**'तात'** हे प्रिय पुत्र ! **'नृकुञ्जरस्य'** नरहस्तिनः । **'भाग्यार्गलितस्य'** दैवबद्धस्य । **'ते'** तव । **'इमाः प्रियाः'** कान्ताः । **'समुल्लुङ्घ्य'** अतिक्रम्य । **कथं प्रयास्यसि** गमिष्यसि । कथम्भूताः ताः ? **'सुवृत्तभोगसौभाग्याः'** सुवृत्तैः सदाचारैः भोगैश्च सौभाग्यां यासां ताः । अर्गला पक्षे सुवर्तुलभोगसौभाग्याः । **'चतुराः'** दक्षाः । **'सुप्रतिष्ठिताः'** सुकुलजाः । पक्षे-चतुरासु हस्तिशालासु, सुप्रतिष्ठिताः सुबद्धाः । **'चतुराः'** इति अत्र अर्गलापक्षे विसर्गाभावः विज्ञेयः । **'धात्रा'** विधात्रा । **'रोधाय'** अवरोधाय । **'विहिताः'** निर्मिताः । **द्वात्रिंशत् अर्गलाः** शृङ्खलाः । **'घनाबन्धाः'** दृढाश्लेषाः । पक्षे दृढबन्धनाः इमाः प्रियाः इति सण्टङ्कः ॥ १२८ ॥ १२९ ॥

**रम्भास्तम्भैः कथं सौधं, नेत्रवस्त्रैश्च नौपटः । पद्मनालैर्गजालानं, सन्नाहः केतकीदलैः ॥ १३० ॥**

**विलेखनं कुकूलाग्नेः, किंवा चम्पककोरकैः । कर्पूरफालिकाभिर्वा, प्रासादशिखरं भवेत् ॥ १३१ ॥**

**विचारय चिरं चारु, चातुरीचतुरानन । साध्यते किं जितानङ्ग, व्रतमङ्ग ! तवाङ्गकैः ॥ १३२ ॥ ( विशेषकम् )**

**'रम्भास्तम्भैः'** कदलीस्तभैः । **कथं सौधं**-प्रासादः स्यात् ! **'नैत्रवस्त्रैः'** सुकुमारवसनैः । **'नौपटः'** प्रवहण-पटः

('सढ' इति भाषायाम्) कथं स्यात् ? **'पद्मनालैः'** कमलनालैः । **'गजालानं'** हस्तिबन्धनं कथं स्यात् ? **'पद्मनालैः'** कमलनालैः । **'गजालानं'** हस्तिबन्धनं कथं स्यात् ? **'केतकीदलैः'** क्रकचच्छदपर्णैः । **'सन्नाहः'** कवचः कथं स्यात् ? ॥ १३० ॥ **'कुकूलाग्नेः'** तुषानलस्य । **'विलेखनं'** कर्षणम् । **'चम्पककोरकैः'** हेमपुष्पक-कलिकाभिः किंवा स्यात् ? **'कर्पूरफालिकाभिः'** कर्पूराणां घनसाराणां फालिकाभिः खण्डैः । **'प्रासादशिखरं'** सौधशृङ्गभागः । **किंवा भवेत् ?** ॥ १३१ ॥ तव अङ्गकैः शरीरैः । **'व्रतं'** दीक्षारूपं किं साध्यते-आराध्यते ? 'अङ्ग' इति सम्बोधनार्थमव्ययम् । **चारु** **'चातुरीचतुरानन'** चातुर्यां चतुरानन ब्रह्मणा तुल्य । **'जितानङ्ग'** जितमदन ! पुत्र ! **'चिरं'** दीर्घकालम् । **'चारु'** सुन्दरतया, क्रिया-विशेषणमिदम् । **'विचारय'** चिन्तय ॥ १३२ ॥

**शालिः प्राहाम्ब ! सन्देहे, श्रियां सांयात्रिका यदि । त्यक्त्वा पुत्रकलत्रादि, विशन्ति क्षारवारिधौ ॥ १३३ ॥**

**ततः प्रशमपीयूष-सागरं विजिगाहिषुः । आत्यन्तिकैकान्तिकार्थ-सिद्धये व्यवसायवान् ॥ १३४ ॥**

**विपश्चिन्निश्चितश्चित्ते, विक्रमोपक्रमक्रमः । वधूभिरुपरुध्येऽहं, देहमोहेन वा कथम् ॥ १३५ ॥**

**'शालिः'** शालिभद्रः । **'प्राह'** वदति । **'अम्ब'** हे मातः । **'श्रियां'** सम्पत्तीनाम् । **'सन्देहे'** संशये । **'यदि'** चेत् । **'सांयात्रिकाः'** पोतवणिजः । **'पुत्रकलत्रादि'** सुतभार्यादि । **'त्यक्त्वा'** विहाय । **'क्षार वारिधौ'** क्षारे लवणसमुद्रे । **'विशन्ति'** प्रविशन्ति ॥ १३३ ॥ **'ततः'** तस्मात् । **'प्रशम-पीयूष सागरं'** क्षमासुधाब्धिम् । **'विजिगाहिषुः'** विगाहनेच्छुः । **'आत्यन्तिकैकान्तिकार्थसिद्धये'** आत्यन्तिकः एकान्तिकश्च यः अर्थः चतुर्थ पुरुषार्थः मोक्षः तस्य सिद्धये प्राप्तये । **'व्यवसायवान्'** कृतनिश्चयः ॥ १३४ ॥ **'विपश्चिन्निश्चितः'** विद्वद्भिः निर्णीतः परीक्षितः इत्यर्थः । **'चित्ते'** मनसि ।

'**विक्रमोपक्रमक्रमः**' विक्रमस्य-पराक्रमस्य यः उपक्रमः आरम्भः तस्मिन् क्रमौ चरणौ यस्य सः । '**अहं**' शालिभद्रः । '**वधूभिः**' पत्नीभिः । '**देहमोहेन वा**' शरीरस्नेहेन वा । '**कथं उपरुध्ये**' कथं निवार्ये ? ॥ १३५ ॥

**अग्निशौचानि चीराणि, वपूंषि च मनीषिणाम् । स्निग्धानि सुकुमाराणि, शुध्द्यन्ति तपसाऽग्निना ॥ १३६ ॥**

'**मनीषिणां**' विदुषाम् । '**स्निग्धानि**' दृढानि । '**सुकुमाराणि**' कोमलानि । '**चीराणि**' वस्त्राणि । '**वपूंषि**' शरीराणि । **च** समुच्चये । '**अग्निशौचानि**' अनलपवित्राणि । भवन्ति । '**तपसाऽग्निना**' तपश्चर्यावह्निना । '**शुद्ध्यन्ति**' तानि निर्मलीभवन्ति। पूर्वकाले एतादृशानि रत्नकम्बलानि अभवन्, यानि अग्नौ शुद्ध्यन्ति स्म । शरीरमपि तपसा अग्निना एव शुद्ध्यति इति भावः ॥ १३६ ॥

**दुर्मोचमाग्रहं मत्वा, तनयस्येति कातरा । कालक्षेपचिकीः कामं, माता सुतमभाषत ॥ १३७ ॥**

**इति** । '**तनयस्य**' पुत्रस्य । '**दुर्मोचं**' मोचयितुमशक्यप्रायम् । '**आग्रहं**' दीक्षाविषयकम् । '**मत्वा**' ज्ञात्वा । '**कातरा**' भयभीता । '**कालक्षेपचिकीः**' कालविलम्बं कर्तुकामा । '**माता**' भद्रा । '**सुतं**' पुत्रम् । '**कामं**' नितान्तम् । '**अभाषत**' कथयामास ॥ १३७ ॥

**स्वर्भोगै र्देवदन्तीव, सदैव सुखलालितः । नृगन्धशयनाहार-विहाराभ्यासमातनु ॥ १३८ ॥**

हे वत्स ! त्वम् । '**देवदन्तीव**' ऐरावणहस्तीव । '**सदैव**' नित्यमेव । '**स्वर्भोगैः**' दिव्यसुखैः । '**सुख-लालितः**' सुखपूर्वकं लालितः असि । तस्मात् प्रथमम् । '**नृगन्धशयनाहारविहाराभ्यासं**' नृगन्धस्य नरगन्धस्य नरशयनस्य नराहारस्य नरविहारस्य च अभ्यासं प्रयत्नम् । '**आतनु**' कुरु ॥ १३८ ॥

**उपश्रुतिमिव श्रुत्वा, वाचं वाचस्पतेः प्रति । प्रत्यहं प्रेयसीमेकामेकामुज्झाञ्चकार सः ॥ १३९ ॥**

‘**उपश्रुतिमिव**’ उप–समीपे श्रूयतेऽस्यामुपश्रुतिः–देवप्रश्नः देववाणीमिव । ‘देवप्रश्न उपश्रुतिः’ इति हैम्याम् । ‘**वाचं**’ **मातृवाणीमिव** । ‘**श्रुत्वा**’ आकर्ण्य । ‘**वाचस्पतेः प्रति**’ बृहस्पतेः समानः । यतः प्रतिनिधि० ।२।२।७२।। इति सूत्रेण समानार्थे पञ्चमी । ‘**सः**’ शालिभद्रः । ‘**प्रत्यहं**’ प्रतिदिनम् । **एकामेकाम्** । ‘**प्रेयसीं**’ प्रियाम् । ‘**उज्झाञ्चकार**’ त्यजति स्म ॥ १३९ ॥

**विश्वचित्रे निजे सौख्ये, दत्तरेखाश्च हेलया । तूलिकास्तूलिकाः साक्षात्, सुसूक्ष्ममृदुलोमिकाः ॥ १४० ॥**

‘**विश्वचित्रे**’ विश्वस्य–जगतः चित्रे आश्चर्यकारिणि । पक्षे चित्रे । **निजे** सौख्ये । **हेलया** लीलया । **दत्तरेखाः** दत्ताः छेदरूपाः रेखाः यासु ताः । चित्रकारपिच्छिकापक्षे दत्ता चित्रे रेखा याभिः ताः । ‘**सुसूक्ष्ममृदुलोमिकाः**’ अतिसूक्ष्म–कोमलरोमिकाः । चित्रकारपिच्छिकापि मृदुलोमिकैव भवति । ‘**साक्षात्**’ प्रत्यक्षम् । ‘**तूलिकाः**’ चित्रकारपिच्छिकाः । ‘**तूलिकाः**’ तूलनिर्मितशयनीयानि । तळाई इति भाषायाम् । **चकारो** भिन्नक्रमे । ‘**तत्याज**’ इति शेषः ॥ १४० ॥

**इतश्चेह पुरे देव–कनीनामकनीयसी । कनीयसी स्वसा शालेः सुभद्रा नाम विद्यते ॥ १४१ ॥**

अथ शालिभद्रभगिनी सुभद्रा प्रसङ्गः । **इतश्च** । ‘**इह**’ राजगृहे । ‘**पुरे**’ नगरे । ‘**देवकनीनां**’ सुरकन्यानाम् । ‘**अकनीयसी**’ ज्येष्ठा, देवाङ्गनाऽधिका इत्यर्थः । ‘**शालेः**’ शालिभद्रस्य । ‘**कनीयसी**’ लघ्वी । ‘**स्वसा**’ भगिनी **सुभद्रा नाम विद्यते** ॥ १४१ ॥

**तत्प्राणनाथः पुण्याम्भ–स्तल्लिका नृमतल्लिका । श्रीमल्लिका वसन्तर्तु–र्धन्यः सौजन्यभूरभूत् ॥ १४२ ॥**

‘**तत्प्राणनाथः**’ तस्याः सुभद्रायाः प्राणनाथः पतिः । ‘**पुण्याम्भस्तल्लिका**’ सुकृतजल तटाकिकातुल्यः । ‘**नृमतल्लिका**’

नरश्रेष्ठः । **'श्रीमल्लिकावसन्तर्तुः'** श्रीः लक्ष्मीः सैव मल्लिका मालती तद्विकासे वसन्तऋतुतुल्यः । **'सौजन्यभूः'** सज्जनतास्थानम्। **'धन्यः'** तन्नामा । **अभूत्** ॥ १४२ ॥

**तस्यान्यदा मुदा स्नाने, प्रस्तुते स्कन्धबन्धयोः । दयितानेत्रपत्रान्तात्, पेतुः कोष्णाश्रुबिन्दवः ॥ १४३ ॥**

**'अन्यदा'**, अन्येद्युः । **'तस्य'** धन्यस्य । **'मुदा'** आनन्देन । **स्नाने** । **'प्रस्तुते'** कर्तुमारब्धे । **'स्कन्धबन्धयोः'** असंबन्धयोः उपरि। **'दयितानेत्रपत्रान्तात्'** प्रिया (सुभद्रा) नयनदलान्तात् । **'कोष्णाश्रुबिन्दवः'** किञ्चिदुष्णाः अश्रुविप्रुषः । **'पेतुः'** पतिताः ॥ १४३ ॥

**बिन्दुर्बिन्दूनसौ सौख्य-शून्यबिन्दून् प्रिया जगौ । निर्यान्त्यश्रुकणाः किं ते, भृङ्गाभा नेत्रपद्मतः ॥ १४४ ॥**

**'बिन्दून्'** विप्रुषः । **'सौख्यशून्यबिन्दून्'** सौख्यस्य शून्यरूपान् बिन्दून् । तृन्नुदन्ता ।२।२।९०॥ इति षष्ठीनिषेधादत्र कर्मणि द्वितीया । **'बिन्दुः'** विदुरः जानन् । बवयोरभेदात् । 'वेदिता विदुरो बिन्दुः' इति हैम्याम् । विन्दिच्छू ।५।२।३४॥ इति निपातः । **'असौ'** धन्यः । **'प्रियां'** सुभद्राम् । **'जगौ'** कथयामास । **'किं'** कथम् । **'ते'** तव । **'नेत्रपद्मतः'** नयनकमलतः **'भृङ्गाभाः'** भ्रमरतुल्याः । **'अश्रुकणाः'** बाष्पबिन्दवः । **'निर्यान्ति'** निर्गच्छन्ति ? ॥ १४४ ॥

**सा प्रत्याह मम स्वामिन् ! सोदरः संयमादरात् । एकैकां प्रेयसीं प्रेम-हेमैककषपट्टिकाम् ॥ १४५ ॥**

**कन्दर्पधूर्तसंमोह-मूलिकामिव तूलिकाम् । मुञ्चति प्रत्यहं हन्त ! तदहं दुःखपूरिता ॥ १४६ ॥**

**'सा'** सुभद्रा । **'प्रत्याह'** प्रत्युवाच । **'स्वामिन्'** हे नाथ ! **मम सोदरः**-भ्राता शालिभद्रः । **'संयमादरात्'**

चारित्रग्रहणमनोरथात् । **'प्रेमहेम्नः'** स्नेहसुवर्णस्य परीक्षायाम् । **'एकैकषपट्टिकां'** एकशाणपट्टिकातुल्याम् । **'कन्दर्पधूर्तस्य'** अधमकामस्य । **'सम्मोहे'** सम्मोहने । **'मूलिकामिव'** मोहनवल्लीमिव । **'तूलिकां'** तूलनिर्मितशयनीयम् । **'एकैकां'** एकामेकाम् । **'प्रेयसीं'** प्रियतमां च । **हन्तः** खेदे । **'मुञ्चति'** त्यजति । **'तत्'** तस्मात् । **अहं दुःखपूरिता**-दुःखपूर्णा । रोदिमीति शेषः ॥ १४५ ॥ १४६ ॥

**धर्मवीरपथाध्वन्यः प्राह धन्यः सुधीनिधिः । य एवं कातरः स स्यात्, किं तृष्णादीर्घिकातरः ॥ १४७ ॥**

**'धर्मवीरपथाध्वन्यः'** धर्मवीराणां पथि-मार्गे अध्वन्यः-प्रवासी । **'सुधीनिधिः'** सुमतिशेवधिः । **धन्यः** **'प्राह'** वदति **य एवं कातरः**-भीतः स्यात् **सः किं 'तृष्णादीर्घिकातरः'** तृष्णा-लोभः सैव दीर्घिका-वापिका तां तरतीत्येवंशीलः स्यात्? ॥ १४७ ॥

**अभ्यमित्रीणताभाजा-मपि सिंहावलोकितम् । नृणां पिशुनयत्येव, पशुत्वमिव मानिनाम् ॥ १४८ ॥**

**'अभ्यमित्रीणताभाजामपि'** शत्रुं प्रति संमुखं गच्छतामपि । **'नृणां'** नराणाम् । **'सिंहावलोकितं'** सिंहवत् पश्चात् विलोकनम् । गच्छन् हि सिंहः पश्चाद् विलोकते, **'पशुत्वमिव'** पशुतातुल्यताम् । **'पिशुनयत्येव'** कथयति एव । सिंहोऽपि पशुरेव । तद्वत् पश्चाद् विलोकनं पशुप्रकृतिरेव । सा च मानधनानां न शोभते इति भावः ॥ १४८ ॥

**कामार्थयोरपि प्रोक्तं, दीर्घसूत्रः प्रणश्यति । ततः प्रसिद्धमेवैतद्, धर्मस्य त्वरिता गतिः ॥ १४९ ॥**

**'कामार्थयोरपि'** कामार्थविषयेऽपि । **'प्रोक्तं'** कथितम् । **'दीर्घसूत्रः'** चिरक्रियः चिरेण कार्यं करोतीत्येवंशीलः । **'प्रणश्यति'** नाशमुपयाति । 'दीर्घसूत्री विनश्यति' इति नीतिशास्त्रोक्तिः । **'ततः'** तस्मात् । **'धर्मस्य त्वरिता गतिः'** इति एतत् सूत्रं प्रसिद्धमेव ॥ १४९ ॥

**भीरु ! भीरुः स ते भ्राता, तनुते तुण्डताण्डवम् । शारदीन इवाम्भोदः, सारदीनतया तया ॥ १५० ॥**

'**भीरु**' हे प्रिये । **सः ते तव** । '**भ्राता**' बन्धुः शालिभद्रः । '**भीरुः**' कातरः अस्ति । **यः शारदीनः** शरत्कालीनः । '**अम्भोदः इव**' मेघ इव । '**सारदीनतया**' साररहितत्वात् दीनता दैन्यं तया । '**तुण्डताण्डवं**' तुण्डे-मुखे-प्रारम्भे एव तुण्डेन भाषणेन वा ताण्डवं नाट्यम् '**तनुते**' करोति । शारदीनो हि जलदः आदौ गर्जनादि बहु करोति न तु वर्षति । यदुक्तम् "शरदि न वर्षति गर्जति, वर्षति वर्षासु निःस्वनो मेघः ।" तद्वत् शालिभद्रोऽपि इत्यर्थः ॥ १५० ॥

**शालिभद्रः स ते बन्धु-रहो तात्त्विकसात्त्विकः । स्वजानानुनयैषी च, क्रमात् त्यजति वल्लभाः ॥ १५१ ॥**

**अहो** आश्चर्ये । **स ते तव बन्धुः** सहोदरः शालिभद्रः । '**तात्त्विक-सात्त्विकः**' तात्त्विकेन सत्यतया 'सात्त्विकः' सत्त्वशाली । **यः स्वजनानुनयैषी**-स्वजनानां अनुनयैषी अभिलाषेच्छुः । **च**कारः समुच्चये । '**वल्लभाः**' पत्नीः । '**क्रमात्**' क्रमेण । '**त्यजति**' परिहरति । अत्र वक्रोक्तिः । यदुक्तम्-"अन्यस्यान्यार्थकं वाक्यमन्यथा योजयेद् यदि । अन्यश्लेषेण काक्वा वा, सा वक्रोक्तिस्ततो द्विधा" ॥ १५१ ॥

**तस्यां विहितमौनायां, दूनायामपि सर्वथा । तदीयपक्षपातेन, सप्तान्यास्तं प्रिया जगुः ॥ १५२ ॥**

'**सर्वथा**' सर्वप्रकारेण । '**दूनायामपि**' दुःखितायामपि । '**तस्यां**' सुभद्रायाम् । '**विहीतमौनायां**' कृततुष्णीम्भावायाम् । '**अन्याः**' सुभद्रां विना अन्याः । **सप्त प्रियाः** प्रेयस्यः । '**तदीयपक्षपातेन**' शालिभद्रसुभद्रापक्षपातेन । '**तं**' धन्यम् '**जगुः**' उचुः ॥ १५२ ॥

**कातरा अपि सङ्ग्राम-वार्तामावर्तयन्त्यहो । न श्वसन्त्यपि निःस्वानो-द्दामसांराविणे रणे ॥ १५३ ॥**

**अहो** आश्चर्ये । **कातराः** अपि भीताः अपि नराः । **'सङ्ग्रामवार्ता'** युद्धवार्ताम् । **'आवर्तयन्ति'** पुनः पुनः कथयन्ति । किन्तु । **'निःस्वानोद्दामसांराविणे'** निःस्वानेन शब्देन उद्दामं भयानकं सांराविणं तुमुलं यत्र तस्मिन् । **'रणे'** युद्धे । **'न श्वसन्ति अपि'** श्वासमपि न गृहणन्ति । युद्धवार्ताकथकाः अन्यान् युद्धार्थं प्रेरयन्ति किन्तु युद्धे प्रारब्धे स्वयं श्वाससमयमात्रमपि न तिष्ठन्ति । तथा यूयमपि संयमवार्तारसिका एव, न पालकाः इति भावः ॥ १५३ ॥

**परं प्रति प्रवदतां, संयमः सुकरः परम् । न सूर्यमण्डलस्येव, समीपेऽप्युपवेशनम् ॥ १५४ ॥**

**'परं प्रति'** अन्यं प्रति । **'प्रवदतां'** प्रेरणां कुर्वतां नराणाम् । **'संयमः'** त्यागधर्मः । **'सुकरः'** सुसाधः । **'परं'** परन्तु । **'सूर्यमण्डलस्य इव'** रविमण्डलस्य इव संयमस्य **'समीपे'** पार्श्वे । **'उपवेशनमपि'** अवस्थानमपि न सुकरम् ॥ १५४ ॥

**प्राणेश ! चारुचारित्र-चारश्चेत् सुकरस्तदा । भोगव्यासमपास्याशु, स्वयमासेव्यते न किम् ? ॥ १५५ ॥**

**'प्राणेश'** हे हृदयेश्वर ! **'चेत्'** यदि । **'चारुचारित्रचारः'** मनोरमचारित्रचर्या । **'सुकरः'** सुसाधः । **'तदा'** तर्हि । **'भोगव्यासं'** विलासविस्तरम् । **'अपास्य'** सन्त्यज्य **'स्वयं'** आत्मना । **'किं न आसेव्यते'** कथं न आराध्यते सः संयमः ? ॥ १५५ ॥

**धन्यंमन्यस्ततो धन्यः, प्रमोदाददे वचः । दिष्ट्या कल्याणि ! कल्याणि-मद्भाग्यानि जयन्त्यहो ॥ १५६ ॥**

**'धन्यंमन्यः'** आत्मानं धन्यं मन्यते इत्येवंशीलः । **धन्यः** । **'ततः'** प्रियावचः श्रुत्वा । **'प्रमोदात्'** आनन्दात् । **'वचः'** वचनम् । **'आददे'** स्वीकृतवान् । उवाच इत्यर्थः । **'अहो'** प्रमोदे । **'कल्याणि'** हे कल्याणकारिणि प्रिये ! **दिष्ट्या** आनन्ददर्शने । **'कल्याणि-मद्भाग्यानि'** कल्याणीनि कल्याणवन्ति च तानि मद्भाग्यानि च । **'जयन्ति'** विलसन्ति ॥ १५६ ॥

**यूयं श्रृङ्गारवाहिन्यो, गम्भीरा रसपूरिताः । अभूवन् पथदेशिन्यः, सत्त्वाक्षिप्ता इव स्वयम् ॥ १५७ ॥**

**यूयम्** '**श्रृङ्गारवाहिन्यः**' श्रृङ्गाराणां वाहिन्यः वाहिकाः । पक्षे-नद्यः । कथम्भूताः ? '**गम्भीराः**' गम्भीरहृदयाः । नदीपक्षे-गहनाः । '**रसैः**' विलासरसैः । पक्षे-जलैः । '**पूरिताः**' पूर्णाः । किन्तु । '**स्वयं**' आत्मना । '**सत्त्वाक्षिप्ताः इव**' मम सत्त्वेन आक्षिप्ताः आकृष्टाः इव । '**पथदेशिन्यः**' मार्गदात्र्यः । '**अभूवन्**' बभूवुः । अत्र 'अभूवन्' इति स्थाने 'अभूत्' इत्युचितं प्रतिभाति ॥ १५७ ॥

**तदहं वरिवस्यामि, तपस्यायै जिनेश्वरम् । भवतीषु भवन्तीषु, भवतीराय कारणम् ॥ १५८ ॥**

'**तत्**' तस्मात् । '**भवतीषु**' युष्मासु । '**भवतीराय**' संसारतटपारगमनाय । '**कारणं**' निदानम् । '**भवन्तीषु**' जायमानासु । **अहम्** । '**तपस्यायै**' संयमाय । '**जिनेश्वरं**' अर्हन्तम् । '**वरिवस्यामि**' सेवे पर्युपासे ॥ १५८ ॥

**निशम्येति वचो रुक्षं, तमूचुः प्रणयात् प्रियाः । नर्म संवर्मितं कर्म, न शर्म प्रजिघांसति ॥ १५९ ॥**

'**इति**' उपर्युक्तम् । '**रुक्षं**' स्नेहरहितं संसारत्यागेच्छापूर्णम् । '**वचः**' धन्यवचनम् । '**निशम्य**' श्रुत्वा । '**तं**' धन्यं पतिम् । '**प्रणयात्**' स्नेहात् । '**प्रियाः**' कान्ताः । '**उचुः**' वदन्ति स्म । '**नर्मसंवर्मितं**' नर्मणा-लीलया संवर्मितं सहितम् । '**कर्म**' वचनरूपं कर्म । '**शर्म**' सौख्यम् । **न प्रजिघांसति** न हन्तुमिच्छति ॥ १५९ ॥

**मूलं धर्मार्थकामानां, स्वयमेवोपलालिताः । कुतः कान्त ! निराधाराः, श्रियः कान्ताश्च मोक्ष्यसि ? ॥ १६० ॥**

'**कान्त**' हे प्रिय । '**धर्मार्थकामानां**' त्रिवर्गस्य । '**मूलं**' मुख्यकारणम् । अनाविष्टलिङ्गत्वात् मूलमेव । '**स्वयमेव**' आत्मनैव । '**उपलालिताः**' परिपोषिताः । '**निराधाराः**' निराश्रयाः । '**श्रियः**' सम्पत्तीः । '**कान्त**' हे स्वामिन् । '**प्रियतमाः**' कान्ताः । **चः** समुच्चये । '**कुतः**' कथम् । '**मोक्ष्यसि**' मोक्तुमिच्छसि ? ॥ १६० ॥

**भाग्यसौभाग्यसाराणां, सतीनां धर्मधीजुषाम् । श्रीणां स्त्रीणां च मन्येऽहं, त्यागेनैवोत्तमं फलम् ॥ १६१ ॥**

**इत्युदीर्य लसद्धैर्यं, जीववीर्यविशेषवान् । प्रस्थितः स्थिरतामेरुप्रस्थसुस्थमतिस्थितिः ॥ १६२ ॥**

'**भाग्यसौभाग्यसाराणां**' भाग्यसौभाग्ये एव सारः यासां तासाम् । '**सतीनां**' साध्वीस्त्रीणां कुलीनानाम् । श्रीपक्षे सत्यमार्गेण उपात्तानां विद्यमानानां वा । '**धर्मधीजुषां**' सुकृतमति सहितानाम् । पक्षे-धर्मे धियं जोषन्ति कुर्वन्ति तासाम् । श्रीणां लक्ष्मीणाम् । '**स्त्रीणां च**' महिलानां च । '**त्यागेनैव**' परिहारेणैव' पक्षे-दानेनैव । '**उत्तमं**' उत्कृष्टम् । फलं स्यादिति अहं मन्ये ॥ १६१ ॥ इति उदीर्य-कथयित्वा । '**जीववीर्यविशेषवान्**' विशिष्टात्मवीर्यवान् । '**स्थिरतामेरुप्रस्थसुस्थमतिस्थितिः**' स्थिरतायां स्थैर्ये मेरुप्रस्थवत् मेरुशिखरवत् सुस्था-स्वस्था मतिस्थितिः यस्य सः । '**लसद्धैर्यं**' यथा लसत् स्फुरत् धैर्यं तथा, क्रियाविशेषणमिदम् । '**प्रस्थितः**' दीक्षार्थं चलितः ॥ १६२ ॥

**सिद्धिः सत्त्वं कलाऽभ्यासं, लक्ष्मीः पुण्यं प्रभा रविम् । अनुयान्ति यथा नाथ ! तथा कान्तं कुलाङ्गनाः ॥ १६३ ॥**

**यथा** । '**सत्त्वं**' आत्मबलम् । '**सिद्धिः**' प्राप्तिः । '**अभ्यासं**' प्रयत्नम् । '**कला**' धनुर्विद्यादिकला । '**पुण्यं**' सुकृतम् '**लक्ष्मीः**' श्रीः । '**रविं**' सूर्यम् । '**प्रभा**' कान्तिः । **अनुयान्ति** अनुगच्छन्ति । **तथा नाथ** हे स्वामिन् । '**कान्तं**' पतिम् । '**कुलाङ्गनाः**' सतीस्त्रियः अनुयान्ति ॥ १६३ ॥

**पतिव्रताव्रतं सत्यं, तीव्रं निःसङ्गताव्रतम् । उभे आराधयिष्यामस्तवानुगमलीलया ॥ १६४ ॥**

**एवमुक्तवतीः प्रीत्या, प्रेयसीः श्रेयसीस्तराः । परं परममित्युक्त्वा, धन्यस्ता अभ्यनन्दयत् ॥ १६५ ॥**

हे स्वामिन् । **तव अनुगमलीलया** अनुगमनक्रीडया । **सत्यं पतिव्रताव्रतं**-पतिव्रतास्त्रियाः व्रतम् । **'तीव्रं'** भीष्मम् । **'निःसङ्गताव्रतं'** मुनिव्रतम् । **'उभे अपि'** द्वे अपि । **'आराधयिष्यामः'** सेविष्यामहे ॥ १६४ ॥ एवं **प्रीत्या**-प्रेम्णा । **'उक्तवतीः'** कथितवतीः । **'श्रेयसीतराः'** अतिशयेन श्रेयस्यः श्रेयसीतराः ताः । **'प्रेयसीः'** प्रियाः । **'परमं'** उत्तमम् । **'परं'** भव्यम् । **इति उक्त्वा**-भाषित्वा । **धन्यः** । **'ताः'** प्रियाः । **'अभ्यनन्दयत्'** अभिनन्दितवान् ॥ १६५ ॥

**उत्कण्ठया निर्वृतिनायिकायाः, कटाक्षितः संयमकाम्यया च । पूर्वप्रियाभिर्वरिवस्यमानः, स वीरनाथागमनं निदध्यौ ॥ १६६ ॥**

**'निर्वृतिनायिकायाः'** निर्वृतिः मुक्तिः सा एव नायिका तस्याः । **'उत्कण्ठया'** उत्सुकतया । **'संयमकाम्यया'** संयमस्य काम्यया-वाञ्छया । **चः** समुच्चये । **'कटाक्षितः'** पुनः पुनः वीक्षितः । **'पूर्वप्रियाभिः'** पूर्वपत्नीभिः । **'वरिवस्यमानः'** पर्युपास्यमानः । **'सः'** धन्यः । **'वीरनाथस्य'** महावीरदेवस्य । **'आगमनं'** आगतिम् । **'निदध्यौ'** चिन्तयामास प्रतीक्षाञ्चक्रे इत्यर्थः । उपजातिवृत्तमिदम् । तल्लक्षणं चेदम् ''उपेन्द्रवज्रा जतजास्ततो गौ । स्यादिन्द्रवज्रा यदि तौ जगौ गः । अनन्तरोदीरितलक्ष्मभाजौ, पादौ यदीयावुपजातयस्ता । इत्थं किलान्यास्वपि मिश्रितासु, स्मरन्ति जातिष्विदमेव नाम ॥ इति वृत्तरत्नाकरे ॥ १६६ ॥

**दिव्यश्रीपरिवेषतां रसवतीं भोगाङ्गभङ्गीमिमा,-मानन्दाश्रुविमिश्रसुन्दरदृशा, श्रीश्रेणिकेनेक्षिताम् ।**
**बाष्पापूर्णदृशा चकोरकवरेणेवान्तरुद्यद्द्विषां, श्रीशालिः किल मानशालिनृपतिः सम्भावयामासिवान् ॥ १६७॥**

**'दिव्यश्रीपरिवेषितां'** दिव्यश्रीभिः परिवेषितां-परिवृत्ताम् । पक्षे प्रदत्ताम् । ('पीरसायेली' इति भाषायाम्) । **'भोगाङ्गभङ्गीं'** भोगाङ्गानां भङ्गी-सामग्री यस्यां ताम् । **'आनन्दाश्रुविमिश्रया'** प्रमोद बाष्पाश्रुयुक्तया । **'सुन्दरदृशा'**

मनोज्ञनयनेन । '**श्रीश्रेणिकेन**' नृपेण । '**ईक्षितां**' 'विलोकिताम् । केन इव ? '**बाष्पापूर्णदृशा**' बाष्पैः आपूर्णा दृग् नयनं यस्य तेन । '**चकोरकवरेणइव**' चकोरपक्षिणा इव । इमां रसवतीं-विलासरसयुक्तां मोहविषयुक्तां च पक्षे षडरसपूर्णभोजनं विषयुक्तम् । रसशब्दः विषार्थोऽपि । अयं भावः-विषमिश्रितां रसवतीं यदा चकोरः पश्यति तदा रोदिति, अत्र चकोरस्थाने रुदन् श्रेणिकनृपः ग्राह्यः । '**इमां**' भोगाङ्गभङ्गीम् । '**अन्तररुद्यद्विषां**' मध्ये स्फुरद् विषां विषमिश्रितामित्यर्थः । '**मानशालिनृपतिः**' मानशालिनां गौरवशालिनां नृणां नराणां पतिः मुख्यः । श्रीशालिभद्रः । **किलः** निश्चयार्थे । '**सम्भावयामासिवान्**' चिन्तयामासेत्यर्थः ॥ १६७ ॥

**श्रीशालिचरिते धर्म-कुमारसुधिया कृते । श्रीप्रद्युम्नधिया शुद्धे, पञ्चमः प्रक्रमोऽभवत् ॥ १६८ ॥**

**इति श्रीकच्छवागडदेशोद्धारक-तपागच्छाचार्य-विजय कनकसूरि-प्रशिष्याचार्य विजय-**
**कलापूर्णसूरि-शिष्यमुनिश्री कलाप्रभविजयजी (विजयकलाप्रभसूरि)-शिष्य-**
**मुनिश्री (पंन्यास) मुक्तिचन्द्रविजयजी**
**शिष्य मुनिश्री (पंन्यास) मुनिचन्द्रविजयविरचितायां**
**श्रीशालिभद्रमहाकाव्यस्य सानुवादटीकायां**
**पञ्चमः प्रक्रमोऽभवत् ।**
**इति श्रीशालिभद्रलीलायां पञ्चमः प्रक्रमः ।**

## ॥ अथ षष्ठः प्रक्रमः ॥



**शालेः पुण्यकणश्रेणिः, प्रशस्तां स्वस्तिकश्रियम् । श्रयन्ती देवदेवस्य, पुरतः परिभाव्यताम् ॥ १ ॥**

'**शालेः**' शालिभद्रस्य । पक्षे-शालिव्रीहेः '**पुण्यकणश्रेणिः**' सुकृतांशावली । पक्षे-पवित्रकणावली । '**देवदेवस्य**' श्रीमहावीरजिनेश्वरस्य । '**पुरतः**' अग्रतः । '**प्रशस्तां**' कल्याणपूर्णाम् । '**स्वस्तिकश्रियं**' स्वस्तिकशोभाम् । '**श्रयन्ती**' भजन्ती । '**परिभाव्यतां**' विलोक्यताम् ॥ १ ॥

**सार्धं श्रीशालिभद्रस्य, श्रद्धयेवाययौ प्रभुः । महतां हि स्पृहाप्राप्ती, युग्मजाते इव ध्रुवम् ॥ २ ॥**

**श्रीशालिभद्रस्य श्रद्धया**-वीरागमनाभिलाषया । '**सार्धमिव**' सममिव । '**प्रभुः**' श्रीवीरः । '**आययौ**' समागतः । '**महतां**' महापुरुषाणाम् । **हिः** निश्चये । '**स्पृहाप्राप्ती**' स्पृहा-वाञ्छा प्राप्तिः लाभः ते । '**ध्रुवं**' नूनम् । '**युग्मजाते इव**' सहोद्भूते इव भवतः ॥ २ ॥

**श्रीवीरपार्श्वे धन्यस्य दीक्षा–**

**शृङ्गारहेतुमृद्धानां दुर्विधानां तु शम्बलम् । वैभारं क्षोणिकल्याणा-लङ्कारं धरणीधरम् ॥ ३ ॥**

**भूर्भुवः स्वस्त्रयीहीरः श्रीवीरः सुरसेवितः । अलञ्चक्रे प्रभावाढ्यो, भववारितरः प्रभुः ॥ ४ ॥**

'**ऋद्धानां**' समृद्धानां श्रेष्ठिनाम् । '**शृङ्गारहेतुं**' शोभाकारणम् । पर्वते पर्यटनादिविलास करणात् । '**दुर्विधानां**'

दरिद्राणाम्। **तुः** चकारार्थः । **'शम्बलं'** पाथेयम् पर्वते आजविकार्थं काष्ठाद्यानयनात् । **'क्षोणिकल्याणालङ्कारं'** पृथ्वीमङ्गलमण्डनम्। **'वैभारं'** तन्नामकम्। **'धरणीधरं'** पर्वतम् ॥ ३ ॥ **'भूर्भुवःस्वस्त्रयीहीरः'** त्रिलोकीरत्नम्। **'सुरसेवितः'** सुरैः देवैः सेवितः। **'भववारितरः'** संसारजलं तरतीत्येवंशीलः । **'प्रभावाढ्यः'** प्रभावेण तीर्थकृन्नामकर्मजेन महिम्ना आढ्यः पूर्णः । **'प्रभुश्रीवीरः'** भगवान् श्री महावीरदेवः । **'अलञ्चक्रे'** भूषयामास समागतः इत्यर्थ ॥ ४ ॥

**मोहद्रोहापसरणं, शरणं भवभीभृताम् । सुरैरकारि समव-सरणं शरणं श्रियाम् ॥ ५ ॥**

**'मोहद्रोहापसरणं'** मोहः एव द्रोहः संसारकारणात्, अथवा मोहश्च द्रोहश्च तौ तयोः अपसरणं अपक्रमणं यस्मात् तत् । **'भवभीभृतां'** भवात् संसारात् भीः भयं तां बिभ्रतां जनानां शरणं आश्रयः । **'श्रियां'** बाह्यान्तरलक्ष्मीणाम् । **'शरणं'** गृहम् । 'वसतिः शरणं' इति हैम्याम् । **'समवसरणं'** देशनासदनम् । **'सुरैः'** देवैः । **'अकारि'** विहितम् ॥ ५ ॥

**धन्य एनःखगश्येनः, स्ववयस्येन शंसितम् । विदाञ्चक्रे विदां चक्र-वर्ती श्रीधर्मचक्रिणम् ॥ ६ ॥**

**'एनःखगश्येनः'** एनांसि-पापानि तानि एव खगाः पक्षिणः तन्मारणे श्येनः-शशादनः, 'बाज' इति भाषायाम् । **'विदां'** विज्ञानाम् । **'चक्रवर्ती'** मुख्यः । **धन्यः** । **'स्ववयस्येन'** निजमित्रेण । **'शंसितं'** ज्ञापितम् । **'श्रीधर्मचक्रिणं श्रीवीरं'** धर्मचक्रप्रवर्तकं श्रीवीरम् । **'विदाञ्चक्रे'** ज्ञातवान् ॥ ६ ॥

**दीनादीनां ददद्दानं, याप्ययानं समाश्रितः । सकलत्रोटितस्नेहः, सकलत्रः सुधीर्द्विधा ॥ ७ ॥**

**सोऽभ्येत्य प्रभुपादान्ते, दान्तेन मनसा भृशम् । मोक्षोपायमुपायंस्त, प्रशस्तः संयमश्रियम् ॥ ८ ॥**

**'दीनादीनां'** अनाथादीनाम् । अत्र सम्प्रदानाविवक्षायां शेषे षष्ठी । 'विवक्षातः कारकाणि' इति न्यायात् । **'दानं'**

वितरणम्। **'ददत्'** अर्पयन् । **'याप्ययानं'** सुखासनं शिबिकाम् । **'समाश्रितः'** अधिरूढः । **'सकलत्रोटितस्नेहः'** पत्नीपुत्रादिसकलवस्तुस्तोमात् त्रोटितः-नाशितः स्नेहः प्रेम येन सः द्विधा सकलत्रः कलत्रसहितः प्रियासहितः, सकलान् जीवान् त्रायते इति सकलत्रः इति द्विधा सकलत्रः ॥ ७ ॥ **'सुधीः'** सुमतिः । **'प्रशस्तः'** मङ्गलरूपः । **'सः'** धन्यः। **'प्रभुपादान्ते'** वीरविभुचरणान्तिके। **'अभ्येत्य'** समागत्य । **'भृशं'** अत्यर्थम् । **'दान्तेन'** वशीभूतेन । **'मनसा'** चेतसा । **'मोक्षोपायं'** मोक्षस्य उपायरूपां रत्नत्रयीमयीम्। **'संयमश्रियं'** चारित्रलक्ष्मीम् । **'उपायंस्त'** परिणीतवान् स्वीकृतवानित्यर्थः ॥ ८ ॥

**शालिभद्रस्य दीक्षा–**

**श्रीवीरागमनं धन्य-व्रतं मत्वाऽथ शालिना । जितंमन्येन साक्षेपं, जनन्यभिदधे तदा ॥ ९ ॥**

**अथ**। **'श्रीवीरागमनं'** श्रीवीरस्य प्रभोः आगमनम् **'धन्यव्रतं'** धन्यस्य व्रतं दीक्षाम्। **'मत्वा'** ज्ञात्वा। **'जितंमन्येन'** आत्मानं धन्येन जितं मन्यमानेन पराजितंमन्येन इत्यर्थः । **शालिना**। **'तदा'** तस्मिन्नवसरे । **'साक्षेपं'** आक्षेपपूर्वकम् । **'जननी'** भद्रा । **'अभिदधे'** उक्ता ॥ ९ ॥

**यस्या धन्यः स जामाता, या च माताऽम्ब ! मेऽभवः। सा त्वं किं प्राञ्जले मार्गे, बम्भ्रभिष्यतिपिञ्जला ॥ १० ॥**

**'अम्ब'** हे मातः ! । **'यस्याः'** तव । **'धन्यः'** धन्याभिधः । **स जामाता**-पुत्रीपतिः । **या च त्वं मे**-मम । **'माता'** जननी । **'अभवः'** जाताऽसि । **सा त्वम्**। **'प्राञ्जले'** सरले । **'मार्गे पथि किं'** **'अतिपिञ्जला'** भृशमाकुला । **'बम्भ्रभिषि'** भृशं भ्रमे पतिताऽसि ? ॥ १० ॥

**स्वसा स्वसुःपति र्यस्ये-यतुर्नासीरवीरताम् । सोऽहं पाश्चात्ययानाया, स्वच्छया किमु नोत्सहे ॥ ११ ॥**

‘**यस्य**’ मम । ‘**स्वसा**’ भगिनी सुभद्रा । ‘**स्वसुः पतिः**’ भगिनीपतिः धन्यः । ‘**नासीर-वीरतां**’ ‘नासीरे’ अग्रगमने ‘वीरतां’ चारित्रपराक्रमरूपाम् । ‘**इयतुः**’ गच्छतः स्म । **सः अहम्** । ‘**स्वेच्छया**’ निजाभिलाषेण । ‘**पाश्चात्ययानाय**’ पाश्चात्याय यानाय-गमनाय अनुगमनाय इत्यर्थः । **किमु न उत्सहे** कथं न सज्जीभवामि ? ॥ ११ ॥

**एकं यियासुरग्रे ( हि ) सार्थोऽप्यथ गृहोत्थितः । सूनुस्तेन कथं रोद्धुं शक्योऽयमिति निश्चिता ॥ १२ ॥**

**भद्रा संवर्म्य धैर्येण, वज्रेणेव निजं मनः । प्रवीणतानदीवेणिः, श्रीश्रेणिकमुपागमत् ॥ १३ ॥**

‘**एकं**’ प्रथमं तावत् । ‘**अग्रे**’ धन्यदीक्षापूर्वमेव । ‘**यियासुः**’ यातुमिच्छुः दीक्षेच्छुः अभूत् । अथ ‘**सार्थोऽपि**’ सार्थरूपः धन्यजामाताऽपि । ‘**गृहोत्थितः**’ गृहात् संसारात् उत्थितः निर्गतः । ‘**तेन**’ तत्कारणेन । **कथम् ? अयं सूनुः** पुत्रः । ‘**रोद्धुं शक्यः**’ गृहे स्थापयितुम् शक्यः । **इति निश्चिता** निश्चयं गता ॥ १२ ॥ **भद्रा** । ‘**वज्रेण इव धैर्येण**’ वज्रतुल्येन धैर्येण । ‘**निजं मनः**’ स्वीयं चेतः । ‘**संवर्म्य**’ वर्मणा सन्नह्य । ‘**प्रवीणतानदीवेणिः**’ दक्षतानदीप्रवाहः । ‘**श्रीश्रेणिकं**’ राजानम् । ‘**उपागमत्**’ समीपे गता ॥ १३ ॥

**व्यजिज्ञपच्च राजानं, दिव्यश्रीर्देव ! मेऽङ्गजः । वीराधिवीरः श्रीवीराद्, व्रतादानां समीहते ॥ १४ ॥**

**राजानं** श्रेणिकम् । ‘**व्यजिज्ञपत्**’ विज्ञपयामास । ‘**देव**’ हे राजन् ! ‘**मे**’ मम । ‘**दिव्यश्रीः**’ देवार्पितश्रीभोक्ता । ‘**वीराधिवीरः**’ वीरेषु अपि वीरः । ‘**अङ्गजः**’ पुत्रः शालिभद्रः । ‘**श्रीवीराद्**’ श्रीवर्धमानस्वामिनः । ‘**व्रतादानं**’ दीक्षाम् । ‘**समीहते**’ इच्छति ॥ १४ ॥

**राज्यश्रीमङ्गले हेम-कुटेन मुकुटेन तत् । पवित्रेणातपत्रेण, चामरै र्विस्मितामरैः ॥ १५ ॥**

**नरेन्द्रचिह्नैराह्नाय, सुप्रसादं प्रसीद मे । दीक्षामहोत्सवं सूनो-रन्यूनं येन कारये ॥ १६ ॥**

'**तत्**' तस्मात् । '**राज्यश्रीमङ्गले**' राज्यश्रीणां-राज्यलक्ष्मीणाम्, मङ्गले मङ्गलविषये । '**पवित्रेण**' प्रशस्तेन । '**आतपत्रेण**' छत्रेण । '**विस्मितामरैः**' विस्मिताः अमराः देवाः यैः तैः । '**चामरैः**' वालव्यजनैः ॥ १५ ॥ '**नरेन्द्राणां**' राज्ञाम् । '**चिह्नैः**' लाञ्छनैः । '**अह्नाय**' शीघ्रम् । '**सुप्रसादं**' सुकृपापूर्वकं समर्पितैः । '**मे**' ममोपरि । '**प्रसीद**' कृपां कुरु । '**येन**' यतः । **सूनोः** पुत्रस्य । '**अन्यूनं**' सम्पूर्णम् । '**दीक्षामहोत्सवं**' प्रव्रज्यामहम् । '**कारये**' विद्यापयामि ॥ १६ ॥

**वज्रातिवर्चसा तेन, वचसा भूभृदाहतः । आह तद्दुःखतो भद्रा-मार्तां भद्रां वशामिव ॥ १७ ॥**

'**वज्रातिवर्चसा**' वज्रादपि अतिवर्चसा अतिशायि वर्चः उग्रं तेजः यस्य तेन । '**तेन**' भद्रोक्तेन । '**वचसा**' वचनेन । '**आहतः**' प्रहतः । '**भूभृत्**' श्रेणिकनृपः पर्वतश्च । '**तद्दुःखतः**' शालिविरहदुःखतः । **आर्तां**' पीडिताम् । '**भद्रां**' भद्रजातीयाम् । '**वशामिव**' हस्तिनीमिव । '**भद्रां**' शालिमातरम् । '**आह**' कथयति ॥ १७ ॥

**सा भोगजलधेर्वेला-हेला सोमा लता क्व सा ? । शालेः क्व चारुचारित्र-भारोद्धरणधीरता ॥ १८ ॥**

**क्व सा**-तस्मिन् समये दृष्टा । '**भोगजलधेः**' विलाससमुद्रस्य शालेः । '**वेलाहेला**' वेला-जलवृद्धिरूपा तस्याः हेला लीला ? **क्व सा सोमा लता**-सोमाभिधवल्लिसमा शालेः काययष्टिः ? **क्व शालेः** चारुचारित्रभारस्य सुन्दरसंयमवीवधस्य । '**उद्धरणे**' उद्वहने । '**धीरता**' धैर्यम् ? ॥ १८ ॥

**भूधरोऽपि तृणं यत्र, भोगश्रीरस्य सा पृथुः । उन्मग्नवापगा युक्तं, सुतरा सुतरामभूत् ॥ १९ ॥**

**'अस्य'** शालिभद्रस्य । **'भोगश्रीः'** विलासलक्ष्मीः । **'सा'** तावती । **'पृथुः'** विशाला । स्वरादुतो गुणादखरोः ॥२।४।३५॥ इति स्त्रीलिङ्गेन पृथ्वीवत् पृथुरपि । **'यत्र'** भोगश्रियाम् । **'भूधरोऽपि'** राजा पर्वतश्च । **'तृणं'** तृणवत् न किञ्चित् । **'युक्तं'** सत्यम् । **'उन्मग्ना'** आपगा इव उन्मग्नाऽऽख्या नदी इव, यस्यां भूभृदपि तरति सा उन्मग्ना नदी । **'सुतरां'** नितान्तम् । **'सुतरा'** सुखेन तर्तुं शक्या दिव्यश्रीः । **'अभूत्'** जाता ॥ १९ ॥

**विभूतेस्त्यागभोगाभ्यां, धिग् दूनास्तद्धना वयम् । धन्यः श्रीशालिरेवायं, मोक्तुं भोक्तुं च यः क्षमः ॥ २० ॥**

**'वयं'** राजानः । **'तद्धनाः'** कृपणाः । 'कीनाशस्तद्धनः क्षुद्रकदर्यः' इति हैम्याम् । **'विभूतेः'** सम्पत्तेः । **'त्यागभोगाभ्यां'** दानोपभोगाभ्याम् । **'दूनाः'** हीनाः, पतितमुद्राग्रहणात् रत्नम्बलाऽग्रहणाच्च । **श्रीशालिः एव अयं धन्यः**-प्रशस्यः कृतार्थः । **यः मोक्तुं** त्यक्तुम् । **'भोक्तुं'** विलसितुम् । **'क्षमः'** समर्थः ॥ २० ॥

**तदहं स्वयमेवैत्य, शालेर्निष्क्रमणोत्सवम् । विधाय श्वासखेदस्य तस्य दास्यामि निष्क्रयम् ॥ २१ ॥**

**'तत्'** तस्मात् । **'अहं'** श्रेणिकः । **'स्वयमेव'** आत्मनैव । **'एत्य'** आगत्य । **शालेः** । **'निष्क्रमणोत्सवं'** दीक्षोत्सवम् । **'विधाय'** कृत्वा । **तस्य श्वासखेदस्य** श्वासात् जातस्य खेदस्य । **'निष्क्रयं'** मूल्यम् । **'दास्यामि'** अर्पयिष्यामि ॥ २१ ॥

**इत्यादिश्य समाश्वास्य, राजचिह्नप्रदानतः । व्यस्राक्षीत् प्रीतिफुल्लाक्षीं, भद्रां भद्रङ्करः प्रभुः ॥ २२ ॥**

**इति आदिश्य** कथयित्वा । **'राजचिह्नप्रदानतः'** राजचिह्नानां मुकुटादीनां प्रदानतः-अर्पणात् । **'समाश्वास्य'** आश्वासनं दत्वा । **'भद्रङ्करः'** भद्रं करोतीत्येवंशीलः । **'प्रभुः'** नृपः श्रेणिकः । **'प्रीतिफुल्लाक्षीं'** प्रीत्या प्रेम्णा फुल्लाक्षीं विकसितनयनाम् । **भद्राम्** । **व्यस्राक्षीत्** प्रेषयामास ॥ २२ ॥

**श्रीशालिरथ गोभद्रं, देवं प्रत्यक्षमुचिवान् । तात दिव्यमहाभोग-श्रिया विश्राणनान्मम ॥ २३ ॥**

**अनुरामं यथा पुत्रा, भ्रातरश्चानुलक्ष्मणम् । भृत्या अनुहनूमन्त-मनुत्वां पितरस्तथा ॥ २४ ॥**

**अथ श्रीशालिः** श्रीशालिभद्रः । '**गोभद्रं**' पितरम् । '**प्रत्यक्षं**' साक्षात् समागतम् । '**देवं**' अमरम् । '**उचिवान्**' कथयामास । '**तात**' हे पितः ! **मम दिव्यमहा भोगश्रिया:**-परमोत्कृष्टविलासलक्ष्म्याः । '**विश्राणनात्**' दानात् । ॥ २३ ॥ **यथा** । '**अनुरामं**' रामस्य पश्चात् । 'उत्कृष्टेऽनूपेन २।२।२९॥ इति द्वितीया । '**पुत्राः**' तनयाः । पुत्रेषु मुख्यः रामः इत्यर्थः। '**अनुहनूमन्तं च भृत्याः**' भृत्येषु मुख्यः हनूमान् इत्यर्थः तथा अनुत्वां पितरः पितृषु मुख्यः त्वं जातः इत्यर्थः ॥ २४ ॥

**पितरः सुतसात्कुर्युः विश्वेऽपि श्रियमैहिकीम् । यौष्माकीणा अहं प्राप, लक्ष्मीरामुष्मिकीरपि ॥ २५ ॥**

'**विश्वेऽपि**' लोकेऽपि । '**ऐहिकीं**' इहलोकसम्बधिनीम् । '**श्रियं**' लक्ष्मीम् । '**सुतसात्**' पुत्राधीनाम् । सुतेऽधीनामिति सुतसात् । 'तत्राऽधीने' इति स्सात् प्रत्ययः । '**कुर्युः**' विदध्युः । **अहम्** । '**यौष्माकीणाः**' युष्माकं इमाः । '**आमुष्मिकीः अपि**' परलोकसम्बन्धिनीः अपि । '**लक्ष्मीः**' श्रीः । '**प्राप**' प्राप्तवान् ॥ २५ ॥

**छायातरोः फलं पुष्पो-द्गतमश्नन्ति पक्षिणः । सुधियः पुण्यवन्तस्तु प्रभावभवमप्यदः ॥ २६ ॥**

'**छायातरोः**' छायाप्रधानवृक्षस्य । '**पुष्पोद्गतं फलं**' कुसुमजन्यं फलम् । '**पक्षिणः**' विहगाः । '**अश्नन्ति**' भक्षयन्ति '**तु**' किन्तु । '**सुधियः**' सुबुद्धयः । '**पुण्यवन्तः**' सुकृतशालिनः । '**प्रभावभवमपि**' धर्मप्रभावजन्यमपि । '**अदः**' प्रत्यक्षोपलक्ष्यं दिव्यश्रीभोगरूपं फलम् । '**अश्नन्ति**' भुञ्जते ॥ २६ ॥

**तव प्रसादाद् दिव्यश्री-रनुभूता मयाऽद्भुता । जीवन्मुक्तिरिवाध्यात्म-विदा योगस्य दुर्लभा ॥ २७ ॥**

'**तव**' पितुः । '**प्रसादात्**' कृपातः । '**अद्भुता**' आश्चर्यकारिणी । '**दिव्यश्रीः**' स्वर्गसम्बन्धिनी लक्ष्मीः । **मया** । '**अनुभूताः**' उपभुक्ताः । केन इव ? '**अध्यात्मविदा इव**' अध्यात्मतत्त्वविज्ञेन इव । '**योगस्य**' यमनियमाद्यष्टाङ्गरूपस्य योगस्य ।'**दुर्लभा**' सामान्यजनेन दुष्प्रापा । '**जीवन्मुक्तिः**' योगिनि जीवति सति मुक्तिः, सदेहमुक्तिः, मुक्तेरानन्दः इत्यर्थः । अनुभूयते ॥ २७ ॥

**स्वसूनोः साम्प्रतं तात ! वीरनाथात् प्रपूरय । प्रशमश्रीपरीरम्भ-संरम्भाऽऽरम्भकौतुकम् ॥ २८ ॥**

'**तात**' हे पितः । '**साम्प्रतं**' अधुना । '**स्वसूनोः**' निजपुत्रस्य मम । '**प्रशमश्रीपरीरम्भ संरम्भारम्भकौतुकम्**' प्रशमश्रियाः-प्रशान्तिलक्ष्म्याः परीरम्भः-आलिङ्गनं तस्य संरम्भः-आटोपः तस्य आरम्भः तस्य कौतुकं कुतुहलम् । '**वीरनाथात्**' महावीरप्रभोः। '**प्रपूरय**' पूर्णीकुरु ॥ २८ ॥

**सुरः प्राह सुजातोऽसि, धीर ! धन्योऽसि धिनीधे । वर्षीयान् यदहं चक्रे, व्रतं तद् यौवने त्वया ॥ २९ ॥**

'**सुरः**' गोभद्रदेवः '**प्राह**' कथयति '**धीर**' हे धैर्यवन् ! । '**सुजातः**' मत्तोऽपि अधिकगुणः अतिजातः पुत्रः । अतिजातः पुत्रः पितुरपि अतिरिच्यते। यदुक्तम्-''मातुतुल्यगुणो जातोऽ-नुजातश्च पितुः समः। अतिजातोऽधिकस्तस्मादपजातोऽधमाधमः॥'' '**असि**' वर्तसे। '**धीनिधे**' हे मतिनिधान !। '**धन्यः**' प्रशस्यः। **असि**। '**यत्**' व्रतम्। **अहम्**।'**वर्षीयान्**' वृद्धः। '**चक्रे**' स्वीकृतवान्। '**तत्**' व्रतम्। **त्वया**।'**यौवने**' भोगार्हकाले। '**चक्रे**' अङ्गीकृतम्। स्वीकर्तुमिच्छसि इत्यर्थः ॥ २९ ॥

**नरश्रियाऽपि बध्यन्ते, नरा रज्ज्वेव रङ्कवः । दिव्यश्रियाऽपि पुत्र ! त्वं, सिंहः शृङ्खलयेव न ॥ ३० ॥**

**'रज्ज्वा'** दवरिकया । **'रङ्कवः इव'** मृगविशेषाः इव । **'नराः'** सामान्यमनुष्याः । **'नरश्रियाऽपि'** मानवलक्ष्म्याऽपि। **'बध्यन्ते'** आसक्ताः भवन्ति । **'पुत्र'** हे वत्स ! **त्वम्**। **'श्रृङ्खलया इव'** लोहनिगडेन इव । **'दिव्यश्रियाऽपि'** देवलक्ष्म्याऽपि न बद्धः । **'सिंहः'** पञ्चाननः यथा श्रृङ्खलया न बध्यते ॥ ३० ॥

**किं ते भूयः प्रियं तात ! करोमि वद कोविद ! । भवनाटकनिर्वाहसन्धिसन्धाविधायिनः ॥ ३१ ॥**

**'तात'** हे वत्स ! । **'भूयः'** पुनः । **'ते'** तव । **किं प्रियं**-इष्टम् । **'करोमि'** विदधामि । **'कोविद'** हे कृतिन्। **'वद'** ब्रूहि । कथम्भूतस्य तव ? **'भव-नाटक-निर्वाह-सन्धि-सन्धा-विधायिनः'** भवनाटकस्य यः निर्वाहः तस्य सन्धिविषये या सन्धा-प्रतिज्ञा तां विदधाति-करोति इत्येवंशीलस्य तव ॥ ३१ ॥

**आलपत्प्राञ्जलिः शालिः, प्राप्तकालं विशालधीः । मम निष्क्रमणोत्साहै-र्दिव्यर्द्धिं सफलीकुरु ॥ ३२ ॥**

**'प्राञ्जलिः'** प्रकृष्टः अञ्जलिः बद्धः येन सः. योजितहस्तः इत्यर्थः । **'विशालधीः'** विपुलमतिः । **'शालिः'** शालिभद्रः। **'प्राप्तकालं'** उचितम् । **'आलपत्'** उवाच । **मम निष्क्रमणोत्साहैः**-दीक्षामहोत्सवैः । **'दिव्यर्द्धिं** दिव्यां समृद्धिम् । **'सफलीकुरु'** सफलां कुरु ॥ ३२ ॥

**एवं जनकमापृच्छ्य, स्वच्छः स्वच्छन्दशौर्यवान् । प्रेयसीः श्रेयसीभक्तीरापपृच्छे महेच्छधीः ॥ ३३ ॥**

**'एवं'** उपर्युक्तप्रकारेण । **'स्वच्छः'** पवित्रः । **'स्वच्छन्द-शौर्यवान्'** स्वस्य आत्मनः छन्दः-अभिप्रायः संयमाभिलाषरूपः तस्मिन् शौर्यवान् शालिभद्रः । **'जनकं'** गोभद्रदेवम् । **'आपृच्छय'** अनुज्ञाप्य । **'महेच्छधीः'** महेच्छावती

मोक्षाभिलाषवती धीः मतिः यस्य सः । '**श्रेयसीभक्तीः**' श्रेयसी-कल्याणमयी भक्तिः यासां ताः । '**प्रेयसीः**' प्रियतमाः । '**आपपृच्छे**' आपृच्छति स्म ॥ ३३ ॥

**यूयं मातृपदाम्भोज-सारसंवर्तिका इव । वर्तध्वं सततं प्रीत्या, परस्परसुसंहताः ॥ ३४ ॥**

**यूयम्** । '**मातृपदाम्भोजसारसंवर्तिका इव**' भद्रामातुः पदाम्भोजे चरणकमले साराः सारभूताः संवर्तिकाः कमलनवदलानि इव । 'संवर्तिका स्यात् नवं दलम्' इति हैम्याम् । '**परस्परसुसंहताः**' परस्परं-मिथः सुसंहताः सुमीलिताः । '**सततं**' सदैव । '**प्रीत्या**' प्रेम्णा । '**वर्तध्वं**' तिष्ठत ॥ ३४ ॥

**भवतीनां जिनाज्ञेवा-राध्यमाना ममाम्बिका । चिन्तासम्भारसंसार-निस्ताराय भविष्यति ॥ ३५ ॥**

'**भवतीनां**' युष्माकम् । '**जिनाज्ञा इव**' अर्हदाज्ञा इव । '**आराध्यमाना**' उपास्यमाना । **मम अम्बिका** माता भद्रा । '**चिन्तासम्भारसंसारनिस्ताराय**' चिन्तानां यः सम्भारः समूहः सः एव संसारः तस्य निस्ताराय-पारगमनाय । **भविष्यति** ॥ ३५ ॥

**ततो विजितमोहारि-वीर-वीरजयन्तिका । चैत्येषु धर्मपूर्वाह्ण-मह्नायाष्टाह्निकां व्यधात् ॥ ३६ ॥**

'**ततः**' तत्पश्चात् । जिनालयेषु । '**विजितमोहारि-वीरजयन्तिका**' विजितः यः मोहारिः-मोहशत्रुः सः एव वीरः तस्य जयात् वीरजयन्तिका-विजयपताका तत्तुल्याम् । '**धर्मपूर्वाह्णं**' धर्मस्य संयमधर्मस्य '**पूर्वाह्णं**' पूर्वदिनम् । '**अष्टाह्निकां**' अष्टदिनोत्सवम् । '**अह्नाय**' शीघ्रम् । '**व्यधात्**' अकरोत् ॥ ३६ ॥

**विवेकराज्ये सप्ताङ्गीं सप्तक्षेत्रीं घनैर्धनैः । प्लावयित्वाऽयमातेने, प्रशस्यश्रीनिबन्धनम् ॥ ३७ ॥**

'**विवेकराज्ये**' धर्मजाते विवेकसाम्राज्ये । '**सप्ताङ्गीं**' स्वाम्यादीनि सप्त राज्याङ्गानि तद्रूपाम् । 'स्वाम्यमात्यसुहृत्कोशो राष्ट्रदुर्गबलानि च' इति हैम्याम् । '**सप्तक्षेत्रीं**' चतुर्विधसङ्घजिनमन्दिर-मूर्ति-जिनागमलक्षणाम् । '**घनैः**' बहलैः । क्षेत्रपक्षे-मेघैः । '**धनैः**' द्रव्यैः । '**प्लावयित्वा**' आसिञ्च्य । '**अयं**' शालिभद्रः । '**प्रशस्यश्रीनिबन्धनं**' प्रशस्या या श्रीः शिवश्रीः तस्याः निबन्धनं-हेतुं पुण्यरूपम् । पक्षे प्रकृष्टा या शस्यश्रीः धान्यसम्पत्तिः तस्याः निबन्धनं-कारणम् । '**आतेने**' अकरोत् ॥ ३७ ॥

**अथ दीक्षाऽभिषेकाय, स्नानमण्डपमभ्यगात् । अदभ्रशरदभ्रौघ-मिव कन्यादिवाकरः ॥ ३८ ॥**

**अथ** । '**कन्यादिवाकरः**' कन्याभिधः यः षष्ठः राशिः तस्मिन् स्थितः दिवाकरः सूर्यः । '**अदभ्रशरदभ्रौघमिव**' अदभ्रः-प्रभूतः शरदभ्रौघः शारदजलदसमूहः तमिव । '**दीक्षाभिषेकाय**' दीक्षार्थं योऽभिषेकः स्नानं तदर्थम् । '**स्नानमण्डपं**' मज्जनस्थानम् । '**अभ्यगात्**' आगच्छति स्म । शरदृतावेव सूर्यः कन्याराशिमागच्छतीति प्रसिद्धमेव । शारदजलदा शुभ्रा भवन्ति, अत्रापि मण्डपः शुभ्रः तेनेयं कल्पना ॥ ३८ ॥

**अथ चन्द्राधिकैर्द्वेधा, चर्चितो हरिचन्दनैः । धर्मध्यानैरिवाश्लिष्टः, परितः स्फुरितप्रभैः ॥ ४० ॥**

**तेजःसारैरलङ्कारै-र्भौमदिव्यैर्मणीमयैः । अतिप्रमाणैः कल्याणै-रैहिकामुष्मिकैरिव ॥ ४१ ॥**

**पारिजातकसन्तान-मन्दारोदारदामभिः । सौरभ्यवासिताशाभिः, मूर्ताभिरिव कीर्तिभिः ॥ ४२ ॥**

**शमवारिधिडिण्डीर-पिण्डैरिव समुज्ज्वलैः । दुकूलैः सुखमामूलैः, कृतकौतुकमङ्गलः ॥ ४३ ॥**

**विधायार्चां जिनार्चायाः, कृतकौतुकमङ्गलः । सम्भाव्य दानसंमानैः, वदान्यः सर्वथाऽर्थिनः ॥ ४४ ॥**

**नराष्टाग्रसहस्त्रोह्य-विमानोत्सङ्गसङ्गतः । सितच्छत्रेण सच्छायः, श्रीकरीशतशालिना ॥ ४५ ॥**

**चामरैश्चामरै र्वीज्य-मानो मानोन्नतै र्नतैः । वर्यतूर्यशताराव-स्फूर्जज्जयजयध्वनिः ॥ ४६ ॥**

**रम्भासङ्गीतसङ्गीत-स्फुरद्धवलमङ्गलः । लसल्लाजाञ्जलिक्षेप-दक्षवृद्धाभिनन्दितः ॥ ४७ ॥**

**'भूपाल' दति बालाभिः, मुग्धाभिश्च महेन्द्रवत् । प्रौढाभिः गाढमूढाभिः, 'कन्दर्प' इति कल्पितः ॥ ४८ ॥**

**श्रीश्रेणिक नरेन्द्रेण, गोभद्रेण सुपर्वणा । परीतो भद्रया साश्रुचक्षुषा च स्नुषाजुषा ॥ ४९ ॥**

**दीनानाथदरिद्रांश्च, लङ्खमङ्खविदूषकान् । प्रीणयन्नप्रमाणाभिः, कल्याणमणिवृष्टिभिः ॥ ५० ॥**

**वैराग्यसङ्गतोऽनङ्गः, श्रृङ्गारो वाऽथ जङ्गमः । भवभीतः स समवसरणं शरणं ययौ ॥ ५१ ॥ ( द्वादशभिः कुलकम् )**

**अथ** शालिभद्रः **समवसरणं**-देशनास्थानम् । **'शरणं'** सदनम् । **'ययौ'** गतः । कथम्भूतः सः ? **'परितः'** अभितः । **'स्फुरितप्रभैः'** उल्लसितकान्तिभिः । **'धर्मध्यानैः'** धर्मचिन्तनैः । **'आश्लिष्टः इव'** आलिङ्गितः इव । **'द्विधा चन्द्राधिकैः'** चन्द्रादपि द्विधा-द्विप्रकारेण शीतलताप्रकाशाभ्यां अधिकैः उत्कृष्टैः । **'हरिचन्दनैः'** गोशीर्षचन्दनैः । **'चर्चितः'** विलिप्तः ॥ ४० ॥ **'ऐहिकामुष्मिकैः'** इहपरलोकसम्बन्धिभिः । **'अतिप्रमाणैः'** अपरिमितैः । **'कल्याणैरिव'** मङ्गलैः कनकैश्च इव । **'तेजःसारैः'** दीप्तिसारैः **'भौमदिव्यैः'** भौमैः-भूमिजातैः, **दिव्यैः**-दिवि स्वर्गे जातैः । **'मणीमयैः'** रत्ननिर्मितैः, मणिशब्द ईकारान्तोऽपि वर्तते । **'अलङ्कारैः'** भूषणैः । अलङ्कृत इति अग्रे वक्ष्यति ॥ ४१ ॥ **'पारिजातक-सन्तान-मन्दारोदारदामभिः'** पारिजातक-सन्तानमन्दाराख्यकल्पवृक्षविशेषाणां उदारदामभिः बृहन्मालाभिः । कथम्भूताभिः ?

**'सौरभ्यवासिताऽऽशाभिः'** सौरभ्येण-सुगन्धेन वासिताः आशाः-दिशः याभिः । **'मूर्ताभिः'**-शरीरधारिणीभिः **'कीर्तिभिरिव'** यशोभिः इव ॥ ४२ ॥ **'शमवारिधिडिण्डीरपिण्डैरिव'** शमवारिधेः प्रशमाब्धेः ये डिण्डीराः-फेनपुञ्जाः तेषां पिण्डैरिव औघेरिव समुज्ज्वलैः अतिशुभ्रैः । **'सुखमामूलैः'** सुखरूपा या मा लक्ष्मीः तस्याः मूलैः । 'लक्ष्मीः पद्मा रमा या मा' इति हैम्याम् । **'सुसोमालैः'** सुकुमालैः । **'दुकूलैः'** क्षौमैः वस्त्रविशेषैः । **'अलङ्कृतः'** भूषितः ॥ ४३ ॥ **'जिनार्चायाः'** जिनप्रतिमायाः । अर्चाशब्दः प्रतिमार्थोऽपि । यदुक्तं हीरसौभाग्यटीकायाम् - 'जिनवरभवनानां भावतोऽर्चा नमामि' । **'अर्चां'** पूजाम् । **'विधाय'** कृत्वा । **'कृतकौतुकमङ्गलः'** कृतं कौतुकरूपं परम्पराऽऽगतं मङ्गलं येन सः । **'दानसंमानैः'** दानैः धनदानैः संमानैः सत्कारैश्च । **'अर्थिनः'** याचकान् । **'सर्वथा'** सर्वप्रकारेण । **'सम्भाव्य'** संमान्य। **'वदान्यः'** प्रियवचनः प्रदानशीलश्च सः ॥ ४४ ॥ **'नराष्टाग्रसहस्रोह्यविमानोत्सङ्गसङ्गतः'** नराष्टाग्रसहस्रैः अष्टाधिकसहस्रनरैः उह्यः-वाह्यः विमानः याप्ययानं तस्य उत्सङ्गे मध्यभागे सङ्गतः-उपविष्टः । **'श्रीकरीशतशालिना'** श्रीकरीणां शतैः शालते शोभते इत्येवंशीलः तेन । (श्रीकरी-'छडीदार' इति भाषायाम्) **'सितच्छत्रेण'** श्वेतातपत्रेण सच्छायः युक्तः ॥ ४५ ॥ **'मानोन्नतैः'** मानेन गौरवेण उन्नतैः उच्चैः । **'नतैः'** नम्रैः । **'अमरैः'** देवैः । **च**कारः पादपूर्तौ । **'चामरैः'** वालव्यजनैः । **वीज्यमानः**। **'वर्यतूर्यशतारावस्फुर्जज्जयजय-ध्वनिः'** वर्यतूर्यशतानां सुन्दरशतवादित्राणां ये आरावा शब्दाः तैः स्फूर्जन् गर्जन् 'जयजयध्वनिः' जय जय इति शब्दध्वनिः नादः यस्य सः ॥ ४६ ॥ **'रम्भासङ्गीतसङ्गीत-स्फुरद्धवलमङ्गलैः'** रम्भा देवाङ्गना ताभिः सङ्गीतैः प्रारब्धैः सङ्गीतैः गीतैः स्फुरन्ति धवलमङ्गलानि यस्य सः । 'लसल्लाजाञ्जलिक्षेप-दक्षवृद्धाभिनन्दितः' लसन्तो ये लाजाः अक्षताः तेषां अञ्जलिः तस्य क्षेपे प्रक्षेपे दक्षाः प्रवीणाः याः वृद्धाः वृद्धस्त्रियः ताभिः अभिनन्दितः सन्मानितः ॥ ४७ ॥ **'बालाभिः'** कन्याभिः । **'भूपालः'** राजा इति । **'मुग्धाभिः'**

किशोरीभिः । ‘**महेन्द्रवत्**’ देवेन्द्रवत् कल्पितः । ‘**गाढमूढाभिः**’ अत्यर्थं मूढाभिः मोहवशाभिः । ‘**प्रौढाभिः**’ प्रौढस्त्रीभिश्च । ‘**कन्दर्पः**’ कामः इति कल्पितः चिन्तितः ॥ ४८ ॥ **श्रीश्रेणिकनरेन्द्रेण** । ‘**सुपर्वणा**’ देवेन । **गोभद्रेण** । ‘**स्नुषाजुषा**’ पुत्रवधूहितया । ‘**साश्रुचक्षुषा**’ बाष्पपूर्णनयनया। ‘**भद्रया**’ भद्रामात्रा । **चः** समुच्चये । ‘**परीत-**’ परिगतः ॥ ४९ ॥ ‘**दीनानाथदरिद्रान्**’ दीनान्-निराशान् अनाथान्-मात्रादिरहितान् दरिद्रान् निःस्वान् । ‘**लङ्खमङ्कविदूषकान्**’ लङ्खाः वंशाग्रादौ नृत्यादिकारिणः, मङ्खाः चित्रफलक-हस्ताः, विदूषकाः-हास्यनर्मादिकारिणः तान् । ‘**अप्रमाणाभिः**’ अपरिमिताभिः । ‘**कल्याणमणिवृष्टिभिः**’ सुवर्णरत्नदानैः । ‘**प्रीणयन्**’ रञ्जयन् ॥ ५० ॥ ‘**वैराग्यसङ्गतः**’ विरक्तियुक्तः । ‘**अनङ्गः**’ कामः ? । ‘**जङ्गमो वा**’ चलन् वा । ‘**श्रृङ्गारः**’ श्रृङ्गाररसः । ‘**भवभीतः**’ भवात् संसारात् भीतः । **सः** शालिभद्रः **समवसरणं शरणं ययौ** ॥ ५१ ॥

**याप्ययानान्महामाना-दिवोत्तीर्य जगद्गुरुम् । स त्रिः प्रदक्षिणीकृत्य, प्रणम्येति व्यजिज्ञपत् । ॥ ५२ ॥**

‘**महामानादिव**’ महागौरवादिव । ‘**याप्यायानात्**’ शिबिकातः । ‘**उत्तीर्य**’ अवरुह्य । ‘**जगद्गुरुं**’ विश्वेश्वरं वीरम् । ‘**त्रिः**’ त्रिवारान् । ‘**प्रदक्षिणीकृत्य**’ प्रदक्षिणाः दत्वा । ‘**प्रणम्य**’ नमस्कृत्य । ‘**सः**’ शालिभद्रः । ‘**इति**’ अग्रे वक्ष्यमाणम्। ‘**व्यजिज्ञपत्**’ विज्ञप्तिं चकार ॥ ५२ ॥

**निर्वाणश्रीपथे नाथ ! चारित्रेण मनोरथः । प्रमाणभूमिमभ्येतु, धर्मसारथिना त्वया ॥ ५३ ॥**

‘**नाथ**’ हे स्वामिन् ! । ‘**निर्वाणश्रीपथे**’ निर्वाणस्य मोक्षस्य श्रीपथे राजमार्गे । ‘श्रीपथो राजवर्त्म च’ इति हैम्याम्। ‘**चारित्रेण**’ संयमेन अथवा च + अरित्रेण, अरिभ्यः भावशत्रुभ्यः त्रायते अरित्रः तेन त्वया । ‘**धर्मसारथिना**’ मम धर्मरथे

सारथितुल्येन । '**मनोरथः**' मम मनः एव रथः मुक्तिमनोरथो वा । '**प्रमाणभूमिं**' प्रकृष्टः मानः गौरवं यत्र तथाविधां प्रमाणभूमिं–मुक्तिस्थानमित्यर्थः । '**अभ्येतु**' गच्छतु ॥ ५३ ॥

**इत्युदीर्य लसद्धैर्याद्, भूषणान्यस्तदूषणः । तनोस्तत्याज निर्व्याजं, प्रतिबन्धं स चेतसः ॥ ५४ ॥**

**इति उदीर्य** कथयित्वा । '**लसद्धैर्यात्**' लसत् स्फुरत् धैर्यं यस्मिन् तस्मात् । '**तनोः**' देहात् । '**अस्तदूषणः**' अस्तानि नष्टानि दूषणानि यस्मात् सः शालिभद्रः । '**भूषणानि**' अलङ्कारान् । '**निर्व्याजं**' निष्कपटम् । '**तत्याज**' त्यजति स्म । '**चेतसः**' मनसः । '**प्रतिबन्धं**' आसक्तिम् । **चः** समुच्चये । **तत्याज** ॥ ५४ ॥

**ततश्च देवदूष्येण परिचीवरितः परम् । उद्दध्रे कुन्तलान्मोह-प्ररोहानिव मुष्टिभिः ॥ ५५ ॥**

'**ततश्च परं**' तत्पश्चात् । '**देवदूष्येण**' दिव्यवस्त्रेण । '**परिचीवरितः**' चीवराणि परिहितानि येन सः । चीवरात् परिधानेऽर्जने ।३।४।४१ ॥ इति परिधानार्थे णिङ् । '**मुष्टिभिः**' मुचुटिभिः । '**मोहप्ररोहानिव**' मोहवृक्षस्य प्ररोहान्–अङ्कुरानिव । '**कुन्तलान्**' केशान् । '**उद्दध्रे**' आकृष्टवान् । केशलुञ्चनं कृतमित्यर्थः ॥ ५५ ॥

**भद्रा नदीवाश्रुपूरै-र्हंसलक्षणशाटिका । सकेशान् भूषणान् दध्रे, सभृङ्गस्वर्णपद्मवत् ॥ ५६ ॥**

'**हंसलक्षणशाटिका**' हंसलक्षणा हंसवर्णा श्वेता शाटिका यस्याः सा । '**अश्रुपूरैः**' बाष्पपूवैः । '**नदीव**' सरिद् इव । '**सभृङ्गस्वर्णपद्मवत्**' भ्रमरयुक्तकनककमलवत् । '**सकेशान्**' बालयुक्तान् । '**भूषणान्**' अलङ्कारान् । भूषणशब्दः पुंलिङ्गोऽपि । '**दध्रे**' धारयामास जग्राह इत्यर्थः ॥ ५६ ॥

**श्रीवीरः श्रीनिवासेन, पद्महस्तेन चारुणा । निवारितभवव्रज्यां, परिव्रज्यां स्वयं ददौ ॥ ५७ ॥**

**'श्रीवीरः'** श्रीवर्धमानस्वामी । **'स्वयं'** आत्मना । **'श्रीनिवासेन'** श्रीः लक्ष्मीः आन्तरलक्ष्मीः तस्याः निवासः यत्र तेन । **'चारुणा'** मनोहरेण । **'पद्महस्तेन'** पद्मतुल्येन हस्तेन । **'निवारितभवव्रज्यां'** निवारिता भवस्य संसारस्य व्रज्या भ्रमणा यत्र ताम् । **'परिव्रज्यां'** दीक्षाम् । **'ददौ'** दत्तवान् ॥ ५७ ॥

**संयमश्रीविवाहेऽस्य, धन्यो धन्यमुनिस्तदा । युक्तं स्वसृपतिः प्रापदानुचर्येण वर्यताम् ॥ ५८ ॥**

**'अस्य'** शालिभद्रस्य । **'संयमश्रीविवाहे'** चारित्रलक्ष्मीपाणिग्रहणे । **'तदा'** तस्मिन् काले । **'धन्यः'** सुकृती । **'स्वसृपतिः'** भगिनीपतिः धन्यमुनिः । **'आनुचर्येण'** अनुचरत्वेन । **'वर्यतां'** श्रेष्ठताम् । **'प्रापत्'** प्राप्तवान् । **'युक्तं'** तत् उचितम् ॥ ५८ ॥

**सङ्गतिः सङ्गता शालेः, सर्वशस्यशिरोमणेः । मात्राऽधिकेन धन्येन, जगज्जीवातुनाऽमुना ॥ ५९ ॥**

**'सर्वशस्यशिरोमणेः'** सकलप्रशस्यपुरुषमुख्यस्य । धान्यपक्षे-सकल-धान्यमुख्यस्य । **'शालेः'** शालिभद्रस्य । पक्षे-शालिधान्यस्य । **'जगज्जीवातुना'** जगज्जीवरक्षकेण । पक्षे जगज्जीवनदायिना । **'मात्राऽधिकेन'** एकदिवसपर्यायाधिकेन। धन्येन मुनिना किल शालिभद्रात् पूर्वं दीक्षा गृहीता । पक्षे-धकारे एकया मात्रया अधिकेन, अर्थात् धान्येन । **'अमुना धन्येन'** धन्यमुनिना सह । **'सङ्गतिः'** मित्रता । **'सङ्गता'** उचिता । यथा धान्यशिरोमणिशालेः अन्योत्तमधान्येन सह मैत्री उचिता तथा शालिभद्रस्य पर्यायाधिकेन धन्यमुनिना सह मैत्री उचिता इति भावः ॥ ५९ ॥

**धार्मिकास्तीर्थयात्रायामर्थयासु सोद्यमः । युवा विवाहे शूरश्च, युधि पश्चात् स्थितो यथा ॥ ६० ॥**

**जामातरं सुतां पुत्रं, तपसे प्रस्थितं गृहात् । भद्राऽऽलोक्य तदा मेने, तथा स्वमपि वञ्चितम् ॥ ६१ ॥**

**यथा** । **'तीर्थयात्रायां'** शत्रुञ्जयादितीर्थयात्रायाम् । **'धार्मिकाः'** पश्चात् स्थिताः धार्मिकजनाः । **'अर्थयात्रासु'**

धनार्जनप्रवासेषु । **'सोद्यमः'** पश्चात् स्थितः उद्यमी पुरुषः । **'विवाहे'** पाणिग्रहणे । **'युवा'** पश्चात् स्थितः अविवाहितः तरुणः । **'युधि'** सङ्ग्रामे । **'शूरः'** पश्चात् स्थितः वीरनरः । **चः** समुच्चये । **यथा स्वं वञ्चितं** मन्यते ॥ ६० ॥ **तथा भद्रा** । **'जामातरं'** धन्यं मुनिम् । **'सुतां'** सुभद्रां साध्वीम् । **'पुत्रं'** शालिभद्रं मुनिम् । **'तपसे'** संयमाय । **'गृहात्'** गेहात्–संसारात् । **'प्रस्थितं'** निर्गतम् । **'आलोक्य'** दृष्ट्वा । **'तदा'** तत्क्षणे । **'स्वमपि'** आत्मानमपि । **'वञ्चितं'** अकृतार्थम् । **'मेने'** मतवती ॥ ६१ ॥

**श्रेणिकः श्रीमहावीरं धन्यशालिमुनी अपि । नत्वा राजगृहं प्राप, विस्मयं च महामनाः ॥ ६२ ॥**

**'महामनाः'** महाशयः । **'श्रेणिकः'** राजगृहेश्वरः । **श्रीमहावीरं धन्यशालिमुनी अपि** । **'नत्वा'** प्रणम्य । **राजगृहं विस्मयं च** । **'प्राप'** प्राप्तः ॥ ६२ ॥

**पुत्रं पोतमिवारोप्य, हित्वा चरणसागरे । भद्रा जगाम विद्राणा, सस्नुषा विमुखायिता ॥ ६३ ॥**

**'चरणसागरे'** संयमसमुद्रे । **'पोतमिव'** प्रवहणमिव । **'पुत्रं'** सुतम् । **'आरोप्य'** संस्थाप्य । **'हित्वा'** विहाय । **'विद्राणा'** विच्छाया । **'सस्नुषा'** पुत्रवधूसहिता । **'विमुखायिता'** विमुखाचरिता विमुखीभूता । **भद्रा** । **'जगाम'** गच्छति स्म ॥ ६३ ॥

**देवाराममदेवद्रुं, मेने निर्वासवं दिवम् । निःसोमं व्योम विनृपं, देशं सा वेश्म तन्निजम् ॥ ६४ ॥**

**'सा'** भद्रा । **'देवारामं'** नन्दनवनम् । **'अदेवद्रुं'** कल्पवृक्षरहितम् । **'दिवं'** स्वर्गम् । **'निर्वासवं'** इन्द्ररहितम् । **'व्योम'** आकाशम् । **'निःसोमं'** चन्द्ररहितम् । **'देशं'** राष्ट्रम् । **'विनृपं'** भूपतिरहितम् । तद्वत् । **तत् निजं**–स्वम् । **'वेश्म'** गृहम् । **'मेने'** मतवती ॥ ६४ ॥

**भृशं रक्षाकृते चिन्ता-हेतुः सूनोर्जनीजनः । तस्या जज्ञे यथा कायः, परकायप्रवेशिनः ॥ ६५ ॥**

'**रक्षाकृते**' रक्षणार्थम् । '**सूनोः**' शालिभद्रस्य । '**जनीजनः**' वधूजनः । '**तस्याः**' भद्रायाः । '**भृशं**' अत्यन्तम् । '**चिन्ताहेतुः**' सन्तापकारणम् । '**जज्ञे**' जातः । **यथा परकायप्रवेशिनः**-अन्यशरीरावगाहिनः योगिनः । '**कायः**' प्राणहीनं शरीरं रक्षणार्थं चिन्ताकारणं भवति तथा । यदि योगिनः प्राणहीनं शरीरं नष्टं स्यात् तर्हि योगी अन्यस्मिन्नेव शरीरे स्थितः आपत्तिं गच्छेत् ॥ ६५ ॥

**सेनाः स्वामिपरित्यक्ताः, ज्ञानशून्याः क्रिया इव । विद्या अमूलमन्त्राश्च, भाग्यहीना गुणालयः ॥ ६६ ॥**

**करेणवो तथा यूथनाथेन च विवर्जिताः । शालित्यक्ताः शालिकान्ताः, श्रान्तास्तद्वद् व्यचिन्तयन् ॥ ६७ ॥ ( युग्मम् )**

**यथा** । '**स्वामिना**' सेनापतिना । '**परित्यक्ताः**' विहीनाः । '**सेनाः**' सैन्यम् । '**ज्ञानशून्याः**' ज्ञानरहिताः । '**क्रियाः**' अनुष्ठानानि । '**अमूलमन्त्राः**' मूलानि वनस्पतिमूलानि मन्त्राश्च तैः रहिताः । '**विद्याः**' वशीकरणादिविद्याः । '**भाग्यहीनाः**' भाग्यरहिताः । '**गुणालयः**' गुणश्रेणयः ॥ ६६ ॥ '**यूथनाथेन**' यूथस्वामिना । '**विवर्जिताः**' रहिताः । '**करेणवः**' हस्तिन्यः । **तद्वत्** । '**श्रान्ताः**' क्लान्ताः । '**भ्रान्ताः**' अपि पाठान्तरे । '**शालिकान्ताः**' शालिभद्रस्य द्वात्रिंशत् प्रेयस्यः । '**व्यचिन्तयन्**' अग्रे वक्ष्यमाणं चिन्तितवत्यः ॥ ६७ ॥

**अलं परिमलं शालेः, कलयन्त्योऽपि निष्कलाः । शस्येन रहितास्तेन, ध्रुवं खलरसा वयम् ॥ ६८ ॥**

'**शालेः**' शालिभद्रस्य । खलभूमिपक्षे-शालिधान्यस्य । '**अलं**' अत्यर्थम् । '**परिमलं**' सुगन्धम् । '**कलयन्त्योऽपि**' धारयन्त्योऽपि । '**निष्कलाः**' धर्मादिकलारहिताः । पक्षे पुष्परहिताः । '**शस्येन**' मङ्गलेन । पक्षे-धान्येन । '**रहिताः**'

वर्जिताः स्मः । '**तेन**' तस्मात् । '**ध्रुवं**' निश्चितम् । **वयं खलरसाः**-खलानां रसा भूमिः तत्तुल्याः । 'जगती मेदिनी रसा' इति हैम्याम् । खलभूमौ धान्यानि शोध्यन्ते ततस्तत्र धान्यपरिमलो भवति न तु तत्प्ररोहः । एवमेव वयमपि खलभूमिसमाः एव मङ्गलरहिताः इति शालिप्रियाचिन्तनम् ॥ ६८ ॥

**सकर्णांस्तूर्णयेत् स्वर्ग-वर्णिका वर्णिताऽप्यहो । निर्वर्णिताऽप्यकर्णाभिरस्माभिरपकर्णिता ॥ ६९ ॥**

**अहो** आश्चर्ये । '**वर्णिता अपि**' कथिता अपि । '**स्वर्गवर्णिका**' स्वर्गसम्पत्तिः । '**सकर्णान्**' विदुषः । '**तूर्णयेत्**' तत्प्राप्तये तूर्णं कारयेत् । **अस्माभिः अकर्णाभिः**-मुर्खतुल्याभिः । '**निर्वर्णिताऽपि**' दृष्टाऽपि स्वर्गसम्पत्तिः । '**अपकर्णिता**' अवगणिता ॥ ६९ ॥

**यदयं दिव्यभोगाङ्गसुभगः प्राणवल्लभः । नान्वयायि शशीवात्र, ताराभिर्ग्रहणक्षणे ॥ ७० ॥**

'**यत्**' यस्मात् । '**ग्रहणक्षणे**' ग्रहणस्य समये । '**ताराभिः**' तारिकाभिः । '**शशी इव**' चन्द्रः इव । '**दिव्यभोगाङ्गसुभगः**' दिव्यभोगाङ्गैः सुभगः सौभाग्यवान् । '**प्राणवल्लभः**' प्राणप्रियः पतिः । '**अयं**' शालिभद्रः । '**अस्माभिः**' तत्प्रियाभिः । '**नान्वयायि**' न अनुसृतः ॥ ७० ॥

**भूगतैरावताद् भृङ्ग्यो, मन्दाराणि धयन्त्यहो । समं तेन तु नो यान्ति, स्वर्गमार्गं तथा वयम् ॥ ७१ ॥**

'**भृङ्ग्यः**' भ्रमर्यः । '**भूगतैरावतात्**' भूगतात्-पृथ्वीप्राप्तात् ऐरावतात्-इन्द्रहस्तिनः । '**मन्दाराणि**' कल्पवृक्षपुष्पाणि । '**अहो**' आश्चर्ये । '**धयन्ति**' लिहन्ति । '**तु**' किन्तु । '**तेन**' ऐरावतेन । '**समं**' सह । '**स्वर्गमार्गं**' देवलोकमार्गम् । '**नो यान्ति**' न गच्छन्ति । **तथा वयमपि** तस्य दिव्यसमृद्धिभोगे सहभागिन्यः अभवामः, किन्तु चरित्र मार्गे न ॥ ७१ ॥

**साङ्क्रामिकं हि भाग्यस्य, फलं सत्त्वस्य नो पुनः । शालिपुण्यैः सुखं प्राप्ताः, तत्सत्त्वैर्न वयं व्रतम् ॥ ७२ ॥**

'**भाग्यस्य**' शालिपुण्यस्य । '**साङ्क्रामिकं**' सङ्क्रमणशीलम् । '**फलं**' अस्माकं प्राप्तम् । **नो पुनः** सत्त्वस्य-आत्मबलस्य फलं प्राप्तम् । **शालिपुण्यैः**' पतिभाग्यैः । **वयं सुखं**-दिव्यर्द्धिरूपम् । '**प्राप्ताः**' लब्धवत्यः । किन्तु । '**तत्सत्त्वैः**' शालिभद्रसत्त्वैः । '**व्रतं**' दीक्षाम् । **न प्राप्ताः** ॥ ७२ ॥

**एवं वियोगविवशा, दिवसानत्यवाहयत् । समान् समासहस्रस्य, तस्याः नश्यत्सुखाः स्नुषाः ॥ ७३ ॥**

'**एवं**' उपर्युक्तप्रलापेन । '**वियोगविवशाः**' विरहव्याकुलाः । '**तस्याः**' भद्रायाः । '**नश्यत्सुखाः**' नश्यन्ति सुखानि यासां ताः । '**स्नुषाः**' पुत्रवध्वः । '**समासहस्रस्य**' वर्षसहस्रस्य । 'हायनोऽब्दं' समाः शरत्' इति हैम्याम् । '**समान्**' तुल्यान् । '**दिवसान्**' दिनानि । '**अत्यवाहयत्**' अतिवाहितवत्यः ॥ ७३ ॥

**धन्य-शालिभद्रयोः संयम-साधना—**

**प्राप्याऽथ जिनराजाज्ञां, विश्वकर्मापराजितौ । द्रव्यादीनां विचारज्ञौ, सूत्रधारौ महामुनी ॥ ७४ ॥**

**विहारेण विहारेण, प्रतिमाशतशालिना । तावलञ्चक्रतुः क्षोणीं, श्रीमहोदयहेतुना ॥ ७५ ॥**

**अथ** । '**जिनराजाज्ञां**' अर्हतो महावीरस्य । '**आज्ञां**' आदेशम् । '**प्राप्य**' लब्ध्वा । '**विश्वकर्मापराजितौ**' विश्वकर्मभ्यः सकलकर्मभ्यः अपराजितौ । सूत्रधारपक्षे-विश्वकर्मणा देववर्धकिना अपि अपराजितौ । '**द्रव्यादीनां**' द्रव्यक्षेत्रकालभावानाम् । '**विचारज्ञौ**' आलोचकौ । पक्षे-काष्ठादिद्रव्याणां विचारज्ञौ । '**सूत्रधारौ**' सूत्रं आचाराङ्गादि तद्धारकौ । पक्षे-वर्धकी,

देवशिल्पिनौ। **'महामुनी'** शालिधन्यौ ॥ ७४ ॥ **'प्रतिमाशतशालिना'** प्रतिमानां साधुप्रतिमानां शतेन शालते–शोभते इत्येवंशीलेन । मन्दिरपक्षे–प्रतिमानां जिनमूर्तीनां शतैः शालिना । **'श्रीमहोदयहेतुना'** श्रीमोक्षकारणेन । पक्षे लक्ष्मी–मुक्तिकारणेन। **'विहारेण'** नवकल्पादिरूपविचरणेन । **'विहारेण'** प्रासादेन । **'तौ'** शालिधन्यौ । **'क्षोणीं'** पृथ्वीम् । **'अलञ्चक्रतुः'** अलङ्कुरुतः स्म ॥ ७५ ॥

**अध्यजीगपदेकाद-शाङ्गीं श्रीगौतमस्त्वमू । पात्रे निवेशिता विद्या, कल्याणाय द्वयोरपि ॥ ७६ ॥**

**'श्रीगौतमः'** प्रथमः गणधरः । **'अमू'** शालिधन्यौ । **'एकादशाङ्गीं'** आचाराङ्गादि विपाकसूत्रान्ताम् । **'अध्यजीगपत्'** अध्यापितवान् । **'पात्रे'** सुपात्रे । **'निवेशिता'** प्रदत्ता । **'विद्या'** ज्ञानम् । **'द्वयोः'** गुरुशिष्ययोः । **'कल्याणाय'** मङ्गलाय भवति ॥ ७६ ॥

**गुरुणा गौतमेनेह, गोतमेनेव सङ्गतौ । अभूतां कल्यानड्वाहा-विव तौ साधुशिक्षितौ ॥ ७७ ॥**

**'गोतमेन इव'** उत्तमगवा इव । **'गौतमेन गुरुणा'** गौतस्वामिना गुरुणा सह । **'सङ्गतौ'** युक्तौ । **'इह'** भुवि । **'तौ'** शालिधन्यौ मुनी । **'कल्यानड्वाहौ इव'** प्रधानवृषभौ इव । **'साधुशिक्षितौ'** साधु–सम्यक् साधुभिर्वा शिक्षितौ–अध्यापितौ । **'अभूतां'** बभूवतुः ॥ ७७ ॥

**गीतार्थौ निर्विगीतार्थौ, सुश्रुतावपि विश्रुतौ । धन्यशालिमुनी धन्यौ, तेपाते दुस्तपं तपः ॥ ७८ ॥**

**'गीतार्थौ'** गीतः ज्ञातः अर्थः शास्त्रार्थः उत्सर्गापवादाभ्यां याभ्यां तौ । **निर्विगीतार्थौ**, तत्कथम् ? विरोधपरिहारे आह–विगीतं विगानं निन्दितं तस्य अर्थः–कार्यं, निर्गतः विगीतार्थः याभ्यां तौ । **सुश्रुतौ–बहुश्रुतौ** अपि विश्रुतौ विगतं

विनष्टं श्रुतं शास्त्रं याभ्यां तौ, विरोधपरिहारे आह विख्यातौ । **'धन्यौ'** सुकृतिनौ । **धन्यशालिमुनी । 'दुस्तपं'** दुष्करम् । **'तपः'** तपश्चर्याम् । **'तेपाते'** तप्तवन्तौ ॥ ७८ ॥

**यत्र देहे नृपश्वासैः, सूचीसूचा प्रपञ्चिता । लूका झलझला तत्र, मलयानिलतां गता ॥ ७९ ॥**

**'यत्र देहे'** यस्मिन् शरीरे । **'नृपश्वासैः'** श्रेणिकोच्छ्वासैः । **'सूचीसूचा'** सूचिकाकल्पना । **'प्रपञ्चिता'** कथिता । **'तत्र'** शरीरे । **'झलझला'** जाज्वल्यमाना । **'लूका'** उष्णकालवायुः । 'लू' इति भाषायाम् । **'मलयानिलतां'** मलयाद्रिपवनतुल्यतां शीततामित्यर्थः । **'गता'** प्राप्ता ॥ ७९ ॥

**यद्राजकरसम्पर्का-दपि तापमवाप तत् । चण्डांशुकरसंसर्गं, देहं सेहे मृणालवत् ॥ ८० ॥**

**'यत्'** देहम् । **'राजकरसम्पर्कादपि'** राज्ञः श्रेणिकस्य करसम्पर्कादपि हस्तसम्पर्कादपि । कमलनालपक्षे- चन्द्रकिरणसम्पर्कादपि । **'तापं'** शारीरिकं मानसिकं तापम् । **'अवाप'** प्राप्तम् । **'तत्'** देहम् । **'चण्डांशुकरसंसर्गं'** सूर्यकिरणसम्पर्कम् । **'मृणालनालवत्'** कमलनालवत् । **'सेहे'** सोढवत् । चन्द्रसंसर्गात् कमलनालं सन्तापं प्राप्नोति किन्तु सूर्यसम्पर्कं सानन्दं सहते तथा शालिमुनेरपि शरीरं श्रेणिकश्वासैः दूनमधुना सूर्यातपं सहते ॥ ८० ॥

**यत्र गोशीर्षचर्चाऽपि, स्वर्णे गैरिकतामगात् । मलाविलं तदेवाङ्ग-मूहे किट्टितलोहताम् ॥ ८१ ॥**

**'यत्र'** देहे । **'गोशीर्षचर्चाऽपि'** हरिचन्दनविलेपनमपि । **स्वर्णे गैरिकताम् अगात्** । सुवर्णे स्वयं सुशोभने सति गैरिकघट्टनं मुधा तद्वत् तस्य तदा गोशीर्षचर्चाऽपि मुधा अभवत् । **'तदेवाङ्गं'** तत् शरीरमेव । **'मलाविलं'** मलेन आविलं-

मलिनं सत् । **'किट्टितलोहतां'** किट्टितश्चासौ लोहश्च, तस्य भावः तत्ताम् । 'कटायेलुं लोढुं' इति भाषायाम् । **अगात्** । इति ऊहे-मन्ये ॥ ८१ ॥

**तस्य गात्रं कान्तलोह-पात्रं यत्र शमः पयः । उपसर्गाग्नितापेऽपि, शिखामाप विशेषतः ॥ ८२ ॥**

**'तस्य'** शालिमुनेः । **'गात्रं'** शरीरम् । **'कान्तलोहपात्रं'** कान्तलोहेन निर्मितं पात्रं तत्तुल्यम् । कान्तलोहभाजने अग्नितापे सति दुग्धं न उत्फणतीति लोकोक्तिः । किन्तु **'यत्र'** शालिशरीरे । **'शमः पयः'** क्षान्तिदुग्धम् । **'उपसर्गाग्नितापेऽपि'** परीषहानलतापेऽपि । **विशेषतः** । **'शिखां'** वृद्धिरूपाम् । **'आप'** प्राप्तम् । इति आश्चर्यम् ॥ ८२ ॥

**मन्दारपुष्पशय्यासु, सुखं तेनाऽन्वभावि यत् । एतत्कठोरभूपीठ-लोठै र्निर्लोठितं हठात् ॥ ८३ ॥**

**'मन्दारपुष्पशय्यासु'** मन्दारपुष्पाणां कल्पवृक्षकुसुमानां शय्यासु शयनीयेषु । **'तेन'** शालिमुनिना । **'यत् सुखं'** शर्म । **'अन्वभावि'** अनुभूतम्, अनुभवनेन भृतमित्यर्थः । **'एतत्'** सुखम् । **'कठोरभूपीठलोठैः'** 'कठोरे' कठिने 'भूपीठे' पृथ्वीतले 'लोठैः' लुण्ठनैः । **'हठात्'** बलात्कारेण । **'निर्लोठितं'** अधःक्षिप्तम् ॥ ८३ ॥

**दिव्यमाभरणं यस्य, विभाति स्म नवं नवम् । कटौ पटच्चरं तस्य, नटति स्म गतस्मयम् ॥ ८४ ॥**

**'यस्य'** शालेः । **'कटौ'** कटिप्रदेशे । **'नवं नवं'** प्रतिदिनं नूतनम् । **'दिव्यं'** परमम् । **'आभरणं'** विभूषणम् । **'विभाति'** शोभते । **'तस्य'** शालिमुनेः कटौ पटच्चरं जीर्णवस्त्रम् । 'जीर्णवस्त्र पटच्चरम्' इति हैम्याम् । **'गतस्मयं'** गतगर्वम्, क्रियाविशेषणमिदम् । **'नटति स्म'** नृत्यति स्म विभाति स्म इत्यर्थः ॥ ८४ ॥

**अभूच्चङ्क्रमणं यस्य, मसृणे मणिकुट्टिमे । स वैश्वानररथ्यासु, बम्भ्रमीति त्वसम्भ्रमी ॥ ८५ ॥**

**'यस्य'** शालिभद्रस्य। **'मसृणे'** कोमले। **'मणिकुट्टिमे'** रत्नबद्धभूमौ। **'चङ्क्रमणं'** भ्रमणम्। **अभूत्। 'स'** शालिमुनिः। **'असम्भ्रमी'** सम्भ्रममुक्तः। **'वैश्वानररथ्यासु'** अग्निरथ्यासु, अग्निसमतप्तमार्गेषु। **'बम्भ्रमीति'** अभीक्ष्णं भ्रमति ॥ ८५ ॥

**राजदारा इवासूर्य-म्पश्या यस्याऽभवत्तनुः। ध्वजा रविरथस्येव, न च्छायामृच्छति स्म सा ॥ ८६ ॥**

**यस्य** तनुः-शरीरम्। **'असूर्यम्पश्या'** सूर्यं न पश्यतीत्येवंशीला। **'राजदारेव'** राज्ञीव। **अभवत्। 'रविरथस्य'** सूर्यस्यन्दनस्य। **'ध्वजा इव'** पताका इव। **'सा'** तनुः। **छायां न ऋच्छति स्म**-न जगाम, न प्राप्नोति इत्यर्थः। यथा रविरथध्वजा सदा सूर्यसम्पर्कात् कदापि छायां न प्राप्नोति तथा शालिमुनिरपि सदा सूर्यातपे तिष्ठतीत्यर्थः ॥ ८६ ॥

**कल्पद्रुमफलास्वादः सदा यस्य वशंवदः। अटाट्यते प्रतिकुटं, स भिस्साभिस्सट्टाकृते ॥ ८७ ॥**

**'कल्पद्रुमफलास्वादः'** कल्पतरुफलभोजनम्। **'सदा'** नित्यम्। **'यस्य'** शालिभद्रस्य। **'वशंवदः'** आधीनः। **'सः'** शालिमुनिः। **'प्रतिकुटं'** प्रतिगृहम्। **'भिस्सा भिस्सट्टाकृते'** भिस्सा-ओदनः भिस्सट्टा-कुत्सिता भिस्सा भिस्सट्टा, लक्षानुरोधाट्टः, दग्धिका, दग्धः ओदनः इत्यर्थः। 'भिस्सा दीदिविरोदनः' इति 'भिस्सटा दग्धिका' इति च हैम्याम्। **'अटाट्यते'** अभीक्ष्णं अटति ॥ ८७ ॥

**दिव्यामृतरसै र्नासीद्, या प्रीतिः स्फीतिशालिनी। शास्त्रविन्नैः कदन्नैः सा, तस्याभूद्यापनापरैः ॥ ८८ ॥**

**तस्य दिव्यामृतरसैः** देवदत्तसुधारसैः। **या स्फीतिशालिनी**-स्फारा। **'प्रीतिः'** स्नेहः। **'नासीत्'** न अभवत्। **'सा'** प्रीतिः। **'यापनाकरैः'** निर्वाहकैः। **'शास्त्रविन्नैः'** पिण्डविशुद्ध्यादि शास्त्रख्यातैः। **'कदन्नैः'** कुत्सितान्नैः **तस्य अभूत्** ॥ ८८ ॥

**दूना या नासिकाऽमुष्य, राज्ञः परिमलैरपि । सेहे श्मशानगन्धं सा, धूपनीमिव रोगिणः ॥ ८९ ॥**

**'अमुष्य'** श्रेणिकस्य । **'राज्ञः'** नृपस्य । **'परिमलैरपि'** सुगन्धैरपि । **'अमुष्य'** शालेः । **या नासिका**-घ्राणम् । **'दूना'** दुःखिता बभूव । **'सा'** नासिका । **'रोगिणः'** रोगग्रस्तस्य । **'धूपनीमिव'** धूपन्याः धूम्रश्रेणिमिव । **'श्मशानगन्धं'** श्मशाने मृतकगन्धम् । **'सेहे'** सहते स्म ॥ ८९ ॥

**बीभत्सवस्तुदुर्गन्धै-रसौ कल्याणसाधकः । दुर्गन्धाया मृदो गन्धै र्धातुवादीव पिप्रिये ॥ ९० ॥**

**'बीभत्सवस्तुदुर्गन्धैः'** मलाविलदेहवस्त्रादिभिः । धातुवादिपक्षे-गन्धकादिभिः । **'कल्याणसाधकः'** मङ्गलमुक्तिसाधकः । पक्षे-सुवर्णसाधकः । **'असौ'** शालिमुनिः । **'दुर्गन्धायाः'** दुष्टः गन्धः यस्याः सा तस्याः । **'मृदः'** मृत्तिकायाः । **गन्धैः** । **'धातुवादी इव'** सुवर्णसाधकः इव । **'पिप्रिये'** प्रीतिं प्राप्नोति स्म ॥ ९० ॥

**दिव्यनाट्यनटीनाट्य-लौकैरभ्यासमीयुषी । मन्ये दृगप्यभूत्तादृग्, नासावंशाग्रनर्तकी ॥ ९१ ॥**

**'दिव्यनाट्यनटीनाट्यऽऽलोकैः'** दिव्यनाट्यं-देवसम्बन्धि नाटकं नटीनाट्यं-मनुष्यसम्बन्धि नटीनाट्यं च तेषां आलौकेः दर्शनैः । **'अभ्यासं'** संस्कारम् । **'ईयुषी'** प्राप्तवती । **'दृगपि'** नयनमपि । **'तादृग्'** नटीतुल्या । **'नासा-वंशाग्रनर्तकी'** नासा एव वंशः तस्य अग्रे अग्रभागे नर्तकी नर्तनकारिका तत्समा । **अभूदिति** मन्ये । स्थापयन्ति हि योगिनः नासाग्रभागे स्वनयने ॥ ९१ ॥

**दृक्प्रीत्यै यस्य कर्पूर-पाञ्चाल्य इव वल्लभाः । आसन्नुत्सङ्गसङ्गिन्य-स्तदाऽस्य पृषताङ्गनाः ॥ ९२ ॥**

**यस्य दृक्प्रीत्यै**-नयनरञ्जनाय । '**कर्पूरपाञ्चाल्य इव**' कर्पूरघटितसालभञ्ज्य इव । '**वल्लभाः**' प्रियाः आसन् । '**तदा**' मुनित्वे । **अस्य पृषताङ्गनाः**-हरिणाङ्गनाः । '**उत्सङ्गसङ्गिन्यः**' अङ्कस्थायिन्यः । '**आसन्**' बभूवुः । साम्यभावेन कायोत्सर्गस्थितस्य शालिमुनेः समीपे हरिणाद्याः निर्भयमागच्छन्तीति भावः ॥ ९२ ॥

**वचांसि स्वामिसत्तायाः, अर्शांसि किल कर्णयोः । जनन्या अपि यस्याशु, व्यथां पप्रथिरेतराम् ॥ ९३ ॥**

**कटूत्काररटच्चेटी-कोटीराटिविघट्टनाः । सुधाचुण्टीघटाघाटा-स्तस्याटाट्यासु जज्ञिरे ॥ ९४ ॥**

'**यस्य**' शालिभद्रस्य । '**स्वामिसत्तायाः**' स्वामिनः सत्तायाः सम्बन्धिनी । '**जनन्याः अपि**' भद्रामातुरपि । '**वचांसि**' वचनानि । '**कर्णयोः**' श्रवणयोः । '**किलः**' निर्णये । '**अर्शांसि इव**' अर्शो रोगविशेषः तद्वत् । '**आशु**' शीघ्रम् । '**व्यथां**' पीडाम् । '**पप्रथिरेतरां**' प्रथयन्तितरां स्म ॥ ९३ ॥ '**तस्य**' शालिमुनेः । '**अटाट्यासु**' विहारेषु पर्यटनेषु । '**कटूत्कटाररटच्चेटी कोटिराटिविघट्टनाः**' कटु च उत्कटं च आरटन्तीनां चेटीनां-दासीनां कोट्यः राट्यः कलहशब्दाः तेषां घट्टनाः-श्रवणानि । '**सुधाचुण्टीघटाघाटाः**' अमृतवापीसमूहसमाः । '**जज्ञिरे**' जाताः ॥ ९४ ॥

**उत्तुण्डचण्डफेरुण्डा, मण्डिताखण्डमण्डलाः । तस्य स्फीतरुताः कान्ता-सङ्गीतन्ति वनान्तरे ॥ ९५ ॥**

'**उत्तुण्डचण्डफेरुण्डाः**' उच्चैः तुण्डानि-मुखानि तैः चण्डाः भीषणाः फेरुण्डाः-श्रृगाल्यः । '**मण्डिताखण्डमण्डलाः**' मण्डितं अखण्डं-सम्पूर्णं मण्डलं-देशः याभिः ते । **स्फीतरुता** बृहद्रवाः । '**तस्य**' शालिमुनेः । '**वनान्तरे**' अटवीमध्ये । '**कान्तासङ्गीतन्ति**' कान्तासङ्गीतमिव आचरन्ति ॥ ९४ ॥

**निःशूकघूकघूत्कारा, भैरवीभैरवारवाः । अस्य सत्पथपान्थस्य, सर्वतः शुभसूचकाः ॥ ९६ ॥**

**'निःशूकघूकघूत्काराः'** निःशूकाः-निर्दयाः ये घूका-उलूका- तेषां घूत्काराः-शब्दाः । **'भैरवीभैरवारवाः'** भैरवीणां दुर्गाख्यचटकिकानां भैरवाः-भयानकाः । **आरवाः**-शब्दाः । **'सत्पथपान्थस्य'** शोभने पथि-मुक्तिमार्गे पान्थस्य प्रवासिनः । **'अस्य'** शालिमुनेः । **'सर्वतः'** परितः । **'शुभसूचकाः'** मङ्गलदर्शकाः आसन् ॥ ९६ ॥

**अवावरी मतिर्दोषान् शालेः प्रशमधीवरी । पीवरी श्रुतपीयूषं, परमार्थैकदृश्वरी ॥ ९७ ॥**

**'शालेः'** शालिमुनेः । **'मतिः'** बुद्धिः । **'दोषान्'** दूषणानि **'अवावरी'** अपनेत्री । ओणृ अपनयने, औणति दोषान् अवावरी, वन्याङ् पञ्चमस्य ।४।२।६५॥ इति आङ् । **'प्रशमधीवरी'** प्रशमं दधातीत्येवंशीला । **'श्रुतपीयूषं'** आगमामृतम् । **'पीवरी'** पीङ्च पाने । पिबतीत्येवंशीला । णस्वरा-ऽघोषाद् ।२।४।४॥ इति अवावर्यादयः । **'परमार्थैकदृश्वरी'** परमार्थं एव एकं पश्यतीत्येवंशीला । आसीत् ॥ ९७ ॥

**अदण्डधारिणा चित्रं, सप्तधातून् सुसाधकौ । तपसा पारदेनावर्तयामासतुराशु तौ ॥ ९८ ॥**

**'सुसाधकौ'** श्रेष्ठाराधकौ । **'तौ'** शालिधन्यौ । पक्षे-सुवर्णसाधकौ । **'अदण्डधारिणा'** मनोदण्डादिरहितेन पक्षे-दण्डरहितेन। **'पारदेन'** पारदायिना भवपारकारिणा । पक्षे-रसेन्द्रेण । **'तपसा'** तपश्चर्यया । **'सप्तधातून्'** रसादीन् । पक्षे-ताम्रादीन् । **'आशु'** क्षिप्रम् । **'आवर्तयामासतुः'** शोषितवन्तौ । पक्षे-परिवर्तितवन्तौ । **अदण्डधारिणा पारदेन इति** चित्रं-आश्चर्यम् । यो हि पारदः शोधितः सन् मध्येदण्डं ऊर्ध्वं बिभर्ति ॥ ९८ ॥

**प्राज्यैर्भोज्यरसैः षड्भि-र्दृप्ताः सप्ताऽपि धातवः । श्रृङ्गाराद्याश्च तैरष्टौ, ताभ्यां त्यक्ताः षडप्यतः ॥ ९९ ॥**

**'प्राज्यैः'** प्रचुरैः । **'षड्भिः'** मधुरादिषड्भिः । **'भोज्यरसैः'** भोजनरसैः । **'सप्तापि धातवः'** रसादि-सप्तधातवः ।

**'दृप्ताः'** मत्ताः । **'तैः'** धातुभिः । **'अष्टौ श्रृङ्गाराद्याः'** शान्तरसरहिताः अष्टरसाः दृप्ताः । **'अतः'** सर्वानर्थमूलमिमे षड्रसाः इति कृत्वा । **'ताभ्यां'** शालिधन्याभ्याम् । **'षडपि'** भोज्यरसाः । **'त्यक्ताः'** परिहृताः ॥ ९९ ॥

**वर्णश्लोकार्थदूरस्थं, मासक्षपणमेतयोः । अभिष्वङ्गलगद्रङ्गबिन्दुच्युतमिवाभवत् ॥ १०० ॥**

**'वर्णश्लोकार्थदूरस्थं'** वर्णः-शरीरकान्तिः श्लोकः-कीर्तिः अर्थः कनकादिकं तेभ्यः दूरस्थं-रहितम् । यदुक्तं दशवैकालिके-"नो कित्तिवण्ण सद्द-सिलोगट्ठयाए तवमहिट्ठिज्जा" ९/४। **'अभिष्वङ्गलगद्रङ्गबिन्दुच्युतमिव'** अभिष्वङ्गेन स्नेहेन लगन् यः रङ्गबिन्दुः हर्षबिन्दुः तेन च्युतं-रहितमिव । **'एतयोः'** शालिधन्ययोः । **'मासक्षपणं'** मासोपवासतपः । बिन्दुसहितं मांसक्षपणमभूत् ॥ पक्षे-वर्णश्लोकार्थ-रहितोऽयं बिन्दुच्युतालङ्कारोऽभवत् ॥ १०० ॥

**अनाहारव्ययैर्मासक्षपणैः कृपणैरिव । चक्रे स्फारं तपः सारं, गेहं देहं कृशं भृशम् ॥ १०१ ॥**

**'अनाहारव्ययैः'** आहारव्ययः नास्ति येषां तैः । **'कृपणैरिव'** कदर्यैरिव। **'मासक्षपणैः'** मासोपवासैः । **'स्फारं'** विशालम्। **'तपःसारं'** तपः एव सारः यत्र तद् । **'देहं गेहं'** गेहरूपं देहं शरीरम् । **'भृशं'** अत्यर्थम् । **'कृशं'** दुर्बलम् । **'चक्रे'** ताभ्यां मुनिभ्यां कृतम् ॥ १०१ ॥

**एक-द्वि-त्रि-चतुर्मास-क्षपणैरापणैरिव । अगण्यपुण्यपण्यानि, क्रीणीतः स्म गतस्मयौ ॥ १०२ ॥**

**'आपणैरिव'** हट्टैरिव । **'एकद्वित्रिचतुर्मासक्षपणैः'** एक-मास-द्विमास-त्रिमास-चतुर्मासानामुपवासैः । हट्टतुल्येभ्यः मासक्षपणेभ्यः इत्यर्थः । **'गतस्मयौ'** गतगर्वौ तौ । शालिधन्यौ । **'अगण्यपुण्य पण्यानि'** अगण्यानि अमेयानि पुण्यपण्यानि पुण्यक्रयाणकानि । **'क्रीणीतः स्म'** क्रयं कुरुतः स्म ॥ १०२ ॥

**ततो भद्रमहाभद्रसर्वतोभद्रसंज्ञिताः । यवमध्या वज्रमध्याः, प्रतिमा आरराधतुः ॥ १०३ ॥**

'**ततः**' तत्पश्चात् । '**भद्र-महाभद्र-सर्वतोभद्रसंज्ञिताः**' भद्रं महाभद्रं सर्वतोभद्रं इति संज्ञाः-नामानि यासां ताः । '**यवमध्या**' '**वज्रमध्या**' इत्यपि प्रतिमाविशेषाभिधाने । **प्रतिमाः** । '**आरराधतुः**' आराधयतः स्म ॥ १०३ ॥

**उग्रादरात्तपस्याऽथ, तावनाशंसिता भृशम् । हृतमांसासृजौ चक्रे, गौरी भृङ्गिरिटिं यथा ॥ १०४ ॥**

**अथ** । '**अनाशंसिता**' निष्कामा । '**तपस्या**' तपः, इदं कर्तृपदम् । '**उग्रादरात्**' उग्रस्य तीव्रतपसः आदरात् । गौरी-पक्षे शङ्करादरात् । 'श्रीकण्ठोग्रौ धूर्जटिः' इति हैम्याम् । '**तौ**' शालिधन्यौ । '**भृशं**' अत्यर्थम् । '**हृतमांसासृजौ**' क्षीणपलरुधिरौ । '**चक्रे**' कृतवती । यथा गौरी-पार्वती । '**भृङ्गिरिटिं**' शङ्करगणं चक्रे तथा । महादेवस्नेहवतीगौरीप्रेरणया अन्धकासुरो हि रुद्रेण वर्षसहस्राणि शूलं प्रोतो धृतो नाड्यास्थिशेषशरीरश्च दासत्वं प्रपन्नो मुक्तो भृङ्गिगणोऽभूदिति प्रसिद्धिः ॥ १०४ ॥

**सदा निष्कोषसम्बन्धं, निर्व्यापारं सुनिर्मलम् । अहिंस्त्रं तत्तपस्तीव्रं, खड्गधाराधिकं बभौ ॥ १०५ ॥**

'**सदा निष्कोषसम्बन्धं**' नित्यं धननिधिसङ्गहीनम् । खड्गपक्षे युद्धमन्तरेण प्रायः खड्गः कोषेण खड्गपिधानकेन सहितमेव स्यात् । '**निर्व्यापारं**' सर्वविरतित्वात् सावद्यव्यापाररहितम् । खड्गं व्याप्रियते तदैव तेजस्वि, नान्यथा, तपस्तु निर्व्यापारमेव। '**सुनिर्मलं**' अत्यमलम् । हिंसातः खड्गे मलिनतैव । '**अहिंस्त्रं**' अहिंसकम् । खड्गं हिंसकं तपस्तु अहिंसकमेव । '**तीव्रं**' तीक्ष्णम्। '**खड्गधाराधिकं**' असिधारातः अपि अधिकम् । '**तत्तपः**' तयोः शालि-धन्ययोः तपः । '**बभौ**' भाति स्म ॥ १०५ ॥

**पवनाभ्याससुस्थात्मा, त्रेताऽधिकबलोदयः । अक्षप्राणापहारी च, हनूमांस्तत्तपःक्रमः ॥ १०६ ॥**

**'पवनाभ्याससुस्थात्मा'** पवनाभ्यासैः सुस्थः स्वस्थः आत्मा यस्य सः । हनूमत्पक्षे-पवनाख्यपितुः अभ्यासं-समीपं तेन सुस्थः आत्मा यस्य सः । **'त्रेताधिक-बलोदयः'** द्विजसत्काग्नित्रयस्य 'त्रेता' इति नाम, तस्मादग्नित्रयात् अधिकं बलं तस्य उदयः यस्य सः । पक्षे-त्रेता युगविशेषाभिधानं तत्र अधिकः बलोदयः यस्य सः । **'अक्षप्राणापहारी'** इन्द्रियबलापहारी । पक्षे-अक्षः रावणपुत्रः तस्य प्राणापहारी । **चः** समुच्चये । **'तत्तपःक्रमः'** तयोः तपःक्रमः तपःपराक्रमः । **'हनूमान्'** हनूमत्तुल्यः इत्यर्थः ॥ १०६ ॥

**अकुण्ठोत्कण्ठया सिद्धेरिव क्षामवपुष्टमौ । मुनी मोहेभफालायां, सिंहो सङ्कुचिताविव ॥ १०७ ॥**

**'सिद्धेः'** मोक्षस्य । **'अकुण्ठोत्कण्ठया इव'** अकुण्ठया अरुद्धया उत्कण्ठया औत्सुक्येन इव । **'क्षामवपुष्टमौ'** क्षामं-कृशं वपुः क्षामवपुः, अतिशयेन क्षामवपुः ययोः तौ । **'मुनी'** शालिधन्यौ । **'मोहेभफालायां'** मोहमतङ्गजोपरि फालायां आक्रमणे । **'सङ्कुचितौ'** संवलितगात्रौ । **'सिंहौ इव'** पञ्चाननौ इव भातः ॥ १०७ ॥

**मलाविलौ बहिष्कीर्णपापपङ्कौ विभावितौ । संयमश्रीपरीरम्भासक्तकस्तुरिकाङ्कितौ ॥ १०८ ॥**

**'मलाविलौ'** मलेन आविलौ मलिनौ । **'बहिष्कीर्णपापपङ्कौ'** बहिः कीर्णः क्षिप्तः पापपङ्कः याभ्यां तौ । **'संयमश्रीपरीरम्भासक्तकस्तूरिकाङ्कितौ'** संयमश्रियाः चारित्रलक्ष्म्याः परीरम्भेण-आलिङ्गनेन आसक्ता लग्ना कस्तूरिका-मृगमदः तया अङ्कितौ लाञ्छितौ । **'विभावितौ'** विभाव्येते स्म । अयं भावः-तौ मलिनौ कथं जातौ ? कविरुत्प्रेक्षते-चारित्रलक्ष्म्याः आलिङ्गनेन लग्नया कस्तूरिकया (कस्तूरिकायाः कृष्णवर्णत्वात्) तौ मुनी अपि मलिनौ भातः ॥ १०८ ॥

**स्मरचौरभयाभावाद्, गन्तव्याल्पतयेव वा । मन्थरं पथि निर्ग्रन्थौ, चार चेरतुरीर्यया ॥ १०९ ॥**

**'स्मरचौरभयाभावाद्'** स्मरचौरस्य कामस्तेनस्य भयाभावात्-भीतेः अभावात् । **'गन्तव्याल्पतयेव'** गन्तव्यस्य मार्गस्य अल्पतया इव । **वा** विकल्पे । **'निर्ग्रन्थौ'** शालिधन्यौ मुनी । **'पथि'** मार्गे । **'ईर्यया'** ईर्यासमित्या । **'मन्थरं'** शनैः शनैः । **'चारु'** सुन्दरम् । **'चेरतुः'** विचरतः स्म ॥ १०९ ॥

**अल्पाक्षोपाङ्गशीलाङ्गभृताङ्गशकटस्य किम् । चीत्कारः कीकशारावस्तयोश्चङ्क्रमणक्रमे ॥ ११० ॥**

**'तयोः'** साध्वोः । **'चङ्क्रणक्रमे'** गमनविधौ । **'कीकशारावः'** अस्थिध्वनिः । **किं अल्पाक्षोपाङ्ग-शीलाङ्गभृताङ्गशकटस्य**-अल्पः स्तोके, अक्षाणि-इन्द्रियाणि उपाङ्गानि-१८००० शीलाङ्गरथभृतः शरीरशकटस्य । शकटपक्षे स्तोकं अक्षस्य धुरः उपाङ्गं-तैलक्षेपणम् । 'उंजवुं' इति भाषायाम् । इत्येवंरूपशकटस्य । **'चीत्कारः'** ध्वनिः । यथा अल्पतैलक्षेपे शकटे चीत्कारध्वनिः समुच्छलति तथा स्निग्धाहाराऽभावात् शालिधन्य देहयोरपि अस्थिरवः समुच्छलति इत्यर्थः ॥ ११० ॥

**द्वादशात्मप्रभासारं, तपो द्वादशभेदभृत् । द्वादशाब्दीं समाराध्य, धृतद्वादशभावनौ ॥ १११ ॥**

**श्रीमता वीरनाथेन, सहितौ रहितौ मदैः । समेतौ समितिप्रष्ठौ, पुना राजगृहं परम् ॥ ११२ ॥ (युग्मम्)**

**'द्वादशभेदभृत्'** बाह्यान्तरद्वादशविधम् । **'द्वादशात्मप्रभासारं'** सूर्यकान्तिसारं सूर्यवत् उग्रतेजः । **तपः** । **'द्वादशाब्दीं'** द्वादशवर्षाणि यावत् । **'समाराध्य'** सेवित्वा । **'धृतद्वादशभावनौ'** धृताः चिन्तनरूपेण अनित्यतादिद्वादश भावनाः याभ्यां तौ ॥ १११ ॥ **'श्रीमता'** अतिशयलक्ष्मीवता । **'वीरनाथेन'** महावीरस्वामिना । **'सहितौ'** सङ्गतौ । **'मदैः'** जात्याद्यष्टमदैः । **'रहितौ'** वर्जितौ । **'समितिप्रष्ठौ'** समितिगुप्तिषु प्रष्ठौ-प्रधानौ । **'पुनः'** भूयः । **राजगृहं पुरं समेतौ**-समागतौ ॥ ११२ ॥

**जननी जन्मभूमिश्च, प्रिया सामान्यजन्मिनाम् । जन्मभूमिः कथं प्रीत्यै, ह्रियै जन्मैव यत्तयोः ॥ ११३ ॥**

'**सामान्यजन्मिनां**' साधारणप्राणिनाम् । '**जननी जम्मभूमिश्च**' माता मातृभूमिश्च । '**प्रिया**' अभीष्टा भवति । यदुक्तम्- ''जणणी य जम्मभूमी, पच्छिमनिद्दा सुहासियं वयणं । मणइट्ठं माणुस्सं, पंचवि दुक्खेण मुच्चंति ॥'' लङ्काविजयानन्तरं लक्ष्मणं प्रति रामकथनम्-''अपि स्वर्णमयी लङ्का, न मे लक्ष्मण ! रोचते । जननी जन्मभूमिश्च, स्वर्गादपि गरीयसी ॥'' '**तयोः**' शालिधन्ययोः । **जन्मभूमिः कथं प्रीत्यै** स्यात् ? '**यत्**' यस्मात् । **तयोः जन्म एव ह्रियै**-लज्जायै बभूव ॥ ११३ ॥

**लोकानां स्वजनग्रामसीमाऽऽलोकः सुखायते । विश्वाऽपि सदृशी विश्वा, जगन्मित्रतया तयोः ॥ ११४ ॥**

'**लोकानां**' सामान्यनराणाम् । '**स्वजनग्रामसीमालोकः**' स्वजनग्रामसीमानां स्वजनानां स्वग्रामाणां स्वग्रामसीमानां च आलोकः-दर्शनम् । '**सुखायते**' सुखकारणं भाति । '**तयोः**' शालिधन्ययोः । '**जगन्मित्रतया**' विश्वसुहृत्तया सूर्यतया वा। '**विश्वाऽपि**' सकलाऽपि, '**विश्वा**' पृथ्वी । '**सदृशी**' समाना अस्ति । यदुक्तम्-

'अयं निजः परो वेति, गणना लघुचेतसाम् । उदारचरितानां तु, वसुधैव कुटुम्बकम् ॥'' ॥ ११४ ॥

**अथ श्रीवीरनाथोऽपि, सुमनः श्रेणिसेवितः । अवाततार वैभारगिरिश्रृङ्गे वसन्तवत् ॥ ११५ ॥**

**अथ श्रीवीरनाथोऽपि** । '**वसन्तवत्**' वसन्तर्तुवत् । '**वैभारगिरिश्रृङ्गे**' वैभाराद्रिशिखरे । **सुमनः श्रेणिसेवितः**' सुमनसां-देवानां श्रेणिभिः सेवितः । वसन्तपक्षे पुष्पाणां श्रेणिभिः सेवितः । '**अवावतार**' अवतरति स्म ॥ ११५ ॥

**त्रिप्राकारपरीवेषं, त्रिलोकीतिलकोपमम् । अध्यासामास समवसरणं रत्नवद् विभुः ॥ ११६ ॥**

**'त्रिप्राकारपरीवेषं'** त्रिप्राकाराः त्रयः वप्राः परीवेषः परिधिः यत्र तत् । **'त्रिलोकी तिलकोपमं'** त्रिलोक्याः त्रिजगत्याः तिलकोपमम् । **'रत्नवत्'** रत्नयुक्तम्, मतुप्रत्यये रूपम् । **'समवसरणं'** देशनासदनम् । **'विभुः'** श्रीवीरः । **'अध्यासामास'** उपविष्टवान् । अधेः शीङ् ।२।२॥२०॥ इत्याधारस्य (समवसरणस्य) कर्मसंज्ञा ॥ ११६ ॥

**ततोऽहम्पूर्विकापूर्वमपूर्वमिव सेवितुम् । जना जिनं समासेदुः, श्रीमन्तं स्वजना इव ॥ ११७ ॥**

**'ततः'** तेन कारणेन । **'अपूर्वमिव'** अद्वितीयमिव । **'अहम्पूर्विकापूर्वं'** अहं पूर्वं अहं पूर्वं इति जल्पः यस्यां सा अहम्पूर्विका तत्पूर्वकम् । **'सेवितुं'** आराधितुम् । **'स्वजनाः'** स्वज्ञातीयाः । **'श्रीमन्तं'** धनाढ्यम् । तद्वत् । **जनाः जिनं**-वीरम् **'समासेदुः'** प्राप्ताः ॥ ११७ ॥

**इतश्च तौ मुनी मान्यौ, शब्दार्थाविव सङ्गतौ । परमार्थाय पर्याप्तौ, साधुवृत्तविशेषकौ ॥ ११८ ॥**

**अनुत्सुकावनुत्सेकौ, मासक्षपणपारणे । श्रीसर्वज्ञमनुज्ञायै, प्राप्तकालं प्रणेमतुः ॥ ११९ ॥**

**इतश्च तौ**-शालिधन्यौ । **'मान्यौ'** माननीयौ । **'मुनी'** साधू । **'शब्दार्थौ इव सङ्गतौ'** वागर्थौ इव संयुक्तौ । **'परमार्थाय'** मोक्षाय । **'पर्याप्तौ'** कृतादरौ । **'साधुवृत्त' विशेषकौ'** साधुजनाचारतिलकौ ॥ ११८ ॥ **'अनुत्सुकौ'** क्षिप्रं स्वमन्दिरं यावः पश्यावः-इति उत्सुकतारहितौ । **'अनुत्सेकौ'** आवां धनाढ्यकुलोद्भवौ महान्तौ इति उत्सेकेन-गर्वेण रहितौ । **'मासक्षपणपारणे'** मासोपवासपारणे । **'अनुज्ञायै'** 'श्रीसर्वज्ञं' श्रीकेवलज्ञानिनं वीरम् । **'प्राप्तकालं'** यथावसरम् । **'प्रणेमतुः'** वन्देते स्म ॥ ११९ ॥

**आदिदेश जिनाधीशः, शालिभद्रं विलोकयन् । यत्सवित्री भवित्री ते, वत्स ! पारणकारणम् ॥ १२० ॥**

**शालिभद्रं विलोकयन्**-पश्यन् । **'जिनाधीशः'** जिनेन्द्रः श्रीवीरः । **'आदिदेश'** आदिशति स्म । **यत्-वत्स**-हे मुने!। **'ते'** तव । **'सवित्री'** माता । **पारणकारणं भवित्री**-भविष्यति ॥ १२० ॥

**तमथादाय निर्देशं, सुमनोमार्गदीपकः । समं धन्येन सञ्चेरे, स दिनेन दिनेशवत् ॥ १२१ ॥**

**अथ दिनेन**-दिवसेन समम् । **'दिनेशवत्'** सूर्यवत् । **'सः'** शालिमुनिः । **'सुमनो मार्गदीपकः'** 'पण्डितपथदर्शकः। सूर्यपक्षे-देवमार्ग (आकाश) प्रकाशकः । **'धन्येन समं'** धन्यमुनिना सह । **'तं आदेशं'** तां श्रीवीराऽऽज्ञाम् । **'आदाय'** गृहीत्वा । **'सञ्चेरे'** सञ्चरति स्म । समस्तृतीयया ।३।३।३२।। इति सम्पूर्वाच्चरेस्तृतीयान्तेन योगे कर्तर्यात्मनेपदम् ॥ १२१ ॥

**मृष्टं वैद्योपदिष्टं च, मम सङ्घटते पुरा । निर्ममो नैवमप्यन्तर्विममर्श विमर्शवान् ॥ १२२ ॥**

**मम मृष्टं**-मधुरम् वैद्योपदिष्टं च सङ्घटते-युज्यते मातृगृहगमनविषये । **एवं विमर्शवान्**-विचारवान् । **'निर्ममः'** ममतारहितः। **'अन्तरपि'** मनस्यपि । **न विममर्श**-न विमृशति स्म । स्वगृहगमनाऽऽदेशं प्राप्य न कोऽपि हर्षः जातः इत्यर्थः, सर्वत्र साम्यभावात् ॥ १२२ ॥

**मोहसैन्यमिवात्यन्तं, परावृत्तिपरौ पुरम् । दक्षौ प्राविक्षतां साक्षाद्, धर्मभूभृच्चराविव ॥ १२३ ॥**

**'साक्षात्'** प्रत्यक्षम् । **'धर्मभूभृतः'** धर्मनृपस्य । **'चरौ इव'** गूढपुरुषौ इव । **'दक्षौ'** कुशलौ । **'भृशं'** अत्यन्तम् । **'परावृत्तिपरौ'** पुनरागमनतत्परौ । **'मोहसैन्यमिव'** मोहराजबलमिव । **'पुरं'** राजगृहनगरम् । **'प्राविक्षतां'** प्रविशतः स्म ॥ १२३ ॥

**नामर्षेण न हर्षेण, विस्मयेन स्मयेन च । व्रीडयाऽपीडया स्पृष्टौ, संस्तवेन स्तवेन न ॥ १२४ ॥**

**सगोत्रैर्भित्तिचित्रैर्वा, दक्षैर्वृक्षैरिवायतौ । सवयोभिर्वयोभिर्वा, न कैश्चिदुपलक्षितौ ॥ १२५ ॥**

**श्रीपथे सञ्चरन्तौ तौ, श्रीमहावीरवाग्बलात् । भद्राप्रासादमेवाशु, रागदुर्गमिवेयतुः ॥ १२६ ॥**

'**अमर्षेण**' क्रुधा । '**हर्षेण**' प्रमोदेन । '**मर्षेण**' इत्यपि पाठः । '**विस्मयेन**' आश्चर्येण । '**स्मयेन**' मदेन । '**व्रीडया**' लज्जया । '**ईडया**' स्तुत्या । '**संस्तवेन**' सम्यक् परिचयेन । '**स्तवेन**' प्रशंसया । **चः** समुच्चये । '**न स्पृष्टौ**' न ग्रस्तौ तौ शालिधन्यौ मुनी ॥ '**भित्तिचित्रैर्वा**' भित्तौ निर्मितालेख्यैरिव, चित्रतुल्यैरित्यर्थः । '**वा**' इवार्थे । '**सगोत्रैः**' सज्ञातिभिः जनैः । '**वृक्षैरिव**' वृक्षतुल्यैः । '**दक्षैः**' चतुरैः । '**आयतौ**' आ समन्तात् यतौ सङ्गयत मुनी इत्यर्थः । '**वयोभिर्वा**' पक्षिभिरिव। अत्रापि **वा** इवार्थः । '**सवयोभिः**' सुहृद्भिः । '**कैश्चित्**' कैरपि जनैः । '**न उपलक्षितौ**' न अभिज्ञातौ ॥ १२५ ॥ '**श्रीमहावीरवाग्बलात्**' श्रीमहावीरवचनस्य बलात्-कारणात्, मातृगृहे पारणं भावीति वचनबलात्। '**श्रीपथे**' राजमार्गे । '**सञ्चरन्तौ**' चलन्तौ । '**तौ**' शालिधन्यौ मुनी । '**रागदुर्गमिव**' प्रेमप्राकारमिव । '**भद्राप्रासादं**' भद्रायाः सौधम् । **एवः** अवधारणे। '**आशु**' क्षिप्रम् । '**ईयतुः**' गतौ ॥ १२६ ॥

**वैडूर्यद्युतिदूर्वासु, मुक्तमुक्ताकणोत्करे । बम्भ्रमीति न तद्दृष्टिगवी पङ्गुरिवाङ्गणे ॥ १२७ ॥**

'**पङ्गुरिव**' पादविकलनरः इव । '**तद्दृष्टिगवी**' शालिधन्यनयनधेनुः । '**वैडूर्यद्युतिदूर्वासु**' वैडूर्यद्युतयः एव दूर्वाः तासु। '**मुक्तमुक्ताकणोत्करे**' मुक्ताः न्यस्ताः मुक्ताकणानां मौक्तिककणानां गवीपक्षे-मौक्तिकतुल्यधान्यकणानां उत्कराः समूहाः यत्र तस्मिन् । '**अङ्गणे**' अजिरे । '**न बम्भ्रमीति**' न अभीक्ष्णं भ्रमति ॥ १२७ ॥

**आत्मीय इति सस्नेहं, सपूर्व इति सादरम् । रुग्णः क्वापीति साशङ्कं, तादृगेवेति सस्पृहम् ॥ १२८ ॥**

**आः ! शून्य इति सोद्वेगं, त्यक्तोऽयमिति सस्मयम् । आलुलोकेऽपि नानेन, स्वप्रासादावतंसकः ॥ १२९ ॥**

भद्राप्रासादप्रवेशे शालिमुनेः चेतःस्थितिं दर्शयन्नाह-**आत्मीयः**-स्वकीयः **इति सस्नेहं**-प्रेमपूर्वकम् । **'सपूर्वः'** पूर्वेण-भूतकालेन सहितः इति सादरं-आदरपूर्वकम् । **'क्वापि'** कुत्रचित् **रुग्णः**-भग्नः, (रुजोंत् भङ्गे) **इति साशङ्कं**-आशङ्कासहितम् । **'तादृगेव'** तादृशः एव अयं यादृशः अस्माभिः त्यक्तः इति सस्पृहं-सकामम् ॥ १२८ ॥ **'आ'** खेदे । **'शून्यः'** दासदास्यादिभिः रहितोऽयं प्रासादः **इति सोद्वेगं**-उद्वेगपूर्वकम् । **'त्यक्तोऽयं'** परिहृतोऽयं ऋद्धिसहितः प्रासादः **इति सस्मयं**-सगर्वम् । **'स्वप्रासादावतंसकः'** निजोत्तमप्रासादः । **'अनेन'** शालिमुनिना । **'न आलुलोकेऽपि'** न दृष्टोऽपि ॥ १२९ ॥

**इतः स्थितमिह भ्रान्तमत्रासितमिहाशितम् । रागमङ्कूरयत्येव, शून्याऽपि हि विलासभूः ॥ १३० ॥**

**इतः स्थितं**-स्थितिः कृता । **इह भ्रान्तं**-पर्यटितम् । **अत्र आसितं**-उपविष्टम् । **इह अशितं** भुक्तम् । **इत्येव शून्याऽपि**-निर्जनाऽपि । **हिः** निश्चये । **'विलासभूः'** विलासस्थानम् । **'रागं'** स्नेहम् । **'अङ्कूरयति'** प्ररोहयति । किन्तु नीरागस्य शालिमुनेः शून्या विलासभूः न रागं प्ररोहयति इत्यर्थः ॥ १३० ॥

**घनागमैः प्रथितया, प्रतिभाति स्म तस्य तु । तरङ्गिण्या समतया, सर्वमेव समीकृतम् ॥ १३१ ॥**

**'तु'** परन्तु । **'तस्य'** शालिमुनेः । **'घनागमैः'** बहलसिद्धान्तैः । नदीपक्षे-मेघागमनैः । **'प्रथितया'** विख्यातया । पक्षे-विशालया । **'समतया'** साम्येन । **'तरङ्गिण्या'** नद्या । **सर्वमेव समीकृतं**-समानं विहितम् । **'प्रतिभाति स्म'** प्रत्यभात् । यथा नदीपूरे प्रसर्पति सर्वं स्थलं समानं जायते तथा समतया शालिमुनेः सर्वं तुल्यं प्रतिभाति इत्यर्थः ॥ १३१ ॥

**अतीत्याङ्गणवेदींताममितां ममतामपि । अन्यभिक्षाचरौचित्या, तस्थतुः सुस्थितौ पुरः ॥ १३२ ॥**

**तां अङ्गणवेदीं**-अजिरस्थलम् । **'अतीत्य'** अतिक्रम्य । **'अमितां'** अपरिमिताम् । **ममतामपि अतीत्य** ।

**'अनन्यभिक्षाचराणां'** सामान्ययाचकानाम् । **'औचित्या'** मर्यादया । **'सुस्थितौ'** स्वस्थौ । **'पुरं'** उग्रे । **'तस्थतुः'** तिष्ठतः स्म ॥ १३२ ॥

**प्रददे धर्मलाभाशीः, किन्तु नोच्चैर्न सादरम् । दर्शिता दर्शनाचारविचारे चातुरी परम् ॥ १३३ ॥**

**'धर्मलाभाशीः'** 'धर्मलाभः' इति आशीः आशीर्वादः । **'प्रददे'** प्रदत्ता । **किन्तु** साऽपि । **'न उच्चैः'** न महारवेण । **'न सादरं'** न सस्नेहं प्रदत्ता । **'परं'** केवलम् । **दर्शनाचारविचारे** । **'चातुरी'** कौशल्यम् । **'दर्शिता'** प्रकटिता ॥ १३३ ॥

**विवर्णौ चित्रलिखितौ, निर्लेपौ लेपनिर्मितौ । अतुल्यौ धर्मसौधस्य, तुल्यकुड्याविव स्थितौ ॥ १३४ ॥**

**चित्रलिखितौ** अपि **विवर्णौ** वर्णरहितौ अत्र विरोधपरिहारे चित्रलिखितौ चित्राङ्कितततुल्यौ रोषतोषरहितौ । **'विवर्णौ'** शरीररूपरङ्गरहितौ । **लेपनिर्मितौ** लेपेन निर्मितौ अपि **निर्लेपौ**-लेपरहितौ अत्र विरोधपरिहारे लेपनिर्मितौ लेपकृदाहारनिर्मितिः तत्र निर्लेपौ-अनासक्तौ । **'धर्मसौधस्य'** धर्मप्रासादस्य । **'अतुल्यौ'** असमौ । **'तुल्यकुड्यौ इव'** समानभित्ती इव । **'स्थितौ'** तिष्ठतः स्म ॥ १३४ ॥

**नैकं पदं पुरोऽभूतां, पदमेकं च नोचतुः । सर्वार्थसिद्धिदं मौनमेतावेकपदेऽकृताम् ॥ १३५ ॥**

**एकमपि पदं**-चरणम् । **'न पुरः'** न अग्रे । **'अभूतां'** जातौ । **एकं च पदं**-शब्दरूपम् । **'न उचतुः'** न जगदतुः । **'एकपदे'** सहसा । **'सर्वार्थसिद्धिदं'** सकलप्रयोजनप्राप्तिप्रदम्, सर्वार्थसिद्धविमानप्रदं वा । तुष्णीम्भावं **'मौनं'** मुनेर्भावं वा । **'अकृतां'** कृतवन्तौ । **अकृतामिति** क्रियास्थाने अकार्ष्टामित्येवंरूपः प्रयोगः सम्भाव्यते ॥ १३५ ॥

**पल्लवी सल्लकीस्तम्भः, सद्मभारधरोऽप्यलम् । रसासङ्गेन जायेत, तथा शीलाङ्गभागपि ॥ १३६ ॥**

**'सद्मभारधरोऽपि'** गृहभारधरोऽपि । **'सल्लकीस्तम्भः'** सल्लकी-लताविशेषः तस्याः स्तम्भः । 'सल्लकी तु गजप्रिया' इति हैम्याम् । **'रसासङ्गेन'** पृथ्वीयोगेन । **'पल्लवी'** पल्लवाः किसलयानि विद्यन्ते यस्य सः, अतः इन् । **'जायेत'** स्यात्। **तथा शीलाङ्गभागपि** शीलाङ्गधरोऽपि साधुः । **'रसासङ्गेन'** रसानां-मधुरादीनां शृङ्गारादीनां च 'आसङ्गेन' संयोगेन । **'पल्लवी'** रागवान् । **जायेत** ॥ १३६ ॥

**साधुः स्वजनसंसर्गाद्, भवेद् रागाङ्कुरोद्धरः । तयोः परं रसावेशात्, न भेदः कीरदारुवत् ॥ १३७ ॥**

**'स्वजनसंसर्गात्'** स्नेहिजनसंयोगात् । **'साधुः'** सामान्यसाधुः । **'रागाङ्कुरोद्धरः'** रागाङ्कुराणां उद्धरः उद्भवः यस्मिन् तादृशः । **भवेत्** । **'परं'** परन्तु । **'तयोः'** शालिधन्ययोः । **'रसावेशात्'** रसानां मधुरादिशृङ्गारादिरसानां **अवेशात्** अप्रवेशात्। कीरकाष्ठपक्षे रसायां पृथिव्यां आवेशात् आ समन्तात् वेशात् प्रवेशात् । **'कीरदारुवत्'** कीरजातीयकाष्ठवत् । **'न भेदः'** न रागादीनामुद्भेदः । पक्षे न अङ्कुराणामुद्भेदः अभूत् ॥ १३७ ॥

**शालिभद्र-धन्यौ स्वजनैः न लक्षितौ—**

**तथा मनोवचःकायैः, परावृत्तिरभूत्तयोः । यथा स्वगृहजैर्मोहस्नेहरागैर्न लक्षितौ ॥ १३८ ॥**

**'तयोः'** शालिधन्ययोः । **'मनोवचःकायैः'** चेतोवचनदेहैः । **'तथा'** तेन प्रकारेण । **'परावृत्तिः'** परिवर्तनम् । **'अभूत्'** जातम् । **यथा मोहस्नेहरागैः**-मोहश्च स्नेहश्च रागश्चच येषां तैः । **'स्वगृहजैः'** स्वजनैरपि । **'न लक्षितौ'** न उपलक्षितौ ॥ १३८ ॥

**पुत्रिकापुत्रजामातृश्रीवीरागमजैरितः । काष्ठागतैश्चतूरूपैर्हर्षपूरैः प्रपूरिता ॥ १३९ ॥**

**ध्यानान्तरतरुच्छेदच्छेका भद्रातरङ्गिणी । रसैश्चिरणिटकाचुण्टीरप्यपूरयदञ्जसा ॥ १४० ॥**

**इतः** । **'पुत्रिका-पुत्र-जामातृ-श्रीवीरागमजैः'** पुत्रिका-सुभद्रा, पुत्रः शालिः, जामाता-धन्यः श्रीवीरश्च प्रभुः तेषां आगमात्-आगमनात् जातैः । **'चतूरूपैः'** पुत्री-पुत्र-जामातृप्रभुगतैः चतुर्विधरूपैः । नदीपक्षे-चतुर्दिग्गतैः । **'काष्ठागतैः'** काष्ठां-पराकाष्ठां गतैः-प्राप्तैः । पक्षे दिग्गतैः चतूरूपैः । **'हर्षपूरैः'** प्रमोदप्लवैः । **'प्रपूरिता'** प्रपूर्णा ॥ १३९ ॥ **'ध्यानान्तरतरुच्छेदच्छेका'** ध्यानान्तराणि-वीराद्यागमनध्यानाद् अन्यध्यानादि तानि एव तरवः तेषां छेदकारिका, पूरे प्रसृते भज्यन्ते हि तरवः । **'भद्रातरङ्गिणी'** भद्रामाता । पक्षे-भद्रानदी । **'रसैः'** स्नेहरसैः । पक्षे-जलैः । **'चिरण्टिकाचुण्टीः अपि'** वधूकूपिकाः अपि । **'अञ्जसा'** द्राग् । **'अपूरयत्'** पूरितवती ॥ १४० ॥

**अचिन्तयच्च दिष्ट्याऽद्य, भाग्यैर्जागरितं मम । आयया श्रीमहावीरस्त्रिलोकीतिलकोऽत्र यत् ॥ १४१ ॥**

**'अचिन्तयच्च'** चिन्तितवती च भद्रा । **अद्य दिष्ट्या**-आनन्दद्योतकमव्ययम् । **मम भाग्यैः**-पुण्यैः **जागरितं**-प्रकटितम् । **यत् त्रिलोकीतिलकः**-त्रिजगदवतंसः । **श्रीमहावीरः आययौ** ॥ १४१ ॥

**अन्यच्च मम सर्वस्वं, मम जीवितजीवितम् । वत्सः श्रीशालिभद्रश्च, सांयात्रिक इवागमत् ॥ १४२ ॥**

**'अन्यच्च'** अपरं च । **मम सर्वस्वं**-सर्वधनतुल्यम् । **'जीवितजीवितं'** मम प्राणानामपि प्राणाः । **'वत्सः'** प्रियपुत्रः श्रीशालिभद्रः । **'आगमत्'** आगतः । कः इव ? **'सांयात्रिकः इव'** पोतवणिग् इव । सांयात्रिकः समुद्रयात्रां कृत्वा पुनरागच्छति तथा ॥ १४२ ॥

**सौधस्य सुतशून्यस्य, द्वादशः परिवत्सरः । विस्मृतं मुखमप्यस्य, न च भद्रा न जीवति ॥ १४३ ॥**

**'सुतशून्यस्य'** पुत्ररहितस्य । **'सौधस्य'** प्रासादस्य । अयं **द्वादशः परिवत्सरः**-इदं द्वादशं वर्षम् वर्तते । **'अस्य'**

शालेः । **'मुखमपि विस्मृतं'** कीदृशं तस्य मुखमासीत् इत्यपि न स्मरामि । **'न च भद्रा न जीवति'** जीवत्येव इत्यर्थः । द्वौ नञौ प्रकृतमर्थं दर्शयतः । हा ! कथं जीवामि इति चिन्तयति सा ॥ १४३ ॥

**त्यक्तताम्बूलकल्पेऽत्र, भाव्यन्ते शालिवैभवे । कर्पूरपारिकाकारा, रङ्गरेखाजुषः स्नुषाः ॥ १४४ ॥**

**अत्र त्यक्तताम्बूल कल्पे**–उज्झितताम्बूलतुल्ये । **'शालिवैभवे'** शालिसमृद्धौ । **'रङ्गरेखाजुषः'** वर्णलेखायुक्ताः अपि । **'स्नुषाः'** पुत्रवध्वः । **'कर्पूरपारिकाकाराः'** घनसारघट तुल्याः पाण्डुवर्णाः । **'भाव्यन्ते'** दृश्यन्ते ॥ १४४ ॥

**विना पतिं च पुत्रं च, वशेवाहो निरङ्कुशा । सुखं निद्रायते भद्रा, निष्कृपा निरपत्रपा ॥ १४५ ॥**

**'पतिं च पुत्रं च विना'** गोभद्रं शालिभद्रं च विना । **अहो** आश्चर्ये । **'वशा इव'** हस्तिनी इव । **'निरङ्कुशा'** स्वच्छन्दा । **'निष्कृपा'** निष्करुणा । **'निरपत्रपा'** निर्लज्जा । **भद्रा** । **'सुखं निद्रायते'** सानन्दं घूर्णायते–इति भद्रा–चिन्तनम् ॥ १४५ ॥

**सा शालिजननीत्वेन, सम्भाव्ये कोविदैः कथम् । याऽहं शस्येषु गण्यापि, भद्रिकेव हि वातिका ॥ १४६ ॥**

**या अहं**–भद्रा । **'शस्येषु'** प्रशस्येषु । पक्षे धान्येषु । **'गण्याऽपि'** माननीयाऽपि **'भद्रिकेव'** 'भद्रिका' तुच्छधान्यविशेषः तत्समा । 'भाद्रडी' इति भाषायाम् । **हिः** निश्चये । **'वातिका'** वातुला–वायुकरी । **'भद्रिकेवातिवातिका'** इत्यपि पाठः । **'सा'** अहं भद्रा । **'कोविदैः'** विचक्षणैः । **'शालिजननीत्वेन'** शालिभद्रमातृत्वेन । पक्ष–शालिधान्यभूमित्वेन । **कथं सम्भाव्ये**–सम्भावनाविषयीभवामि ? ॥ १४६ ॥

**शिरीषसुकुमाराङ्गी, नन्दना मे सुयौवना । सासह्यते व्रतं कष्टं, निदाघमिव पद्मिनी ॥ १४७ ॥**

**'शिरीषसुकुमाराङ्गी'** शिरीषपुष्पवत् सुकोमलाङ्गी । **'सुयौवना'** शोभनं यौवनं यस्याः सा । **'नन्दना'** पुत्री, सुभद्रा साध्वी । **'कष्टं'** कष्टेन आचर्यते इत्थम्भूतम् । **'व्रतं'** दीक्षाम् । **'सासह्यते'** भृशं सहते । का इव ? **'पद्मिनी'** कमलिनी। **'निदाघमिव'** घर्ममिव ॥ १४७ ॥

**अहं जराभिभूताऽपि दुःखैरपि सुखैरिव । विप्लाविता शिवाऽन्धेव, कुलिकैर्बदरोद्भवैः ॥ १४८ ॥**

**अहं जरया**–वार्धक्येन । **'अभिभूताऽपि'** उपप्लुताऽपि । **सुखैरिव दुःखैरपि** । **'विप्लाविता'** विप्रतारिता । दृष्टान्तमाह– **'बदरोद्भवैः'** बदरजातैः । **'कुलिकैः'** फलैः । **'अन्धा शिवेव'** अन्धश्रृगाली इव । यदुक्तम्–'बदरेणाऽपि हि प्रभवेत्, शृगालस्य महान् महः ।' श्रृगालीवत् अहमपि तुच्छसांसारिकसुखैः वस्तुतः दुःखरूपैः विप्रतारिताऽस्मीत्यर्थः ॥ १४८ ॥

**भद्रं तस्याः सुभद्रायाः, शालिभद्रस्वसुर्यया । व्रतेनैकेन सत्येनानुगतौ वर-सोदरौ ॥ १४९ ॥**

**शालिभद्रस्य स्वसुः**–भगिन्याः **तस्याः सुभद्रायाः भद्रं**–मङ्गलं भूयात् । **यया एकेन सत्येन व्रतेन**–सत्याः इदं तेन सतीव्रतेन **वरसोदरौ**–पतिभ्रातरौ **अनुगतौ**–अनुसृतौ ॥ १४९ ॥

**स्त्रीणां भ्राता च भर्ता च, श्रृङ्गारौ भुवि दुर्लभौ । तस्याः किमुच्यते यत्तौ, श्रीवीरेण विशेषितौ ॥ १५० ॥**

**'भुवि'** जगत्याम् । **स्त्रीणां भ्राता च भर्ता च** सोदरः पतिश्च द्वावपि । **'श्रृङ्गारौ'** भूषणरूपौ दुर्लभौ स्तः । **'तस्याः'** सुभद्रायाः । किमुच्यते ? **'यत्'** यस्मात् । **'तौ'** शालिधन्यौ । **'श्रीवीरेण'** भगवता । **'विशेषितौ'** प्रभुनिश्रया विशेषतां गतौ ॥ १५० ॥

**रूपश्रिया जयन्तीव, वैजयन्ती निजान्वये । सा मे सुता समायाता, शीलशैलेशचूलिका ॥ १५१ ॥**

**'रूपश्रिया'** रूपलक्ष्म्या । **'जयन्तीव'** इन्द्रपुत्रीव । **'निजान्वये'** स्वकुले । **'वैजयन्ती'** पताका । **'शीलशैलेशचूलिका'** ब्रह्मचर्यमेरुशिखारूपा । **सा मे**-मम **सुता**-पुत्री सुभद्रा **समायाता**-समागता ॥ १५१ ॥

**धन्यः सुतापतिर्धन्यः, स नमस्यो महाव्रती । रेजेऽष्टाभिः प्रियाभिर्यो, मूर्ताभिरिव मूर्तिभिः ॥ १५२ ॥**

**'सुतापतिः'** जामाता । **'स धन्यः'** धन्याभिधः मुनिः । **'धन्यः'** पुण्यवान् । **स महाव्रती**-महामुनिः पक्षे-शङ्करः । 'महाव्रती वह्निहिरण्यरेताः' इति हैम्याम् । **'नमस्यः'** नमनीयः । **यः मूर्ताभिरिव अष्टाभिः मूर्तिभिः** अष्टमूर्तितुल्याभिः । **'प्रियाभिः'** प्रेयसीभिः । **'रेजे'** राजते स्म । शङ्करपक्षे-क्षिति-जल-पवन-हुताशन-यजमानाऽऽकाश-चन्द्र-सूर्याभिधाभिः मूर्तिभिः अष्टमूर्तिः शङ्करः यथा रेजे । 'मृत्युञ्जयः पञ्चमुखोऽष्टमूर्तिः' इति हैम्यां शिवनामसु ॥ १५२ ॥

**सङ्गतं सङ्गतं निस्सङ्गतं मेऽद्य कुटम्बकम् । सुप्रभातं प्रभातं तत्, स्ववशे श्वोवसीयसम् ॥ १५३ ॥**

**अद्य मे**-मम **निःसङ्गतं**-निरीहं **कुटुम्बकं**-दीक्षित पुत्र-पुत्री-जामातृरूपः परिवारः । **'सङ्गतं'** मीलितम् । **'सङ्गतं'** तत् युक्तम् । **'प्रभातं'** प्रत्युषम् । **'सुप्रभातं'** सुष्ठु प्रकाशितम् । **'स्ववशे श्वोवसीयसं'** स्वाधीनं च जातं कल्याणम् ॥ १५३ ॥

**विभाव्यैवमसम्भाव्यप्रमोदभरभास्वरा । भद्राऽवादीद्विनिद्रास्या, जननीव जनीजनम् ॥ १५४ ॥**

**'एवं'** उक्तप्रकारेण । **'विभाव्य'** विचार्य । **'असम्भाव्यप्रमोदभरभास्वरा'** असम्भाव्येन-अचिन्त्येन प्रमोदभरेण-हर्षभरेण भास्वरा-देदीप्यमाना । **'विनिद्रास्या'** प्रफुल्लवदना । **भद्रा** । **'जननीव'** माता इव न तु श्वश्रूरिव । **'जनीजनं'** वधूजनम् । **'अवादीत्'** भाषितवती ॥ १५४ ॥

**वत्सा वधूटिकाः ! कल्पकोटिकल्पा विकल्पिता । युष्माभिर्द्वादशाब्दीयं, दुर्लभे प्राणवल्लभे ॥ १५५ ॥**

**'वत्सा:'** हे पुत्र्य: । **'वधूटिका:'** हे पुत्रवध्व: । **'प्राणवल्लभे'** प्राणप्रिये शालिभद्रे । **'दुर्लभे'** दुष्प्रापे सति । **युष्माभि: इयं द्वादशाब्दी**-द्वादशानां अब्दानां वर्षाणां समाहार: । **'कल्पकोटिसमा'** युगकोटितुल्या । **'विकल्पिता'** चिन्तिता ॥ १५५ ॥

**युष्मद्ध्यानै: स्फुरद्वातै:, किं मनोरथिकैरिव । महापोत इवानिन्ये, दूरदेशान्तरात् प्रिय: ॥ १५६ ॥**

**'मनोरथिकैरिव'** मनोरथानां आशानां अयं तैरिव, मन:सारथिभिरिव वा । **'स्फुरद्वातै:'** उल्लसद्वायुसमै: । **'युष्मद्ध्यानै:'** युष्माकं ध्यानै: शालिविषयकै: । **किं दूरदेशान्तरात्**-दूरस्थितान्यदेशात् । **'महापोत: इव'** महाप्रवहणमिव । **'प्रिय:'** स्वामी । **'आनिन्ये'** आनीत: ? ॥ १५६ ॥

**तदद्य सोद्यमा यूयं, पुरा परिचितं चिरात् । श्रृङ्गारमनुगृह्णीत, विनीतमिव सेवकम् ॥ १५७ ॥**

**'तत्'** तस्मात् । **अद्य सोद्यमा:**-सप्रयत्ना: । **यूयं पुरा**-पूर्वम् । **चिरात्**-चिरकालम् । **'परिचितं'** सदा परिहितत्वात् परिचितम् । **'श्रृङ्गारं'** पट्टदुकूलादि मण्डनम् । **'विनीतं'** विनम्रम् । **'सेवकमिव'** दासमिव । **'अनुगृह्णीत'** परिधत्त इत्यर्थ: ॥ १५७ ॥

**द्रुतं सवनपीठं तद्, यात स्नातानुलिम्पत । अलङ्कारानलं कारागृहादद्य विमुञ्चत ॥ १५८ ॥**

**'तत्'** तस्मात् । **'द्रुतं'** क्षिप्रम् । **'सवनपीठं'** स्नानपीठम् । **'यात'** गच्छत । **'स्नात'** स्नानं कुरुत । **'अनुलिम्पत'** पश्चाद् विलेपनं कुरुत । **अद्य कारागृहात्**-गुप्तिगृहात् । **'अलङ्कारान्'** भूषणानि । **'अलं'** अत्यर्थम् । **'विमुञ्चत'** निष्कासयत ॥ १५८ ॥

**इति श्वश्रूनिदेशात्ता, उच्चरोमाञ्चकञ्चुका: । देहे गेहेऽप्यसंमान्त्यस्तदा तत्वरिरेतराम् ॥ १५९ ॥**

**इति श्वश्रूनिदेशात्**-भद्राऽऽदेशात् । **'उच्चरोमाञ्चकञ्चुका:'** उच्चा: रोमाञ्चा: एव कञ्चुका यासां ता: । **'देहे'** शरीरे ।

**'गेहेऽपि'** गृहेऽपि । **'असंमान्त्यः'** हर्षोत्कर्षत्वाद् अमान्त्यः । **'ताः'** पुत्रवध्वः । **'तदा'** तत्क्षणे । **'तत्वरिरेतरां'** शीघ्रतां चक्रुः ॥ १५९ ॥

**तदाऽऽदिष्टः सुसन्तुष्टः, परिवारोऽप्यवारितः । अन्योन्यं पूर्णपात्रार्थी, हर्षसांराविणं व्यधात् ॥ १६० ॥**

**तदा** । **'आदिष्टः'** भद्रया आदेशं प्राप्तः । **'तयाऽऽदिष्टः'** इत्यपि पाठः । **'सुसन्तुष्टः'** सम्यक् तृप्तः । **'अवारितः'** केनाऽपि अनिरुद्धः । **'परिवारः'** दासदास्यादिपरिजनः । **'पूर्णपात्रार्थी'** पूर्णपात्रस्य अर्थी इच्छुकः । 'उत्सवेषु सुहृद्भिर्यद्, बलादाकृष्य गृह्यते । वस्त्रपात्रादि तत्पूर्णपात्रं पूर्णानकं च तत् ॥" इति हैम्याम् । **'अन्योन्यं'** मिथः । **'हर्षसांराविणं'** हर्षेण सम्मदेन सांराविणं शब्दमयम् । अभिव्याप्तौ ।५।३।९०।। इत्यनेन ञिनि, नित्यं ञिनोऽण् ।७।३।५८।। इत्यनेन नित्यमण् । **'व्यधात्'** करोति स्म ॥ १६० ॥

**प्रमोदसागरे तत्र, कल्लोला इव किङ्कराः । एहिरेयाहिराञ्चक्रुर्नृत्यन्तोऽत्यन्तचञ्चलाः ॥ १६१ ॥**

**तत्र प्रमोद सागरे**–आनन्दाब्धौ । **'कलोल्ला इव'** तरङ्गाः इव । **'अत्यन्तचञ्चलाः'** अतिचपलाः । **'नृत्यन्तः'** धावन्तः । **'किङ्कराः'** सेवकाः । **'एहिरेयाहिराञ्चक्रुः'** एहि रे याहि रे इत्येवंविधान् शब्दान् कुर्वन्ति स्म ॥ १६१ ॥

**सत्वरं तत्र यास्यामि, दास्ये तत्र प्रदक्षिणाम् । साधुमण्डलसारस्य, ह्रीङ्कारस्येव वेष्टनाम् ॥ १६२ ॥**

**वन्दनेन मुनेस्तस्य, चन्दनेनेव निर्भरम् । सन्तापमपनेष्यामि, कुटुम्बायोगरोगजम् ॥ १६३ ॥**

**कपोलपालिलालित्ये, नेत्रराजीवराजिते । वेल्लद्भ्रूवल्लिके भालस्थले तन्मुखपल्वले ॥ १६४ ॥**

**चिरं मरुकुरङ्गीव, मम दृष्टिः पिपासिता । लावण्यसलिलं धीरा, मनोहत्य प्रपास्यति ॥ १६५ ॥**

**पुत्रमामन्त्रयिष्येऽहं, दिव्याहारेण लालितम् । अपि मर्त्योचितैरन्नपानैर्ग्राम्येव नागरम् ॥ १६६ ॥**

**एवं मनोरथरथव्यूहोध्दूतरजश्चयैः । निरुद्धनयनेवाम्बा, नालुलोके सुतं मुनिम् ॥ १६७ ॥**

**अथ भद्रामनोरथान्** षड्भिः श्लोकैः दर्शयति–'**तत्र**' शालिमुनिसमीपे । '**सत्वरं**' क्षिप्रम् । '**यास्यामि**' गमिष्यामि। '**ह्रिङ्कारस्य**' ह्रीं इति मन्त्रबीजस्य । '**वेष्टनामिव**' त्रिरेखावर्तुलमिव । **तस्य साधुमण्डलसारस्य**–मुनिसमूहे सारभूतस्य शालिमुनेः। **प्रदक्षिणां दास्ये** ॥ १६२ ॥ **तस्य मुनेः**। '**चन्दनेन इव**' श्रीखण्डेन इव । '**निर्भरं**' अत्यर्थम् । '**वन्दनेन**' नमस्कारेण। '**कुटम्बाऽयोगरोगजं**' कुटुम्बस्य अयोगः वियोगः सः एव रोगः तस्मात् जातम् । '**सन्तापं**' मनस्तापम् । '**अपनेष्यामि**' निवारयिष्यामि ॥ १६३ ॥ '**कपोलपालिलालित्ये**' कपोलपालिः–गण्डपालिरेव लालित्यं यत्र तस्मिन् । '**नेत्रराजीवराजिते**' नयनकमलशोभिते । '**वेल्लद्भ्रूवल्लिके**' वेल्लन्त्यः–चलन्त्यः भ्रुवः एव वल्लयः लताः यत्र तथाविधे, कः स्वार्थिकः । '**भालस्थले**' भालं–ललाटमेव स्थलं यत्र । '**तन्मुखपल्वले**' शालिवदनलघुसरसि ॥ १६४ ॥ **मरुदेशस्य कुरङ्गीव**–मृगीव । '**पिपासिता**' तृषिता । **मम धीरा**–धैर्यं प्राप्ता दृष्टिः । '**चिरं**' चिरकालं यावत् । '**मनोहत्य**' तृप्तिं यावत् । '**लावण्यसलिलं**' लावण्यजलम्। '**प्रपास्यति**' पानं करिष्यति ॥ १६५ ॥ '**दिव्याहारेण**' दिव्येन आहारेण स्वर्गीयेण अन्नेन । '**लालितमपि**' वर्धितमपि । '**पुत्रं**' तनयम् । **मर्त्योचितैः**' मनुष्ययोग्यैः । **अन्नपानैः** । **अहं आमन्त्रयिष्ये**–निमन्त्रणं करिष्यामि । दृष्टान्तमाह–'**ग्राम्या**' ग्रामीणा स्त्री । '**नागरमिव**' नगरनिवासिनं पुरुषमिव आमन्त्रयति ॥ १६६ ॥ **एवम्** ।'**मनोरथरथव्यूहोध्दूतरजश्चयैः**' मनोरथाः एव रथाः तेषां व्यूहस्य–समूहस्य उध्दूतैः ऊर्ध्वं गतैः रजश्चयैः पांशुसमूहैः ।

**'निरुद्धनयना इव'** आच्छादितनेत्रा इव । **'अम्बा'** भद्रा माता **'सुतं मुनिं'** गृहागतं शालिमुनिम् । **'न आलुलोके'** न दृष्टवती ॥ १६७ ॥

**यथा निधानं निष्पुण्या, दायं द्यूतोद्यता निजम् । हन्त भ्रान्ता न पश्यन्ति, दुर्दैवहताशयाः ॥ १६८ ॥**

**ध्यानधाराधिरोहेऽपि, भद्रा भद्रविनाकृता । तथा सम्भावयामास, गृहाङ्गणगतौ न तौ ॥ १६९ ॥**

**यथा** । **'निष्पुण्याः'** निर्भाग्याः । **'निधानं'** धननिधिम् । **न पश्यन्ति** । यदुक्तम्–''पदे पदे निधानानि, योजने रसकूपिका। भाग्यहीना न पश्यन्ति, बहुरत्ना वसुन्धरा ॥'' यथा । **'दुर्दैवहताशयाः'** दुर्भाग्यनष्टमनोरथाः । **'भ्रान्ताः'** भ्रान्तिं प्राप्ताः । **'द्यूतोद्यताः'** द्यूते उद्यताः–तत्पराः । **निजं दायम्** । 'दाव' इति भाषायाम् । **न पश्यन्ति । हन्तः** खेदे ॥ १६८ ॥ **तथा ।** **'ध्यानधाराधिरोहेऽपि'** शालिध्यानधारायाः अधिरोहे आरोहे अपि । **'भद्रविनाकृता'** भद्रेण मङ्गलेन विनाकृति रहिता । **भद्रा** । **'गृहाङ्गणगतौ'** गृहाङ्गणं गतौ–प्राप्तौ । **तौ** शालिधन्यौ मुनी । **'न सम्भावयामास'** न दृष्टवती ॥ १६९ ॥

**सम्भूय ललनाः शालेर्जगदु र्जगदुत्तमाः । विरहः सुसहः प्राणप्रिये प्रायः प्रवासजः ॥ १७० ॥**

**एकग्रामप्रवासस्तु, मरणादपि दुःसहः । प्रियालोकेऽपि सोऽस्माकं, साम्प्रतं न प्रयास्यति ॥ १७१ ॥**

**शालेः जगदुत्तमाः**–विश्वश्रेष्ठः । **'ललनाः'** प्रियाः । **'सम्भूय'** सम्मील्य । **'जगदुः'** वदन्ति स्म । **'प्रायः'** बहुधा। **'प्राणप्रिये'** पत्यौ गृहस्थे सति । **'प्रवासजः'** ग्रामान्तरप्रवासेन जातः । **'विरहः'** वियोगः । **'सुसहः'** सुखेन सह्यो भवति ॥ १७० ॥ **'तु'** परन्तु । **'एकग्रामप्रवासः'** एकस्मिन्नेव ग्रामे राजगृहे प्रवासः । **'मरणादपि दुःसहः'** स्त्रीणां हृदये प्रायेण इयं इच्छा वर्तते यत् पतिः सम्मुखं आगत्य मां सङ्गच्छतु, किन्तु अत्र स्वयमेव तत्र गन्तव्यम् । तत्र स्वयं

गमने न काऽपि गरिमा स्त्रीणाम् । अतः एकग्रामेऽपि प्रवासः मरणादपि दुःसहः प्रतिभाति । **अस्माकम्** । '**सः**' विरहः । '**प्रियालोकेऽपि**' प्रियस्य-प्रेयसः आलोकेऽपि दर्शनेऽपि '**साम्प्रतं**' इदानीम् । '**न प्रयास्यति**' न गमिष्यति ॥ १७१ ॥

**यद् वयं निजनाथस्य, स्वपाणिकमलार्चने । देवस्येवापवित्राङ्गा, दूरिताः पापपूरिताः ॥ १७२ ॥**

'**यतः**' यस्मात् । '**देवस्य इव**' जिनस्य इव । '**अपवित्राङ्गाः**' ऋतुमत्यः स्त्रियः । '**स्वपाणिकमलार्चने**' निजहस्ताम्बुजाभ्यां अर्चने-पूजने । '**दूरिता**' दूरे गताः । तथा **वयं पापपूरिताः** दुरितपूर्णाः । '**निजनाथस्य**' स्वस्वामिनः शालेः । स्वपाणिकमलार्चने दूरिताः वयं न स्वामिस्पर्शसौभाग्यं लप्स्यामहे इति भावः ॥ १७२ ॥

**हृदि प्रतिनिधिः स्नात्रप्रतिमेव निजेशितुः । श्रीमूलनायकस्यास्य, स्नाप्या हर्षजलैर्यदि ॥ १७३ ॥**

**अस्य श्रीमूलनायकस्य**-मन्दिरमूलनायकतुल्यस्य शालिमुनेः । '**स्नात्रप्रतिमेव**' स्नात्रबिम्बमिव । '**निजेशितुः**' स्वस्वामिनः। '**हृदि**' हृदये । '**प्रतिनिधिः**' प्रतिमा । '**यदि**' चेत् । '**हर्षजलैः**' प्रमोदपानीयैः । '**स्नाप्या**' स्नपनीया । इदमपि महत् सौभाग्यमिति शेषः । यथा मूलनायकप्रतिमायां गर्भगृहस्थितायां पूजकैः स्नात्रबिम्बं बहिः निष्कास्य पूज्यते तथा वयं हृदि शालिभद्रप्रतिनिधिं स्नापयिष्यामः इति भावः ॥ १७३ ॥

**समं चेत् प्राव्रजिष्याम, प्राणेशेन तदा मुदा । नाऽभविष्यत्तदा लोकापवादैः सुखखण्डना ॥ १७४ ॥**

'**तदा**' स्वामिदीक्षासमये । '**मुदा**' आनन्देन । '**प्राणेशेन**' शालिना स्वामिना । '**समं**' सह । '**चेत्**' यदि । '**तदामुना**' इत्यपि पाठः । '**प्राव्रजिष्याम**' प्रव्रज्यां अग्रहीष्याम । '**तदा**' तर्हि । '**लोकापवादैः**' अहो ! सतीभिरपि आभिः पतिः न अनुसृतः इत्येवंविधः लोकापवादः-लोकनिन्दा तैः । '**सुखखण्डना**' सुखदलनम् । **न अभविष्यत्** ॥ १७४ ॥

**वयं सम्प्रति पद्मिन्यः, सद्मदुःखजलाशये । पत्युः सूरस्य सत्तैव, न संवासः पुनर्यतः ॥ १७५ ॥**

'**सम्प्रति**' अधुना । **वयं सद्मदुःखजलाशये** गृहदुःखसरसि । '**पद्मिन्यः**' पद्मिनीस्त्रियः । सूर्यपक्षे–कमलिन्यः स्मः । '**यतः**' यस्मात् । '**सूरस्य**' धर्मवीरस्य । पक्षे–सूर्यस्य । '**पत्युः**' पतिदेवस्य । '**सत्तैव**' अस्तित्वमेव । **न पुनः संवासः**– सहवासः । यथा सरसि स्थिता पद्मिनी केवलं सूर्यप्रकाशमेव प्राप्नोति न संवासम् । तथा वयमपि सम्प्रति पतिसत्तामेव प्राप्नुमः, न सहवासमिति भावः ॥ १७५ ॥

**इति हर्षाश्रुसम्पृक्तविरहानलजैरिव । ध्रुवं धूमैर्विधुरिताः, कान्ता ददृशिरे न तम् ॥ १७६ ॥**

**इति** '**हर्षाश्रुसम्पृक्तविरहानलजैरिव**' हर्षाश्रुसम्पृक्तैः आनन्दाश्रुसंयुक्तैः विरहानलजैः–वियोगाग्निजातैः । अल्पजलसंयोगात् वर्धते एव धूमः अग्नौ । '**धूमैः**' धूम्याभिः । '**विधुरिताः**' व्याकुलाः । '**कान्ताः**' प्रेयस्यः । '**ध्रुवं**' निश्चितम् । '**तं**' शालिमुनिम् । '**न ददृशिरे**' न पश्यन्ति स्म ॥ १७६ ॥

**तपःश्रिया वल्लभया, पूर्वकान्ताभयादिव । मन्ये प्रचण्डयोगिन्या, निन्ये स किमदृश्यताम् ॥ १७७ ॥**

'**मन्ये**' अहं कविः मन्ये । '**प्रचण्डयोगिन्या**' अत्युग्ररोषणशीलया योगिन्या । '**तपः श्रिया**' तपश्चर्यालक्ष्म्या । '**वल्लभया**' प्रियया । '**पूर्वकान्ताभयादिव**' मा पूर्वप्रियासु आसक्तः स्यादिति भयादिव । '**सः**' शालिमुनिः । **किमदृश्यतां निन्ये** ? मा पूर्वप्रियासु आसक्तः स्यात् शालिमुनिः इति ईर्ष्यया इव योगिनीतुल्यया तपश्चर्यया स अदृश्यतां नीतः इति कविकल्पना ॥ १७७ ॥

**तन्नाममन्त्रमेवाभिर्जञ्जपूकाभिरप्यहो । न वरः प्राप्यसत्त्वाभिर्देवीवर इवागतः ॥ १७८ ॥**

**'तन्नाममन्त्रमेव'** शालिभद्रनाममन्त्रमेव । **'जञ्जपूकाभिरपि'** जपनशीलाभिरपि । **'आभिः'** शालिप्रियाभिः । **'असत्त्वाभिः'** सत्त्वहीनाभिः । **'देवीवरः इव'** देवीवरदानमिव । **आगतः वरः**–पतिः शालिमुनिवरः । **'न प्रापि'** न प्राप्तः । गृहागतः शालिमुनिः न दृष्टः इत्यर्थः ॥ १७८ ॥

**तेन कायस्तथा चक्रे, क्षामः प्रतिपदिन्दुवत् । यथा नादर्शि कान्ताभिरुषारूपाभिरप्यहो ॥ १७९ ॥**

**'तेन'** शालिमुनिना । **'प्रतिपदिन्दुवत्'** प्रतिपच्चन्द्रवत् । **'कायः'** शरीरम् । **तथा क्षामः**–कृशः । **'चक्रे'** कृतः । **यथा 'उषारूपाभिरपि'** कामपुत्रः अनिरुद्ध तत्पत्नी उषा तद्वद् रूपं यासां ताभिरपि । चन्द्रपक्षे–कामधेनुभिरपि । यतः उक्तम्–प्रतिपच्चन्द्रं सुरभिर्नकुलो नकुलीं पयश्च कलहंसः । कृष्णकवल्लीं पक्षी, सूक्ष्मं धर्मं सुधीर्वेत्ति ॥" (सुरभिः–धनुः) निशागोकामपुत्रवध्वर्थः उषाशब्दः । **अहो** आश्चर्ये । **'कान्ताभिः'** शालिपत्नीभिः । **'न अदर्शि'** न दृश्यते स्म । उषा (सुरभिः) प्रतिपच्चन्द्रं पश्यति किन्तु अत्र उषातुल्यभिरपि शालिपत्नीभिः कृशः शालिमुनिः न दृष्टः इति आश्चर्यम् ॥ १७९ ॥

**अवस्थाय प्रतस्थाते, तत्र सौधक्षणे क्षणम् । साधू अगाधमाध्यस्थ्यसुधाम्भोनिधिसिन्धुरौ ॥ १८० ॥**

**तत्र सौधक्षणे**–प्रासादोत्सवे । **'क्षणं'** मनाक् । **'अवस्थाय'** अवस्थानं कृत्वा । **'अगाधमाध्यस्थ्यसुधाम्भोनिधिसिन्धुरौ'** अगाध–माध्यस्थ्यमेव सुधाम्भोनिधिः–अमृतसमुद्रः तत्र सिन्धुरौ–कुञ्जरौ । **'साधू'** शालिधन्यौ । **'प्रतस्थाते'** प्रस्थानं कुर्वतः स्म ॥ १८० ॥

**स्वाम्यादेशात्तमावासं, विशतोरथ निर्यतोः । राज्याभिषेककाले श्रीरामलक्ष्मणयोरिव ॥ १८१ ॥**

**समचित्ततया हन्त ! क्षमापुत्र्या सशोभयोः । प्रकारः कोऽपि नाकारविकारस्य तयोरभूत् ॥ १८२ ॥**

**'राज्याभिषेककाले'** अयोध्याराज्याभिषेकसमये । **'स्वाम्यादेशात्'** श्रीवीरविभोरादेशात् । रामपक्षे-दशरथादेशात् । **'तमावासं'** भद्राप्रासादम् । **'विशतोः'** प्रविशतोः पक्षे-राज्याभिषेकाय प्रविशतोः । **अथ निर्यतोः**-निर्गच्छतोः-पक्षे-वनाय निर्गच्छतोः ॥ १८१ ॥ **हन्तः** खेदे । **'समचित्ततया'** प्रासादप्रवेशे ततः निर्गमे वा चेतसः साम्यभावात् । पक्षे-राज्याभिषेके वनवासे वा साम्यभावात् । **'क्षमापुत्र्याः'** क्षमायाः पुत्री समता तया । पक्षे पृथ्वीसुतया सीतया । **'सशोभयोः'** समतया शोभितयोः । पक्षे सीतया शोभितयोः । **'तयोः'** शालिधन्यमुन्योः । पक्षे-रामलक्ष्मणयोः । **'आकारविकारस्य'** आकृतेः विकारस्य । **कोऽपि प्रकारः**-विशेषः । **'न अभूत्'** न जातः । यदुक्तम् आहूतस्याभिषेकाय, विसृष्टस्य वनाय च । न मया लक्षितस्तस्य, स्वल्पोऽप्याकारविभ्रमः ॥ १८२ ॥

**क्व सा नृपतिमानेऽपि दुःखदा सुकुमारता । क्व मातुरपमानेऽपि, सुखदा तु कठोरता ॥ १८३ ॥**

**'नृपतिमानेऽपि'** श्रेणिकभूपसत्कारे अङ्कोपवेशनरूपेऽपि । **क्व सा दुःखदा**-कष्टदा । **'सुकुमारता'** सुकोमलता ? **क्व मातुः**-भद्रायाः ।**'अपमानेऽपि'** गृहे सत्काराऽभावात् ।**'सुखदा'** आनन्ददायिनी ।**तुश्च**कारार्थः ।**'कठोरता'** कठिनता ? ॥ १८३ ॥

**मा भूवन् सम्प्रति रागाङ्कुरा नीरसयोस्तयोः । चित्रं नादीपि कोपाग्नि-र्यत्तदा शुष्ककाष्ठयोः ॥ १८४ ॥**

**'नीरसयोः'** नीरागयोः । काष्ठपक्षे-शुष्कयोः । **'तयोः'** मुन्योः । **'साम्प्रतं'** अधुना अपमानेऽपि । **'रागाङ्कुराः'** स्नेहप्ररोहाः । **'मा भूवन्'** मा भवन्तु । किन्तु **तदा** । **'शुष्ककाष्ठयोः'** शुष्केन्धनसमयोः तयोः । **'कोपाग्निः'** रोषानलः । **'न अदीपि'** न अज्वालि । इति **चित्रं**-आश्चर्यम् । शुष्ककाष्ठे अङ्कुराः न प्ररोहन्ति, किन्तु घर्षणे जाते अग्निः आविर्भवत्येव, किन्तु अत्र शालिधन्यचेतसि अपमानेऽपि कोपाग्निरपि न जातः इति चित्रम् ॥ १८४ ॥

**अतिस्निग्धं जगन्मैत्र्या, मनः किं युग्मिकालवत् । निर्ममत्वेन किं चाति-रुक्षं प्रान्तारवत् तयोः ॥ १८५ ॥**

**संयमात्यन्तिकरतेः, स्वर्गसर्गायितं किमु ? । आविर्भावयतः प्राप, नात्र द्वेषवृषाकपिः ॥ १८६ ॥**

'**तयोः**' मुन्योः । '**मनः**' चेतः । **किं जगन्मैत्र्या** । '**युग्मिकालवत्**' अवसर्पिण्याः प्रथम-द्वितीय-तृतीयारकवत् । '**अतिस्निग्धं**' अतिस्नेहयुक्तम् । **किञ्च निर्ममत्वेन**-ममतारहिततया । '**प्रान्तारवत्**' प्रान्तः-चरमः षष्ठारः तद्वत् । '**अतिरुक्षं**' अतिरुक्षता-युक्तम् ? ॥ १८५ ॥ **किमु संयमात्यन्तिकरतेः**-संयमे चारित्रे आत्यन्तिकरतेः अतिशयितरागात् । '**स्वर्गसर्गायितं**' स्वर्गसृष्टितुल्यम् ? चारित्ररागात् सरागसंयमात् लभ्यते एव स्वर्गः । '**आविर्भावयतः**' प्रकटयतः जनस्य । '**अत्र**' मनसि । '**द्वेषवृषाकपिः**' कोपानलः । 'वृषाकपिः पावक-चित्रभानू' इति हैम्याम् । '**न प्राप**' न प्राप्तः । युग्मिकाले षष्ठारके देवलोके च कालस्य अतिस्निग्धत्वात् अतिरुक्षत्वाद् वा अग्निः न उत्पद्यते, तेन कवेरियं कल्पना ॥ १८६ ॥

**स्थानान्तरानपेक्षौ तौ, संवेगान्मुनिपुङ्गवौ । ववलाते शिरःस्थायि-स्वाम्याज्ञारश्मिराजितौ ॥ १८७ ॥**

'**स्थानान्तरानपेक्षौ**' अन्यस्थानगमने निरपेक्षौ । '**शिरःस्थायिस्वाम्याज्ञारश्मिराजितौ**' शिरसि-मस्तके स्थायिन्यः स्वामिनः वीरस्य आज्ञा-रश्मयः आज्ञाकिरणानि तैः राजितौ-शोभितौ । वृषभपक्षे-शिरःस्थायिशाकटिकरज्जुराजितौ । **तौ मुनिपुङ्गवौ**-मुनिसत्तमौ शालिधन्यौ । पक्षे-पुङ्गवौ-प्रधानवृषभौ । '**संवेगात्**' वैराग्यात् । पक्षे-सम्यग् वेगात् । '**ववलाते**' वलतः स्म ॥ १८७ ॥

**निरीयमाणयोः पुर्याः काचिन्मथितहारिका । तयोः संमुखमायासी-द्दधिपात्रावलीं दधिः ॥ १८८ ॥**

'**पुर्याः**' राजगृहपुर्याः । **निरीहमाणयोः** निर्गच्छतोः । **तयोः** साध्वोः । '**संमुखं**' पुरः । **दधिपात्रावलीं**

गोरसभाजनश्रेणिम्। '**दधिः**' धारयित्री, दधातीति दधिः । **काचित् मथितहारिका**-दध्यादिविक्रेत्री स्त्री । 'महीआरी' इति भाषायाम् । '**आयासीत्**' आगच्छति स्म ॥ १८८ ॥

**सा विद्यैव सदाभ्यासा, वृद्धभावेऽपि सस्फुरा । सतां मतिरिवात्यन्तं परिणामसुनिर्मला ॥ १८९ ॥**

**प्राज्यसौराज्यसन्नीतिरिवादण्डकरग्रहा । अहीनकरणस्थैर्यसिद्धव्यापारगौरवा ॥ १९० ॥**

**कात्यायनी निभाल्याऽथ सा युक्तं ब्रह्मचारिणम् । दधती विस्मिते नेत्र-कुमुदे मुमुदेतराम् ॥ १९१ ॥**

'**सा**' मथितहारिका स्त्री । '**सदाभ्यासा विद्या इव**' सदा अभ्यासः यस्यां सा विद्या तद्वत् । **वृद्धभावेऽपि सस्फुरा** वार्धक्येऽपि स्फूर्तिमती । '**सतां मतिः इव**' सज्जनानां बुद्धिः इव । **अत्यन्तं परिणामसुनिर्मला** अत्यन्तं भृशं परिणामे फले सुनिर्मला अत्यमला ॥ १८९ ॥ '**प्राज्यसौराज्यसन्नीतिः इव**' विशालसुराज्यसुनीतिः इव । '**अहीनकरण स्थैर्यसिद्धव्यापारगौरवा**' सम्पूर्णकार्य(साधन)स्थैर्येण सिद्धं व्यापारस्य वाणिज्यस्य गौरवं यस्याः सा । पक्षे-अहीनकरणस्थैर्येण-सम्पूर्णेन्द्रियस्थिरतया सिद्धं व्यापारस्य गौरवं यस्याः सा । '**अदण्डकरग्रहा**' यस्मिन् करदण्डाद्या न गृह्यन्ते सा वृद्धापक्षे-करे दण्डस्य अग्रहणात् ॥ १९० ॥ '**कात्यायनी**' अर्धवृद्धा मथितहारिका । पक्षे-गौरी । 'मृडानी-कात्यायन्यौ' इति हैम्याम्। '**युक्तं**' धन्यमुनिना युक्तं शालिभद्रमुनिम् । पक्षे-गणपति-सहितं (कार्तिकेयम्) । '**ब्रह्मचारिणं**' ब्रह्मशालिनं मुनिम् । पक्षे-कार्तिकेयम् । षाण्मातुरो ब्रह्मचारी इति हैम्याम् । **अथ सा** । **निभाल्य** विलोक्य । '**विस्मिते नेत्रकुमुदे**' प्रफुल्ले नयनकैरवे । '**दधती**' धारयन्ती । '**मुमुदेतरां**' मोदतेतरां स्म ॥ १९१ ॥

**सा प्राचीव रविं प्राप्य, विकस्वरमुखाम्बुजा । अमन्दानन्दपूर्णाङ्गी, चिन्तयामास चेतसि ॥ १९२ ॥**

**'रविं'** सूर्यम् । **'प्राप्य'** लब्ध्वा । **'प्राचीव'** पूर्वा दिगिव । **'विकस्वरमुखाम्बुजा'** प्रफुल्लवदनपद्मा । **'अमन्दा-नन्दपूर्णाङ्गी'** अनल्पप्रमोदेन पूर्णं-भृतं अङ्गं यस्याः सा । **'चेतसि'** मनसि । **'चिन्तयामास'** विचारयामास ॥ १९२ ॥

**सुधान्धुः किमयं बन्धुः, सुन्दरः सोदरः किमु ? । आशाव्यासनिवासाय, दिग्गजः किं ममाङ्गजः ? ॥ १९३ ॥**

**'अयं'** शालिमुनिः । **किं सुधान्धुः**-अमृतकूपः । **'बन्धुः'** स्वज्ञातीयो बान्धवः ? **किमु सुन्दरः सोदरः**-भ्राता ? किं **'आशाव्यासनिवासाय'** मनोरथविस्तारनिवासाय । पक्षे-दिग्व्यासनिवासाय । **मम दिग्गजः**-दिग्गजसमः । **'अङ्गजः'** पुत्रः ? ॥ १९३॥

**किं वाऽहं राज्यमापन्ना, किं वाऽहं स्वर्गमागता । किं वा प्रमोदमेदस्वि-दुग्धाब्धिजलमानुषी ॥ १९४ ॥**

**किंवा अहं राज्यं आपन्ना** प्राप्ता ? **किंवा अहं स्वर्गं**-देवलोकं **आगता**-आयाता ? **किंवा प्रमोदमेदस्विदुग्धाब्धिजलमानुषी** हर्षमेदुरक्षीरसागरे जलसुन्दरीसमा अहं जाता ? ॥ १९४ ॥

**आत्मानं नाभिजानामि, नाभिजानामि कोऽप्ययम् । किं त्वेवमभिजानामि, पर्व सर्वोत्तमं मम ॥ १९५ ॥**

**'आत्मानं'** स्वम् । **'नाभिजानामि'** नोपलक्षयामि **कोपि अयमिति** । **किन्तु एवं अभिजानामि** यत् अयं शालिमुनिः **मम सर्वोत्तमपर्व**-पर्वदिनम् ॥ १९५ ॥

**एवमस्या विकल्पालीप्रणालीमार्गलालितम् । हर्षाम्बुनेत्र-मार्गेणा-पूरयत् क्षेत्रभूमिकाम् ॥ १९६ ॥**

**एवं अस्याः**-मथितहारिकायाः । **नेत्रमार्गेण** नयनाध्वना । **विकल्पालीप्रणालीमार्गलालितं** विकल्पाः एव आली

श्रेणिः सैव प्रणालीमार्गः कुल्यामार्गः तेन लालितं नीतम् । **'हर्षाम्बु'** आनन्दाश्रुजलम् । **क्षेत्रभूमिकां** शरीरम् । पक्षे-क्षेत्रभूमिम्। **'अपूरयत्'** पूरितवत् ॥ १९६ ॥

**सर्वाभिसारः स्नेहस्य, स्तनयोः क्षीरकन्दयोः । प्रससार पयः पूरस्ततस्तस्याश्चिरादपि ॥ १९७ ॥**

**ततः तस्याः**-वृद्धायाः । **चिरादपि** वृद्धभावेऽपि । **'क्षीरकन्दयोः'** दुग्धमूलयोः' । **'स्तनयोः'** वक्षोजयोः । **'स्नेहस्य'** प्रेम्णः । **'सर्वाभिसारः'** सर्वतः अभितः सारभूतं सर्वस्वम् । **'पयःपूरः'** दुग्धपूरः । **प्रससार** प्रसरति स्म ॥ १९७ ॥

**भूमिष्ठे सकले देवे, दुग्धं क्षरति गौर्यथा । अज्ञातेऽपि तथा पुत्रे, प्रस्नुता साऽप्यसंस्तुता ॥ १९८ ॥**

**'सकले'** सप्रभावे । **देवे भूमिष्ठे** भूमिस्थिते । **यथा गौः** धेनुः । **दुग्धं** पयः । **क्षरति** स्रवति । **तथा असंस्तुताऽपि**-अपरिचिताऽपि । **'सा'** वृद्धा । **'अज्ञातेऽपि'** अविदितेऽपि । **'पुत्रे'** शालिमुनौ । **'प्रस्नुता'** दुग्धं प्रस्नुतवती ॥ १९८ ॥

**तत्र व्यतिकरे धर्म-सर्गादौ मुनिदर्शनात् । दुग्धं ववर्ष सोत्कर्षं, क्षीरकादम्बिनीव सा ॥ १९९ ॥**

**'मुनिदर्शनात्'** शालिमुनिविलोकनात् । **तत्र व्यतिकरे** वृत्तान्ते । **'धर्मसर्गादौ'** धर्मसृष्टेः आदौ, धर्मस्थापनात् पूर्वम्। **'क्षीरकादम्बिनीव'** दुग्धमेघमाला इव । **'सा'** मथितहारिका । **'सोत्कर्षं'** उत्कर्षसहितम् । **दुग्धं** पयः । **'ववर्ष'** वृष्टवती। **यथा युगादौ** मेघमाला वर्षति तथेयमपि ॥ १९९ ॥

**व्यजिज्ञपच्च सा दाना-शया शालिं शुभाशया । भवतः किं किमातिथ्यं, प्रशये नाथ! निर्धना ॥ २०० ॥**

**'दानाशया'** दाने-दानकरणे आशयः इच्छा यस्याः सा । **'शुभाशया'** कुशलाशया । **चः** समुच्चये । **'सा'** वृद्धा।

‘**शालिं**’ मुनिम् । ‘**व्यजिज्ञपत्**’ विज्ञपयामास । ‘**नाथ**’ हे स्वामिन् ! । ‘**निर्धना**’ । अहं **भवतः किं किं आतिथ्यं**-सत्कारम् । ‘**प्रथये**’ करोमि ? ॥ २०० ॥

**तथापि नाथ ! नाथे यत्, सत्पथे पान्थ ! ते शुभम् । शकुनं दधि तद्धीर ! गृहाणानुगृहाण माम् ॥ २०१ ॥**

**तथापि नाथ**–हे प्रभो ! ‘**सत्पथे**’ सन्मार्गे । ‘**पान्थ**’ हे प्रवासिन् ! । ‘**ते**’ तव । ‘**शुभं**’ कल्याणम् । ‘**नाथे**’ याचे वाञ्छे । ‘**तत्**’ तस्मात् । ‘**धीर**’ हे धैर्यशालिन् ! । ‘**शकुनं दधि**’ मङ्गलरूपं दधि । ‘**गृहाण**’ आदस्त्व । **मां अनुगृहाण** मयि अनुग्रहं कुरु ॥ २०१ ॥

**इत्युदीर्य प्रदायासौ, दधिभिक्षां मुमुक्षवे । धन्यंमन्या मुदाऽनंसी-च्चञ्चद्रोमाञ्चकञ्चुका ॥ २०२ ॥**

**इति उदीर्य**–कथयित्वा । ‘**मुमुक्षवे**’ मुनये । **दधिभिक्षां प्रदाय**–प्रकृष्टभावेन दत्वा । ‘**धन्यंमन्या**’ आत्मानं धन्यं मन्यते इत्येवंशीला । **चञ्चद्रोमाञ्चकञ्चुका** उच्छलत्पुलककञ्चुका । ‘**असौ**’ मथितहारिका धन्या । ‘**मुदा**’ आनन्देन । ‘**अनंसीत्**’ नमति स्म ॥ २०२ ॥

**दुग्धमेघायिता पूर्वं, महामेघायिताऽश्रुभिः । दधिमेघायिता दानात्, सुधामेघायिता गिरा ॥ २०३ ॥**

‘**पूर्वं**’ दुग्धमेघायिता प्रस्नवेन दुग्धमेघतुल्या । ‘**अश्रुभिः**’ नयनजलैः । ‘**महामेघायिता**’ महामेघसमा । ‘**दानात्**’ दधिदानात् । **दधिमेघायिता** दधिमेघसमा । ‘**गिरा**’ मधुरवचनेन । ‘**सुधामेघायिता**’ अमृतमेघसमा । असौ मथितहारिका बभूव ॥ २०३ ॥

**संसिच्य पुण्यबीजानि, यथास्थानमियाय सा । साधू सर्वोपधाशुद्धं, तदेवादाय जग्मतुः ॥ २०४ ॥**

**'पुण्य-बीजानि'** सुकृतबीजानि । **'संसिच्य'** दानजलेन संसिच्य । **'यथास्थानं'** इष्टं स्वस्थानम् । **'सा'** वृद्धा । **'इयाय'** गता । **'तदेव'** आदत्तं दधि एव । **'सर्वोपधाशुद्धं'** सर्वपरीक्षाशुद्धम् । **'आदाय'** गृहीत्वा । **'साधू'** शालिधन्यौ । **'जग्मतुः'** गतौ ॥ २०४ ॥

**श्रीवीरं प्रणिपत्येर्या-पथिकीपूर्वकं ततः । शालिः प्राह मम स्वामिन् ! पारणं मातृतः कथम् ? ॥ २०५ ॥**

**'ततः'** तत्पश्चात् । **'ईर्यापथिकीपूर्वकं'** ईर्यापथिकीप्रतिक्रमणपूर्वकम् । **श्रीवीरं प्रणम्य**-वन्दित्वा । **शालिः प्राह स्वामिन् ! मम पारणं मातृतः**-भद्रातः **कथम्** ? ॥ २०५ ॥

**आदिदेशाथ सर्वज्ञः, शालिभद्र ! महामुने ! । प्राग्जन्मजननी वत्स ! तवेयं दधिदानकृत् ॥ २०६ ॥**

**अथ सर्वज्ञः**-सर्ववेत्ता श्रीवीरः । **'आदिदेश'** उवाच, **'महामुने'** हे मुनिवर ! शालिभद्र ! । **'इयं'** वृद्धा मथित-हारिका धन्या । **'दधिदानकृत्'** दध्नः प्रतिलम्भिका । **'प्राग्जन्मजननी'** तव पूर्वजन्ममाता अस्ति ॥ २०६ ॥

**पुरा नाम्नैव धन्याऽऽसीत, शालिग्रामनिवासिनी । सैव सत्याऽधुना जाता, भवतो दधिदानतः ॥ २०७ ॥**

**शालिग्रामनिवासिनी पुरा पूर्वं नाम्ना एव 'धन्या' आसीत् । अधुना भवतः दधिदानतः सा एव सत्या यथार्था धन्या जाता** ॥ २०७ ॥

**स्वरूपं श्रीवीरात्तदिदमखिलं पूर्वभवजं, निशम्य श्री शालिः प्रबलतरवैराग्यकलितः ।**

**प्रयोक्ष्ये भोज्ये त्वां दिवि बहिरिति प्रेक्ष्य च मनः, स धन्यः कायस्य स्थितिरियमतः पारणमधात् ॥ २०८ ॥**

**श्री वीरात्** भगवतः **तद् इदं अखिलं पूर्वभवजं** पूर्वजन्मसम्बन्धि **स्वरूपं** निशम्य आकर्ण्य **प्रबलतरवैराग्यकलितः** प्रकृष्टतरनिर्वेदसहितः **श्रीशालिः** मुनिः । हे देह ! **भोज्ये**-भोजने **प्रयोक्ष्ये**-प्रयुक्तं करिष्यामि । **इति दिवि** आकाशे स्वर्गे **'बहिः'** शरीराद् बहिः । **चः** समुच्चये । **मनः प्रेक्ष्य** दृष्ट्वा स्थापयित्वा इत्यर्थः । शरीरात् मनः पृथक्कृत्य इत्यर्थः । **स धन्यः**-सुकृती । **'इयं'** भोजनादिका । **'कायस्य'** शरीरस्य **'स्थितिः'** स्वभावः । **'अतः'** इतिकृत्वा **पारणम् अधात्**-अकरोत् । शालिभद्रस्य आत्मा उक्तवान् हे देह ! त्वां भोजने योक्ष्ये हे मनः त्वां च दिवि योक्ष्ये एवं कृत्वा पारणं कृतम् । मनसा विना भुक्तमित्यर्थः । शिखरिणीवृत्तमिदम् । तल्लक्षणं चेदम्-''रसै रूद्रैश्छिन्ना यमनसभला गः शिखरिणी'' ॥ २०८ ॥

**विशालां श्रीशालेः कथमहमिह स्तौमि समतां, जनन्यायादुच्चैरिव निजजनन्याऽपि जनितैः ।**
**असंमानैरेतैरशनिनिशितैः पश्य पतितै, रपि क्षीराम्भोधि र्ज्वलति विगलत्येव हिमवान् ॥ २०९ ॥ ( शिखरिणी )**

**श्री शालेः विशालां**:-विपुलां **समतां**-मध्यस्थतां तुल्यतां वा । **'इह'** भुवि । **'कथं' स्तौमि** कथं शब्दैः स्तुतिविषयीकरोमि ? **''जनन्यायादुच्चैरिव** लोकन्यायादपि उपरिस्थितैरिव । **निजजनन्याऽपि** स्वमात्रा भद्रया अपि । **''जनितैः''** उत्पादितैः । **एतैः अशनिनिशितैः**-वज्रतीक्ष्णैः । **'असंमानैः'** असत्कारैः अपमानैः । समताभङ्गो नाभूदिति शेषः । **'पश्य'** विलोकय । **''पतितैः''** दिवः पतितैः अशनिभिः । **क्षीराम्भोधिरपि** दुग्धजलधिरपि । **'ज्वलति'** दहति । **'हिमवानपि'** हिमपर्वतोऽपि । **'गलति एव'** द्रवति एव अयं शालिस्तु न, तत्कथं तेन समुद्रेण गिरिणा वा समता (तुल्यता) स्यात् ? ॥ २०९ ॥

**क्षमाभृतः प्रापुरिहापमाना-शनिप्रहारैर्निजपक्षहानिम् । असौ तु साम्यामृतसिन्धुशायी, मैनाकवन्नाकलयाञ्चकार ॥ २१० ॥**
**( उपजाति )**

**'अपमानाशनिप्रहारैः'** अपमानवज्राघातैः । **'क्षमाभृतः'** अन्ये मुनयः पर्वताश्च **'निजपक्षहानिं'** मुनिपक्षे समतापक्षनाशम्। पर्वतपक्षे-निजपक्ष('पांख' इति भाषायाम्)नाशम् **'तु'** किन्तु । **'असौ'** शालिभद्रः । **'साम्यामृतसिन्धुशायी'** समतासुधाम्भोनिधिशायी । **'मैनाकवत्'** मैनाकनामा हिमालयपुत्रः पर्वतः तद्वत् । **न आकलयाञ्चकार** निजपक्षहानिं न प्राप्नोति स्म । मैनाकपर्वतः सागरे निमग्नोऽस्ति ततः स अशनिप्रहारविषयो न भवति । तद्वत् शालिमुनेरपि समतामृतसागरनिमग्नत्वात् समताभङ्गाभावः इति भावः ॥ २१० ॥

**पूर्वं पायसशम्बलेन तनयं, निन्ये कुलं तादृशं, पश्चाद् गोरससशम्बलेन किल या, सर्वार्थसिद्धिश्रियम्।**
**धन्या सैव जनन्यतः परतरां भद्रामभद्रामथो, नो मन्येऽन्तरवासकेऽपि वसतो मातेति यद्गीः सताम् ॥ २११ ॥**

**'पूर्वं'** सङ्गमभवे । **'पायसशम्बलेन'** परमान्नपाथेयेन । **'यया'** धन्यया । **'तादृशं कुलं'** गोभद्रस्य ऋद्धिमत् कुलम्। **'निन्ये'** सङ्गमं नीतवती । **'पश्चात्'** शालिभद्रभवे । **'या'** धन्या मथितहारिका **किलः** निश्चयार्थः । **'गोरस-शम्बलेन'** दधिपाथेयेन । **'सर्वार्थसिद्धिश्रियं'** पञ्चमानुत्तर-विमानलक्ष्मीं नेष्यति । **'धन्या'** पुण्यवती मथितहारिका धन्या । **सा एव जननी**-माता । **अथो अतः परतरां** अन्याम् । **'अभद्रां'** अधन्यां अमङ्गलाम् । **'भद्रां'** मातरम् । **नो मन्ये** । **'यत्'** यतः । **'अवासकेऽपि'** प्रासादादिकं अदत्वा अवासकेऽपि मातृजने । **'अन्तर्'** चेतसि । **'वसतः'** निवसतः पुत्रजनस्य । **'माता'** जननी सत्या । इति सतां-सज्जनाम् । **'गीः'** वचनम् । अयं भावः-धन्यया यद्यपि शालिभद्राय प्रासादादिकं न दत्तम् । तथापि यदा सा शालिमुनिदृष्टि-पथे समायाता तदा सा शालिमनसि प्रविष्टैव । तस्याः दध्नः शालिमुनिना आदत्तत्वात् ॥ २११ ॥

श्री शालिचरिते धर्म-कुमार सुधिया कृते । श्रीप्रद्युम्नधिया शुद्धे, षष्ठोऽयं प्रक्रमोऽभवत् ॥ २१२ ॥

इति श्रीकच्छवागड देशोद्धारक तपागच्छाचार्य श्री विजय कनक सूरिजी प्रशिष्याचार्य
विजय कलापूर्ण सूरिजी शिष्य मुनिश्री कलाप्रभ विजयजी (आ. विजय कलाप्रभसूरिजी)-शिष्य
मुनिश्री (पंन्यास) मुक्तिचन्द्र विजयजी - शिष्य मुनिश्री (पंन्यास) मुनिचन्द्र
विजय विरचितायां श्रीशालिभद्र - महाकाव्यस्य
सानुवादटीकायां षष्ठः प्रक्रमोऽभवत् ।

इति श्री शालिलीलाकथायां श्रीशालिभद्र विहार मातृगृहागमनपारणवर्णनो नाम षष्ठः प्रक्रमः ।

# ॥ अथ सप्तमः प्रक्रमः ॥

**श्रीशालेः साधुमूर्धन्यामनुत्तरफलोदयाम् । विचारयन्तु चतुरा, मङ्गल्यामक्षतश्रियम् ॥ १ ॥**

'**चतुराः**' हे प्रवीणजनाः ! । '**श्रीशालेः**' श्री शालिभद्रमुनेः । पक्षे शालिधान्यस्य । '**साधुमूर्धन्यां**' मुनिमुख्याम्। पक्षे-शोभनधान्येषु प्रधानाम् । '**अनुत्तरफलोदयां**' अनुत्तर विमानफलोदयाम् । पक्षे अद्वितीयफलोदयाम् । '**मङ्गल्यां**' मङ्गलरूरपाम् । '**अक्षतश्रियं**' अखण्डां मोक्षलक्ष्मीम् । पक्षे-शालिधान्यशोभाम् । '**विचारयन्तु**' चिन्तयन्तु ॥ १ ॥

**शालि-मुनेः अनशन-विषयणी विचारणा–**

**अथ श्रीवीरवाक्यानां, शालिभद्रमुनिः स्मरन् । विममर्श मनस्येवमषडक्षीणमन्त्रवित् ॥ २ ॥**

**अथ श्री वीरवाक्यानां**-श्रीवीरवाक्यानि, अत्र कर्मार्थे षष्ठी, स्मृत्यर्थदयेशः ।२।२।१०॥ इति वैकल्पिकी कर्मसंज्ञा । '**स्मरन्**' चिन्तयन् । **शालिभद्रमुनिः** । '**अषडक्षीणमन्त्रवित्**' चतुष्कर्णमन्त्रणावेत्ता । '**मनसि**' हृदये । '**एवं**' अग्रे वक्ष्यमाणम्। '**विममर्श**' विमृशति स्म ॥ २ ॥

**प्रविश्य गर्भे नेपथ्यं, परावृत्य पुनः पुनः । नरीनर्ति नटः प्राणी, कटरे भवनाटके ॥ ३ ॥**

'**कटरे**' आश्चर्यद्योतकमव्ययम् । '**नटः**' नटसमः प्राणी, गर्भे-गर्भरूपायां जवनिकायाम् । '**प्रविश्य**' मध्ये गत्वा । '**नेपथ्यं**' वेषम् । **पुनः पुनः परावृत्य** । '**भवनाटके**' संसार-रङ्गभूमौ । '**नरीनर्ति**' वारं वारं नृत्यति ॥ ३ ॥

**कुत्र सा कुक्कुटग्रामवासव्यासविडम्बना ? । क्व मे सुपर्वदेशीयगुणगौराङ्गपौरता ? ॥ ४ ॥**

'**कुक्कुटग्रामवासव्यासविडम्बना**' कुक्कुटग्रामे कुत्सितग्रामे वासव्यासात्-निवासप्रपञ्चात् विडम्बना-कदर्थना। **कुत्र सा** ? '**सुपर्वदेशीयगुणगौराङ्गपौरता**' सुपर्वदेशीया देवतुल्या गुणगौराङ्गा गुणोज्ज्वल शरीरा पौरता-नागरिकता **क्व मे**-मम ? ॥ ४ ॥

**पराभवपदं न्यूना, सर्वथा कण्टकाशना । सदाभीरीदृगाभीरी, माता मञ्जेव मे पुरा ॥ ५ ॥**

'**पुरा**' पूर्वं सङ्गमभवे । '**मे माता**' मम जननी धन्या । '**सर्वथा पराभवस्थानं**' सर्वप्रकारेण अभिभव-स्थानम् । '**न्यूना**' तुच्छा । '**कण्टकाशना**' कण्टकमयाहार भक्षणा । '**सदाभीः**' सदा भयवती । '**ईदृगाभीरी**' इत्थम्भूता मथितहारिका । **मञ्जा इव** । अजा इव । अभूत् । अजाऽपि कण्टकभक्षिका सदा भीता तुच्छा पराभवस्थानं च भवति ॥ ५ ॥

**इदानीं जननी राजवल्लभा दुर्लभान् पुनः । वधूकृत्यविधौ रत्नकम्बलानप्यपीपटत् ॥ ६ ॥**

**इदानीं** इह भवे **जननी**-भद्रा पुनः । '**वधूकृत्यविधौ**' पुत्रवधूकार्यकरणे । '**राजवल्लभादुर्लभान्**' राजराज्ञीभिः चेल्लणादिभिः दुर्लभान् । **रत्नकम्बलानपि** । '**अपीपटत्**' पाटयामास ॥ ६ ॥

**पितुर्नामाऽपि नाज्ञायि, तत्र दूरेऽस्तु दर्शनम् । एहिरेयाहिराऽकारि, गोभद्रेणाऽत्र मत्कृते ॥ ७ ॥**

'**तत्र**' सङ्गमभवे । **पितुः**-जनकस्य । **नाम अपि** । '**न अज्ञायि**' न ज्ञातम् । **दर्शनं तु दूरे अस्तु** । '**अत्र**' इहभवे। '**मत्कृते**' मदर्थम् । '**गोभद्रेण**' पित्रा देवेन । '**एहिरेयाहिरा**' गमनागमनक्रिया । '**अकारि**' कृता ॥ ७ ॥

**पशुदासस्तदाऽभूवं, ग्रामादपि बहिश्चरः । पण्यमज्ञासिषं भूपं, त्विदानीं ललितेश्वरः ॥ ८ ॥**

**तदा ग्रामादपि बहिश्चरः**–शालिग्रामादपि बहिः पर्यटक– । **'पशुदासः'** गोपालः । **अभूवम्** । **इदानीं तु ललितेश्वरः**–महेभ्यः अहम् । **भूपं**–श्रेणिकम् । **'पण्यं'** क्रयाणकम् । **'अज्ञासिषं'** ज्ञातवान् ॥ ८ ॥

**कृपालुभ्यः प्ररुदिता, परान्नं प्रापयत् प्रसूः । पूर्वं प्रमुदितस्तेन, प्राप्तराज्य इवाभवम् ॥ ९ ॥**

**भवेऽस्मिन् वैभवाभोगानुभावानुभवं निजम् । परस्वाम्यभिधानेन, मेनेऽहं व्याघ्रबालितम् ॥ १० ॥**

**'पूर्वं'** प्राक् । **'प्ररुदिता'** प्रकर्षेण रुदिता माता धन्या । **'कृपालुभ्यः'** दयालुभ्यः प्रातिवेश्मिकेभ्यः महिलाजनेभ्यः । **'परान्नं'** क्षीरम् । **'प्रापयत्'** प्रापयति स्म । **'तेन'** परमान्नेन । **'प्रमुदितः'** प्रहृष्टः सन्नहम् । **'प्राप्तराज्य इव'** समासादितसाम्राज्य इव । **अभवम्** ॥ ९ ॥ **अस्मिन् भवे निजम्** । **'वैभवाभोगानुभावानुभवं'** वैभवानां आभोगः विस्तारः तस्य अनुभावः–प्रभावः तस्य अनुभवम् । **'परस्वाम्यभिधानेन'** परः स्वामी इति अभिधानेन कथनेन । **'व्याघ्रबालितं'** व्याघ्रबालाचरितम् । **'अहं मेने'** मन्ये स्म ॥ १० ॥

**अभविष्यत्तदा जन्मनाशो मे ग्रामवासिनः । मदीयभाग्यैर्नायास्यद्, यद्यानुपदिको मुनिः ॥ ११ ॥**

**तदा मे ग्रामवासिनः जन्मनाशः**–मृत्युः **अभविष्यत् यदि मदीयभाग्यैः आनुपदिकः**–पृष्ठलग्नः **मुनिः न आयास्यत्** ॥ ११ ॥

**ध्रुवं यस्याः प्रशस्यायाः, सत्त्वसाहाय्यसाहसैः । प्राप्तोऽहमियतीं भूमिमश्वः क्षेत्रगुणैरिव ॥ १२ ॥**

**सा तद्रूपैव दुःस्था च, मम जन्मान्तरस्थितेः । पारणे कारणं जज्ञे, वात्सल्यामृततल्लिका ॥ १३ ॥**

**'ध्रुवं'** नूनम् । **'प्रशस्यायाः'** उत्तमायाः । **'यस्याः'** पूर्वमातुः धन्यायाः । **'सत्त्वसाहाय्य साहसैः'** परमान्नभक्षणावसरे दधिदानावसरे च एतल्लक्षणैः गुणैः । **अहं इयतीं भूमिं**-कक्षाम् । अश्वपक्षे-भुवम् । **प्राप्तः** । **'क्षेत्रगुणैरिव'** रेणुरहितादिभूमिगुणैरिव। यथा अश्वः रेणुरहितादिभूभागे क्षिप्रं गच्छति तथा **अहमपि** धन्यामातुः **सत्त्वसाहाय्यसाहसैः** गुणैः इयतीं कक्षां प्राप्तोऽस्मीत्यर्थः ॥ १२ ॥ **'सा'** धन्या माता अधुनाऽपि **'तद्रूपैव'** तद्विधा एव । **'दुःस्था'** दरिद्रा । **'जन्मान्तरस्थितेः'** जन्मान्तरं अन्यजन्म तस्मिन् स्थितिः यस्य तस्य मम । **'वात्सल्यामृततल्लिका'** वात्सल्यामृतस्य तल्लिका-तटाकिका सा । **पारणे कारणं जज्ञे**-जाता ॥ १३ ॥

**अपाङ्गाङ्गणकोणस्थं, शोणभागमिवाहता । भद्रादृष्टिरिहाद्राक्षीत्, न मां परिचितं सदा ॥ १४ ॥**

**'अपाङ्गाङ्गणकोणस्थं'** अपाङ्गाङ्गणस्य, अपाङ्गं भिक्षाचरोचितत्वात् । नेत्रपक्षे-नेत्रप्रातरूपाङ्गणस्य, कोणे विभागे स्थितम्। **'सदा परिचितं'** नित्यं सुज्ञातम् । नेत्रपक्षे सदा सन्निहितत्वात् परिचितम् । **'शोणभागमिव'** रक्तांशमिव । **मां न अद्राक्षीत्**-न पश्यति स्म । यथा दृष्टिः स्वकोणस्थितमपि रक्तांशमपि न पश्यति तथा अहमपि स्वाङ्गणस्थितोऽपि भद्रया न दृष्टः इति भावः ॥ १४ ॥

**न पूर्वया न परया, मम मात्राशयाऽद्य तत् । कल्याणाद्रिं जिगमिषोः, कार्यमुत्तरकाष्ठया ॥ १५ ॥**

**'तत्'** तस्मात् । **'कल्याणाद्रिं'** शिवगिरिं मुक्तिमित्यर्थः । पक्षे-कनकाचलं मेरुम् । **'जिगमिषोः'** गमनेच्छोः । **मम अद्य । न पूर्वया मात्रा**-न पूर्वभवमात्रा धन्यया । पक्षे-आशया पूर्वदिशा । **'न परया मात्रा'** न पाश्चात्यया भद्रया जनन्या। पक्षे आशया पश्चिमया दिशा । **'कार्यं'** अपेक्षा । किन्तु । **'उत्तरकाष्ठया'** उत्तरक्रियया अनशनक्रियया । पक्षे

उत्तरदिशा कार्यम् । इतः मेरुः उत्तरदिशि वर्तते तत्र गन्तुकामः यथा उत्तरदिशमेव वाञ्छति तथा अहमपि उत्तरक्रियामनशनक्रियामेव समीहे इत्यर्थः ॥ १५ ॥

**प्रयोगमिव निर्वेदवेदस्येति विमृश्य सः । श्रेयः पुरीपथाध्वन्यं, धन्यं मुनिमुवाच च ॥ १६ ॥**

इति '**निर्वेदवेदस्य**' वैराग्यवेदस्य । '**प्रयोगमिव**' प्रणवं ओङ्कारमिव अनशनप्रयोगम् । '**विमृश्य**' चिन्तयित्वा । '**सः**' शालिमुनिः । '**श्रेयःपुरीपथाध्वन्यं**' मुक्तिनगरीमार्गप्रवासिनम् । **धन्यं मुनिम्** । '**उवाच**' कथितवान् ॥ १६ ॥

**धन्यानामपि धान्यानामिव दुःखै र्घरट्टकैः । दलितानां भवेत्प्रायो, धर्माङ्कूरप्ररोहणा ॥ १७ ॥**

'**घरट्टकैः**' घरट्टतुल्यैः । **दुःखैः** । '**दलितानां**' पिष्टानाम् । '**धान्यानामिव**' व्रीहीणामिव । '**धन्यानामपि**' पुण्यवतामपि । **प्रायः धर्माङ्कूरप्ररोहणा** भवेत् । दुःखितानां भवति प्रायेण धर्ममार्गे गतिः यथा घरट्टैः पिष्टानां धान्यानां सुपात्रदानात् दानधर्माङ्कूरप्ररोहणा भवति ॥ १७ ॥

**धूर्तराजं महामोहं, विप्रतार्य पुनर्भवान् । सुधी र्विसाधयामास, वर्करेण महावृषम् ॥ १८ ॥**

'**धूर्तराजं**' वञ्चकमुख्यम् । **महामोहं विप्रतार्य**-वञ्चयित्वा । '**भवान्**' तत्रभवान् । '**सुधीः**' सुमतिः । '**वर्करेण**' लीलया । 'खेला ललनं वर्करोऽपि च' इति हैम्याम् । पक्षे-अजापुत्रेण । 'बकरो' इति भाषायाम् । '**महावृषं**' महापुण्यम् । पक्षे-महावृषभम् । '**विसाधयामास**' विशेषेण साधितवान् । यथा कोऽपि अजापुत्रं (बर्करम्) दत्त्वा महावृषभं गृह्णीयात् तथा भवताऽपि महापुण्यं लीलया अर्जयित्वा मोहराजः वञ्चितः-इति धन्यमुनिं प्रति शालिमुनिकथनम् ॥ १८ ॥

**श्रीमद्धर्मसुनासीरनवनासीर वीर ! ते । रोगद्वेषादयो दूरे, दानवाः सर्वदा नवाः ॥ १९ ॥**

‘**श्रीमद्धर्मसुनासीरनवनासीर वीर**’ धर्मदेवेन्द्रसेनायां नव्याग्रयाने वीर हे मुने ! । ‘**ते**’ तव । ‘**सर्वदा**’ सदा । ‘**नवाः**’ नूतनाः । ‘**रागद्वेषादयः दानवाः**’ अशुभ भावरूपाः दैत्याः । ‘**दूरे**’ दूरे गताः ॥ १९ ॥

**विक्रान्तेन त्वया क्रान्तं, मोहदुर्गं सुदुर्गमम् । बाढं प्रौढं समारूढा, मादृशाः कातरा अपि ॥ २० ॥**

‘**विक्रान्तेन**’ पराक्रमिणा । **त्वया** । ‘**सुदुर्गं**’ अतिदुर्लङ्घ्यम् । ‘**मोहदुर्गं**’ मोहराजस्य विषमवप्रम् । ‘**क्रान्तं**’ लङ्घितम् । ‘**मादृशाः**’ **कातराः अपि** भीरवोऽपि । ‘**बाढं**’ अत्यर्थम् । प्रौढताशालिनं भवन्तं । ‘**समारूढाः**’ समाश्रिताः ॥ २० ॥

**सद्यस्तदन्तरङ्गारिचक्रे समितिनिर्जिते । आवयोर्दधिभोज्येन, संजज्ञे वीरपाणकम् ॥ २१ ॥**

‘**तत्**’ तस्मात् । ‘**सद्यः**’ सपदि । ‘**अन्तरङ्गारिचक्रे**’ भावशत्रुसमूहे । ‘**समितिनिर्जिते**’ समितिगुप्तिभिः जिते । शत्रुपक्षे-सङ्ग्रामैः जिते । ‘समिति-सङ्गरौ’ इति हैम्याम् । ‘**दधिभोज्येन**’ दध्नः भोजनेन । **आवयोः वीरपाणकं**-वीराणां पानम् । ‘वृत्ते भाविनि वा युद्धे, पानं स्याद् वीरपाणकम्’ इति हैम्याम् । पानस्य भावकरणे ।२।३।६९।। इति णत्वम् । ‘**संजज्ञे**’ जातम् । दध्नः मङ्गलत्वात् ॥ २१ ॥

**श्रीगौतमं पुरोधाय, श्रीवीराग्रे नृपानिव । तटे कृत्वा कषायांश्च, जयश्रीरुपयम्यते ॥ २२ ॥**

‘**श्रीवीराग्रे**’ श्रीवीरस्य प्रभोः अग्रे । **श्रीगौतमं पुरोधाय** अग्रे कृत्वा पुरोहितं कृत्वा च । ‘**नृपानिव कषायान्**’ शत्रुभूपानिव क्रोधादीन् । ‘**तटे कृत्वा**’ अधः कृत्वा । ‘**जयश्रीः**’ विजयलक्ष्मीः । ‘**उपयम्यते**’ परिणीयते ॥ २२ ॥

**प्रमोदादभ्यधात् धन्यः, शालिः क्वापि न खण्ड्यते । सत्त्वसार ! त्वया सत्या, लौकिकी सा कृता श्रुतिः ॥ २३ ॥**

**धन्यः**–मुनिः । **प्रमोदात् अभ्यधात्**–उवाच । **'सत्त्वसार'** हे सत्त्वनिष्ठ शालिमुने । **त्वया 'शालिः ( धान्यं ) क्वापि न खण्ड्यते**–न दल्यते' इत्येवंविधा **'लौकिकी'** लोके प्रचलिता । **'श्रुतिः'** वार्ता । **सत्या** कृता ॥ २३ ॥

**प्राग्मानस्य न केनापि, संयमस्य परीषहैः । नोपसर्गैश्च भावारिप्रहारैस्ते न खण्डना ॥ २४ ॥**

शालिः कथं न खण्ड्यते ? इति दर्शयन्नाह–**'प्राग्'** पूर्वं गृहावासे । **'मानस्य'** गौरवस्य । **न केनाऽपि खण्डना जाता** । अधुना ते–तव **संयमस्य** । **'भावारिप्रहारैः'** रागाद्यान्तरशत्रुघातैः परीषहैः उपसर्गैः खण्डना न जाता ॥ २४ ॥

**श्रृङ्गारोदारमन्दारमालाभिः किल खेलनात् । अभिमानः परिम्लानिमानशे मानसे न ते ॥ २५ ॥**

**'श्रृङ्गारोदारमन्दारमालाभिः'** श्रृङ्गाराय उदारमन्दारमालाभिः उत्तमकल्पद्रुस्रग्भिः । **किलः** निश्चयार्थः । **'खेलनात्'** क्रीडनात् । **'ते'** तव । **'मानसे'** मनसि मानसरसि वा । **'अभिमानः'** गौरवम् । **'परिम्लानिं'** परितः ग्लानिम् । **'न आनशे'** न प्राप्तः ॥ २५ ॥

**स्वः श्रीस्त्वयाऽल्पकालीना, प्रविशन्ती गृहं मुहुः । निरस्ता स्वर्णनिर्माल्यव्याजतः शाश्वतश्रिये ॥ २६ ॥**

**'स्वर्णनिर्माल्यव्याजतः'** सुवर्णनिर्माल्यस्य व्याजतः–मिषात् । **'गृहं'** सौधम् । **'मुहुः'** वारं वारम् । **प्रविशन्ती । अल्पकालीना**–आशाश्वता । **स्वः श्रीः** स्वर्गलक्ष्मीः । **'शाश्वतश्रिये'** मुक्तिश्रीकृते । **त्वया निरस्ता**–दूरे कृता ॥ २६ ॥

**तद् विलम्बः प्रलम्बः किं, मर्मवेधी कलम्बवत् । त्वया पूर्वं न दानेऽपि, सूत्रिता दीर्घसूत्रिता ॥ २७ ॥**

**'तत्'** तस्मात् । **'कलम्बवत्'** बाणवत् । **'मर्मवेधी'** मर्मभेदी । **'प्रलम्बः'** प्रकृष्टः लम्बः प्रलम्बः दीर्घः । **विलम्बः** ।

**'किं'** कथम् ? **'पूर्वं'** सङ्गमभवे । **त्वया** । **'दानेऽपि'** मुनये क्षीरदानेऽपि । **'दीर्घसूत्रिता'** चिरक्रियता । **'न सूत्रिता'** न विहिता ॥ २७ ॥

**क्षमाधुर्यौ समाधुर्यौ, सम्प्रधार्य तदूर्जितम् । नन्तुं प्रयातौ श्रीवीरं, पुष्पदन्ताविवोदितौ ॥ २८ ॥**

**'तत्'** तस्मात् । **'ऊर्जितं'** बलिष्ठं अनशनविषयकं सङ्कल्पम् । **'सम्प्रधार्य'** अवधार्य । **'समाधुर्यौ'** मैत्रीमाधुर्यसहितौ । **'क्षमाधुर्यौ'** शमधुरीणौ । **'उदितो पुष्पदन्ताविव'** उदितौ सूर्य-चन्द्रौ इव । शालि-धन्यौ **श्रीवीरं नन्तुं प्रयातौ** ॥ २८ ॥

**व्यधत्तां श्रीमहावीरं, प्रणम्याराधनाविधिम् । शमिनौ संयमोतुङ्गप्रासादाग्रे ध्वजं किल ॥ २९ ॥**

**श्रीमहावीरं प्रणम्य** । **'संयमोत्तुङ्गप्रासादाग्रे'** संयमाः-चारित्रं तदेव उत्तुङ्गः-उच्चः प्रासादः तस्याग्रे । **'ध्वजं'** पताकातुल्यम् । **किलः**-निश्चयार्थः । **'आराधनाविधिं'** अन्तिमाराधनाविधिम् । **'शमिनौ'** शमवन्तौ मुनी । **तौ व्यधत्तां**-कुर्वतः स्म ॥ २९ ॥

**मोहध्वंसिशुभध्यानयोधस्कन्धाविवाथ तौ । सुवर्णपुष्पैः श्रीवीरः, स्वयं स्वामी व्यभूषयत् ॥ ३० ॥**

**स्वयं श्रीवीरः स्वामी** । **'मोहध्वंसिशुभध्यानयोधस्कन्धाविव'** मोहनाशककुशलध्याने मुख्यवीरौ इव । **'तौ'** इदं कर्मपदम् । **'सुवर्णपुष्पैः'** शोभनाः वर्णाः अक्षराणि यत्र तत् सुवर्णं-प्रशंसनं तद्रूपैः पुष्पैः । युद्ध पक्षे-कनककुसुमैः । **'व्यभूषयत्'** विभूषितवान् । यथा युद्धात् प्राग् वीराः स्वर्णपुष्पैः अभिनन्द्यन्ते तथा श्रीवीरेण शालिधन्यौ प्रशंसात्मकवचनैः उपबृंहितौ अभिनन्दितौ इत्यर्थः ॥ ३० ॥

**वत्सौ स्वस्थौ युवां धन्यौ, कृतपुण्यौ सलक्षणौ । सुलब्धं युवयोर्जन्म, साधु संयमजीवितम् ॥ ३१ ॥**

कथं तदित्याह–वत्सौ ! **युवां स्वस्थौ**–आत्मस्थौ । **धन्यौ कृतपुण्यौ** । **सलक्षणौ**–सुलक्षणैः सहितौ स्थः इति शेषः । **युवयोः जन्म सुलब्धं**–सफलम् । **संयमजीवितं** साधु–श्रेष्ठम् । अस्तीति शेषः ॥ ३१ ॥

**पराक्रमं धनुः कृत्वा, विनियोज्याशुगं मनः । लक्ष्यध्यानावधानेन, राधावेधो विधीयताम् ॥ ३२ ॥**

**पराक्रमं धनुः कृत्वा** तत्र **आशुगं**–आशु–क्षिप्रं गच्छति इत्येवंशीलं बाणं तद्रूपं मनः । **'विनियोज्य'** निवेश्य । **'लक्ष्यध्यानावधानेन'** लक्ष्यवेधध्याने अवधानेन । **'राधावेधः'** राधा–सप्तचक्रोपरि भ्रमन्ती पुत्तलिका तस्याः वेधः तत्तुल्या कठिना साधना । **'विधीयतां'** क्रियताम् ॥ ३२ ॥

**तमेवं श्रीजिनादेशं, नेत्रपट्टमिवोज्ज्वलम् । शिरस्याधाय समितिदीक्षां शिक्षामपि क्षणात् ॥ ३३ ॥**

**श्रीगौतमं पुरस्कृत्य, विशुद्धाध्यवसायवत् । मैत्रीभावमिवोत्तुङ्गं, वैभारगिरिमीयतुः ॥ ३४ ॥**

**एवं नेत्रपट्टमिव**–बहुमूल्यवस्त्रमिव । **उज्जवलं तं** श्रीजिनादेशम् । **'समितिदीक्षां'** समितिगुप्तिव्रतम् । युद्ध पक्षे–सङ्ग्रामव्रतम् । **'शिक्षामपि'** अनशनयोग्यहितशिक्षामपि । **'क्षणात्'** तूर्णम् । **'शिरसि'** मस्तके । **'आधाय'** कृत्वा ॥ ३३ ॥ **'विशुद्धाध्यवसायवत्'** पवित्रमनः–परिणाममिव । **श्रीगौतमं पुरस्कृत्य । मैत्रीभावमिव उत्तुङ्गं वैभारगिरिं ईयतुः**–गतौ ॥ ३४ ॥

**शनैः शनैः समारुह्याधित्यकां मुदितामिव । माध्यस्थ्यमिव सौस्थ्याय, प्रत्युपेक्ष्य शिलातलम् ॥ ३५ ॥**

**स्मृतपञ्चनमस्कारकृतपञ्चाङ्गिरक्षणौ । क्षमयित्वा समग्रं च, जन्तुजातं कुटुम्बवत् ॥ ३६ ॥**

**आहारांश्चतुरो हित्वा, कषायानिव सर्वथा । आशंसायाः प्रयोगांश्च, चतुर्गतिगमानिव ॥ ३७ ॥**

**पादपोपगमं नामानशनं प्रतिपद्य तौ । निष्प्रकम्पौ बहिश्चान्तर्गिरिवत्तस्थतुः स्थिरौ ॥ ३८ ॥ ( कलापकम् )**

**'शनैः शनैः'** मन्दं मन्दम् । **'मुदितामिव'** प्रमोदभावनामिव । **'अधित्यकां'** गिरेः उपरितनभूमिम् । **समारुह्य** । **'सौस्थ्याय'** हृदये सुस्थताकृते । **'माध्यस्थ्यमिव'** उपेक्षाभावनामिव । **'प्रत्युपेक्ष्य'** दृष्टिप्रतिलेखनं कृत्वा ॥ ३५ ॥ **'स्मृतपञ्चनमस्कारकृतपञ्चाङ्गिरक्षणौ'** स्मृतैः पञ्चनमस्कारमन्त्रैः कृतं पञ्चाङ्गिरक्षणं याभ्यां तौ । पादौ हस्तौ शिरश्च इति पञ्चङ्गानां समाहारः पञ्चाङ्गि । **'कुटुम्बवत्'** स्वजनवत् । **समग्रं जन्तुजातं**-प्राणिसमूहम् । **क्षमयित्वा** ॥ ३६ ॥ **कषायानिव** चतुरः-चतुर्विधान् । **'आहारान्'** अशन-पान-खादिम-स्वादिमलक्षणान् । **'सर्वथा'** मनोवचःकायैः सर्वप्रकारेण । **'हित्वा'** त्यक्त्वा । **'चतुर्गतिगमानिव'** चतुर्गतिं गमयन्ति चतुर्गतिगमाः तानिव । **'आशंसायाः प्रयोगान्'** इहलोक-परलोक-कामभोग-मरणाशंसारूपान् चतुरः, जीवितप्रयोगाऽऽशंसायाः अत्रैव समाविष्टत्वात् इह चत्वारः प्रयोगाः ज्ञेयाः । **चः** समुच्चये । **हित्वा** ॥ ३७ ॥ **'पादपोपगमं नाम अनशनं'** यत्र पादपवत्-वृक्षवत् स्थिरीभूयते तत् पादपोपगमं अनशनं कथ्यते । **'प्रतिपद्य'** स्वीकृत्य । **'बहिः अन्तश्च'** शरीरे मनसि च । **'निष्प्रकम्पौ'** कम्परहितौ । **गिरिवत् स्थिरौ तस्थतुः**-तिष्ठतः स्म ॥ ३८ ॥

**श्री गौतममुनीन्द्रोऽपि, मोहव्याधिचिकित्सकौ । तौ सत्याविव नासत्यौ, मुनिसिंहावुपावृहत् ॥ ३९ ॥**

**श्रीगौतममुनीन्द्रोऽपि** । **'नासत्यौ इव'** अश्वनीकुमारौ स्वर्गवैद्यौ इव । **'सत्यौ'** तथ्यौ । **'मोहव्याधिचिकित्सकौ'** मोहरोगप्रतिकारकौ **'तौ मुनिसिंहौ'** यतिश्रेष्ठौ । **'उपावृहत्'** उपवृहितवान्-प्रशंसितवानित्यर्थः ॥ ३९ ॥

**भगवतः पार्श्वे गच्छन्ती भद्रा–**

**इतो भद्रा निजावासे, हर्षोत्कर्षवशंवदा । किङ्करैः कारयामास, सुतागमनमङ्गलान् ॥ ४० ॥**

**इतः निजावासे**–स्वप्रासादे । '**हर्षोत्कर्षवशंवदा**' प्रमोदप्रकर्षाधीना । **भद्रा** । **किङ्करैः** सेवकैः । **सुतागमनमङ्गलान्**। '**कारयामास**' कारयति स्म ॥ ४० ॥

**अजिरे रेजिरे तत्र, तोरणानां परम्पराः । अमन्दानन्दमाकन्दे, वेल्लन्तः पल्लवा इव ॥ ४१ ॥**

**तत्र अजिरे**–अङ्गणे । '**अमन्दानन्दमाकन्दे**' 'अमन्दानन्दः–प्रकृष्टः प्रमोदः सः एव माकन्दः–चूतः तत्र । '**वेल्लन्तः**' चलन्तः । '**पल्लवा इव**' किसलयानि इव । **तोरणानां परम्पराः**–श्रेणयः । '**रेजिरे**' राजन्ते स्म ॥ ४१ ॥

**कौसुम्भं शुशुभे वासः, सुतरामधितोरणम् । श्रीशालिभद्राभिमुख-भक्तिरागसमप्रभम् ॥ ४२ ॥**

'**अधितोरणं**' तोरणे । '**कौसुम्भं वासः**' काषायं वस्त्रम् । '**सुतरां शुशुभे**' अत्यन्तं शोभते स्म । कथम्भूतं तत् ? '**श्रीशालिभद्राभिमुखभक्तिरागसमप्रभं**' श्रीशालिभद्रस्य अभिमुखं सम्मुखं भक्त्याः रागेण समा रक्ता प्रभा यस्य तत् ॥ ४२ ॥

**हसन्तीव मुहुर्मुक्तास्वस्तिकस्तबका मही । धन्यशालिपदस्पृष्टा, तद्वीक्षावञ्चिताः प्रियाः ॥ ४३ ॥**

'**धन्यशालिपदस्पृष्टा**' धन्यशालिपदैः स्पृष्टा । '**मुक्तास्वस्तिकस्तबका**' मौक्तिक–स्वस्तिकानां स्तबका; यस्यां सा । '**मही**' पृथ्वी । '**तद्वीक्षावञ्चिताः**' शालिदर्शन वञ्चिताः । '**प्रियाः**' कान्ताः । '**मुहुः**' अनिशं । '**हसन्तीव**' उपहासं

कुर्वती इव । मौक्तिक-शुभ्रकिरणव्याजात् हसन्तीव पृथ्वी शालिपत्नीः कथयति रे मुग्धाः ! अहं धन्यशालिपदैः स्पृष्टा, युष्माभिस्तु दर्शनमपि न प्राप्तमित्यर्थः ॥ ४३ ॥

**अथ भद्रास्नुषाः क्षामाः, प्रियस्यैवानुकारतः । वसाना वाससी श्वेते, श्रीशालेरिव कीर्तयः ॥ ४४ ॥**

**प्रेमक्षीरनिधेर्वेलाः, श्रीचन्दनविलेपनैः । लताः कृतयुगस्येवामुक्तमुक्ताफलव्रजैः ॥ ४५ ॥**

**नीरङ्गीच्छन्नवदनाः, सदनाद् वन्दनाकृते । निश्चलभक्तयश्चेलुः, श्वश्रूमनु जिनं प्रति ॥ ४६ ॥ (विशेषकम्)**

**अथ भद्रास्नुषाः**-भद्रापुत्रवध्वः । '**प्रियस्यैवानुकारतः**' प्रियस्य शालेः एव अनुकारतः-सादृश्यात् । '**क्षामाः**' कृशाः । **श्रीशालेः कीर्तयः इव श्वेते वाससी**-वस्त्रे **वसाना**-परिदधाना ॥ ४४ ॥ **श्रीचन्दन-विलेपनैः प्रेमक्षीरनिधेः**-स्नेहदुग्धाब्धेः । '**वेलाः**' तरङ्ग-स्वरूपाः । '**आमुक्तमुक्ताफलव्रजैः**' परिहितमौक्तिक-मालासमूहैः । '**कृतयुगस्य लताः इव**' सत्ययुगस्य चतुर्थारकस्य लताः-वल्लयः इव ॥ ४५ ॥ '**नीरङ्गीछन्नवदनाः**' नीरङ्गी-कौसुम्भवसनं तेन छन्नं वदनं-मुखं यासां ताः । '**निश्चलभक्तयः**' निश्चला-स्थिरा भक्तिः यासां ताः । '**वन्दनाकृते**' वन्दनार्थम् । '**सदनात्**' गृहात् । '**श्वश्रूमनु**' भद्राश्वश्रूः पश्चात् । **जिनं प्रति चेलुः**-चलन्ति स्म ॥ ४६ ॥

**ततोऽभयकुमारेण, समं श्रेणिकभूपतिः । श्रीवीरस्य नमस्यायै, तत्रागाद् भद्रया सह ॥ ४७ ॥**

**ततः अभयकुमारेण**-मन्त्रिणा **समं**-सह श्रेणिक-भूपतिः **श्रीवीरस्य नमस्यायै**-वन्दनाय **भद्रया सह** तत्र-समवसरणे **आगात्**-आयातः ॥ ४७ ॥

**स्वामिनं विधिवन्नत्वा, भद्रा साधुसभामभि । वेलां प्रतीव कमठी, दृशं प्रीतिमतीं ददौ ॥ ४८ ॥**

**स्वामिनं**–महावीरं **विधिवत्**–विधिपूर्वकं नत्वा । '**वेलां**' समुद्रजलवृद्धिं प्रति **कमठीव**–कच्छपी इव । **भद्रा** । '**साधु-सभामभि**' मुनिपर्षदं प्रति । '**प्रीतिमतीं दृशं**' प्रेममयीं दृष्टिम् । '**ददौ**' अर्पितवती । साधुसभा विलोकिता इत्यर्थः ॥ ४८ ॥

**पुरं स्वस्वजनेनेव, सुभिक्षं स्वधनेन वा । सूनुना शून्यमालोक्य, सदः सा खेदमासदत् ॥ ४९ ॥**

'**स्व-स्वजनेन**' निजस्वजनेन । '**शून्यं**' रहितम् । '**पुरमिव**' नगरमिव । '**स्वधनेन**' स्वकीयेन द्रव्येण शून्यं सुभिक्षमिव–सुकालमिव । '**सूनुना**' पुत्रेण शालिमुनिना **शून्यं सदः**–सभाम् । '**आलोक्य**' दृष्ट्वा । '**सा**' भद्रा । **खेदं**–ग्लानिम् । '**आसदत्**' प्राप्ता ॥ ४९ ॥

**साभिशङ्कमनाः सार्थ-वाही नाथं व्यजिज्ञपत् । क्व तौ नाथ ! सुचारित्रौ, धन्यशालिमहामुनी ॥ ५० ॥**

'**साभिशङ्कमनाः**' अभिशङ्कया सहितं मनः यस्याः सा **सार्थवाही भद्रा नाथं व्यजिज्ञपत्**–नाथ–हे स्वामिन् ! **तौ सुचारित्रौ**–सुसंयमौ **धन्यशालिमहामुनी क्व** वर्तेते ? ॥ ५० ॥

**साधु माधुकरीं वृत्तिं, चरन्तौ चारुचर्यया । मद्गेहे हेतुना केन, नायातौ ममतोज्झितौ ॥ ५१ ॥**

'**चारुचर्यया**' सुन्दरगत्या । '**साधु**' सम्यक्तया । '**माधुकरीं वृत्तिं**' भ्रामरीं भोजनवृत्तिम् । '**चरन्तौ**' पालयन्तौ । '**ममतोज्झितौ**' – ममतायाः उज्झितौ–रहितौ । '**मद्गेहे**' मम गृहे । **केन हेतुना न आयातौ ?** ॥ ५१ ॥

**जगौ जगद्गुरुर्भद्रे ! स्वहितावहितौ हि तौ । मया वचनविज्ञानात्, प्रहितौ तव वेश्मनि ॥ ५२ ॥**

**'जगद्गुरुः'** विश्वनाथः वीरः । **'जगौ'** उवाच । **भद्रे ! 'स्वहितावहितौ'** स्वहिते निजकल्याणे अवहितौ-जागृतौ । **हिः** निश्चये । **'तौ'** शालिधन्यौ । **'वचनविज्ञानात्'** अद्य माता तव पारण-कारणं भविष्यति' इति वचोविज्ञानात् । **मया तव वेश्मनि** गेहे । **'प्रहितौ'** प्रेषितौ ॥ ५२ ॥

**न निध्यातवती पुत्रं, ध्यायन्त्यपि तदागमम् । सुखेच्छुरिव सौख्यस्य, मूलं धर्ममिव स्वकम् ॥ ५३ ॥**

**'तदागमं'** पुत्रागमनम् । **'ध्यायन्ती अपि'** स्मरन्ती अपि । त्वम् । **पुत्रं न निध्यातवती**-न दृष्टवती । क इव ? **सुखेच्छुः सौख्यस्य मूलं**-कारणं **स्वकं धर्ममिव न पश्यति** ॥ ५३ ॥

**युष्मदुत्तरमप्राप्य, वलितौ प्राग्भवाम्बया । धन्यया दत्तदध्ना तौ, मासक्षपणपारणम् ॥ ५४ ॥**

**विधाय सह धन्येन, सुज्ञानौ मदनुज्ञया । इदानीमेव वैभारे, पादपोपगमं श्रितौ ॥ ५५ ॥**

**युष्मदुत्तरं अप्राप्य** वलितौ-प्रत्यागतौ । **'प्राग्भवाम्बया'** पूर्वभवस्य मात्रा धन्यया **दत्तदध्ना** दत्तेन दध्ना तौ मासक्षपणपारणम् ॥ ५४ ॥ **'विधाय'** कृत्वा । **'धन्येन'** मुनिना सह । **'मदनुज्ञया'** मम अनुमत्या । **'सुज्ञानौ'** शोभनश्रुतौ । **इदानीमेव वैभारे** पर्वते **पादपोपगमं**-अनशनं **श्रितौ**-सेवेते स्म ॥ ५५ ॥

**जगज्जीवातुभिस्तैस्तु, जिनेन्दोर्वचनामृतैः । पद्मिन्यस्ताः परिम्लाना, बभूवुरिति साम्प्रतम् ॥ ५६ ॥**

**'जिनेन्दोः'** जिनचन्द्रस्य । **'जगज्जीवातुभिः'** जगतां जीवातुभिः-जीवनौषधैः । **वचनामृतैः** । **'पद्मिन्यः'** सूर्यविकासिनीकमलिन्यः पद्मिनीस्त्रियः । **'ताः'** शालिप्रियाः । **'परिम्लाना'** परितः म्लानाः । **'बभूवुः'** जाताः । **इति 'साम्प्रतं'** योग्यम् । भवत्येव म्लाना चन्द्रोदये किल पद्मिनी ॥ ५६ ॥

**हंसी वीतंसवश्येव, झषी वा जालकीलिता । हरिणी बाणभिन्नेव, नितान्तं भ्रान्तमानसा ॥ ५७ ॥**

**निःश्वसन्ती स्खलन्ती च, निपतन्ती पदे पदे । रुदती रोदयन्ती च, भद्रा तं देशमासदत् ॥ ५८ ॥**

'**वीतंसवश्या**' वीतंसे-पक्षिबन्धने वश्या-आधीना । '**हंसीव**' मराली इव । '**जालकीलिता झषी वा**' जालेन कीलिता-बद्धा झषी मत्स्यी इव । '**बाणभिन्ना**' शरविद्धा । '**हरिणी इव**' मृगी इव । '**नितान्तं**' अत्यन्तम् । '**भ्रान्तमानसा**' भ्रान्तं मानसं यस्याः सा ॥ ५७ ॥ '**निःश्वसन्ती**' दीर्घान् निःश्वासान् मुञ्चती । '**पदे पदे**' प्रतिपदम् । '**स्खलन्ती**' स्खलनं प्राप्नुवती । स्वयं **रुदती** अन्यानपि **रोदयन्ती भद्रा तं देशं**-वैभारगिरिं, यत्र शालिधन्यौ अनशनं प्रतिपन्नौ स्तः । '**आसदत्**' प्राप्ता ॥ ५८ ॥

**विस्मितः श्रेणिकोऽप्याशु, तत्रागान्मन्त्रिणा समम् । वीराधिवीरौ श्रीवीरस्वामिशिष्यौ विलोकितुम् ॥ ५९ ॥**

**विस्मितः श्रेणिकः अपि** । '**आशु**' क्षिप्रम् । '**मन्त्रिणा**' अभयकुमारेण । '**समं**' सह । '**वीराधिवीरौ**' वीरेभ्योऽपि **वीरौ**-शूरौ । '**श्रीवीरस्वामिशिष्यौ**' शालिधन्यौ । '**विलोकितुं**' द्रष्टुम् । '**तत्र**' वैभारे । **आगात्** ॥ ५९ ॥

भद्रायाः विलपनम्—

**शिलातले शयानौ सा, तौ वज्रघटिताविव । उत्कीर्णाविव निर्वर्ण्य, मुमूर्च्छ सपरिच्छदा ॥ ६० ॥**

**शिलातले शयानौ**-कायोत्सर्गमुद्रया सुप्तौ । '**वज्रघटितौ इव**' वज्रनिर्मितौ इव । '**उत्कीर्णौ इव**' टङ्केन उल्लिखितौ इव । '**निर्वर्ण्य**' विलोक्य । '**सपरिच्छदा**' सपरिवारा । '**सा**' भद्रा । '**मुमूर्च्छ**' मूर्च्छां प्राप्ता ॥ ६० ॥

**पुनर्गिरिसमीरेण, सचैतन्या शुचाकुला । विरोक्य वदनं शाले-र्विललाप मुहुर्मुहुः ॥ ६१ ॥**

**'गिरिसमीरेण'** वैभारगिरिवायुना । **'पुनः'** भूयः । **'सचैतन्या'** जागृता । **'शुचा'** शोकेन । **'आकुला'** विह्वला । **शालेः वदनं विलोक्य मुहुः महुः विललाप** विलपति स्म ॥ ६१ ॥

**हा वत्स ! वत्स ! हा स्वच्छ ! हा पुत्र ! सुपवित्र हा ! । हा वीर ! धीर गम्भीर ! साधुकोटीरहीर ! हा ॥ ६२ ॥**

स्पष्टार्थः । **साधुकोटीरहीर**-मुनिमौलिरत्न ! ॥ ६२ ॥

**हा निर्मम ! हहाऽनीह !, हा नीरजनिरञ्जन ! हा काम्य ! साम्य ! हा सौम्य ! हहा तात्त्विक-सात्त्विक ॥ ६३ ॥**

स्पष्टार्थः । **अनीह**-निःस्पृह । **'नीरजनिरञ्जन'** नीरजं-कमलं तद्वत् निरञ्जन ! । **'काम्य'** स्पृहणीय ! । **'साम्य'** समतामय ! ॥ ६३ ॥

**प्रिये प्रिये तवास्यस्य, न्युञ्छनं तव नेत्रयोः । बलिः क्रिये च ते यामि, निर्ममत्वेऽवतारणम् ॥ ६४ ॥**

स्पष्टार्थः । **आस्यस्य**-मुखस्य । **'न्युच्छनं'** प्रोञ्छनम् । 'लुछणुं' इति भाषायाम् । **अवतारणं** 'ओवारणुं' इति भाषायाम् ॥ ६४ ॥

**द्वात्रिंशत्तूलिकासुप्त ! तात ! तप्तशिलातले । लीनोऽपि न विलीनोऽसि, सुकुमार कुमार ! किम् ॥ ६५ ॥**

**'द्वात्रिंशत्तूलिकासुप्त'** द्वात्रिंशतूलिकासु (तळाइ इति भाषायाम्) सुप्त हे तात-प्रियनन्दन ! 'तातोऽभीष्ट पुत्रे स्यात्' इति वचनात् । **'तप्तशिलातले'** तप्ते शिलातले । **'लीनोऽपि'** स्थितोऽपि । **'सुकुमार'** हे कोमल ! । **किं न विलीनोऽसि**-कथं न द्रुतोऽसि ॥ ६५ ॥

**आः ज्ञातं हेतुरत्रायं, मया जातोऽसि भद्रया । दम्भोलिश्चुलुकं लेभे, समुत्थाय यदग्रतः ॥ ६६ ॥**

'**आः ज्ञातं**' हुं... ज्ञातम् । **अत्र अयं हेतुः** । त्वं **मया भद्रया जातोऽसि** । '**यदग्रतः**' ममाग्रे । '**दम्भोलिः**' वज्रम् । '**समुत्थाय**' आगत्य । '**चुलुकं**' गण्डुषम् । '**लेभे**' लभते स्म । वज्रादपि कठोरहृदयाहमिति भावः ॥ ६६ ॥

**पूर्वमेवैकवत्साऽहं, विधिना वत्स ! निर्मिता । निजाङ्गज-सदाऽनिष्ट-शङ्कापङ्काकुला भृशम् ॥ ६७ ॥**

**वत्स ! पूर्वमेव विधिना**-ब्रह्मणा **अहं एकवत्सा निर्मिता** । कथम्भूता अहम् ? '**भृशं**' अत्यर्थम् । '**निजाङ्गजसदानिष्टशङ्कापङ्काकुला**' निजाङ्गजे-स्वपुत्रे सदानिष्टशङ्कापङ्कैः-नित्यमप्रियशङ्काकर्दमैः आकुलाव्याकुला ॥ ६७ ॥

**त्वादृशस्तनयो यस्यास्तीव्रं स्वीकुरुते व्रतम् । साऽपि जीवत्यहो ! माता, स्त्रीणां धिग् जीवितं दृढम् ॥ ६८ ॥**

स्पष्टार्थः ।

**कुन्ती देवी परं धन्या, सुतैः सह ययौ वनम् । कौशल्येव सशल्याऽहं, पतिपुत्रनिराकृता ॥ ६९ ॥**

स्पष्टार्थः । **कुन्ती** पाण्डवमाता । **कौशल्या** श्रीराममाता । **पतिपुत्रनिराकृता** पतिपुत्रैः रहिता ॥ ६९ ॥

**कथं न कठिना भद्रा, यस्याः पश्य निरन्तरम् । सकर्णा भल्लयः साराः, स्नुषाः खाट्कुर्वते हृदि ॥ ७० ॥**

स्पष्टं पूर्वार्धम् । '**पश्य**' विलोकय । '**यस्याः**' मम । '**हृदि**' अन्तःकरणे । '**सकर्णाः**' चतुराः । भल्लिपक्षे कर्णसहिताः । (कर्ण-'कानो' इति भाषायाम्) '**साराः**' प्रधानाः । पक्षे-आरसहिताः । आरं लोहविशेषः तेन सहिताः । '**भल्लयः**' कुन्ताः ।

**'स्नुषाः'** पुत्रवध्वः । **'खाट्कुर्वते'** खाट् इति शब्दं कुर्वते । 'खटके छे' इति भाषायाम् । भल्लितुल्याभिः पुत्रवधूभिः भिद्यमानाऽपि अहं न भेदं प्राप्नोमि तस्मात् कठिनाऽहमिति भावः ॥ ७० ॥

**सत्यं त्याज्यसुखा भद्रा, पुण्यकर्मनिराकृता । त्वद्दानवञ्चिताया मे, प्रान्तेऽपि न परं जयः ॥ ७१ ॥**

**'सत्यं'** उचितम् । **'पुण्यकर्मनिराकृता'** पुण्यकर्मभिः दानादिकैः सुकृतैः निराकृता रहिता । विष्टिपक्षे पुण्यकर्माणि पवित्रकार्याणि तैः निराकृता । ज्योतिःशास्त्रानुसारेण भद्रायां पवित्रकार्याणि न क्रियन्ते । **'भद्रा'** शालिमाता । पक्षे-ज्योतिःशास्त्रप्रसिद्धा भद्रा । **'त्याज्यसुखा'** त्याज्यं-त्यागयोग्यं सुखं यस्याः सा अस्ति । **'परं'** परन्तु **'प्रान्तेऽपि'** चरमेऽपि । **'त्वद्दानवञ्चितायाः'** हे शाले ! त्वद्दानवञ्चितायाः । **'मे'** मम । **जयः न** अभवत् । 'विष्टिपुच्छे ध्रुवं जयः' इति ज्योतिःशास्त्रवचनात् **'भद्रा'** प्रान्ते विजयदायिनी भवति, किन्तु अहं प्रान्तेऽपि सुपात्रदानेन न विजयिनी अभवम् । अहो मे अधन्यता ! इति भद्राविलापः ॥ ७१ ॥

**भ्रान्ताऽस्मि धूर्तिता वाऽस्मि, धिग् धिग् धत्तूरिताऽपि वा । मुषिताऽस्मि हहा वत्स ! हा निष्फलमनोरथा ॥ ७२ ॥**

स्पष्टार्थः । **धत्तूरिता**-पीतधत्तूरा ॥ ७२ ॥

**मया कामगवी गेहा-गता दण्डेन ताडिता । दत्वा कपाटौ व्यासेधि, पूर्णकुम्भकरः करी ॥ ७३ ॥**

स्पष्टार्थः । **कामगवी**-कामधेनुः । **'पूर्णकुम्भकरः'** पूर्णकुम्भः करे-शुण्डायां यस्य सः । **करी**-हस्ती । **'व्यासेधि'** निषिद्धः ॥ ७३ ॥

**सूनुर्महामुनिर्मासोपवासी स्वयमागतः । प्रत्यलाभि मया यन्न, यावज्जीवमियं व्यथा ॥ ७४ ॥**

**मासोपवासी स्वयं आगतः सूनुः**-पुत्रः **महामुनिः मया यत् न प्रत्यलाभि** न प्रतिलम्भ्यते स्म । **इयं व्यथा**-पीडा **यावज्जीवं** भविष्यति ॥ ७४ ॥

**हताऽहं हन्त दग्धाऽहं, स्वाङ्गजं यद् गृहाङ्गणे । नाजीगणं गणनया, भिक्षुकस्याऽपि निर्गुणा ॥ ७५ ॥**

**हन्तः** खेदे । **अहं हताऽस्मि । अहं दग्धाऽस्मि । यद् गृहाङ्गणे स्वाङ्गजं** निजपुत्रं **भिक्षुकस्यापि गणनया** निर्गुणा अहं **न अजीगणं** - न गणितवती ॥ ७५ ॥

**त्वदागमोत्सवव्यग्रा, त्वां नाज्ञासिषमागतम् । विवाहव्याकुलेवाहं, व्यस्मार्षं पाणिपीडनम् ॥ ७६ ॥**

'**त्वदागमोत्सवव्यग्रा**' तव आगमनोत्सवव्याकुला अहम् । **आगतं त्वां न अज्ञासिषं**-न ज्ञातवती । **विवाहव्याकुला** युवती **पाणिपीडनं**-हस्तमेलनमिव । **अहं व्यस्मार्षं** विस्मृतवती ॥ ७६ ॥

**नैवोत्तरमपि प्रादां, तदा तद् वत्स ! साम्प्रतम् । उत्तरं तव नास्त्येव, यज्जात ! जगतीतले ॥ ७७ ॥**

**तदा उत्तरमपि अहं न प्रादां**-न दत्तवती । हे **वत्स** ! **तत् साम्प्रतं** युक्तमस्ति । **यत्** यस्मात् **जात** हे पुत्र ! **जगतीतले** भूतले तव उत्तरं अतिशायि किञ्चित् वस्तुजातं नास्ति एव ॥ ७७ ॥

**कुविजातं भवेत्प्रायः कुमाता नैतदप्यसत् । निर्ममोऽप्यागतः सद्म, मयाऽदर्शि न पापया ॥ ७८ ॥**

**प्रायः कुविजातं**-कुपुत्रं प्रति माता **कुमाता** न भवति, परन्तु **एतदपि असत्**-असत्यं जातम् । यत् **सद्म**-गृहं **आगतः निर्ममोऽपि पुत्रः पापया मया न अदर्शि**-न दृष्टः ॥ ७८ ॥

**पूर्वं त्वदीयतातस्य, वियोगेन तवाप्यथ । पश्चात्तापैस्तवाभक्ते-स्तापितं वह्निभिस्त्रिधा ॥ ७९ ॥**

**हतं घनै र्जनावाक्यैः, स्फुटितं हृदयं न यत् । त्वदम्बाया निरालम्बं, त्रिपरीक्षितवज्रति ॥ ८० ॥**

**पूर्वं त्वदीयतातस्य** गोभद्रस्य वियोगेन **अथ तवाऽपि वियोगेन, तव अभक्तेः** अदानात् **पश्चात्तापैः**–इति **त्रिधा वह्निभिः तापितम् । जनावाक्यैः** जनानां अवाक्यैः दुष्टवाक्यैः । अत्र नञ् दुष्टार्थे । यथा–लज्जा चत्ता सीलं च खंडिअं, अजसघोसणा दिन्ना । जस्स कए पिअसही ! सो जणो 'अजणो' जाओ । **घनैः**–मुद्गरैः **हतं त्वदम्बायाः** तव मातुः **निरालम्बं** निराधारं **यत् हृदयं न स्फुटितं** तत् **त्रिपरीक्षितवज्रति**–त्रिवारं परीक्षित वज्र तद्वत् आचरति तत्समं कठिनमित्यर्थः ॥ ७९ ॥ ८० ॥

**वत्स ! मातुः कलत्राणां, परीक्षा वीक्षिता त्वया । धर्मस्येव तु धन्यस्य, प्रीतिर्निर्वाहसुन्दरा ॥ ८१ ॥**

**वत्स ! मातुः कलत्राणां** प्रियाणां च **परीक्षा त्वया । वीक्षिता**–दृष्टा । **'तु'** किन्तु **धर्मस्य इव धन्यस्य** मुनेः **प्रीतिः निर्वाहसुन्दरा** निर्वाहेण पारगमनेन सुन्दरा अस्ति ॥ ८१ ॥

**हास्येऽवश्यं सहायः स्यात्, प्रायः पुंसां स्वसुः पतिः । जातः सुकृतकृत्येषु, धन्यो धन्यतमस्तु ते ॥ ८२ ॥**

**प्रायः पुंसां**–पुरुषाणां **स्वसुःपतिः** भगीनिपतिः **हास्ये अवश्यं सहायः** स्यात् **तु**–परन्तु **ते** तव **धन्यतमः**–प्रकृष्टपुण्यवान् **धन्यः सुकृतकृत्येषु सहायो जातः** ॥ ८२ ॥

**जगतीमान्यसौजन्य !, तपःश्रीधन्य ! धन्य हे । सहकृत्वा त्वमेवासि, मम पुत्रस्य संयमम् ॥ ८३ ॥**

**'जगतीमान्यसौजन्य'** जगत्यां मान्यं सौजन्यं यस्य तत्सम्बोधने । **'तपःश्रीधन्य'** तपःश्रिया धन्य सुकृतिन् ! । **धन्य** मुने ! **त्वमेव मम पुत्रस्य संयमं सहकृत्वा**-सहकारी । सहराजभ्या ।५।१।१६७।। इति क्वनिप् प्रत्ययेन 'सहकृत्वन्' शब्दः । **असि** ॥ ८३ ॥

**सुतादपि हि जामाता, प्रियः स्त्रीणां मया तु हा ! । न दानं न च संमानं, तुभ्यं नाप्युत्तरं ददे ॥ ८४ ॥**

**सुतादपि स्त्रीणां हि जामाता प्रियः भवति** । यदुक्तम्-इत्थीण ए त्रण वल्लहां, कलह-कज्जल-सिन्दूर । ए पुण अतिहि वल्लहा, दूध-जमाई-तूर ॥ **तु**-किन्तु **मया हा ! तुभ्यं**-गृहागताय **न दानं न च संमानं नापि उत्तरं ददे** दत्तम् ॥ ८४ ॥

**शालिभद्रस्वसा मन्ये, सुभद्रा न ममाङ्गजा । यया पक्षत्रयी रत्न-त्रयीव विमलीकृता ॥ ८५ ॥**

**'मन्ये'** अहं चिन्तयामि । **सुभद्रा शालिभद्रस्वसा,** किन्तु **न मम अङ्गजा**-न मम पुत्री । **यया रत्नत्रयीव**-ज्ञानादित्रयीव **पक्षत्रयी**-मातुः पितुः पत्युश्च पक्षत्रयम् । **विमलीकृता**-धवलीकृता ॥ ८५ ॥

**आत्मानमित्युपालभ्य, सर्वपर्वसु वञ्चितम् । प्रशशंस भृशं शाले-र्मातरं पूर्वजन्मनः ॥ ८६ ॥**

**इति सर्वपर्वसु**-दीक्षा-भिक्षादानादिसर्वप्रसङ्गेषु । **'वञ्चितं'** विप्रतारितम् । **आत्मानं उपालभ्य** दोषपात्रीकृत्य । **शालेः पूर्वजन्मनः मातरं** धन्यां भृशं **प्रशशंस**-प्रशंसति स्म ॥ ८६ ॥

**निर्वीराऽपि दरिद्राऽपि, चिरायुरपि सा वरम् । दुग्धधौतैः हृदो नेत्रैः, पुत्र ! त्वं लक्षितो यया ॥ ८७ ॥**

**सा** धन्या **निर्वीराऽपि**-पतिपुत्र-रहिताऽपि । 'निर्वीरा निष्पतिसुता' इति हैम्याम् । **दरिद्राऽपि चिरायुरपि वरं** श्रेष्ठा । **यया दुग्धधौतैः** स्तनजातेन दुग्धेन धौतैः । **'हृदः'** हृदयस्य अन्तःकरणस्य । **नेत्रैः लक्षितः** त्वं अभिज्ञातः ॥ ८७ ॥

**अहं जीवन्मृता तात ! गृहकर्मणि कर्मठा । वत्सला न निजोत्सङ्ग-लालितेऽपि हहा त्वयि ॥ ८८ ॥**

**तात**-हे वत्स ! **अहं जीवन्मृता**-जीवन्ती सती अपि मृता इव । **गृहकर्मणि कर्मठा**-परायणा अस्मि । **हहा ! निजोत्सङ्गलालितेऽपि** त्वयि-स्वीयाङ्के लालितेऽपि त्वयि न वत्सला अभवम् ॥ ८८ ॥

**धन्या नान्यास्ति धन्याया, या जन्मान्तरनन्दनम् । ऋजुरज्ञा मुनिं स्नेहात्, प्रस्नुता प्रत्यलाभयत् ॥ ८९ ॥**

**'धन्यायाः'** मथितहारिकायाः । **'अन्या'** परा । **'धन्या'** पुण्यशालिनी नास्ति **या जन्मान्तरनन्दनं** पूर्वभवपुत्रं **मुनिं** शालिं **ऋजुः**-भद्रा अज्ञाना **स्नेहात् प्रस्नुता**-प्रसुता **प्रत्यलाभयत्**-प्रतिलम्भयति स्म ॥ ८९ ॥

**अभद्राऽन्या न भद्राया, वित्ते लोकोत्तरे यया । पुत्रे सर्वोत्तमे पात्रे, नो ददे दानशम्बलम् ॥ ९० ॥**

**भद्रायाः** मत्तः **अन्या अभद्रा**-अमङ्गला नास्ति, **यया वित्ते**-विख्याते **लोकोत्तरे सर्वोत्तमे पात्रे** पुत्रे **दानशम्बलं नो ददे**-न दत्तम् ॥ ९० ॥

**साहाय्यादथवा यस्याः, पुत्र ! ते सम्पदः शुभाः । त्वयाऽपि हेलया तस्यै, पुण्यलाभः प्रकल्पितः ॥ ९१ ॥**

**अथवा हे पुत्र ! यस्याः**-धन्यायाः **साहाय्यात् ते**-तव **शुभाः सम्पदः** भविष्यन्ति, अतः **त्वयाऽपि तस्यै हेलया**-लीलया **पुण्यलाभः** धर्मलाभः **प्रकल्पितः**-प्रदत्तः ॥ ९१ ॥

**प्रथमं पायसं सूनु-रन्यूनं भोजितस्तया । परलोकं प्रतिष्ठासोः, कृतं च दधिमङ्गलम् ॥ ९२ ॥**

तया-धन्यया **प्रथमं**-सङ्गमभवे **अन्यूनं** सम्पूर्णं **पायसं**-क्षीरं त्वं **सूनुः भोजितः परलोकं प्रतिष्ठासोः**-भवान्तरं प्रस्थातुमिच्छोः तव अधुना **दधिमङ्गलं**-दध्ना मङ्गलं कृतम् ॥ ९२ ॥

**आदेशकारिणी तस्याः, केवलं प्रातिवेश्मिकी । अभिज्ञानेन केनाहं, प्रार्थये लाभमद्भुतम् ॥ ९३ ॥**

**तस्याः**-धन्यायाः **आदेशकारिणी केवलं प्रातिवेश्मिकी अहं केन अभिज्ञानेन** चिह्नेन **अद्भुतं लाभं**-धर्मलाभं **प्रार्थये** वाञ्छे ? दधिदानेन धन्या धर्मलाभं प्राप्ता किन्तु अहं केन अभिज्ञानेन धर्मलाभं प्रार्थये ? मया न किमपि दध्यादिकं दत्तमिति भावः ॥ ९३ ॥

**तथापि समतासिन्धो ! समसज्जनदुर्जन ! । वासीचन्दनकल्पस्त्व-मिति मामनुकम्पय ॥ ९४ ॥**

**तथापि समतासिन्धो** समतारससमुद्र ! **समसज्जनदुर्जन** सज्जनदुर्जनेषु सम-समानचित्त ! हे मुने ! **त्वं वासीचन्दनकल्पः** वास्या छेदकेषु चन्दनेन च लेपकेषु कल्पः-तुल्यमनोवृत्तिः असि, **इति मां अनुकम्पय**-मयि दयां कुरु ॥ ९५ ॥

**हीनाया दीननेत्राया, देहि प्रत्युत्तरं मम । निजाम्बिकां हहा वत्स ! सम्भावय दृशापि माम् ॥ ९५ ॥**

**दीननेत्रायाः हीनायाः मम प्रत्युत्तरं देहि । हहा ! वत्स ! निजाम्बिकां मां दृशाऽपि**-नयनेनाऽपि **सम्भावय**-विलोकय ॥ ९५ ॥

**एवं विविधभङ्गीभिर्भद्रा प्ररुदिता सती । रोदसी रोदयामास, मृगपक्षिगणाकुलाम् ॥ ९६ ॥**

**एवं विविधभङ्गीभिः**, विविधाभिः भङ्गीभिः प्रकारैः । '**प्ररुदिता**' प्रकर्षेण रुदिता **सती भद्रा** । '**मृगपक्षिगणाकुलं**' पशुपक्षिगणैः आकुलां-सङ्कीर्णाम् । '**रोदसी**' द्यावापृथिव्यौ । '**रोदयामास**' रोदयति स्म ॥ ९६ ॥

दयितानां परिदेवनम्—

**शालेः शिलापरीरम्भारम्भकेलिं विलोक्य ताः । दधिरे विधुरास्तस्य, दयिताः परिदेवनम् ॥ ९७ ॥**

**शालेः** मुनेः **शिलापरीम्भाऽऽरम्भकेलिं**–गिरिशिलाऽऽलिङ्गनोपक्रमक्रीडां **विलोक्य विधुराः** व्याकुलाः **ताः** तस्य शालेः **दयिताः** शालिप्रियाः **परिदेवनं**–विलापं **दधिरे**–चक्रुः ॥ ९७ ॥

**हा प्राणवल्लभ प्रौढपुण्यैरपि सुदुर्लभ ! । हा रूपविजितानङ्ग ! हहा जीवितजीवितम् ॥ ९८ ॥**

**हा प्राणवल्लभ** ! प्रौढपुण्यैरपि–प्रकृष्ठपुण्यकर्मभिरपि सुदुर्लभ ! रूपविजितानङ्ग–रूपेण विजितः अनङ्गः कामः येन तत्सम्बोधने । **हहा ! जीवितजीवितं**–जीवितस्यापि जीवितम् ! ॥ ९८ ॥

**गोभद्रस्य कुलेऽस्माकं, सुकृतैस्त्वमवातरः । जीमूतवाहनस्येव, गेहे कल्पद्रुमोऽर्थिनाम् ॥ ९९ ॥**

**अस्माकं सुकृतैः** पुण्यैः त्वं **गोभद्रस्य कुले अवातरः**–अवतीर्णवान् । कः इव ? **अर्थिनां**–याचकानां पुण्यैरिव । **जीमूतवाहनस्य** मेघवाहनस्य–इन्द्रस्य, इन्द्रो हि मेघानाविश्य वर्षतीति कविसमयः । '**गेहे**' गृहे स्वर्गे । '**कल्पद्रुमः** इव' सुरतरुरिव ॥ ९९ ॥

**अन्यथा क्व वयं नाथ ! मर्त्यलोकैककीटिकाः । भोगभङ्गी क्व सा दिव्याऽस्माकं स्वप्नेऽपि दुर्लभा ॥ १०० ॥**

**नाथ** हे स्वामिन् ! **अन्यथा मर्त्यलोकैककीटिकाः**–मर्त्यलोके एककीटिकारूपाः **वयं क्व** ? **अस्माकं स्वप्नेऽपि दुर्लभा सा भोगभङ्गी**–दिव्यविलासविच्छित्तिः क्व ? ॥ १०० ॥

**परं प्राणेश ! निःसत्त्वाः, किं ब्रूमो विदुषिब्रुवाः । प्रेमहेमतुलाकाले, व्यञ्जिता गुञ्जया समाः ॥ १०१ ॥**

**परं**-किन्तु **प्राणेश ! विदुषिब्रुवाः** आत्मानं विदुर्षीं ब्रुवन्ते इत्येवंशीलाः मिथ्याविदुष्यः । **निःसत्त्वाः**-सत्त्वहीनाः **वयं किं ब्रूमः** ? यतः **प्रेमहेमतुलाकाले**-स्नेहसुवर्णतुलनासमये दीक्षाऽवसरे वयं **गुञ्जया**-कृष्णलया रक्तिकया **समाः**-तुल्याः **व्यञ्जिताः**-प्रकटिताः ॥ १०१ ॥

**अपि कल्याणरूपास्ते, नाथ ! सेवाच्युता वयम् । भवकूपं पतिष्यामस्त्वदलङ्कृतयो यथा ॥ १०२ ॥**

**नाथ ! ते**-तव **कल्याणरूपाः**-मङ्गलरूपाः- । **अलङ्कारपक्षे**-सुवर्णरूपाः । **सेवाच्युताः**-सेवातः च्युताः-भ्रष्टाः । **वयं भवकूपं**-संसारान्धुम् । पक्षे-कूपम् । **पतिष्यामः** । **यथा त्वदलङ्कृतयः**-तव अलङ्काराः कूपे पतन्ति स्म तथा ॥ १०२ ॥

**एकवृन्तादिवोत्खाताः, गोभद्रस्य वधूटिकाः । लोकोक्तिरिति सत्यैवा-स्माकं निःसत्त्वतागुणैः ॥ १०३ ॥**

**गोभद्रस्य वधूटिकाः**-पुत्रवध्वः **एकवृन्तादिव**-एकपुष्पबन्धनादिव **उत्खाताः**-उन्मूल्य आनीताः **इति लोकोक्तिः अस्माकं निःसत्त्वतागुणैः सत्या एव** अस्ति ॥ १०३ ॥

**एवं संवित्तिसम्पन्ना, निःस्नेहा निस्त्रपागुणाः । इयन्त्यो हन्त निःसत्त्वाः, कुतो दैवेन सञ्चिताः ॥ १०४ ॥**

**एवं संवित्तिसम्पन्नाः**-बुद्धियुताः **निःस्ननेहाः** स्नेहरहिताः **निस्त्रपागुणाः**-लज्जागुण रहिताः । **इयन्त्यः निःसत्त्वाः** दैवेन कुतः हन्त ! **सञ्चिताः**-एकत्रीकृताः ? ॥ १०४ ॥

**एषाऽपकीर्तिरस्माकमायुगान्तं विजृम्भिता । यत्प्रियः प्राङ्गणस्थोऽपि, न दृशाऽपि हि पस्पृशे ॥ १०५ ॥**

**अस्माकं एषा अपकीर्तिः आयुगान्तं**-युगान्तं यावत्, **विजृम्भिता**-प्रकाशिता, **यत् प्राङ्गणस्थः अपि प्रियः दृशाऽपि**-नयनेनाऽपि हि न **पस्पृशे**-स्पृष्टः । विलोकितोऽपि न इत्यर्थः ॥ १०५ ॥

**पुनरेवैष्यति प्रेयान्, प्रीत्याऽस्माभिः प्रणंस्यते । सोऽन्यसामान्यया हाऽस्मान्, दृशा सम्भावयिष्यते ॥ १०६ ॥**

**एवमाशावशान्नाथ ! नीता द्वादशवत्सरी । अनेनानशनेनाशु, ही ! विलीना मनोरथाः ॥ १०७ ॥**

**पुनः एव प्रेयान्**-पतिः **एष्यति**-आयास्यति । **अस्माभिः प्रीत्या प्रणंस्यते**-पलायिष्यते । **सः** पतिः **अन्यसामान्यया**-अन्येषु अपि सामान्यया साधारणया **दृशा**-नयनेन **अस्मान् सम्भावयिष्यते** विलोकयिष्यति ॥ १०६ ॥ **एवं आशावशात् नाथ** ! अस्माभिः **द्वादशवत्सरी**-द्वादशाना वत्सराणां-वर्षाणां समाहारः, **नीता**-गमिता । किन्तु **अनेन अनशनेन, ही** खेदे, **आशु**-क्षिप्रं **मनोरथाः विलीनाः**-प्रणष्टाः ॥ १०७ ॥

**प्राणनाथ ! प्रसादात्ते, प्रिया पृथ्वीपतेरपि । तदाऽस्मानभ्यनीनन्दत्, वणिक्कुलभवा अपि ॥ १०८ ॥**

**प्राणनाथ ! ते**-तव **प्रसादात्**-कृपातः, **तदा**-रत्नकम्बलग्रहणसमये **पृथ्वीपतेरपि**-श्रेणिकनृपस्याऽपि, **प्रिया**-चेल्लणा, **वणिक्कुलभवाः अपि**-वणिक्कुले भवाः-जाताः अपि अस्मान् **अभ्यनीनन्दत्**-अभिनन्दितवती ॥ १०८ ॥

**त्वत्करस्पर्शपुण्येन, दिव्याहारेण लालिताः । दिव्याङ्गरागमालाभिः, स्वामिन् दुर्ललिता वयम् ॥ १०९ ॥**

**त्वत्करस्पर्शपुण्येन**-त्वदीयहस्तस्पर्शेन पुण्येन-पवित्रेण, **दिव्याहारेण**-दिव्येन आहारेण, **लालिताः**-पालिता-

**वयं स्वामिन् ! दिव्याङ्गरागमालाभिः**-दिव्यैः अङ्गरागैः-विलेपनैः मालाभिश्च, **दुर्ललिताः** दुः-अतिशयेन ललितं यासां ताः ॥ १०९ ॥

**देवीभूयमिव प्राप्ताः, किं तेनाविरता वयम् । अनलम्भूष्णवः कान्त ! तवानुमरणेऽपि हा ॥ ११० ॥**

**वयं देवीभूयमिव**-देवीत्वमिव, **प्राप्ताः किं तेन वयं अविरताः**-अविरतिमत्यः ? देवाः खलु विरतिग्रहणे असमर्थाः । **हा ! तव अनुमरणेऽपि** मृत्योः पश्चादपि, **कान्त**-हे नाथ ! **अनलम्भूष्णवः**-विरतिग्रहणं प्रति अशक्ताः ॥ ११० ॥

**तदन्त्यां प्रार्थनां नाथ ! नाथेमहि महीयसीम् । निजं वागमृतं हन्त, हन्तकारः प्रदीयताम् ॥ १११ ॥**

**तत्**-तस्मात्, **नाथ ! अन्त्यां**-चरमां **महीयसीं**-महत्तरां-**प्रार्थनां-नाथेमहि**-याचामहे । **हन्त** करुणास्पद-स्थितिदर्शकमव्ययम् । **निजं वागमृतं**-वचनामृतं, **हन्तकारः,** सिद्धान्नपक्वान्नफलादीनां प्रथमं अतिथि-ब्राह्मणादीनां दानं **'हन्तकारः'** कथ्यते, **प्रदीयतां**-अर्प्यताम् ॥ १११ ॥

**एवं प्रलपिता वीक्ष्य, वधूसङ्घट्टघट्टिता । भद्रा मुमूर्च्छ मूर्च्छान्ते, मुक्तकण्ठं रुरोद सा ॥ ११२ ॥**

**एवं प्रलपिताः**-प्रलापं कुर्वतीः स्नुषाः, **वीक्ष्य** प्रेक्ष्य, **वधूसङ्घट्टघट्टिता**-वधूसङ्घट्टेन घट्टिता-सङ्क्रान्तदुःखा, **भद्रा मुमूर्च्छ**-मूर्च्छां प्राप्ता, **मूर्च्छान्ते**-मूर्च्छाविगमे सा **मुक्तकण्ठं**-उच्चस्वरेण **रुरोद**-रोदिति स्म ॥ ११२ ॥

**श्रेणिकनरेन्द्रस्तां, विषादविषमूर्च्छिताम् । चञ्चद्वचनपीयूषतुषारैर्निरवापयत् ॥ ११३ ॥**

**विषादविषमूर्च्छितां**-विषादविषेण मूर्च्छितां **तां** भद्रां श्रीश्रेणिकनरेन्द्रः **चञ्चद्वचन पीयूष तुषारैः** स्फुरद्वाणीसुधातुहिनैः, **निरवापयत्**-निर्वाणं शान्तिं प्रापिता ॥ ११३ ॥

**गुणैस्त्वं गणनीयाऽसि, माननीयाऽसि मानिनाम् । वन्द्यानां वन्दनीयाऽसि, महनीया महात्मनाम् ॥ ११४ ॥**

स्पष्टार्थः ॥ ११४ ॥

**नन्द्यास्त्वं नन्दनोर्वीव, पारिजाततरुः सुतः । यस्यां पश्यावतीर्णोऽयं, वरिवस्यः सुरैरपि ॥ ११५ ॥**

**नन्दनोर्वीव**-नन्दनवनपृथ्वी इव, **त्वं नन्द्याः**-आनन्दं लभस्व, **यस्यां**-नन्दनोर्व्याम्, **सुरैरपि वरिवस्यः**-सेव्यः, **पारिजाततरुः**-कल्पवृक्षविशेषः, **अयं सुतः**-शालिभद्रमुनिः, **अवतीर्णः**-उत्पन्नः, **इति पश्य**-विलोकय ॥ ११५ ॥

**कल्याणि ! तव कल्याण-वर्णिकां वर्णयन्तु के । यद्भूः पुरुषकोटीरः, पार्थिवार्थितसङ्गमः ॥ ११६ ॥**

'**कल्याणि**' हे मङ्गलमयि भद्रे ! मुकुटपक्षे-हे सुवर्णदे पृथ्वि ! **तव कल्याणवर्णिकां**-मङ्गलवर्णनम् । मुकुटपक्षे-सुवर्णवर्णिकाम् । '**के**' बुधाः । '**निर्णयन्तु**' निश्चिन्वन्तु ? '**यद्भूः**' यज्जातः पुत्रः, यस्याः भवति जायते यद्भूः शालिः । सुवर्णपक्षे-मुकुटः । '**पुरुषकोटीरः**' पुरुषेषु कोटीरः-मुकुटसमः । '**पार्थिवार्थितसङ्गमः**' पार्थिवेन श्रेणिकेन राज्ञा अर्थितः सङ्गमः यस्य सः शालिभद्रः । मुकुटोऽपि राजभिः धार्यते एव शिरसि ॥ ११६ ॥

**सर्वदा नर्मदा भद्रा, करेणुस्त्वं यदङ्गजः । गम्भीरवेदी पुन्नागो, मोहदुर्गस्य भञ्जकः ॥ ११७ ॥**

**त्वं सर्वदा**-सर्वकाले सर्वं दात्रीति वा सर्वदा । '**नर्मदा भद्रा**' नर्म मधुरवचनं ददातीत्येवंशीला भद्रा । पक्षे-नर्मदानद्यां भद्रा भद्रजातीया **करेणुः**-हस्तिनी । '**यदङ्गजः**' यदीयपुत्रः । '**गम्भीरवेदी**' गम्भीरतत्त्ववेत्ता । पक्षे-अवगणिताङ्कुशः हस्ती । '**पुन्नागः**' प्रधानपुरुषः । पक्षे-गजवरः । **मोहदुर्गस्य भञ्जकः** अस्ति ॥ ११७ ॥

**सीमा सुकृतिनां चूला, भोगसौभाग्यभागिनाम् । चूडामणिर्मुनीन्द्राणामहङ्कारवतामपि ॥ ११८ ॥**

**तेन प्रारम्भनिर्वाहधौरेयेण सुतेन ते । पतिव्रताव्रतं तीर्थं, प्रभावेणेव कीर्तितम् ॥ ११९ ॥**

**सुकृतिनां**-पुण्यवतां **सीमा**-मर्यादा, **भाग्यसौभाग्यभागिनां चूला**-शिखा, **अहङ्कारवतामपि**-ज्ञानादौ गर्वभाजामपि **मुनीन्द्राणां चूडामणिः**-शिरोरत्नम् ॥ ११८ ॥ **तेन ते**-तव, प्रारम्भनिर्वाहधौरेयेण-प्रारम्भस्य निर्वाहे-पारगमने धुर्येण-शक्तेन, **सुतेन** पुत्रेण-तव **पतिव्रताव्रतं कीर्तितं**-भुवि स्तुतम् । किमिव ? प्रभावेण-महिम्ना तीर्थमिव कीर्त्यते-इति भद्रां प्रति श्रेणिकोक्तिः ॥ ११९ ॥

**स्त्रीषु हाटकपट्टस्ते, भालपट्टे निवेश्यताम् । सूता सिंहीव या मोहकुम्भिकण्ठीरवं सुतम् ॥ १२० ॥**

**या सिंही इव, मोहकुम्भिकण्ठीरवं**-मोहमतङ्गजमारणे मृगेन्द्रतुल्यम्, **सुतं**-पुत्रम्, **सूता**-प्रसूता, तस्याः **ते**-तव **भालपट्टे**-ललाटदेशे, **स्त्रीषु हाटकपट्टः** सुवर्णपट्टः **निवेश्यतां**-स्थाप्यताम् ॥ १२० ॥

**तद् वृथा मा कृथाः शोकं, भद्रे वीरप्रसूरसि । दृढं परिकरं बद्ध्वा, वधूभिः परिवारिता ॥ १२१ ॥**

**धैर्यप्रोत्साहनावाक्यै र्मधुरैः सलिलैरिव । महासमरसंरम्भे, सम्प्रीणय निजाङ्गजम् ॥ १२२ ॥**

**तत्**-तस्मात् हे **भद्रे** ! **वृथा शोकं मा कृथाः** मा कुरु । **त्वं वीरप्रसूः**-वीरमाता असि । ततः **दृढं**-प्रौढं **परिकरं**-परिवारं **बद्ध्वा**-कृत्वा, **वधूभिः**-पुत्रवधूभिः **परिवारिता**-परिवेष्टिता त्वम् ॥ १२१ ॥ **महासमरसंरम्भे**-रम्भे-हे रम्भातुल्ये महासमरसं मुनिम्, युद्धपक्षे-महासमरस्य-महासङ्ग्रामस्य संरम्भे-आवेशे । **निजाङ्गजं**-स्वपुत्रम्, **सलिलैरिव**-जलैरिव, **मधुरैः** धैर्यप्रोत्साहनावाक्यैः-धैर्यस्य प्रोत्साहनाकारकैः **वाक्यैः** वचनैः, **सम्प्रीणय**-रञ्जय ॥ १२२ ॥

**श्रीश्रेणिकवचोभिस्तैर्भद्रा निन्ये रसान्तरम् । गुरूपदेशैः सद्भूतैश्चित्तवृत्तरिवाधिकम् ॥ १२३ ॥**

**तैः श्रीश्रेणिकवचोभिः भद्रा रसान्तरं**–अन्यरसं, करुणरसात् शान्तरसम्, **निन्ये**–नीता, कैरिव ? **सद्भूतैः**–सत्यैः, **गुरूपदेशैः** इव **चित्तवृत्तिः** इव **अधिकं**–उच्चस्थानं नीयते ॥ १२३ ॥

**भद्रा शोकं पराभूय, समाश्वास्य जनीजनम् । आशीर्वादैः सुधास्वादैः, नन्दयामास नन्दनम् ॥ १२४ ॥**

**भद्रा शोकं पराभूय**–निराकृत्य, **जनीजनं**–वधूजनं **समाश्वास्य, सुधास्वादैः**–अमृतमधुरैः **आशीर्वादैः नन्दनं**–शालिमुनिं **नन्दयामास**–नन्दयति स्म ॥ १२४ ॥

**भद्रायाः आशीर्वादाः ।**

**जय त्रिजगतीवीर !, जय वीरावतंसक ! । जय वीरविभोः शिष्य !, जय वीरपथाध्वग ! ॥ १२५ ॥**

स्पष्टार्थः । **वीरावतंसक**–वीरमुख्य ! । **वीरपथाध्वग**–वीरमार्गप्रवासिन् ॥ १२५ ॥

**मृत्तिकेव सुतीर्थस्य, वन्द्याऽहं ते प्रसादतः । स्मरणीया जनानां तु, वधूट्यो वनवीथिवत् ॥ १२६ ॥**

हे पुत्रमुने ! **ते**–तव **प्रसादतः**–कृपातः **अहं सुतीर्थस्य मृत्तिका इव वन्द्या** जाता । **वनवीथिवत्** सुतीर्थस्य वनराजिवत्, **जनानां तु वधूट्यः**–पुत्रवध्वः **स्मरणीयाः** जाताः ॥ १२६ ॥

**शिवास्ते सन्तु पन्थानः, पारमार्थिकपान्थ ! हे । निष्प्रत्यूहं समभ्येतु, साध्यसिद्धिः स्वयंवरा ॥ १२७ ॥**

**हे पारमार्थिकपान्थ** परमपदप्रवासिन् ! **ते**-तव **पन्थानः मार्गाः शिवाः** कल्याणाः **सन्तु । स्वयंवरा साध्यसिद्धिः** लक्ष्यसिद्धिः मुक्तिः, **निष्प्रत्यूहं**-निर्विघ्नं **समभ्येतु** समागच्छतु ॥ १२७ ॥

**युवां संसारपारीणौ, भूयास्तामस्तविस्तरौ । शाश्वतश्रीपरीरम्भ-सुभगम्भावुकस्थिती ॥ १२८ ॥**

हे शालिधन्यौ ! **युवां संसारपारीणौ**-भवपारङ्गतौ, **अस्तविस्तरौ** नष्टसंसारविस्तरौ, **शाश्वतश्रीपरीरम्भसुभगम्भावुकस्थिती** शाश्वतश्रिया-मुक्तिलक्ष्म्याः, परीरम्भे आलिङ्गने, सुभगम्भावुका सौभाग्यपूर्णा स्थितिः ययोः तौ, **भूयास्तां** भवताम् ॥ १२८॥

**भद्रेत्याशास्य रुदती, स्वं च सन्धीरयन्त्यपि । शरद्द्यौरिव वर्षन्ती, क्वापि क्वापि महोज्ज्वला ॥ १२९ ॥**

**ततोऽभयकुमारेण, धैर्येणेवावलम्बिता । समं कुटुम्बनिर्वाहावष्टम्भेनेव भूभृता ॥ १३० ॥**

**परिष्कृता वधूटीभिः, पुण्यप्रकृतिभिर्यथा । नगरं भवितव्यस्य, नियोगमिव साऽविशत् ॥ १३१ ॥ ( विशेषकम् )**

**इति आशास्य**-आशीर्वादं दत्वा **रुदती भद्रा स्वं**-आत्मानं, **सन्धीरयन्ती अपि**-आश्वासयन्ती अपि, **शरद्द्यौरिव** शरदाकाशमिव, **महोज्ज्वला, क्वापि-क्वापि शरद्वत्,** वर्षन्ती-अश्रुभिः ॥ १२९ ॥ **ततः धैर्येण इव अभयकुमारेण अवलम्भिता**-अवष्टम्भिता, **कुटुम्बनिर्वाहावष्टम्भेन इव**-कुटुम्ब-निर्वाहे अवष्टम्भेन आधारभूतेन इव, **भूभृता श्रेणिकनृपेण समं**-सार्धम् ॥ १३० ॥ **पुण्यप्रकृतिभिः यथा**-इव, **वधूटीभिः**-पुत्रवधूभिः, **परिष्कृता**-मण्डिता, **भवितव्यस्य**-भाग्यस्य, **नियोगमिव** शासनमिव, **सा**-भद्रा, **नगरं**-राजगृहम्, **अविशत**-प्रविष्टा ॥ १३१ ॥

**धन्य-शालिभद्रयोः सर्वार्थसिद्धविमानगमनम्–**

**व्यक्तं मुक्तामयौ युक्तौ, तपःश्रीकुण्डलाविव । तौ वज्रकर्णिकासारौ, वीर्यश्रीकङ्कणाविव ॥ १३२ ॥**

**कल्यकल्याणरूपौ च, ज्ञानश्रीनूपुराविव । निष्प्रकम्पौ शान्तिदान्त्योः, क्रीडाभूमीधराविव ॥ १३३ ॥**

**धन्यः श्रीशालिभद्रश्च, मुनिवृन्दारकौ ततः । परीषहोपसर्गादि-वैरिवृन्दविदारकौ ॥ १३४ ॥**

**गुरुगौतमनिर्यामं, संन्यासं पोतमास्थितौ । भावनित्यगतेर्वेगाद्, ध्रुवध्यानप्रमाणतः ॥ १३५ ॥**

**सुदुस्तरमतिक्रम्य, प्रतिज्ञाभरनीरधिम् । कल्पानल्पश्रियोऽतीत्य, स्वामिसेवाकदर्थितान् ॥ १३६ ॥**

**अभव्यैरपि सम्भाव्यवैभवानुभवानहो । अधिकारानिवोत्सृज्य, नवग्रैवेयकानपि ॥ १३७ ॥**

**सिद्धेः शाखापुरे किंवा, वेशविश्रामशाखिनि । विवोढुं शाश्वतीं लक्ष्मीं, जन्यावासेऽथवाऽङ्गणे ॥ १३८ ॥**

**अनुत्तरसुखागारे, तौ पञ्चानुत्तरोत्तरे । महाविमाने सर्वार्थसिद्धेऽभूतां सुरोत्तमौ ॥ १३९ ॥ ( अष्टभिः कुलकम् )**

अथ पादपोपगमनानशनस्थौ शालिधन्यौ वर्णयति **'तपःश्रीकुण्डलौ इव'** तपःश्रियाः कुण्डलौ-कर्णकुण्डलौ इव । **'व्यक्तं'** स्पष्टम् । **'मुक्तामयौ'**, मुक्ताः-त्यक्ताः आमयाः भावरोगाः याभ्यां तौ । कुण्डलपक्षे-मुक्ताफलनिर्मितौ । **युक्तौ**-उचितौ । पक्षे-संयुक्तौ । **'वज्रकर्णिकासारौ'** वज्ररत्नस्य कर्णिका एव सारभूता ययोः तौ, **वीर्यश्रीकङ्कणौ इव**-वीर्यश्रियाः कङ्कणौ-वलयौ इव ॥ १३२ ॥ **ज्ञानश्रीनूपुरौ इव, कल्यकल्याणरूपौ**-सुन्दरमङ्गलरूपौ, नूपुरपक्षे-शुद्धसुवर्णभूतौ । **'शान्तिदान्त्योः'** शान्तिदान्तिसुन्दर्योः **निष्प्रकम्पौ**-निश्चलौ, **क्रीडाभूमीधरौ इव**-क्रीडापर्वतौ इव ॥ १३३ ॥ **ततः धन्यः श्रीशालिभद्रश्च मुनिवृन्दारकौ**-मुनिमुख्यौ, **परीषहोपसर्गादिवैरिवृन्दविदारकौ** ॥ १३४ ॥ **'गुरुगौतमनिर्यामं'** गुरुः गौतम निर्यामः निर्यामकः पोतपक्षे-कर्णधारः यस्य तम्, **संन्यासं**-संयमम्, **पोतं**-प्रवहणम्, **आस्थितौ**-आश्रितौ ।

**ध्रुवध्यानप्रमाणतः**-निश्चल ध्यानप्रमाणतः, पोतपक्षे ध्रुवतारकावधानप्रमाणतः, नाविकाः किल दिग्विनिर्णयार्थं ध्रुवतारकं विलोकन्ते, **भावनित्यगतेः** भावानां-भावनानां नित्यं गतिः यस्मिन् तस्मात् **वेगात्**-रयात् ॥ १३५ ॥ **'सुदुस्तरं'** अतिदुःखेन तीर्यते एवंविधम्, **प्रतिज्ञाभरनीरधिं**-प्रतिज्ञाभरः एव नीरधिः समुद्रः तम्, **अतिक्रम्य**-उल्लङ्घ्य । **स्वामिसेवाकदर्थितान्**-इन्द्रादिस्वामिसेवाभिः कदर्थिता विडम्बितान्, **अल्पश्रियः**-अल्पा श्रीः समृद्धिः यत्र तान्, कल्पान् -सौधर्मादिद्वादशदेवलोकान् **अतीत्य**-अतिक्रम्य ॥ १३६ ॥ **अहो**-आश्चर्ये, **अभव्यैरपि** जीवैः **सम्भाव्यवैभवानुभवान्**-सम्भाव्यः वैभवस्य अनुभवः यत्र तान्, **अधिकारानिवकारासु** गुप्तिषु इति अधिकाराः तानिव, **नवग्रैवेयकानपि**-लोकपुरुषे ग्रीवास्थानीयान् नव देवलोकान् **उत्सृज्य**-परित्यज्य ॥ १३७ ॥ **'सिद्धेः'** मुक्तिनगरस्य, **शाखापुरे**-उपपुरे, **किंवा** सिद्धेः **वेशविश्रामशाखिनि**-प्रवेशे विश्रामशाखी-विश्रान्तिवृक्षः तत्र, **अथवा शाश्वतीं मुक्तिं** लक्ष्मीं **विवोढुं**-परिणेतुं **जन्यावासे** जनी वधूः तस्याः आवासे, विवाहसमये यत्र स्थीयते, जन्यानां वा वधूसुहृदानां आवासे, **अङ्गणे** ॥ १३८ ॥ **अनुत्तरसुखागारे**-अनुत्तरस्य अनुपमस्य सुखस्य अगारे-गृहे, **पञ्चानुत्तरोत्तरे** पञ्चानां अनुत्तराणां विमानानां उत्तरे-उत्तमे, **सर्वार्थसिद्धे महाविमाने**-तन्नामके पञ्चमे विमाने । तौ शालिधन्यौ, **सुरोत्तमौ**-देवश्रेष्ठौ, **अभूताम्** ॥ १३९ ॥

**नात्रान्यस्वामिनामापि, तदस्थीयतामिति । शालिमस्थापयल्लक्ष्मीर्निरुत्तरमनुत्तरा ॥ १४० ॥**

**अत्र**-विमाने **अन्यस्वामिनाम** अपि न अस्ति **तत्**-तस्मात् **अवस्थीयां**-अवस्थानं **क्रियताम्-इति अनुत्तरा लक्ष्मीः**:अनुत्तरविमानश्रीः, **निरुत्तरं-अनुत्तरं शालिं**-मुनिं **अस्थापयत्** स्थापितवती ॥ १४० ॥

**आत्रायस्त्रिंशतं वार्धीन्, सौख्याम्भोधिगयोरपि । नाभ्याययुरभिष्वङ्गतरङ्गाः पुनरेतयोः ॥ १४१ ॥**

**आत्रायस्त्रिंशतं वार्धीन्**–त्रयस्त्रिंशतं सागरोपमान् यावत्, **सौख्याम्भोधिगयोरपि**–सुखसमुद्रगतयोरपि, **एतयोः**–शालिधन्ययोः **पुनः अभिष्वङ्गतरङ्गा**–आसक्तिकल्लोलाः, **न अभ्याययुः**–न अभिगच्छन्ति स्म । समुद्रस्थितावपि तरङ्गस्पर्शाभावः आश्चर्यं व्यनक्ति ॥ १४१ ॥

**व्यामोहेन महाहिमेन मथितं, नो मायया लूकया, कोपेन प्रबलातपेन न मदै रोगाभियोगैरिव,**
**पश्चात्तापभरैर्विहङ्गनिकरै र्नासूयया वात्यया, सौख्यं सौमनसं वनं तदनयो र्लोकोत्तरं कीर्त्यते ॥ १४२ ॥**

**व्यामोहेन** अज्ञानेन, **महाहिमेन**–महातुहिनेन, **न मथितं** न नष्टम्, **नो लूकया**–न उष्णवायुना ('लू' इति भाषायाम्) **मायया; न प्रबलेन आतपेन कोपेन; न रोगाभियोगैरिव** न रोगाणां अभियोगैः उद्यमैरिव **मदैः** मानैः, **न पश्चात्तापभरैः** विहङ्गनिकरैः–पक्षिसमूहैः । **न असूयया**–न ईर्ष्यया, **वात्यया**–वायुसमूहेन **मथितमिति** सर्वत्र सम्बध्यते । **तत्**–तस्मात् **अनयोः**–शालिधन्ययोः **सौख्यं, सौमनसं**–सुमनसां देवानामिदं सौमनसं तन्नामकं मेरुस्थितवनम्, **वनं लोकोत्तरं**–अलौकिकं **कीर्त्यते**–कथ्यते ॥ १४२ ॥

**ब्रह्मज्योतिरिव स्वयं समुदितं, नोपाधिसंसाधितं, पीवज्जीवमिवोपजीव्यमिह नो, नासारसंज्ञादिभिः ।**
**निष्प्रत्यूहसमूहमुज्ज्वलकल-श्रीकेवलालोकवद्, द्वैतातीतमहो ! महोदयसखं तावन्वभूतां सुखम् ॥ १४३॥**

**ब्रह्मज्योतिः इव**–परमतेजः इव, **स्वयं समुदितं** प्रकटितम्, **न उपाधिसंसाधितं**–उपाधिभिः साधनैः न संसाधितं–प्राप्तम्, **पीवज्जीवमिव**–पीवत्–पुष्टीभवत् जीवः जीवनं तदिव, **इह**–संसारे, **असारसंज्ञादिभिः** आहार–भयादिसंज्ञाभिः, **न उपजीव्यं**–न अपेक्ष्यमाणम्, **निष्प्रत्यूहसमूहं** निर्विघ्न समूहम्, **उज्ज्वलकलश्रीकेवलालोकवत्** उज्ज्वलः–अवदातः कलः

मनोज्ञः **श्रीकेवलालोकः** श्रीकैव्यल्यप्रकाशः तद्वत्, **द्वैतातीतं**-अद्वैतं एकम्, **अहो ! महोदयसखं**-महोदयः मोक्षः एव सखा मित्रं यस्य तत्, **सुखं तौ** शालिधन्यौ देवौ, **अन्वभूतां**-अनुभवतः स्म ॥ १४३ ॥

**दुष्कर्म ताभ्यां तु पुरा विदेहे, जन्माधिगम्याथ पुराविदेहे। निरन्तरानन्दसदाविदेहे, प्रयास्यतस्तौ हि पदे विदेहे ॥ १४४ ॥**

**ताभ्यां** शालिधन्यदेवाभ्याम्, **दुष्कर्म** दुरितम्, **तुः** चकारार्थः, **पुरा**-पूर्वजन्मनि-शालिधन्य जन्मनि, **विदेहे** विशेषेण दग्धम्। **अथ पुराविदिहे**-पूर्वमहाविदेहे क्षेत्रे, **जन्म अधिगम्य**-प्राप्य। **निरन्तरानन्दसदाविदेहे**-निरन्तरेण-निबिडेन आनन्देन सदा विदेहः उपचयः (दिर्हीक् लेपे) यस्मिन् तस्मिन्, **विदेहे** देहरहिते, **पदे**-स्थाने मोक्षे इत्यर्थः, **तौ प्रयास्यतः**-गमिष्यतः ॥ १४४ ॥

**अनुत्तरं दानमुत्तरश्रियो-ऽप्यनुत्तरं मानमनुत्तरं यशः। श्रीशालिभद्रस्य गुणा अनुत्तरा, अनुत्तरं धैर्यमनुत्तरं पदम् ॥ १४५ ॥**

**श्रीशालिभद्रस्य दानं अनुत्तरम्,** बाल्यभावेऽपि प्रथमवारमेव प्राप्तस्याऽपि परमान्नस्य मुनये दानात्। **अनुत्तरश्रियः** शालिभद्रजन्मनि नित्यं दिव्यर्द्धिभोगात्। **मानं अनुत्तरम्,** राजालिङ्गनेऽपि अपमानचिन्तनात्। **यशः अनुत्तरम्,** श्रीमहावीरस्वामिगौतमस्वामि-श्रेणिकाभयादिभिः महानुभावैः गीयमानत्वात्। **गुणाः अनुत्तराः** स्वगृहे सन्मानाऽभावेऽपि समताभङ्गाऽभावात्। **धैर्यं अनुत्तरम्,** अनशन-काले तप्तशिलायामपि अखण्डधैर्यात् तदानीं पत्नी-मात्रादिषु ममतात्यागाद् वा। **अनुत्तरं पदम्,** तन्नामकं स्वर्गस्थानमनुत्तरविमानम्। **अनुत्तरपदं** मुक्तिर्वा। वंशस्थवृत्तमिदम्, तल्लक्षणं चेदम्-'जतौ तु वंशस्थमुदीरितं जरौ" ॥ १४५ ॥

**जयतु शम समुद्रः, प्राप्तमौनीन्द्रमुद्रः, कलिकलुषदरिद्रस्त्यक्तसम्मोहनिद्रः।**
**मदनदमनरुद्रः, सर्वतो भाविभद्रः, शिवपथरथभद्रः, श्रीमुनिः शालिभद्रः ॥ १४६ ॥**

**श्रीमुनिः शालिभद्रः जयतु** । कथम्भूतः सः ? **शमसमुद्रः** प्रशमपयोधिः । **प्राप्त-मौनीन्द्रमुद्रः**-मुनीन्द्रस्य इयं मौनीन्द्री, प्राप्ता मौनीन्द्री मुद्रा येन सः । **कलिकलुषदरिद्रः**-कलिकलुषाभ्यां दरिद्रः रहितः **'त्यक्तसम्मोहनिद्रः'** त्यक्ता सम्मोहनिद्रा येन सः । **'मदनदमनरुद्रः'** मदनस्य कामस्य दमने रुद्रः शिवः । शिवेन किल कामः दग्धः इति पौराणिकाः । **सर्वतः** परितः, **भाविभद्रः** भाविनि कालेऽपि भद्रं मुक्तिरूपं मङ्गलं यस्य सः । **'शिवपथ रथभद्रः'** शिवपथरथे-मुक्तिमार्गस्यन्दने भद्रः उत्तमः वृषभः ॥ १४६ ॥

**श्री शालिर्गुरुराजकुञ्जरवराध्यारूढया प्रौढया, श्रीमद्धर्मधराधिपप्रहितया, वैराग्यभङ्ग्या स्वयम् ।**
**स्वीचक्रे गजमुद्रयेव सहसा, सर्वार्थसिद्ध्यैव यः, तस्यैतच्चरितं सतां प्रदिशतां, कल्याणमालाश्रियः ॥ १४७॥**

**( शार्दूल. )**

य **श्रीशालिः सर्वार्थसिद्ध्या**-सर्वार्थसिद्धसुन्दर्या कर्तृभूतया, **सहसा एव स्वीचक्रे**-स्वीकृतः । कथम्भूतया सर्वार्थसिद्ध्या ? **गुरुराजकुञ्जरवराध्यारूढया**-गुरुराजः एव कुञ्जरवरः गजवरः तं आरूढया, **प्रौढया**-उत्कृष्टया, **श्रीमद्धर्मध-राधिपप्रहितया** श्रीमद्धर्मनृपेण प्रहितया-प्रेषितया, स्वयं **वैराग्यभङ्ग्या**-विरागप्रकारेण गजमुद्रया इव हस्तिमुद्रया इव (नृपेण गजमुद्रा गजारूढश्रीकरणाय प्रहीयते) यः सर्वार्थसिद्ध्या स्वीचक्रे । **तस्य** शालिभद्रस्य **एतत्** चरितं-काव्यरूपमिदं जीवनम्, सतां-सज्जनानाम्, **कल्याणमालाश्रियः**-मङ्गलश्रेणिलक्ष्मीः, **प्रदिशतां**-प्रदेयात् ॥ १४७ ॥

**प्रस्तुतं दानधर्मेण, श्रीशालिचरितं शुभम् । गोभद्रेण श्रीविबुधप्रभेण तु विशेषितम् ॥ १४८ ॥**
**श्रीमद् भद्रेश्वरे वीर-पादोपान्ते समर्थितम् । भूयात् सकर्णकर्मानाममृतप्रातराशवत् ॥ १४९ ॥**

**शुभं श्रीशालिचरितं दानधर्मेण**-मासोपवासिनः यतेः क्षीरदानधर्मः तेन । ग्रन्थपक्षे-प्रस्तुतग्रन्थकर्त्रा धर्मकुमारपण्डितेन । **प्रस्तुतं**-प्रारब्धं, **'श्रीदानधर्मकल्पद्रुः'** इतः प्रारब्धम् । **'श्रीविबुधप्रभेण'** श्रीविबुधेषु देवेषु प्रभा यस्य तेन (गोभद्रदेवेन)। पक्षे एतद्ग्रन्थोपदेशकविबुधप्रभसूरिणा । **'गोभद्रेण'** शालिपित्रा । पक्षे-गवि-भुवि भद्रेण मङ्गलेन, अथवा गौः वाणी तया भद्रेण (विबुधप्रभसूरिणा) । **तुश्च**कारार्थः । **'विशेषितं'** विशिष्टतां गतम् ॥ १४८ ॥ **'श्रीमद्भद्रेश्वरे'** कच्छदेशस्थिते भद्रेश्वर इति नाम्ना प्रसिद्धे तीर्थे । **'वीरपादोपान्ते'** तीर्थपतिश्रीमहावीरदेवचरणान्तिके । **'समर्थितं'** विरचितम् । इदं चरितम् । 'सकर्णकर्णानां' प्रवीणजनकर्णानाम् । **'अमृतप्रातराशवत्'** अमृतमयप्रातर्भोजनवत् । **'भूयात्'** भवतु ॥ १४९ ॥

**श्रीनागेन्द्रमुनीन्द्रवंशविपुल-क्षीरार्णवैरावणाः, श्रीहेमप्रभसूरयः प्रसृमरश्रीकीर्तिसांराविणाः ।**
**तत्पट्टे प्रभुधर्मघोषगुरवो रेजुः स्फुरद्गौरवाः, श्रीसोमप्रभसूरयस्तरणयस्तत्तट्टपूर्वाचले ॥ १५० ॥ ( शार्दूल. )**

**'श्रीनागेन्द्रमुनीन्द्रवंशविपुलक्षीरार्णवैरावणाः'** श्रीनागेन्द्रमुनीन्द्रवंशः श्रीनागेन्द्र इति नाम्ना ख्यातः मुनीन्द्रवंशः मुनीश्वराणां गच्छः सः एव विपुलक्षीरार्णवः-विशालक्षीराब्धिः तस्मिन् ऐरावणाः ऐरावणहस्तितुल्याः । **'प्रसृमरश्रीकीर्तिसांराविणाः'** प्रसृमराभ्यां विस्तरणशीलाभ्यां श्री-कीर्तिभ्यां सांराविणं-अभिव्याप्तः ध्वनिः येषां ते । अभिव्याप्तौ ।५।३।९०।। इत्यनेन सांराविणम् । **श्रीहेमप्रभसूरयः** अभूवन् । **'तत्पट्टे'** तेषां पट्टे **स्फुरद्गौरवाः प्रभुधर्मघोषगुरवः रेजुः** राजन्ते स्म । **'तत्पट्टपूर्वाचले'** तेषां पट्टः एव पूर्वाचलः-उदयाचलः तस्मिन् **तरणयः**-सूर्याः **श्री सोमप्रभसूरयः** रेजुः ॥ १५० ॥

**ब्रह्माणः किल भारती श्रितवती यत्कण्ठपीठीमठीं, गोविंदाः कमला यदंह्रिकमलासेवासु हेवाकिनी ।**

**ईशानाः किमु गङ्गयेव महिता गौर्या सुकीर्त्या च ये, श्रीसोमप्रभसूरयः सुमनसां मूर्धन्यतां ते दधुः ॥ १५१ ॥**

**( शार्दूल. )**

**'यत्कण्ठपीठीमठीं'** यत्कण्ठपीठी–श्रीसोमप्रभसूरिकण्ठपीठिका यस्यां सा मठी–मठः ताम् । **किलः** निश्चये । **भारती**–सरस्वती श्रितवती, इमे सूरयः किं **ब्रह्माणः** प्रजापतयः ? सरस्वती ब्रह्मपुत्रीति ख्याता । **यदंह्रिकमलासेवासु**–यत्पादपद्मयोः **आसेवासु**–पर्युपासनासु, **हेवाकिनी** तत्परा, **कमला**–लक्ष्मीः, तस्मात् किं इमे **सोमप्रभसूरयः गोविन्दाः**–नारायणाः, लक्ष्मीः विष्णुपत्नीत्वेन ख्याता । **ये च गङ्गया इव गौर्या**–श्वेतया, ईशानपक्षे–पार्वत्या सुकीर्त्या **महिताः–पूजिताः तत् किमु ईशानाः** महादेवाः ? **ते श्री सोमप्रभसूरयः सुमनसां**–देवानां पण्डितानां च, **मूर्धन्यतां**–मुख्यतां, **दधुः** धारयन्ति स्म । ब्रह्म–विष्णुमहेशाः अपि देवेषु मूर्धन्यतां धारयन्ति इति प्रसिद्धिः । ॥ १५१ ॥

**तत्पट्टाचलचूलिका विजयते, दम्भाख्यजम्भाजित–श्रीः श्रीमान् विबुधप्रभः प्रभुरसौ, सुज्ञानलीनाशयः ।**
**तस्य प्राप्य निदेशलेशमनिशं, गीर्देवताध्यानतः, चक्रे धर्मकुमारसाधुरमलां श्रीशालिलीलाकथाम् ॥ १५२ ॥**

**तत्पट्टाचलचूलिका**–तत्पट्टाद्रिशिखरम्, 'तत्पट्टे किल चूलिका' इत्यपि पाठः । **दम्भाख्यजम्भाजितश्रीः**–दम्भाख्यः दम्भनामा जम्भदैत्यः तेन अजिता श्रीः यस्य सः । **सुज्ञानलीनाशयः**–सुज्ञाने लीनः आशयः भावः यस्य सः, **श्रीमान् प्रभुः असौ विबुधप्रभः** तन्नामा गुरुः, पक्षे इन्द्रः, **विजयते । तस्य निदेशलेशं**–आज्ञांशम्, **प्राप्य अनिशं**–सदा **गीर्देवताध्यानतः** सरस्वतीध्यानतः, **धर्मकुमारसाधुः** धर्मकुमारनामा मुनिः, **अमलां**–उज्ज्वलाम्, **श्री शालिलीलाकथां चक्रे**–कृतवान् ॥ १५२ ॥

**इयं कथा वृद्धकुमारिकेव, सदूषणा भूषणवर्जिताऽऽसीत् ।**
**प्रद्युम्नदेवस्य परं प्रसादात्, बभूव पाणिग्रहणस्य योग्या ॥ १५३ ॥**

**वृद्धकुमारिका इव इयं कथा सदूषणा** काव्यदोषसहिता, वृद्धा पक्षे-वृद्धत्वादिदोषयुता । **भूषणवर्जिता**-काव्यालङ्कारहिता-पक्षे आभूषणहीना । **आसीत्** । '**परं**' किन्तु । '**प्रद्युम्नदेवस्य**' तन्नामकमुनेः, पक्षे-कामदेवस्य । **प्रसादात्**-कृपातः । **पाणिग्रहणस्य** पाणौ हस्ते ग्रहणस्य, पक्षे-विवाहस्य । **योग्या**-उचिता । **बभूव**-जाता ॥ १५३ ॥

**प्रभाचन्द्रेण गणिना, गुणगौरवशालिना । अलेखि प्रथमादर्शे, भक्तिव्यक्तिनिदर्शनम् ॥ १५४ ॥**

**गुणगौरवशालिना प्रभाचन्द्रेण गणिना प्रथमादर्शे**-प्रथमप्रतौ **इदं चरितं अलेखि**-लिखितम् । **इदं किल भक्तिव्यक्तिनिदर्शनं** भक्तिप्रकाशनदृष्टान्तः ॥ १५४ ॥

**यावद्दानदिवाकरः शुभदिन-श्रीसौविदल्लोऽर्हतः, तीर्थे पूर्वगिरावुदेति तिमिर-ध्वंसी विवेकारुणः ।**
**स्फीता तावदियं यतिक्षितिपतेः श्रीशालिभद्रप्रभोः, बुद्धैर्बोधकरैः सुमङ्गलकला-भोगावली कीर्त्यताम् ॥ १५५ ॥**
**( शार्दूल. )**

**यावद् दानदिवाकरः**-दानसूर्यः, **पूर्वगिरौ**-उदयाचले, **अर्हतः**-जिनस्य, **तीर्थे**-शासने उदेति । कथम्भूतः सः ? **शुभदिनश्रीसौविदल्लः**-शुभदिनस्य श्रियाः-शोभायाः रक्षणे सौविदल्लः अन्तःपुर-स्त्रीरक्षकः । **तिमिरध्वंसी**-तमोनाशी, तमः पापं अन्धकारश्च । **विवेकारुणः**-विवेकः अरुणः-सूर्यसारथिः यस्य सः । **तावत् यतिक्षितिपतेः**-मुनिमहीपतेः,

**श्रीशालिभद्रप्रभोः बोधकरैः**-बोधकैः, पक्ष-वैतालिकैः-स्तुतिव्रतैः । 'वैतालिका बोधकराः' इति हैम्याम् । **बुद्धैः**-पण्डितैः, **स्फीता** विस्तृता **इयं सुमङ्गलकला भोगावली**-सुमङ्गलाः कलाः त्यागरूपाः कलाः यस्यां सा भोगानां आवली श्रेणिः, पक्षे-भोगावली नामकः ग्रन्थः, वैतालिकाः तं पठन्ति, यत् श्री हैम्याम्-'नग्नःस्तुतिव्रतस्तस्य, ग्रन्थो भोगावली भवेत्।" **कीर्त्यतां** गीयतां पठ्यताम् ॥ १५५ ॥

**श्री शालिचरिते धर्म-कुमार सुधिया कृते । श्रीप्रद्युम्नधिया शुद्धे, सप्तमः प्रक्रमोऽभवत् ॥ १५६ ॥**

**अयं दानमहाधर्मः, कल्पद्रुम इवाद्भुतः । भूयात् समस्तभव्यानां, मनोवाञ्छितसिद्धये ॥ १५७ ॥**

स्पष्टार्थः ।

**ब्राह्मी निर्मलशब्दसिद्धिकलिता, मन्ये पवित्राशया, लक्ष्मीर्वा पुरुषोत्तमप्रियतमा, नानार्थजातप्रसूः ।**

**गौरी मङ्गलशालिभद्रचरिता सर्वप्रियम्भावुका, जीयाद्धर्मकुमारपण्डितमति विंस्तारिधर्मोन्नतिः ॥ १५८ ॥**

**धर्मकुमारपण्डितमतिः जीयात्** । कीदृशी सा ? '**निर्मलशब्दसिद्धिकलिता**'-निर्मलाभिः व्याकरणदोषरहिताभिः शब्दसिद्धिभिः कलिता-भूषिता, **पवित्राशया**-शुचिभावा, सरस्वतीपक्षे-पवित्रहृदया, **ब्राह्मी** सरस्वती । **नानार्थद्रव्यप्रसूः**-विविधार्थसमूहजनयित्री, लक्ष्मीपक्षे-अनेकधनसमूहजनयित्री, **पुरुषोत्तमप्रियतमा**-उत्तमपुरुषाणां प्रियतमा अतीव प्रिया, पक्षे विष्णुपत्नी लक्ष्मीः । **वा** विकल्पे । **मङ्गलशालिभद्रचरिता**-मङ्गलं शालिभद्रस्य चरितं यस्याः सा, पक्षे-मङ्गलेः शालते मङ्गलशाली भद्रः-वृषभः नन्दी यस्य सः शम्भुः तेन सहचरिता चलिता (गौरी), **सर्वप्रियम्भावुका**-सर्वजनानां प्रिया

भवति इत्येवंशीला, **गौरी**-शिवप्रिया, **'मन्ये'** अहं कविः मन्ये । **विस्तारिधर्मोन्नतिः**-विस्तरणशीला धर्मोन्नतिः यस्यां सा, धर्मकुमारपण्डितस्य मतिः जीयात्-जयतु ॥ १५८ ॥

**जिनातिशय-यक्षाख्य-वत्सरे विहिता कथा । ग्रन्थेन द्वादशशती, चतुर्विंशतिसंयुता ॥ १ ॥**

**जिनानां अतिशयाः ३४, यक्षाः १३, 'अङ्कानां वामतो गतिः' इतिन्यायात् वि. सं. १३३४ वर्षे इयं कथा विहिता । ग्रन्थाग्रं १२२४ श्लोकाः ।**

**इति श्री शालिभद्रचरिते सर्वार्थसिद्धिसम्प्राप्तिवर्णनो नाम सप्तमः प्रक्रमः ।**

# टीकाकार - प्रशस्तिः

कच्छोद्धारकरो मुनिः समभवत्, **पद्माभिद्यः** श्रीतपा-गच्छे स्वच्छगुणे सरोवरसमे, यः पद्मशोभां गतः ।
तच्छिष्यो मुनिपुङ्गवो मनफरा-जातश्च **जीताभिधः,** यस्याऽद्यापि प्रकीर्त्यते भुवि चमत्कारान्वितं जीवितम् ॥ १ ॥

(शार्दूल.)

तच्छिष्यो गुरुपादपद्ममधुलिट्, **श्रीहीरनामाऽभवत्,** तत्पट्टे **कनकाख्य**सूरिवृषभो, वात्सल्यवारांनिधिः ।
कारुण्यं विनयः क्षमा श्रुतरतिर्गम्भीरता धीरता, यस्मिन् भूरिगुणाः स्थिता गुरुवरे, रत्नानि वार्धौ यथा ॥ २ ॥

(शार्दूल.)

तदीये पट्टेऽति-स्मृतिबल-युतः संयमरतः, मुनीन्द्रो **देवेन्द्रो** मुखविजितचन्द्रोऽभवदिह ।
गुरुभ्राता तस्य प्रखरचरणासेवनपरः, महाज्योतिर्वेत्ता जगति विदितः **कञ्चनमुनिः** ॥ ३ ॥

(शिखरिणी)

तदीयः सच्छिष्यः प्रशमकरुणापूर्णहृदयः, महायोगी ध्यानी प्रभुचरणलीनश्च सततम् ।
यशस्वी वर्चस्वी यतिततिपतिः सम्प्रति भुवि, **कलापूर्णाचार्यो** जनहृदय-धार्यो विजयते ॥ ४ ॥

(शिखरिणी)

**कलाप्रभस्तस्य** विनेय धुर्यः, सौभाग्यशाली मुनिवृन्दवर्यः। तच्छिष्यमुख्यो मुनि**मुक्तिचन्द्रः**, मुक्तिक्रियामग्नमना अतन्द्रः ॥ ५ ॥

(उपजाति)

मुनिना **मुनिचन्द्रेण,** तस्य शिष्याणुना किल । मुनिश्री **पुण्यपालस्य,** प्राप्य प्रकृष्टप्रेरणाम् ॥ ६ ॥

टीका विरचितेयं **श्री मनफरापुरे** वरे । यत्रोपलब्धजन्मानो, बहवः साधवोऽभवन् ॥ ७ ॥

पूर्वं श्रीमत्तपागच्छे, **विजयप्रभसूरयः । श्रीजीतविजयाद्याश्च,** रत्नान्यस्य पुरस्य हि ॥ ८ ॥

प्रारब्धा तत्र टीकेयं, **जयपुरे** च पूर्णताम् । प्राप्ता श्रीवैक्रमे वर्षे, विधु-वेद-ख-लोचने ॥ ९ ॥

(वि.सं. २०४१)

श्रीमन्मनफरा-पाठ-शालायाः पाठकेन च । विदुषा**ऽमूलखेनैषा**, संशोधिताऽस्ति यत्नतः ॥ १० ॥

तथापि मतिदोषाद् वा, मुद्रणदोषतोऽथवा । याः काश्चित् क्षतयः स्युस्ताः, बुधैः शोध्याः क्षमाधनैः ॥ ११ ॥

नुर्गच्छतो हि क्षतयो भवन्ति, प्रमादतो वा मतिमान्द्यतो वा। दौर्जन्यतस्तत्र हसन्ति केचित्, सौजन्यतः कोऽपि समादधाति ॥ १२ ॥

(उपजाति)

यावज्जगति सूर्येन्दू यावच्च जैनशासनम् । तावज्जीयादिदं काव्यं, वाच्यमानं विचक्षणैः ॥ १३ ॥

**इति समाप्तं सगूर्जरानुवाद-टीकाविभूषितं श्रीशालिभद्रमहाकाव्यम् ॥**

**॥ शिवमस्तु सर्व जगतः ॥**

# પ્રક્રમ - ૧



સૌભાગ્ય અને ભાગ્યની ભૂમિ, પ્રથમ અને અંતિમ તીર્થંકરોની બાહ્ય-આંતર લક્ષ્મીના ભોગોના ફળવાળું શ્રીદાનધર્મરૂપી કલ્પવૃક્ષ જય પામો. ॥ ૧ ॥

જેઓ ધન સાર્થવાહના ભવમાં ઘીના વાદળ બની તે રીતે વરસ્યા, જેથી વિશાળ ધાન્યશ્રી (રાજ્ય લક્ષ્મી) પેદા થઇ, તે શ્રીઆદિનાથ ભગવાન તમને બાહ્યાન્તર લક્ષ્મી માટે બનો. ॥ ૨ ॥

પ્રથમ ભવ (નયસાર)ના સુપાત્ર દાનના મૂળવાળું જેમનું સમ્યક્ત્વવૃક્ષ ઉત્કટ મિથ્યાત્વરૂપી હાથીએ ઉખેડ્યું નથી, વળી દયા-દાન એવી પરમ કોટિને પામ્યા, જેથી નિઃસંગ છતાંય જેમણે દેવદૂષ્યનું (બ્રાહ્મણને) દાન કર્યું તે શ્રીમહાવીરસ્વામી તમારા કલ્યાણ (મોક્ષ) માટે બનો. ॥ ૩ ॥ ૪ ॥

પંડિતોએ સારી રીતે વિચારેલી, ત્રણ લોકના વિષયવાળી, પવિત્ર ઉચ્ચારવાળી સરસ્વતીદેવી ઇચ્છિતને આપનારી બનો.

**બીજો અર્થ :** દેવોએ સારી રીતે ચરાવેલી, ત્રણેય લોકમાં ફરનારી અને ચરનારી (ત્રણેય લોક જેના માટે 'ગોચર' છે.) પવિત્ર મૂત્ર અને છાણવાળી કામધેનુ (ગાય) ઇચ્છિતને આપનારી બનો. ॥ ૫ ॥

જેમના હસ્ત (કિરણ) સંસર્ગથી પથ્થર (ચન્દ્રકાન્તમણિ) જેવા મારામાંથી પણ કાવ્યરસનું સ્ફુરણ થયું તે ચન્દ્રશા ગુરુશ્રી સોમપ્રભસૂરિ પ્રસન્ન થાઓ. ॥ ૬ ॥

શ્રી દેવાનંદના શિષ્ય શ્રીકનકપ્રભના શિષ્યશ્રી પ્રદ્યુમ્નમુનિ દીર્ઘકાળ જય પામો, જેઓ આ ગ્રન્થના સંશોધક છે. ॥ ૭ ॥

જેમના દ્વારા જૈનધર્મની મોક્ષમાર્ગ પ્રકાશક પ્રભા પ્રગટી, તે પૂજ્યશ્રી ઉદયપ્રભસૂરિ જય પામો. ॥ ૮ ॥

સંસાર-સાગરમાં દુર્લભ, અક્ષીણ લક્ષ્મીનો હેતુ, સારી કીર્તિ (શબ્દ) ફેલાવનાર દક્ષિણાવર્તશંખ જેવો દાનધર્મ છે. દાનધર્મે (શંખે) જે અનશ્વર લક્ષ્મીવાળા (વિષ્ણુ) સંગમ (શાલિભદ્રનો જીવ)નો પરમાન્નદાનથી મંગળમય હાથ લીલાપૂર્વક શોભાવ્યો છે, તે શ્રી શાલિભદ્રને હું કથા દ્વારા પ્રસિદ્ધ કરું છું. ॥ ૯ ॥ ૧૦ ॥

તો, શ્રી રામચન્દ્રજીની જેમ જેની કથા બાળ, ગોપાળ, સ્ત્રી-સૌમાં પ્રસિદ્ધ છે, તે શ્રી શાલિભદ્રનું સૌભાગ્ય હું કંઈક કહું છું. ॥ ૧૧ ॥

**શાલિભદ્ર કથા પ્રારંભ :**

ધન-ધાન્યથી અગાધ લક્ષ્મીવાળો, સજ્જનો-પંડિતો અને ગાયોના ધણથી ખીચોખીચ ભરેલો, પર્વતો અને વૃક્ષોની શ્રેણિથી મનોહર મગધ નામનો દેશ છે. ॥ ૧૨ ॥

મોટા ચોખાના ખેતરોની પાળથી જેના સીમાડાની ભૂમિ શોભી રહી છે, રમણીયતાથી જે ગામોમાં મુખ્ય છે, તે 'શાલિગ્રામ' નામનું અહીં (મગધ દેશમાં) ગામ હતું. ॥ ૧૩ ॥

જ્યાં (શાલિગ્રામમાં) દોહવાનો અવાજ, ગાયોનાં ધણનું દર્શન, ખીરની સુગંધ, ભોજનનો સ્વાદ, કોમળ કાંબલીનો સ્પર્શ-વગેરેથી પાંચેય પ્રકારનું વિષયસુખ (દેશ સુખ) રહેલું હતું. ॥ ૧૪ ॥

પાણીમાં પડતા પ્રતિબિંબોનાં ઘરેણાવાળું (સજ્જન-પાણી જેવા સ્વચ્છ અલંકારવાળો) ઘણાં ધાન્યની પેદાશથી ઉપકાર કરનારું (મોટા ભાગે પરોપકારી) સીધા અને ગંદકી વિનાના માર્ગોવાળું (સરળ-નિષ્પાપ જીવનમાર્ગે ચાલનારો) તે ગામ સજ્જનની જેમ શોભી રહ્યું હતું. ॥ ૧૫ ॥

**ધન્યા વર્ણન :**

ધનુષ્યના કામઠાની જેમ મૂળ વંશ-કુળ (વાંસ)થી કપાયેલી છતાં ગુણ (દોરી)થી યુક્ત, સુદ એકમ-બીજના ચંદ્ર જેવી દુર્બળ છતાં નિષ્કલંક, કેળના થડ જેવી અસાર છતાંય સરળ-શીતળ અને કોમળ, તારાઓની શ્રેણીની જેમ નિરાધાર છતાંય સદાચારી (તારાની શ્રેણિ; સદા ફરનારી) સર્વત્ર સૌજન્ય દાખવનારી, પોતાના ગુણથી સર્વત્ર માન્ય ધન્યા નામની ત્યાં ગરીબ સ્ત્રી રહેતી હતી. ॥ ૧૬ ॥ ૧૭ ॥ ૧૮ ॥

તે ધન્યાનો, હાલતો-ચાલતો ખજાનો, મનોરથરૂપી રથમાં ઘોડો, સંપૂર્ણ અંગવાળો, સુખના સંગમરૂપ સંગમ નામે પુત્ર હતો. ॥ ૧૯ ॥

**સંગમ વર્ણન :**

તે સંગમ, ચંદ્ર જેવો સૌમ્ય, ચકોર જેવો ચતુર, પોપટ જેવો અહિંસક, કોયલ જેવો મીઠાબોલો, વિનય કરવામાં નેતર જેવો, હંસ જેવો વિવેકી, સ્વભાવથી જ હરણ જેવો નિષ્કપટ હતો. ॥ ૨૦ ॥ ૨૧ ॥

ધન્યાના વિસામા માટે તે વૃક્ષ જેવો હતો. નાનો છતાં કુલીન (વૃક્ષ; પૃથ્વીમાં લીન) અવળચંડાઇ વગરનો (પંખી રહિત) દુઃખથી બચાવનારો (પાંદડા વગરનો) હતો. તો પણ તેનાથી આશાભરી ધન્યા આનંદિત થઇ ઉઠી. (વૃક્ષથી દિશા આનંદિત થઇ.) ॥ ૨૨ ॥

ચંદ્ર વગરની પણ દિવાળીની રાત જેમ દીવાઓથી ઝળહળે છે તેમ ધન્યા, પતિ વિનાની હોવા છતાં પણ પુત્રરૂપ દીવાથી શોભી રહી હતી. ॥ ૨૩ ॥

જેમ કારતક સુદ પૂનમ દિવાળી જેવી (દેવદીવાળી) ગણાય છે તેમ ધન્યા, વિધવા હોવા છતાં પણ પુત્રના લીધે સધવા જેવી હતી. ॥ ૨૪ ॥

‘ઉત્તમ પુરુષો સ્વગુણોથી પ્રખ્યાત હોય છે અને મધ્યમ માણસો પિતાના ગુણોથી પ્રખ્યાત હોય છે.’ આ નીતિવાક્યના અનુસાર જાણે સંગમના પિતાનું નામ જણાતું નથી. (માટે જ સંગમ સ્વનામધન્ય હોવાથી ઉત્તમ પુરુષ હતો.) ॥ ૨૫ ॥

**ધન્યાની દરિદ્રતા :**

પોતાના પુત્રના પોષણ માટે, પૂર્વ કર્મના શોષણ માટે નિર્મળ અને નિષ્કપટ ધન્યા પારકા ઘરોમાં કામ કરતી હતી. ॥ ૨૬ ॥

પુત્રરૂપી આંબાના ઝાડને સિંચવા માટે, ગરીબાઈરૂપી આગને બૂઝવવા માટે, ચિન્તા-સન્તાપના નાશ માટે, દુઃખરૂપી કાદવ દૂર કરવા માટે, દક્ષ, દંભ વિનાની, ઉગ્ર આન્તર રોગથી પીડાતી ધન્યા જલયોગ-ઇચ્છુકની જેમ આક્રોશપૂર્વક પાણીના ઘડા ઠાલવતી હતી. ॥ ૨૭ ॥ ૨૮ ॥

તે હવેલીઓની સફાઇ કરતી હતી... જાણે કર્મોની સફાઇ કરતી હતી ! તે ઘંટીથી દળતી હતી... જાણે તે ઘંટી દુઃખોને દળનારી હતી. ॥ ૨૯ ॥

સજ્જનોને ખુશ કરનારી કુશળ ધન્યા મુશળ (સાંબેલા)થી એકધારું ખાંડતી હતી... જાણે ભયંકર પાપોને ખાંડતી શોભી રહી હતી. ॥ ૩૦ ॥

જેમ તે શ્રીમંતોના ઘરોમાં શરીર પર ભારે કષ્ટ સહેતી હતી, તેમ ભોજન-વસ્ત્રના સંદેહમાં ચિન્તાની આગથી (મનમાં પણ) બળતી હતી. ॥ ૩૧ ॥

**વાછરડા ચરાવતો સંગમ :**

હવે આઠ વર્ષનો, ઊછળતા ઉદ્યમવાળો, ધબકતા ઉત્સાહવાળો પ્રેમાળ સંગમ ગોચરમાં વાછરડા ચરાવવા લાગ્યો. ॥ ૩૨ ॥

સૂર્યના (જિનેશ્વરદેવના) દર્શનપૂર્વક જાગેલો, (પ્રબુદ્ધ મુનિ) શુદ્ધ બુદ્ધિવાળો, પોતાનાં દેશ-ગામ (વિષયસુખ) છોડતો, લાકડી (દાંડો) અને કામળીનો ટુકડો લેતો, વિદ્વાન મુનિ જેમ પુણ્યકર્મને આગળ કરીને નીકળે તેમ પવિત્ર ગાય (વાણી)થી પેદા થયેલા વાછરડાઓને (જિનાજ્ઞા) આગળ કરીને માત્સર્યરહિત તે સંગમ જંગલો તરફ નીકળી પડતો. અથવા વિદ્વાન જેમ પુણ્યકર્મ તરફ જાય તેમ તે જંગલોમાં જતો હતો. ॥ ૩૩ ॥ ૩૪ ॥

સ્ત્રીઓની વાણી સત્ય હોય છે, પણ કુમારી સ્ત્રીની વાણી વિશેષે કરીને સત્ય હોય છે. તેમ ગાયની રજ (ગોધૂલિ) હિતકર હોય છે... પણ વાછરડાઓની રજ તો તેને વિશેષે કરીને હિતકર બનતી હતી. ॥ ૩૫ ॥

તૃપ્ત, હિતકર ઇન્દ્રિયો જેવા વાછરડાઓ ચરાવીને (ચિંતવીને) પાણી (સંવર) પીવડાવીને, કંબલધારી, પેટ પૂરતા જ ભાતાવાળો (કુક્ષિશંબલી), નાનપણથી જ ગુણ-સમૂહની સંગતિવાળો, (મૂળ-ઉત્તર-ગુણ-ધારી) માતા પર

ભક્તિવાળો (પ્રવચન-માતાનો પાલક), ઉદાત્ત મતિવાળો સંગમ રાતના સમયે સુખ શય્યામાં સાધુની જેમ સૂઈ જતો હતો. ॥ ૩૬ ॥ ૩૭ ॥

**સંગમની ખીર માટેની ઈચ્છા :**

એક વખતે ક્યાંક કોઈ તહેવારમાં તુચ્છ આહાર કરનાર ઉંચા મુખવાળા તે બાળ સંગમે ઘેર ઘેર ખીર જોઈ. ॥ ૩૮ ॥

આ મહાન ઉત્સવ છે-એમ માનીને સાચું ખોટું નહિ વિચારનાર તે સંગમ પોતાની માતા પાસે શેઠના દીકરાની જેમ સભ્યતાપૂર્વક બોલ્યો. ॥ ૩૯ ॥

ઓ મા ! આજે નીરોગી એવા મારા માટે-મારા દેહના પોષણ માટે જલદી ખીર બનાવી દે... સાકરવાળી અને ઘીથી લચપચતી ! ॥ ૪૦ ॥

મા બોલી : ઓ વત્સ ! તું રૂપમાં કનૈયો છે. પોતાની રમતમાં મસ્ત છે. ઓ બાળ ! તારા માટે હું મારું બલિદાન આપી દઉં ! ॥ ૪૧ ॥

તારી આંખોનું હું લુછણું લઉં છું. તારા વચનના હું ઓવારણું લઉં છું. ઓ બટકબોલા બાબા ! તારી ભુજાઓની આસપાસ હું આંટા મારું ! તારા માટે હું મરી ફીટું. ॥ ૪૨ ॥

આનંદિત ચિત્તવાળા સદા સંતોષી ઓ પુત્ર ! તું બાળ હોવા છતાં અબાલ છે-પંડિત છે. તને કદી કદાગ્રહ થયો નથી. ॥ ૪૩ ॥

તારી આશા હું પૂરીશ. તારી આશંકા (અમંગળ) હું દૂર કરીશ. ખરેખર માતાઓ કદી પણ પુત્ર સામે પ્રતિકૂળ બોલતી નથી. ॥ ૪૪ ॥

સાક્ષાત્ અમૃતભર્યા મીઠાં વચનોથી માતા દ્વારા પ્રમાણથી પણ વધુ અતિ ખુશ થયેલો બાળક તે જ વખતે ઘરથી બહાર ચાલ્યો ગયો. ॥ ૪૫ ॥

પુત્રરૂપી હાથીના આવા વૃત્તાન્તરૂપી દાંતથી હલાવાયેલી જંગલની વેલડી જેવી બિચારી ધન્યા કરમાઈ ગઈ. ॥ ૪૬ ॥

**ધન્યાનો વિલાપ :**

પુત્રને ફોગટ આશ્વાસન આપવાથી વ્યાકુલ હૃદયવાળી તે વિચારવા લાગી; વિધાતાએ મારાથી અધિક દુર્દશાધીન બીજી કઈ સ્ત્રી બનાવી હશે ? ॥ ૪૭ ॥

દુનિયામાં એક તો સ્ત્રીજન્મ હલકો છે. ત્યાં પણ વિધવાપણું નવાં દુઃખો કરનારું છે. ગરીબાઈ અવિશ્વાસનું સ્થાન છે. વળી ત્યાં દાસપણું હાસ્યાસ્પદ છે. ॥ ૪૮ ॥

પૂર્વ સુખને યાદ કરીકરીને તે જોરજોરથી રડવા લાગી. જગતમાં દુઃખી સ્ત્રીઓની શક્તિ રુદન છે. ॥ ૪૯ ॥

ઓ મા ! તેં મને કેમ જન્મ આપ્યો ? હાય ! પિતાજી ! તમે કેમ મને પાળી-પોષી ? અરેરે ! હું તો વિપત્તિઓની વાનગી બની છું. દુઃખોનું સ્થાન બની છું. ॥ ૫૦ ॥

ખરેખર હું નામથી જ ધન્યા છું. (વસ્તુતઃ અધન્યા જ છું.) જેમ પેલી તિથિ અભદ્ર હોવા છતાં 'ભદ્રા' કહેવાય છે ને ? કારણ કે એકના એક પુત્રને એક વખત પણ હું સારું ભોજન આપી શકતી નથી ! (તો હું ધન્યા શી રીતે ?) ॥ ૫૧ ॥

**પાડોશણોનું આગમન :**

ધન્યાનો આવો વિલાપ સાંભળીને તેના શોકથી આવેશવાળી પોતાની જ તર્જના વડે તર્જની આંગળી જેવી, સુખને આપનારી પાડોશણો આવી પહોંચી. ॥ ૫૨ ॥

રાજાને જેમ પાડોશી રાજા શત્રુ હોય છે, તેમ પાડોશીનો પ્રાયઃ પાડોશી શત્રુ હોય છે. પરંતુ ધન્યાને તો ખેતરની ભૂમિની સરવાણીની જેમ રડતી પાડોશણો રસોઇ (જલ) માટે બની. ॥ ૫૩ ॥

ઓ બેન ! નિસાસા બંધ કર. મા ! ઓ મા ! હવે રડીશ નહિ. ઓ કલ્યાણમયી ! કલ્યાણની વેલડીને અટકાવનારું કારણ કહે. ॥ ૫૪ ॥

'તારા પુત્રનું મંગળ થાઓ... મંગળ થાઓ... અમંગળ શાંત થાઓ... શાંત થાઓ...' આ પ્રમાણે સ્નેહ દ્વારા સર્વસ્વ - સમર્પણને સૂચિત કરતી પાડોશણો ત્યારે બોલી ઊઠી. ॥ ૫૫ ॥

હવે કામળીના છેડાથી આંખનાં આંસુ લૂછીને સરળ અને પવિત્ર ધન્યા બોલી : હતભાગી હું મારા આત્માનો શો શોક કરું ? ॥ ૫૬ ॥

**વિલાપનું કારણ કહેતી ધન્યા :**

ઓ સ્વચ્છ મનવાળી બહેનો ! તમે હોશિયાર છો છતાં અજાણ વ્યક્તિની જેમ, જન્મથી માંડીને અત્યાર સુધી દુઃખથી દાઝેલી મને શું પૂછો છો ? ઇંટના નીંભાડાની ઉંદરડીને તાપનું શું પૂછો છો ? ॥ ૫૭ ॥

વિશેષ આ વાત છે. હે વિશેષજ્ઞ બહેનો ! આજે સારથી જેવા મારા અજ્ઞાની દીકરાએ ઘરડી ગાય જેવી મને મનોરથના રથમાં જોડી છે. ॥ ૫૮ ॥

તે મનોરથ પૂરવામાં અસમર્થ, દુર્બળ હું વિષાદ કરું છું. બેસો. આપના સામીપ્યરૂપ ખજાનાથી વધુ સુખનો કેતુ (નિશાની) બીજો કોઇ હેતુ નથી. (આપની હાજરી એ જ મારું સુખ.) ॥ ૫૯ ॥

**પાડોશણોનો મધુર જવાબ :**

ત્યાર પછી વિસ્મિત થયેલી તે પાડોશણો બોલી : ઓ અસમર્થ બાઇ ! શું તારો બાબો ઐરાવણ હાથીની જેમ કલ્પવૃક્ષનાં ફળો ઇચ્છે છે ! ॥ ૬૦ ॥

હવે તે ગદ્‌ગદ સ્વરે બોલી : ઘીથી લચપચતી, ધરતીનું અમૃત, દેવોને પણ સ્વભાવથી જ પરમ પ્રીતિ માટે પ્રખ્યાત થયેલી ખીર ગરીબ માણસોને ક્યાંય મળતી નથી. જેમ સારાં વચનો ક્યાંય સાંભળવા ન મળે. તે ખીરની તેણે માંગણી કરી છે, કારણ કે બાળકો હંમેશાં જોયેલી વસ્તુની ઇચ્છા કરનાર હોય છે. ॥ ૬૧ ॥ ૬૨ ॥

પોતાને સજ્જન માનતી તે પાડોશણો બોલી : આપણે તો સમાન સુખ-દુઃખવાળી છીએ. ઓ ભાગ્યશાળી બહેન ! આ વાત કરવાથી તેં આપણે પરસ્પર પ્રેમરહિત છીએ - એમ જણાવ્યું. ॥ ૬૩ ॥

ઓ ધન્યા ! તું ખરેખર ધન્ય છે. માનનું રક્ષણ કરવા માની પુરુષો પ્રાણ છોડી દે છે. પરંતુ તું તો પ્રાણથી પણ અધિક પુત્ર માટે માનને છોડતી નથી. ॥ ૬૪ ॥

ઝાકળ-ધુમ્મસ જેવી અમે છીએ. અમારાથી કદાચ તારા દુઃખનો દાવાનળ શાંત ન થાય, પરંતુ સૂર્ય જેવા આ બાળકની ઇચ્છા (કિરણ) કેમ ન પૂરી શકીએ ? ॥ ૬૫ ॥

કોઈ બોલી : આ પુત્રને હું મારે ઘેર જમાડીશ. બીજી બોલી : બરાબર છે. આમ દરેકના ઘેર ક્રમશઃ જમાડવો જોઈએ. ॥ ૬૬ ॥

વિશિષ્ટ બુદ્ધિવાળી કોઈ બોલી : માતા આમ રાજી ન થાય. બીજી બોલી : આપણે સૌ સાથે મળીને આ (ખીર) બનાવીએ. ॥ ૬૭ ॥

**ખીરની સામગ્રી લાવતી પાડોશણો :**

આમ કહી એક સ્ત્રીએ ગુણ જેવા ઊજળા ચોખા મોકલ્યા. બીજીએ દૂધથી ભરેલી પારી (ઘડો) મોકલી. જાણે તે પોતાના યશથી ભરેલી હતી. બીજી કોઈ સ્ત્રી ઘણું ઘી લાવી. જાણે રસલક્ષ્મીનું સામ્રાજ્ય લાવી ! અને અન્ય કોઈ મીઠી-મીઠી સાકર લાવી. જાણે પ્રીતિનો વિસ્તાર લાવી ! ॥ ૬૮ ॥ ૬૯ ॥

રેંટ ચલાવનારો, કેટલું પાણી રેંટે કાઢ્યું ? - એના અનુમાનથી તેલ (સ્નેહ) આપે છે. પરંતુ ધન્યાએ આંખમાંથી છોડેલી અશ્રુધારથી વધારે સ્નેહ સખીઓ પાસેથી મેળવ્યો. ॥ ૭૦ ॥

સેંકડો (રૂપિયા)થી સારો પાડો (પોળ-મહોલ્લો) મળે. હજારોથી સારો પાડોશી મળે. ધન્યાને તો (એક પણ રૂપિયાના ખર્ચ વિના) પાડોશણો ઉત્તમ કોટિને પામી. ॥ ૭૧ ॥

દુઃખમાં આરીસા સમી (જેમાં દુઃખનું પ્રતિબિંબ પડે) પાડોશણો પણ દુર્લભ હોય છે. પરંતુ ધન્યાની આ પાડોશણો તો દુઃખરૂપી શલ્યને બહાર કાઢવામાં લોહચુંબક સરખી બની. (પહેલાંના જમાનામાં શરીરમાં ઘૂસી ગયેલા બાણ વગેરે લોખંડનાં શસ્ત્રોને બહાર કાઢવા માટે લોહચુંબકનો ઉપયોગ થતો હશે.) ॥ ૭૨ ॥

ત્યારપછી પોતાને ધન્ય માનતી ધન્યા સંગમ માટે ખીર મેળવીને રાજી રેડ થઈ ગઈ. ॥ ૭૩ ॥

વાછરડાઓને વિદાય આપી, સ્નાન કરી, થાક ઉતારી, ભાવિમાં પુણ્યના સંગમવાળો સંગમ પોતાને ઘેર આવ્યો. ॥ ૭૪ ॥

નિઃશલ્ય, નિશ્ચલ, માતાએ તૈયાર કરેલા આસન પર તે ઉત્તર દિશા સન્મુખ બેઠો. જાણે નિર્મળ જૈન-ધર્મ પર બેઠો.

**ગૌણાર્થ :** ઉત્તમ નિષ્ઠાને આગળ કરી, પ્રવચનમાતાથી બનેલા નિશ્ચલ અને નિઃશલ્ય જૈનધર્મ પર તે પ્રતિષ્ઠિત થયો. ॥ ૭૫ ॥

માતા જાણે ભાવિના ફળને જાણનારી હતી. તેણે બાળકની આગળ ગૃહસ્થધર્મરૂપી વૃક્ષ પરથી દાનનું ફળ લેવા જાણે બાજોઠ-પાટલો મૂક્યો. (ઊંચા ઝાડ પરથી નાનું બાળક ફળ શી રીતે તોડી શકે ? નીચે બાજોઠ તો મૂકવો જ પડેને ?) ॥ ૭૬ ॥

તે પાટલા પર ગોળ કૂંડાળું દોરતી ભવ્ય ભવિતવ્યતા શી માતાએ જાણે તેના પાપ-કર્મને કુંડલિત (સીમિત) કર્યું. ॥ ૭૭ ॥

સજ્જનના ચિત્ત જેવી વિશાળ (ઉદાર), સજ્જનના વાક્યની જેમ સારી રીતે માંજેલી (વિચારાયેલું) સજ્જનના શરીરની જેમ રુચિ (કાન્તિ)ના સ્થાન સમી થાળી તેણીએ પાટલા પર મૂકી. ॥ ૭૮ ॥

ઝટપટ આવી પહોંચનારી દાનસમ્પત્તિરૂપ ધર્મનદી (સેના)નું, હસ્ત (ટેક્સ) શુદ્ધિ કરનારું પાણી, સૈન્યની અગ્રગામી ટુકડીની જેમ શોભી રહ્યું. ॥ ૭૯ ॥

સૈનિકના મનની જેમ ગરમ, ન્યાયના પૈસાની જેમ સુખકારી, માતાના ચિત્તની જેમ સ્નિગ્ધ (સ્નેહાળ), સજ્જનના ચરિત્રની જેમ રસવાળી, ગુરુની હિતશિક્ષાની જેમ સર્વ રીતે મનોહર ખીર આનંદિત થયેલી માતાએ તેને પીરસી. ॥ ૮૦ ॥ ૮૧ ॥

નીતિ અને ઉત્સાહ સાથે જેમ વૈભવ વિશાળ બને તેમ ઘી અને સાકર સાથે (થાળીમાં રહેલી) ખીરને પહોળી કરી મીઠી નજર લાગવાના ભયથી માતા બીજે સ્થળે ચાલી ગઇ. ॥ ૮૨ ॥

**તપસ્વી મુનિનું આગમન :**

આ બાજુ અચિન્તિત ચિન્તામણિ, અકલ્પિત કલ્પવૃક્ષ અને ઇચ્છ્યા વિના મળેલી કામધેનુની જેમ કોઇ સાધુ આવી ચડ્યા. તે યોગાભ્યાસમાં રતિવાળા, સર્વવિરતિમાં ઉલ્લસિત મતિવાળા માસક્ષમણમાં રતિવાળા અને મોક્ષમાર્ગમાં ગતિ કરનારા હતા. ॥ ૮૩ ॥ ૮૪ ॥

જેવી રીતે દક્ષિણાવર્ત શંખ અને કાળી ચિત્રાવેલ અગણિત પુણ્યથી નજરે ચડે તેમ તેને મુનિ નજરે ચડ્યા. ॥ ૮૫ ॥

ત્રણ જગતના મિત્ર સૂર્ય શા તે મુનિ દ્વારા આરીસા જેવા નિર્મળ સંગમે અંતરંગ અંધારું હરનાર જ્ઞાન-જાગૃતિમય પ્રકાશ પ્રાપ્ત કર્યો. ॥ ૮૬ ॥

ઉત્પન્ન થયેલા જાતિ સ્મરણ જ્ઞાનવાળા અથવા તો જન્મ પામેલા દેવની જેમ સંગમ 'આ શું ?' એમ સંભ્રમમાં પડી ગયો અને ચિત્તમાં વિચારવા લાગ્યો. ॥ ૮૭ ॥

**સંગમનો આનંદ :**

અહો મારું કેવું ભાગ્ય જાગ્યું ? અહો મારું કેવું ભાગ્ય જાગ્યું ? અહો આજે મારે ત્યાં મોટો ઉત્સવ મંડાયો. અહો ! મને ધર્મસામગ્રી મળી. અહો ! મારા કર્મની લઘુતા થઇ. ॥ ૮૮ ॥

મારે તો આજે અણધાર્યે વાદળ વિના વરસાદ વરસ્યો. ચંદ્ર વિના ચાંદની ખીલી. દીવા વિના પ્રકાશ પ્રગટ્યો. ॥ ૮૯ ॥

આવા ગામમાં સાધુ ભગવંત ? આ તો પૃથ્વી પર ઐરાવત હાથી આવ્યો ! રણપ્રદેશમાં ગંગાનું પૂર આવ્યું ! મારવાડમાં કલ્પવૃક્ષ ઊગ્યું ! ॥ ૯૦ ॥

અને એ મુનિ ભગવંત આ ગામમાં પણ મારે ઘેર ? આ તો ગરીબને ઘેર રાજા આવ્યો ! અમાસની રાતે ચંદ્ર ઊગ્યો ! પાતાળમાં સૂરજ પહોંચ્યો ! ॥ ૯૧ ॥

સામાન્ય અનાજના પણ ઠેકાણા ન હોય તેવા મારા ઘરે ખીર ક્યાંથી ? ખારી જમીનમાં ઘાસ પણ ન ઊગે ત્યાં મોટા ડાંગરના છોડની હારમાળા ક્યાંથી ? ॥ ૯૨ ॥

આ તો ગગન મંડળમાં ગંગા-જમના અને સરસ્વતીનો ત્રિવેણી-સંગમ થયો. શિલાપુત્ર (ભાગ્યહીન પ્રાણી) પર પાર્વતી, સરસ્વતી અને મહાલક્ષ્મી પ્રસન્ન થયાં. ॥ ૯૩ ॥

આ તો જડરૂપ ઘડામાં તર્ક, લક્ષણ અને સાહિત્યરૂપ ત્રણ વિદ્યાઓની ચર્ચા થઇ પડી. જે મારા જેવા (સંગમ)માં ચિત્ત, વિત્ત અને પાત્રનો સંગમ થયો. ॥ ૯૪ ॥

તરત જ મને વિત્ત (ખીર) મળ્યું. તરત જ મને પાત્ર (મુનિ) મળ્યું. તરત જ ચિત્ત હર્ષથી છલકાયું. તો તરત જ પુણ્યની કમાણી કરી લઉં ! ॥ ૯૫ ॥

શ્રી રામચંદ્રજીએ અન્નને સર્વરત્નોમાં પ્રધાન માન્યું છે. તો પાત્રમાં અપાયેલું આ પરમાન્ન (પરમ + અન્ન) ચિન્તામણી રત્ન જેવું બનો ! ॥ ૯૬ ॥

તે જ અમૃત-આહાર કહેવાય, જે સુપાત્રમાં અપાય અને જેનો રસ કરોડો યુગો વીતવા છતાં ઓછો ન થાય. ॥ ૯૭ ॥

આમ વિચારી થાળી લઈ સ્થિર થઈ તે ઉભો થયો. હર્ષથી ઊંચા થયેલા રોમાંચથી કવચિત (બખ્તરયુક્ત) થયેલો તે શોભવા લાગ્યો. તેના શરીર પર જાણે પુણ્યના અંકુરો ઊગ્યા ! ધર્મ-વૃક્ષની ચોફેર તેણે જાણે વાડ કરી ! શુદ્ધિબુદ્ધિવાળો તે ગરીબાઈરૂપ શત્રુ સાથેના યુદ્ધ માટે બખ્તર પહેરી જાણે સજ્જ થયો. ॥ ૯૮ ॥ ૯૯ ॥

તેણે મુનિને વિનંતી કરી : હે મુનિરાજ ! આપ ચંદ્ર જેવા છો. આપનો પવિત્ર અભિલાષ (કિરણ) રાજા કે રંક-સૌ પર સમાન છે. ॥ ૧૦૦ ॥

અણધાર્યા મળેલા આપના પારસમણિ શા ચરણસ્પર્શથી, આપના ગુણથી રક્ત ધાતુવાળા મારું સુંદર કલ્યાણ થયું.

**ગૌણાર્થ :** તારા સ્પર્શથી (હે પારસમણિ !) મુજ તામ્રધાતુનું સોનું થયું. ॥ ૧૦૧ ॥

ઓ મૈત્રી-વિલાસના મંદિર મુનિ ! ઓ કરૂણારૂપી કામિની દ્વારા પવિત્ર યૌવનવાળા સ્વામી ! મહેરબાની કરો અને મને તારો. ॥ ૧૦૨ ॥

ઓ મહાવ્રતધારી મુનિ ! આ દુર્બળ, નિર્ધન દોષની ખાણ સરખા બાળકને આપના આગમનથી પવિત્ર કરો.

**ગૌણાર્થ :** હે શંકર ! દુર્બળ અને કિરણ વગરના આ બાલ ચંદ્રને આપ આપની જટામાં ધારણ કરી પવિત્ર કરો. ॥ ૧૦૩ ॥

આ પ્રમાણે અમૃતની વૃષ્ટિસમી વાણી દ્વારા ભૂમિકા કરીને આનંદનાં આંસુથી જાણે છાંટણા છાંટતો ! ભાવનાના વૃક્ષને જાણે સિંચતો ! પાપના પંકને જાણે સાફ કરતો ! જલપૂર્વક દાન દેવા જાણે સંગમ...! પ્રસન્નતાપૂર્વક, હર્ષપૂર્વક, આદરપૂર્વક, ભાવની નિર્મળતાપૂર્વક, ભક્તિની કુશળતાપૂર્વક, ઈચ્છારહિતપણે, ઉપમારહિતપણે, શિક્ષારહિતપણે, પોતાના કર્મથી નિર્ધન છતાં પરમભક્તિથી યુક્ત સંગમે ખીર વહોરાવી. ॥ ૧૦૪ ॥ ૧૦૫ ॥ ૧૦૬ ॥ ૧૦૭ ॥

મુનિના ધ્યાનથી શાંતરસ ! આત્મનિંદાથી કરુણરસ ! દાનપ્રવૃત્તિમાં ઉત્સાહપૂર્વક ધસી જવાથી વીરરસ ! અણધાર્યું થવાથી અદ્‌ભુતરસ સમો સંગમ, વાણીવીરોનાં વચનોથી અતીત, યોગીઓને પણ અગમ્ય, મુતિમંતોને અજ્ઞેય-ચાર રસોના મિશ્રણને પામ્યો. ॥ ૧૦૮ ॥ ૧૦૯ ॥

**મુનિને ખીરનું દાન :**

આ પ્રગૃહીતા નામની છઠ્ઠી ભિક્ષા છે-એમ વિચારી સંગમ પર અનુગ્રહ કરવામાં તત્પર, દક્ષ મુનિએ તે ગ્રહણ કરી. ॥ ૧૧૦ ॥

તેના પુણ્ય-પુંજથી ભરેલા પાલા (અનાજ માપવાનું સાધન) પર ધર્મલાભના આશીર્વાદથી શિખા કરીને સરળ ચિત્તવાળા મુનિ પોતાના સ્થાને ગયા. ॥ ૧૧૧ ॥

બીજા ઘરથી આવેલી, પ્રફુલ્લ મનવાળી, અવિષાદી માતાએ બેઠેલા તે બાળકને ફરી ખીર આપી. ॥ ૧૧૨ ॥

માતા બાળકને ઘીથી તરબોળ મીઠાઇ પરાણે પણ ખવડાવે. પરંતુ આ બાળકે પોતાની મેળે જ જમી લીધું છે-એમ જાણી રાજી થયેલી માતા કંઇ બોલી નહિ. ॥ ૧૧૩ ॥

અહો ! કેવો છે આ બાળકના લોભનો ઉછાળો ! મુનિ-દાનના ફળમાં તેણે માને પણ ઠગી ! જુઓ તો ખરા ! ॥ ૧૧૪ ॥

પુણ્યથી ભરાયેલા, આનંદની અધિકતાથી શોભતા સંગમને મુનિ-દાનથી અમૃતરૂપ થયેલ ખીરથી તરત જ તૃપ્તિ થઇ ગઇ. (અમૃતથી તૃપ્તિ થતાં વાર કેટલી ? થોડું અમૃત અને તરત જ તૃપ્તિ !) ॥ ૧૧૫ ॥

હવે કોગળો કરી, વિસામો લઇ, પ્રશાંત અને અભ્રાન્ત મનવાળો સંગમ, જાણે વિશાળ રાજ્ય મળ્યું હોય તેમ આનંદ માણવા લાગ્યો. ॥ ૧૧૬ ॥

ઓ પ્રાજ્ઞપુરુષો ! સજ્જ થયેલા તેના આત્મગુણો વડે તૈયાર થયેલ પુણ્યના વિપાકની ન વિચારી શકાય એવી પણ સુગંધ વિચારો.

**ગૌણાર્થ :** હોંશિયાર રસોઇયાઓ વડે બનાવાયેલી પવિત્ર રસોઇની ન કલ્પી શકાય તેવી સુગંધની કલ્પના કરો. ॥ ૧૧૭ ॥

**સંગમના દાનની અદ્‌ભુતતા :**

ઉપદ્રવનો નાશ કરનારું હોવાથી મંગલકારી, આત્માને અનુકૂળ હોવાથી દક્ષિણાવર્ત, મોહના ઝેરને નાશ

કરતું હોવાથી તીક્ષ્ણઘાતી, શાંત રસ પેદા કરનારું હોવાથી રસાયણ, ત્રિકોટિશુદ્ધ હોવાથી ગુરુ, કુવિકલ્પની આગથી બળે નહિ તેવું હોવાથી અદાહ્ય, પોતાનું ફળ આપવાથી પવિત્ર, વિનયયુક્ત હોવાથી નમ્ર-આ પ્રમાણે આઠ ગુણથી યુક્ત દાન સુવર્ણરૂપ બને છે.

સોનું પણ ગરીબાઈનો નાશ કરનારું હોવાથી મંગળરૂપ, તપેલું સોનું જમણી બાજુ ફરે છે માટે દક્ષિણાવર્ત, લોઢાને મારનારું હોવાથી તીક્ષ્ણઘાતી, પારા વડે તેનું અયન (પ્રાપ્તિ) થતી હોવાથી રસાયણ, વજનદાર હોવાથી ગુરુ, અગ્નિથી બળતું નહિ હોવાથી અદાહ્ય, કદી સડતું ન હોવાથી પવિત્ર, જેમ વાળીએ તેમ વળતું હોવાથી નમ્ર હોય છે. ॥ ૧૧૮ ॥

નિપુણતા, જાણકાર માણસોનો ઉપદેશ-વગેરેથી ધાતુવાદનું ધાતુજન્ય સોનું મળે છે, પરંતુ આ દાનરૂપી સોનું તો સ્વારસિક (પોતાના જ રસથી બનેલું) કુમાર (શુદ્ધ સોનું) છે. આથી તે અધિક મહત્ત્વ પામે છે. ॥ ૧૧૯ ॥

અતિશય મોંઘું, દુર્લભ, સ્વયંભૂ (પોતાની મેળે થનારું) ભૂતકાળનાં પાપોને (પ્રેત-દોષને) હરનારું, શાલિગ્રામમાં પેદા થયેલું આ સંગમનું દાન 'કુમાર' સુવર્ણ સમાન છે. ॥ ૧૨૦ ॥

અહીં (શાલિગ્રામમાં) સંગમ દ્વારા જે કુમાર (શંકરપુત્ર કાર્તિકેય) સુવર્ણ સમાન દાન થયું. એથી જ જાણે આ ગામ 'શાલિગ્રામ' તરીકે ઓળખાયું. (શિવલિંગના પથ્થરને પણ 'શાલિગ્રામ' કહેવાય છે.) ॥ ૧૨૧ ॥

ઉત્સુક થયેલી ગાયો વાછરડાને અનુસરે છે. તેથી વાછરડા સમાન વત્સપાલ સંગમનો ધર્મરૂપી કામધેનુ ગાયે દૂરથી જ આશ્રય લીધો. ॥ ૧૨૨ ॥

પુત્રના મદન કોદરા જેવા મિથ્યાત્વ-પુદ્ગલોને ચોખ્ખા કરવા માટે જ જાણે ધન્યા રડતી હતી-એમ હું માનું છું. ॥ ૧૨૩ ॥

જુઓ-૭૧મા શ્લોકનો અનુવાદ. ॥ ૧૨૪ ॥

અષડક્ષીણ મંત્રણા કરનારા સંગમે, પહેલા પોતાને જણાવીને પરલોકના ફળને આપનારું કૃત્ય ખીરથી શરૂ કર્યું. (જેમાં ત્રીજી વ્યક્તિ ન હોય તેવી મંત્રણા 'અષડક્ષીણ' કહેવાય છે.) ॥ ૧૨૫ ॥

સંગમના દાનના પ્રારંભમાં આ ઉપમાઓ આપી શકાય. કુમારી, કાંતેલું સૂતર, ગજપટી (દેશાંતરીય વસ્ત્ર), બ્રહ્મા અને બીજનો ચંદ્ર (આ બધી વસ્તુઓ ક્રમે કરીને વિસ્તાર પામે છે, તેમ આ દાન પણ વિસ્તાર પામશે.) ॥ ૧૨૬ ॥

શ્રી શ્રેયાંસકુમાર શ્રી આદિનાથ ભગવાનનો પ્રપૌત્ર અને જાતિસ્મરણ જ્ઞાનવાળો હતો. પેલો મૂલદેવ કલારૂપ કલ્પવેલડીનું મૂળ અને રાજપુત્ર હતો. ઓલી ગુણોજ્જવલ ચંદના તો શહેરી અને રાજપુત્રી હતી. પરંતુ આ સંગમ ગામડિયો બાળ ગોવાળ હતો... છતાં દાતા બન્યો તે આશ્ચર્ય કહેવાય. ॥ ૧૨૭ ॥ ૧૨૮ ॥

દ્રવ્યાદિ ચાર પ્રકારે અભિગ્રહધારી સ્વયં ભ.શ્રી મહાવીરદેવ પોતાની શિષ્યાની દાન-સામગ્રીના કર્તા બન્યા એ ચંદનાનું શું આશ્ચર્ય ગણાય ? ॥ ૧૨૯ ॥

મૂલદેવે તો દાન વખતે જ ચોખ્ખે ચોખ્ખી પોતાની ઈચ્છા કહી દીધી. પરંતુ બાળક છતાં મહાન, ઉદાર આ સંગમે હિતકારી મૌન સેવ્યું. ॥ ૧૩૦ ॥

દાન પછી માતાની પાસે સંગમે જે મૌન સેવ્યું ત્યારે જ ખરેખર 'મૌનં સર્વાર્થસાધકમ્' એ લોકપ્રસિદ્ધ સૂત્ર સત્ય બન્યું-એમ હું માનું છું. ॥ ૧૩૧ ॥

સંગમની તે સરળતા ! તે ઉત્કૃષ્ટ ભાવના ! કલિયુગમાં માણસોને ભલે દુર્લભ હોય, પરંતુ દાન આપ્યા પછી જે તેનું મૌન હતું, એ પણ આજે દુષ્કર છે. ॥ ૧૩૨ ॥

તેના આવા મહાદાનમાં પણ દેવોએ જે સોનૈયા ન વરસાવ્યા તે તો આવતા ભવમાં વધુ આપવા માટે વિલંબ કર્યો હતો. ॥ ૧૩૩ ॥

મોહરાજાએ વિચાર્યું હશે : આની પાસે કોઇ ધર્મનું સ્થાન નથી. નિર્મળ કુળ નથી. કોઇનો ઉપદેશ નથી. પુણ્યનો લેશ નથી. ધનનો કે બુદ્ધિનો ખજાનો નથી-(આ બાપડો શું કરવાનો છે ?) આમ અસાવધાન રહેલા મોહરાજાથી ઉપેક્ષિત થયેલા તે સંગમે કર્મવિવર પામીને પોતાનું કામ કરી લીધું-એમ હું માનું છું. ॥ ૧૩૪ ॥ ૧૩૫ ॥

ખીરનો આપનારો આ 'દાનવીર' ખવાયેલી ખીરને તો તણખલા જેવીય નથી ગણતો-આમ અતિક્રોધથી પેટમાં રહેલી નહિ પચેલી ખીરે જાણે બળવો કર્યો. (વિકાર પામી). ॥ ૧૩૬ ॥

**સંગમને પેટનો રોગ થયો :**

હવે તેને ગૂઢ વિશૂચિકા (પેટનો રોગ) થઇ. તે પુણ્યરૂપ તિજોરીની ચાવી સમી અને ગુણ (દોરા)ના યોગની સૂચક (સોય) હતી, પરંતુ દોષની સૂચક નહોતી. ॥ ૧૩૭ ॥

મા ન હોવા છતાં ઘણું કરીને દુઃખી બાળક 'વોય મા !' એમ બોલી માને યાદ કરે છે. પરંતુ તેને તો મુનિધ્યાનના પ્રભાવથી નજીકમાં રહેલી મા પણ ભુલાઇ ગઇ. ॥ ૧૩૮ ॥

વાગેલો એક કાંટો પણ મોટે ભાગે ધર્મરંગમાં ભંગ પાડે છે, પરંતુ સંગમને તો પ્રાણનો સંશય પણ ધર્મનો ભાવ તોડી શક્યો નહીં. ॥ ૧૩૯ ॥

**મૃત્યુ-સમયે સંગમની વિચારણા :**

ધીરોમાં અગ્રેસર, સુપાત્ર-દાનના બળથી નિર્મળ સંગમ વિચારવા લાગ્યો : અવશ્યંભાવિ મૃત્યુથી તત્ત્વજ્ઞોને ભય શાનો ? ॥ ૧૪૦ ॥

જેની પાસે ભાથું નથી હોતું તે મુસાફર માર્ગમાં દુઃખી બને છે. મારી પાસે તો સુપાત્ર-દાન દ્વારા મજબૂત ભાથું છે. હવે ચિંતા શી ? ॥ ૧૪૧ ॥

કામળીનો કટકો પહેરનાર હું ! સાચે જ કોઈ ભાગ્યથી મને પાત્ર-દાનનું મહાપુણ્ય મળ્યું ! ખરેખર મારે તો કપૂરથી મોઢું પુરાયું. ॥ ૧૪૨ ॥

સર્વ લોકોથી બહિષ્કૃત થયેલો, પશુનો દાસ પશુ જેવો હું સંગમ ક્યાં ? અને પ્રાજ્ઞ પુરુષોમાં પ્રધાન (દેવોના રાજા) ઇન્દ્ર શા તે મુનિ - ભગવંત ક્યાં ? ॥ ૧૪૩ ॥

ક્યાં હું સર્વ વસ્તુથી ખાલી સંગમ ? અને ક્યાં તે ચિત્ત-વિત્ત અને પાત્રથી સંપૂર્ણ ધર્મ-સામગ્રી ? ખરેખર આ તો ઘાસની ઝૂંપડી પર વિશાળ આગાશી આવી પહોંચી. ॥ ૧૪૪ ॥

મને પારકું અન્ન ખાનારો બનાવી માતાએ પરમાન્ન (ખીર) બનાવ્યું, પરંતુ મેં મારા કાર્યો કરીને તેને પરમાર્થાન્ન (પરલોકનું ભાથું) બનાવ્યું. ॥ ૧૪૫ ॥

હવે પ્રશમ-અમૃતના સરોવર, શાંતિના ધામ એ મુનિપુંગવનું મને શરણું હો-એ જ ઉચિત છે. ॥ ૧૪૬ ॥

સજ્જનોને ઉદાહરણ યોગ્ય, રત્નના આરીસા સમાન સુંદર દર્શનવાળા આ નાના બાળકમાં અગ્રસ્થિત મુનિ ભગવંત જાણે પ્રતિબિંબિત થયા ! ॥ ૧૪૭ ॥

તે જ વખતે લાગેલ હોવા છતાં, ઉત્તમ રાજપુત્રની જેમ ધર્મરાગે, જીવલેણ સંકટમાં પણ તેને છોડ્યો નહિ. ॥ ૧૪૮ ॥

'આચાર કુળને કહે છે.' આ વચન જો સાચું હોય તો તેના દાન અને ધીરજના ગુણથી નક્કી થયું કે તે ક્ષત્રિય કુળનો હતો. ॥ ૧૪૯ ॥

અહો ! સંગમનું અદ્ભુત સૌભાગ્ય ! તેની તરત જ પરણેલી-નવોઢા-પ્રિયા સદ્ભાવના, સતીની જેમ ઉલ્લાસપૂર્વક પરલોકમાં પણ સાથે ચાલી. ॥ ૧૫૦ ॥

રૂપસ્થ-ધ્યાનથી પાંચમા પરમેષ્ઠી (મુનિ)નું ધ્યાન ધરીને, સમાધિના અમૃત-કુંડમાં આકંઠ ડૂબેલો સંગમ, દાન-શીલ વિનાની દેવ-ગતિને બાજુએ મૂકી દાન-ધ્યાનના અનુબંધથી દાન-પ્રધાન ગતિ (મનુષ્ય-ગતિ)ને પામ્યો. ॥ ૧૫૧ ॥ ૧૫૨ ॥

મનુષ્યપણામાં દિવ્ય-ભોગોની પ્રાપ્તિ આશ્ચર્યકારી છે-એમ વિચારી જાણે તેણે મનુષ્ય ગતિ પસંદ કરી. (સંગમે મનુષ્યગતિનો સંગમ કર્યો.) ॥ ૧૫૩ ॥

તેવી સ-રસ ખીર આપીને-ખાઇને હવે હું જેવું તેવું અન્ન શી રીતે ખાઇ શકીશ ? એમ વિચારીને જાણે નિષ્કપટ સંગમે પોતાના પ્રાણનો ત્યાગ કર્યો. ॥ ૧૫૪ ॥

ગાંઠમાં ગરથ (પૈસો) હોય તો કયો ડાહ્યો માણસ ખરાબ સ્થાનમાં રહે ? તેથી સુપાત્ર-દાનના ધનવાળા સંગમે કુત્સિત ગામ અને શરીરનો ત્યાગ કર્યો. ॥ ૧૫૫ ॥

દાનની મહોર હાથમાં લઇ, ધર્માધિકારી બનેલો, સજ્જનોને સેવનીય આ સંગમ હવે પશુનો દાસ શી રીતે બને ? ॥ ૧૫૬ ॥

પાત્ર-દાનના અભિમાનથી જે ભાવિમાં રાજા શ્રેણિકનું પણ સ્વામીપણું સહન નહિ કરે તે પશુઓને સ્વામી શી રીતે બનાવે ? ॥ ૧૫૭ ॥

ચંદ્ર મહેલ, દ્રૌપદીનું આમ્રવૃક્ષ, ચક્રવર્તીનું ચર્મરત્ન, મૂલ નક્ષત્રના દોષને હરનારું વસ્ત્ર-આ બધી ચીજો તે જ દિવસે બનેલી જેમ લાભદાયી બને છે, તેમ સંગમનું સુકૃત પુષ્કળ સદ્‌ભાવના પ્રભાવથી તે જ દિવસે સર્વ સિદ્ધિ અને સમૃદ્ધિને આપનારું બન્યું. ॥ ૧૫૮ ॥ ૧૫૯ ॥

રાગદ્વેષથી રહિત સરળતા-ગુણથી મેળવી શકાય તેવું, સદાય અખૂટ, અવિનાશી, જગતની (૧૪ રાજલોકની) ઉપર રહેલું, બીજી વાર ન મળે તેવું, ચોક્કસ, એક શાલિભદ્ર (આત્મા)ને ઈષ્ટ, બીજા લોકો (જડ)ને ભોગ-યોગ્ય નહિ-એવું શાલિભદ્રનું દાન અને મોક્ષનું સુખ અમે સ્તવીએ છીએ. ॥ ૧૬૦ ॥

શ્રી ધર્મકુમાર પંડિતે રચેલા, શ્રી પ્રદ્યુમ્ન મુનિની બુદ્ધિ દ્વારા શુદ્ધ થયેલા આ શાલિભદ્ર કાવ્યમાં પ્રથમ પ્રક્રમ પૂરો થયો. ॥ ૧૬૧ ॥

**॥ પહેલો પ્રક્રમ સંપૂર્ણ ॥**

# પ્રક્રમ - ૨



તે સંગમના દાનના પરાક્રમથી ખુશ થયેલા ધર્મ મહારાજાએ જે કૃપા કરી તેની લીલા અમે પ્રસ્તુત કરીએ છીએ. ॥ ૧ ॥

**જંબુદ્વીપ-ભરતક્ષેત્રનું વર્ણન :**

ચંદ્ર જેવી ગોળ ભૂમિવાળું (ચંદ્ર જેવા અપ્રમત્ત વર્તનવાળા મહાપુરુષ) મહાપુરુષ સમાન, મંગળનું સ્થાન 'જંબુદ્વીપ' નામનું શાશ્વત દ્વીપ છે. ॥ ૨ ॥

લાખ યોજન વિસ્તારવાળા જે જંબુદ્વીપની વચ્ચે લાખો દીવાઓની જેમ ઝળહળતો, સદા કાંતિમાન સોનાનો મેરુ પર્વત છે. ॥ ૩ ॥

સૂર્યના રથમાં સાત ઘોડા, ઈન્દ્રના ઘોડામાં સાત મુખ, લગ્નકુંડલીમાં સાત ગ્રહો, સંગીતમાં સાત સ્વરો, રાજ્યમાં સાત અંગો, હાથીમાં સાત અવયવો અને શરીરમાં સાત ધાતુઓ છે, તેમ આ જંબુદ્વીપમાં જિનેશ્વર દેવોએ સાત ક્ષેત્રો કહ્યાં છે. નવાઈની વાત છે કે આ જંબુદ્વીપ છ વર્ષધર (પર્વત)વાળો હોવા છતાં 'સપ્તવર્ષ' કહેવાય છે. ॥ ૪ ॥ ૫ ॥

તે જંબુદ્વીપના હૈમવતાદિ ૪ યુગલિક ક્ષેત્રો ધર્માધર્મની પ્રવૃત્તિ વગરનાં છે. જ્યારે ભરતાદિ ત્રણ ક્ષેત્રો ધર્માધર્મની પ્રવૃત્તિથી ધમધમતાં છે. જાણે સર્વસંપત્તિનો વેપાર કરનાર કમાઉ દીકરા ! ॥ ૬ ॥

તે ક્ષેત્રોમાં સમુદ્રને પેલે પાર 'ભરત' નામનું ક્ષેત્ર છે. વરસમાં છ ઋતુઓ, ગીતમાં છ રાગો, કાર્તિકેયમાં છ મુખ, ભોજનમાં છ રસ, રાજ્યમાં છ ગુણ, વાદીમાં છ તર્ક હોય છે, તેમ અખંડ ભરતમાં છ ખંડ શોભી રહ્યા હતા. ॥ ૭ ॥ ૮ ॥

ઉચ્ચગોત્રીય પુરુષ જેવા વૈતાઢ્ય પર્વતે, જાણે નીચ પૃથ્વી (માતા)માં પેદા થયેલા તે છ ખંડોને ત્રણ-ત્રણના વિભાગમાં જુદી-જુદી પંક્તિમાં બેસાડ્યા ! ॥ ૯ ॥

ત્રણ લોકમાં જેમ મનુષ્ય-લોક, ત્રણ વયમાં જેમ યૌવન-વય, ત્રણ કાળમાં જેમ વર્તમાનકાળ સકલ કાર્યના સાધક છે, તેમ દક્ષિણ વિભાગના ખંડોમાં મધ્ય ખંડ પ્રધાન છે. સર્વ પ્રકારનાં સુખ આપવામાં તે સમર્થ છે. ॥ ૧૦ ॥ ૧૧ ॥

**મગધ-રાજગૃહનું વર્ણન :**

તે મધ્ય ખંડમાં મોતી જેવા ઉજ્જવળ ધાન્યના પ્રદેશોવાળા પૃથ્વી-વલયોથી અતિ ભરચક મગધ નામે દેશ છે. ॥ ૧૨ ॥

જે મગધ-દેશમાં મેદથી પુષ્ટ ગાયો, સન્નારીની જેમ સુખપૂર્વક દોહી શકાય તેવી ખૂનખાર ચોરને આધીન નહી થતી, વાંઝિયાપણાના દોષથી રહિત હતી.

**ગૌણાર્થ :** જ્યાં પતિવ્રતા સ્ત્રીઓ પુષ્ટ શરીરવાળી, સૂર્ય અને દુર્જનોને આધીન નહિ થનારી અને વાંઝિયાપણાના દોષથી રહિત હતી. ॥ ૧૩ ॥

જે મગધ-દેશમાં દુષ્કાળના ગઢને તોડવા મૂઢકો (ખેતીનાં સાધન) તોપ-ગોળાની જેમ શોભતાં હતાં અને મોટાં હળો યંત્ર ચલાવવાના દંડાની જેમ શોભી રહ્યાં હતાં. ॥ ૧૪ ॥

જ્યાં સમુદ્રના મિત્ર જેવા ઘણાં સરોવરો હતાં. જેનાં દૂધ જેવાં પાણી ! જાણે ધરતી-લક્ષ્મીનાં તેજ જોઇ લો. ॥ ૧૫ ॥

જ્યાં વિશાળ ડાંગરવાળા અને શાકભાજીનાં ખેતરોથી ભરેલી, રથના સમૂહોથી ગાજતી, ગાયના ધણથી પવિત્ર ધરતી શોભી રહી હતી. ॥ ૧૬ ॥

જ્યાં ઊંડાં મૂળવાળાં, ફેલાતી ઊંચી ડાળવાળા છાંયડાથી યુક્ત ફૂલોથી મનોહર મહાન ફળની આબાદીવાળા વૃક્ષો સજ્જનોની જેમ શોભી રહ્યા હતા.

**ગૌણાર્થ :** જ્યાં લાંબા કાળથી રહેનારા, પુત્ર-પૌત્રાદિ પરિવારની શાખાવાળા, કાંતિયુક્ત, વિદ્વાનોમાં પ્રિય, વિવાહ-યાત્રા-જિનમંદિર નિર્માણાદિ મહાફળવાળા સજ્જનો શોભી રહ્યા હતા. ॥ ૧૭ ॥

કાંટા (ખૂંટ)નો સમૂહ, ઝગડો (દંતાળી), સ્ત્રી (ધાન્ય વાવવાનું સાધન) દુર્જનો (ખળા)નો સત્કાર, જ્યાં બહાર થતો હતો, પણ અંદર નહિ. જ્યાં અકાળે દાન થતું, પણ સાચા માણસોનું અકાળ મોત થતું નહિ. (અર્થાત્ નિર્દોષને ફાંસી અપાતી નહિ) અવસરે મેઘ-વૃષ્ટિ થતી, પણ વિવેકીઓની અવસરે પણ કોપ-વૃષ્ટિ થતી નહિ. ॥ ૧૮ ॥ ૧૯ ॥

મગધ દેશમાં રાજગૃહ નગર ખરેખર મહારાજાધિરાજની જેમ શોભી રહ્યું હતું. સોનાનાં પગથિયાં સિંહાસન બન્યાં. મહેલો અને હવેલીઓ પર રહેલા સોનાના કળશોની જ્યોતિ મુગટ બની. ઊછળતા કેતકી ફૂલનાં પરાગ

અને ધૂપના ધુમાડા ગંગા-જમના જેવા કાળા-ધોળા છત્ર બન્યા. ફરકતા ધજાના છેડા ચામર બન્યા. હવે તે મહારાજા કેમ નહિ ? ॥ ૨૦ ॥ ૨૧ ॥ ૨૨ ॥

**મહારાજાશ્રી શ્રેણિક-મહારાણી શ્રી ચેલ્લણા :**

જે રાજગૃહનગરમાં બહાર બગીચા અને અંદર સ્ત્રીઓ શોભતી હતી.

**બગીચા..................................................... સ્ત્રીઓ**

નેતર વૃક્ષની પ્રધાનતાવાળા......................આંખોને મંગળરૂપ

રાયણ જ્યાં પ્રાપ્ત થઈ શકે તેવા.................પ્રિય-આલાપવાળી

નારંગીવાળા ....................................સદા વિલાસવાળી

પાંદડાં અને વેલડીથી શોભાયમાન ...............પત્ર-રચનાથી શોભતી

હરડે-કેળથી મનોહર ............................સુખકારી રંભા અપ્સરા જેવી મનોહર

વાડ સહિત ....................................ઘુંઘટવાળી

પાટલ (કાંકચ) વૃક્ષવાળા.......................લાલ હોઠવાળી

પવિત્ર વસ્તુથી ભોગ યોગ્ય .....................પુણ્યથી ભોગ-યોગ્ય

કરાયેલા સુંદર ઝરણાવાળા ......................સારા કુળમાં પેદા થયેલી

હંસોના વિલાસવાળા ............................હંસ જેવી ગતિવાળી

જે રાજગૃહમાં શ્રીમંતોની હવેલીઓ સજ્જનોના જીવન જેવી શોભતી હતી.

**હવેલી .................................................... સજ્જનોનું જીવન**

વાસ્તુધર્મ-યુક્ત ................................ધર્મ યુક્ત

વિશાળ ........................................ઉદાર

ચોખ્ખી ........................................નિર્મળ

કોટિધ્વજવાળી ................................પરમ કોટિને પ્રાપ્ત કીર્તિ પતાકાવાળું

કીર્તિને ચડવા માટે જેની ગુણશ્રેણી નિસરણી બની છે, જેણે અઢારેય સભાશ્રેણિઓને પ્રસન્ન કરી છે, તે શ્રેણિક રાજા તે નગરનું પાલન કરતો હતો. ॥ ૨૩ ॥ ૨૪ ॥ ૨૫ ॥ ૨૬ ॥

તે શ્રેણિક રાજાના બાહુ પર મેઘ જેવી તલવાર લટકતી હતી.

**તલવાર.................................................... મેઘ**

બાહુ પર ........................................પર્વત પર

